आचार्यशर्ववर्मप्रणीतं

# कातन्त्रव्याकरणम्

## प्रथमो भागः

व्याख्याचतुष्टयोपेतम्

कुलपतेः डॉ० मण्डनमिश्रस्य प्रस्तावनया समलङ्कृतम्

सम्पादकः
डॉ० जानकीप्रसादद्विवेदी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी

SARASVATĪBHAVANA-GRANTHAMĀLĀ
[ Vol. 135 ]

# KĀTANTRAVYĀKARAṆA

OF

## ĀCĀRYA ŚARVAVARMĀ

## [ PART - ONE ]

*With four Commentaries*
'VṚTTI' & 'ṬĪKĀ'
By
ŚRI DURGA SINGH
'KĀTANTRAVṚTTIPAÑJIKĀ'
By
ŚRĪ TRILOCANADĀSA
'KALĀPACANDRA'
By
KAVIRĀJA SUṢEṆAŚARMĀ
'SAMĪKṢĀ'
By Editor

*FOREWORD BY*
**DR. MANDAN MISHRA**
VICE-CHANCELLOR

*EDITED BY*
**DR. JĀNAKĪPRASĀDA DWIVEDĪ**
Reader, Sanskrit Department
Central Institute of Higher Tibetan Studies
(Deemed University)
Sarnath, Varanasi

VARANASI
1997

*Research Publication Supervisor —*
**Director, Research Institute**
Sampurnanand Sanskrit University
Varanasi.

❑

*Published by —*
**Dr. Harish Chandra Mani Tripathi**
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002

❑

*Available at —*
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002

❑

**First Edition,** 500 Copies
**Price :** Rs. 350.00

❑

*Printed by —*
**Anand Printing Press**
C. 27/170-A, Jagatganj,
Varanasi-221 002

सरस्वतीभवन-ग्रन्थमाला

[ १३५ ]

आचार्यशर्ववर्मप्रणीतं

# कातन्त्रव्याकरणम्

[ प्रथमो भागः ]

श्रीदुर्गसिंहकृताभ्यां कातन्त्रवृत्ति-टीकाभ्यां

श्रीमत्त्रिलोचनदासकृतया 'कातन्त्रवृत्तिपञ्जिका'-टीकया

कविराजसुषेणशर्मकृतया 'कलापचन्द्र'-टीकया

सम्पादकीयसमीक्षया

कुलपतेः डॉ०मण्डनमिश्रस्य प्रस्तावनया च समलङ्कृतम्

No-0

सम्पादकः

डॉ०जानकीप्रसादद्विवेदः

उपाचार्यः, संस्कृतविभागे

केन्द्रीय-उच्च-तिब्बतीशिक्षा-संस्थानम्

सारनाथः, वाराणसी

वाराणस्याम्

२०५४ तमे वैक्रमाब्दे १९१९ तमे शकाब्दे १९९७ तमे खैस्ताब्दे

*अनुसन्धानप्रकाशनपर्यवेक्षकः –*
**निदेशकः, अनुसन्धानसंस्थानस्य**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

❑

*प्रकाशकः –*
**डॉ० हरिश्चन्द्रमणित्रिपाठी**
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२.

❑

*प्राप्तिस्थानम् –*
**विक्रय-विभागः,**
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी - २२१ ००२.

❑

**प्रथमं संस्करणम्,** ५०० प्रतिरूपाणि
**मूल्यम्** – ३५० = ०० रूप्यकाणि

❑

*मुद्रकः –*
**आनन्द प्रिंटिंग प्रेस**
सी० २७/१७०-ए, जगतगंज
वाराणसी - २२१ ००२

# प्रस्तावना

शब्दानुशासनात्मकम् अथ च रक्षोहागमलघ्वसन्देहप्रयोजनान्वाख्यानपरं व्याकरणशास्त्रं वाङ्मलानां चिकित्सितं सद् शब्दब्रह्माधिगमायालं भवति। एवं श्रूयते यन्महर्षिपतञ्जलिना यथा चित्तगतदोषापनोदाय पादचतुष्टयात्मकं योगशास्त्रम्, किञ्च कायमलापसारणाय चरकाभिधानं वैद्यकशास्त्रं प्रणीतमासीत्, तथैव तेन वाग्दोषविघाताय पदशास्त्रं महनीयं महाभाष्यमपि विरचितम्। यथोक्तम्—

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**

**योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥**

आर्षे आदिकाव्ये रामायणे ऋष्यमूकपर्वतपरिसरे लक्ष्मणेन सह भिक्षुवेषधारिणो हनूमतो विशदा काचिद् वार्ता समजनि, यामाकर्ण्य श्रीरामस्तदीयां वाचं बहुधा प्रशंसते। वाचःप्राशस्त्ये कारणं यत्र ऋग्यजुःसामवेदाद्यध्ययनानुशीलनं समुद्भावितं तत्र बहुविधव्याकरणश्रवणमपि अपशब्दप्रयोगविरहे कारणत्वेनाभिमतम्—

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥**

(वा० रा० ४।३।२९) इति।

एतेनैषा बुद्धिरास्थेया भवति यन्मितसारवचोरूपवाग्मित्वाधिगमाय व्याकरणमवश्यमध्येतव्यम्। तच्च व्याकरणमष्टधा नवधा च पूर्वकालेऽपि प्रसिद्धमासीत्। साम्प्रतमुपलब्धेषु पाणिनीय-कातन्त्र-चान्द्र-जैनेन्द्र-सारस्वत-सरस्वतीकण्ठाभरण-हैमादि-बहुव्याकरणेषु परम्पराद्वयं स्पष्टमवभासते— माहेशी माहेन्द्री च। तत्र माहेशीं परम्परामनुसरन्ति पाणिनीयचान्द्रसरस्वतीकण्ठाभरणादीनि व्याकरणानि, परमिदानीं

माहेन्द्रपरम्परायाः प्रातिनिध्यमाचरति केवलं कातन्त्रम्। माहेशी परम्परा प्रत्याहार-प्रधाना शब्दलाघवाख्यानपरा च प्रतिभासते। माहेन्द्री परम्परा च लोकव्यवहारप्रधाना सती अर्थलाघवमाविष्कुरुते। एवं पाणिनीयव्याकरणप्रक्रिया पर्याप्तं विस्तृता दुरूहा च वर्तते। कातन्त्रव्याकरणप्रक्रिया सारल्यं संक्षेपं च वितनुते।

यथाद्यत्वे पाणिनीयव्याकरणमध्ययनादावधिक्रियते न तथा कातन्त्रम्। परं कदाचिद् भारतदेशस्य सीमान्तप्रदेशेषु श्रीलङ्का-तिब्बत-भूटान-नेपालादिदेशेषु चास्याध्ययनं प्रचलितमासीदित्यैतिह्यग्रन्थानुशीलनेनावगन्तुं शक्यते। नागर-वङ्ग-भोट-उत्कल-शारदाद्यक्षरमयं विपुलग्रन्थराशिसमधिष्ठितमस्य समृद्धं वाङ्मयमधिगम्य कस्य सचेतसश्चेतो महतीं मुदं नाप्नुयात्। परं हन्त, नाद्यावधि शर्ववर्म-वररुचिप्रणीतस्य चतुर्दशशतसूत्रात्मकस्यास्य कातन्त्रस्य प्राचीनं वृत्तिटीकादिवाङ्मयं यथोचितं मुद्रितमभूत्। वङ्गाक्षरेषु मुद्रितं वाङ्मयं यदिदानीं कथञ्चिदुपलभ्यते तदत्यन्तम-व्यवस्थितं जीर्णं च दृश्यते।

वृत्तिटीकाद्यभावे व्याकरणसूत्रार्थाद्यवगमो नैव कथमपि कर्तुं शक्यत इति विदन्ति धीमन्तः। **डॉ०जानकीप्रसादद्विवेदाः** पूर्वमस्मिन्नेव विश्वविद्यालये कातन्त्र-व्याकरणमधिकृत्य गवेषणापरायणाः सन्तः **'वाचस्पति'** (डी० लिट्०) – शोधोपाधिना सभाजिताः। तदनन्तरमपि यद् विशिष्टं कार्यं तैरत्र कृतं तत् तिब्बतीसंस्थानेन प्रकाशितम्। श्रीद्विवेदिनः कार्येऽस्मिन्निष्ठातिशयं श्रमं विशिष्टाध्ययनं चाकलयन् विश्वविद्यालय एतदीयसम्पादन-प्रकाशनयोजनामङ्गीचकार। तत्र सन्धिप्रकरणात्मके प्रथमे खण्डेऽस्मिन् न केवलं व्याख्याचतुष्टयस्य प्रशस्तं सम्पादनमेव जिज्ञासुजना-नामनुसन्धातृविदुषां चातितरामुपकारकमस्ति, किञ्च पाणिनीयादिप्राचीनार्वाचीन-व्याकरणैः सह तुलनात्मकमध्ययनमपि विशेषेण मननीयमाभाति। नामचतुष्टय-आख्यात-कृत्प्रकरणान्यपि व्याकरणस्यास्य प्रकाशनाधीनानि सन्ति। प्रकीर्ण-दुरूह-महनीयकार्यस्यास्य सम्पादनाय श्रीद्विवेदिमहोदया अभिनन्दनैः संयोज्यन्ते। आशास्यते च यद् अधिगतयाथातथ्या गुणैकपक्षपातिनो विद्वांसः कार्यादस्मादवश्यं मुदिताः सन्तो लाभान्विताः स्युरिति।

प्रौढपाण्डित्यस्य समीक्षाशक्तेश्च समन्वयो बहुधा अङ्गुलिगणनीयेष्वाचार्येषु समुपलभ्यते। तस्य सङ्गमस्य प्रतीकभूता आचार्याः श्रीद्विवेदिनो वाराणस्याः सम्मानिता विद्वांसः। पूर्वमयं विश्वविद्यालयः, तदनन्तरं च केन्द्रीयोच्चतिब्बतीशिक्षासंस्थाननामा मानितविश्वविद्यालय एतैः स्वकीयया विद्यासाधनया समलङ्क्रियत इति हर्षप्रकर्षस्य विषयः। सेयमेतेषां विशिष्टा साधनाऽनवरतं प्रवहति, यस्याश्चेदं केवलं प्रथमं पुटम्। द्वित्रा भागाः सम्प्रति अवशिष्टा वर्तन्ते। एतेनैतेषां योगदानस्य माहात्म्यं स्पष्टमनुमातुं शक्यते। अहं तेषामस्यै साधनायै विश्वविद्यालयस्य सम्मानं समर्पयन् प्रकाशनाधिकारिणं **डॉ०हरिश्चन्द्रमणित्रिपाठिनं** मुद्रकम् 'आनन्द-प्रिंटिंग-प्रेस'-यन्त्रालयस्य सञ्चालकं **श्रीदिवाकरत्रिपाठिनं** च धन्यवादैः सम्भावयन् ग्रन्थमिमं पाठकेभ्यः समर्पयामि।

**वाराणस्याम्**
मार्गशीर्षपूर्णिमायाम्,
वि०सं० २०५४

**मण्डनमिश्रः**
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

# भूमिका

कलापं कातन्त्रं यदिह विदितं दुर्गविततम्,
क्वचिद् यत् कौमारं प्रथितमिदमास्ते बहुफलम्।
मयाध्यायः सन्धेर्निखिल इह तस्यैव पठितः,
सतां यत्नाद् भूयात् सततमुपकाराय महते॥

**शर्ववर्मादिभिः प्रोक्तं कातन्त्रं सन्धिसंज्ञकम्।**
**यत् पूर्वं तन्मया सर्वं रक्षितं शब्दगौरवात्॥**

वेदार्थज्ञानाय प्रातिशाख्य-निरुक्तव्याकरणरूपा महती शब्दानुशासनपरम्परा प्रवर्तते प्राचीनकालादेव। प्रातिशाख्यं निरुक्तं च वैदिकशब्दानुशासनमंशत आख्याति। परं व्याकरणरूपं शब्दानुशासनं वैदिकं लौकिकं चोभयविधमंशं व्याप्नोति। व्याकरणस्यापि परम्पराद्वयी दृश्यते – माहेशी माहेन्द्री च। साम्प्रतं माहेशीं परम्पराम् अनुसरन्ति पाणिनीयचान्द्रप्रभृतीनि बहूनि व्याकरणानि, परं माहेन्द्रीं परम्परामाश्रयते केवलं कातन्त्रमेव। माहेशी परम्परा प्रत्याहाररूपा, कृत्रिमा, संक्षिप्ता चेति। माहेन्द्री परम्परा च लोकव्यवहारानुगता, प्रत्याहारहीना, विस्तृता चेति।

## कातन्त्रव्याकरणस्योपयोगिता

पाणिनीयपरवर्तिषु प्रायेण चत्वारिंशत्संख्याकेषु व्याकरणेषु कातन्त्रं प्रथमं संक्षिप्तं सरलं मूर्धन्यं च वर्तते। राज्ञः सातवाहनस्य शब्दविद्याधिगमाय शर्ववर्माचार्येणेदमध्यायत्रितये निबद्धमासीत्। एकदा जलक्रीडया श्रान्तिमनुभवन्ती विदुषी राज्ञी 'मोदकं देहि' इति वचनं जगाद, तदनन्तरं मोदकसमर्पणकृत्यमवलोक्य राज्ञी व्याकरणज्ञानशून्यं राजानमुपहसितवती। तेन नितान्तं विमना राजा व्याकरणज्ञानम् आसादयितुं प्रतिजज्ञे। तदीयां प्रतिज्ञां पूरयितुमेवाचार्यः शर्ववर्मा कुमारं कार्त्तिकेयमाराध्य व्याकरणमिदं निबबन्ध। 'मोदकम्' इति पदे 'मा + उदकम्' इति सन्धिर्वर्तते, तस्मात् सर्वप्रथमं पञ्चपादात्मकं सन्धिप्रकरणमेकोनाशीतिसूत्रबद्धं (७९) प्रस्तुतम्। 'मोदकम्' इति स्यादिपदम्। तस्माद् द्वितीयं प्रकरणं वर्तते

नामचतुष्टयम्, इदं षट्सु पादेषु निबद्धं षड्लिङ्ग-कारक – समास-तद्धितात्मकं सप्तत्रिंशदुत्तरशतत्रयसूत्रात्मकम् (३३७) अस्ति। 'देहि' इति आख्यातपदम्, तेन तृतीयं प्रकरणम् आख्यातविषयस्य वर्ततेऽष्टपादात्मकमेकोनचत्वारिंशदुत्तरशतचतुष्टयसूत्रात्मकं (४३९) चेति। शर्ववर्माचार्येण विरचितान्येतावन्त्येव पञ्चपञ्चाशदुत्तराष्टशतमितानि सूत्राणि (८५५)। षट्पादेषु विभक्तं कृत्प्रकरणं षट्चत्वारिंशदधिकपञ्चशतसूत्रात्मकं (५४६) विरचितमाचार्येण वररुचिना। श्रीपतिदत्तविरचितं कातन्त्रपरिशिष्टम्, चन्द्रकान्ततर्कालङ्कारेण लिखितानि कातन्त्रच्छन्दःसूत्राणि च व्याकरणस्यास्य समृद्धिं कुर्वन्ति।

अस्य वृत्ति-टीका-न्यासादिरूपा व्याख्यानग्रन्था बहवो विलसन्ति, येषां परिचयः प्रास्ताविकांशादवगन्तव्यः। परं दुर्गसिंहीयव्याख्यानमन्तरा कातन्त्रं कथमपि ज्ञातुं नैव शक्यते। तदीयं च व्याख्यानं वर्तते 'वृत्ति-टीका'-द्वयरूपम्। त्रिलोचनदासकृता विवरणपञ्जिका, सुषेणविद्याभूषणकृतः कलापचन्द्रश्च प्रस्तुतान् दोषानाक्षेपान् वा समादधाति, किं च विस्तरेण विषयं प्रकाश्य मन्दधियामपि हिताय प्रभवति। प्रायेण व्याख्याचतुष्टयमेतत् कातन्त्रीयसन्धिप्रकरणसूत्रेषु सर्वेष्वेवोपलभ्यते। अत्र बहूनामाचार्याणां ग्रन्थानां च मतमुद्धृतं दृश्यते। अपि च 'वयम् – वस्तुतः – परमार्थतः- अयमभिप्रायः' इत्यादिभिर्बहुभिः प्रतीकवचनैः स्वकीया विचारा अपि प्रकाशिताः सन्ति। तस्मादेता एव चतस्रो व्याख्या अत्र प्रस्तुताः।

### स्वकीयकातन्त्रव्याकरणाध्ययनान्वेषणपरिचयः

कातन्त्रव्याकरणमधिकृत्य शोधकार्यं मयाऽष्टषष्ट्यधिकैकोनविंशतिशततमे यीशवीयाब्दे प्रारब्धमासीत्। शारदा-उत्कल-वङ्गाक्षरमयांस्तदीयान् हस्तलेखानध्येतुमहं विविधशिक्षासंस्थानेषु गतवान्। प्रायेण शतत्रयसंख्याका हस्तलेखा मया वर्षत्रितयेऽधीताः। एवं कातन्त्रव्याकरणविमर्शनामकं शोधप्रबन्धमधिकृत्य वाराणसेयसंस्कृतविश्वविद्यालयेन 'वाचस्पति' (डी० लिट्०) शोधोपाधिर्मह्यं प्रदत्तो द्विसप्तत्युत्तरैकोनविंशतिशतमितयीशवीयाब्दस्य मार्चमासे। विश्वविद्यालयेन प्रकाशितः उत्तरप्रदेशसंस्कृत-अकादमीसंस्थया स प्रबन्धो विशेषपुरस्कारेण पुरस्कृतोऽपि वर्तते। शोधप्रबन्धोऽयं सप्ताध्यायेषु विभक्तः कातन्त्रीयविषयविवेचनात्मकः पाणिनीयव्याकरणविषयेण सह तुलनात्मकश्चास्ते।

केन्द्रीय-उच्चतिब्बतीशिक्षासंस्थानात् 'कलापव्याकरणम्' -शीर्षको मदीय एको ग्रन्थः प्रकाशितः अष्टाशीत्युत्तरैकोनविंशतिशततमयीशवीयाब्दे। ग्रन्थेऽस्मिन् सप्तविंशतिर्मूलसूत्रपाठाः सम्मिलिताः सन्ति। अन्येऽपि केचन शिष्यहितान्यास – कातन्त्ररूपमाला-कातन्त्रोणादिसूत्रादयो ग्रन्थाः प्रकाशिता विविधस्थानेभ्यो विद्वद्भिः। परं कातन्त्रीयस्य कस्याप्येकस्य सूत्रस्यार्थोदाहरणप्रत्युदाहरणाक्षेपसमाधाननिर्वचनादि-साधनाय नैवाद्यावधि क्वचित् प्रयत्नः संजातः। तस्यैव कार्यस्य पूर्तये एका शोध-योजना मया सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनविभागे प्रस्तुता आसीत्। विषयस्य गौरवं मन्यमाना प्रकाशनसमितिर्मदीयं प्रस्तावमङ्गीकृत्य ग्रन्थमिमं चतुर्षु खण्डेषु प्रकाशयितुं निर्णीतवती। एतस्य निर्णयस्य फलस्वरूपमेव सन्धिप्रकरणात्मकं प्रथमं खण्डमिदं मुद्रितं दृश्यते।

## ग्रन्थगतविषयादियोजना

अत्र प्रतिसूत्रानन्तरं हिन्दीभाषायां सूत्रार्थः, दुर्गवृत्तिः, दुर्गटीका, विवरण-पञ्जिका, कलापचन्द्रश्च प्रस्तुतः। व्याख्याचतुष्टयान्ते हिन्दीभाषायां समीक्षा कृताऽस्ति, यत्र चतसृषु व्याख्यासु विचारितानां विविधमतानां विशिष्टा अंशा दर्शिताः। पाणिनीयकातन्त्रयोः सूत्ररचनादिविषयक उत्कर्षोऽपकर्षश्च विवेचितः। सूत्रप्रक्रियाप्रदर्शनपुरस्सरमुदाहृतशब्दानां संक्षेपेण रूपसिद्धिरपि कृता।

सन्धिप्रकरणस्यैकोनाशीतिसंख्याकानां सूत्राणां व्याख्याचतुष्टये षण्णवत्यधिकैक-शतमितोदाहृतशब्दानां रूपसिद्धिर्दर्शिता। उदाहृतशब्दानां सूची द्वितीये परिशिष्टे निबद्धा। व्याख्यासु स्मृतानां प्रायेण सार्धशतश्लोकानां सूची तृतीये परिशिष्टे द्रष्टव्या। व्याख्याकारैः प्रसङ्गतः प्रायेण शतद्वयमिताः शब्दा व्युत्पादितास्तेषां संग्रहोऽत्र चतुर्थे परिशिष्टे कृतः। शैली-प्रक्रिया-योजनादिप्रतीकाः प्रायेण शतत्रयमिता विशिष्टाः शब्दा व्याख्यासूपलभ्यन्ते, ते पञ्चमे परिशिष्टे संगृहीताः। व्याख्याकारैस्तदीयमत-प्रदर्शनाय प्रसङ्गतः प्रायेण शतत्रयमितानि ग्रन्थनामानि स्मृतानि, तानि षष्ठे परिशिष्टे संकलितानि। एवमेव 'अन्ये-अपरे-अमरसिंह-उमापति - केचित् - महाभाष्यकार'-प्रभृतिभिः शब्दैराचार्या अपि स्मृताः, तेऽपि शोधकार्यस्य सौविध्याय सप्तमे परिशिष्टे संकलिताः। सन्धिप्रकरणमाश्रित्य वर्तमानानां मयाऽधीतानां च हस्त-लेखानां मुद्रितग्रन्थानां सम्पादनकार्ये सहायकानां च ग्रन्थानां सूची अष्टमे परिशिष्टे संलग्ना।

## कातन्त्रस्य कानिचिद् वैशिष्ट्यानि

कातन्त्रव्याकरणस्य सन्धिप्रकरणगतसूत्राणां पाणिनीयव्याकरणापेक्षया किं कियत् कीदृशं च वैशिष्ट्यं जागर्ति इत्येतस्य निदर्शनाय कातन्त्रसूत्ररचना-प्रक्रिया-शैलीगतो विषयः कश्चित् संक्षेपेण विमृश्यते –

### १. ग्रन्थाभिधानकृतं वैशिष्ट्यम्

**१. कातन्त्रम्**

कु = ईषद् अल्पं संक्षिप्तं वा, तन्त्रम् = व्याकरणं कातन्त्रम् । ईषदर्थककुशब्दस्य 'का' आदेशः – "का त्वीषदर्थेऽक्षे" (कात० २।५।२५) । तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेनेति तन्त्रम् = व्याकरणम् । एवं कातन्त्रमिति संक्षिप्तव्याकरणाभिधानम् । संक्षेपश्च पाणिनीयव्याकरणापेक्षया पूर्ववर्तिसमस्तव्याकरणापेक्षया वाऽवगन्तव्यः । कार्त्तिकेय-तन्त्रस्य, काशकृत्स्नतन्त्रस्य, कात्यायनतन्त्रस्य, कालापकतन्त्रस्य वा संक्षिप्तं नामधेयं कातन्त्रमित्यपि केचिद् वदन्ति ।

**२. कलापं कालापं कलापकं वा**

कलाम् = व्याकरणांशम्, संक्षेपम्, अल्पशब्दान् वा पिबति आप्नोति व्याप्नोति अधिकरोति वा कलापम् । तदेव कालापम् । संज्ञायां कनि प्रत्यये सति कलापकम् । बृहत्तन्त्रात् कला आपिबतीति कलापकमिति हेमचन्द्रः । संग्रहार्थकोऽपि कलापशब्दः । तेन बहूनां व्याकरणानां सारसंग्रहात्मकमिदं कलापव्याकरणमाभाति ।कलापो मयूरपिच्छम्, तत्रैव प्रथमसूत्रस्य लिखितत्वाद् इदं कलापनाम्ना प्रथितं बभूवेत्यपि मन्यते –

**शङ्करस्य मुखाद् वाणीं श्रुत्वा चैव षडाननः।**
**लिलेख शिखिनः पुच्छे (पिच्छे) कलापमिति कथ्यते ॥**

कुमारकात्तिकियेन कलापस्य मयूरपिच्छस्य मध्याद् उपदिष्टत्वाद् इदं कलापम् । कलापी मयूरः कार्त्तिकेयवाहनः, स व्याकरणस्यास्य सम्प्रदाने साहाय्यमारचयामासेति कलापमस्य नाम बभूव ।

**३. कौमारम्**

कुमार्या सरस्वत्या प्रवर्तित्वात् 'कौमारम्' इति नाम –

**ब्राह्म्या कुमार्या प्रथमं सरस्वत्याप्यधिष्ठितम् ।**
**अर्हम्पदं संस्मरन्त्या तत्कौमारमधीयते ॥**

कुमारेण कार्त्तिकेयेन प्रवर्तितत्वात् कुमाराणां राजकुमाराणां वा कृतेऽत्यन्तं हितसाधकत्वादुपकारकत्वाद् वाऽस्य कौमारमिति सार्थकं नाम।

**४. शार्ववर्मिकम्**

कार्त्तिकेयमाराध्य आचार्यशर्ववर्मणा प्रोक्तमिदं व्याकरणम्, तस्मादस्य शार्ववर्मिकमिति नामधेयमस्ति।

**५. दौर्गसिंहम्, दुर्गसिंहीयं वा**

दुर्गसिंहेन व्याकरणस्यास्य परिष्कारः कृतः, वृत्ति-टीका– उणादिवृत्ति-लिङ्गानुशासन– परिभाषावृत्त्यादिभिर्वा इदं परिबृंहितम्। तेनास्य दौर्गसिंहं दुर्गसिंहीयं च नाम जातम्।

## २. रचनाप्रयोजनस्य वैशिष्ट्यम्

आन्ध्रदेशीयो राजा सातवाहनः कदाचिज्जलक्रीडासक्तो बभूव स्वमहिषीभिः समम्, तत्र जलक्रीडया श्रान्ता विदुषी राज्ञी राजानमाह– 'मोदकं देहि देव' इति। राजा प्रेम्णा जले तस्यै बहून् मोदकान् व्यतरत्। तदा तस्य व्याकरणानभिज्ञतां विज्ञाय राज्ञी राजानमुपजहास। तेन लज्जितो राजा व्याकरणज्ञानाधिगमार्थं संकल्पयामास। तदीयं संकल्पं विज्ञाय आचार्यः शर्ववर्मा षण्मासावधिके काले व्याकरणम् उपदेष्टुं प्रतिज्ञातवान्, ततश्च तपसा कार्त्तिकेयं तोषयित्वा तत्सकाशात् "सिद्धो वर्णसमाम्नायः" इति सूत्रोपदेशं संप्राप्य व्याकरणमिदं प्रणिनाय।

आचार्यशशिदेवविरचित– व्याख्यानप्रक्रियानुसारं वैदिकानाम्, धनिनाम्, यूनाम्, वणिजाम्, लोकयात्रादिकार्येषु व्यासक्तमानसानामपि मनुजानां क्षिप्रं शब्दसाधुत्व-प्रक्रियापरिज्ञानाय कलापस्य रचना संजाता। उक्तमपि –

**छान्दसाः स्वल्पमतयः शास्त्रान्तररताश्च ये।**
**ईश्वरा वाच्यनिरतास्तथालस्ययुताश्च ये॥**
**वणिजस्तृष्णादिसंसक्ता लोकयात्रादिषु स्थिताः।**
**तेषां क्षिप्रं प्रबोधार्थमनेकार्थं कलापकम्॥**

## ३. वेदाङ्गत्वाङ्गीकारवैशिष्ट्यम्

बहवो वैयाकरणकल्पा एवं वदन्ति यद् यस्मिन् व्याकरणे वैदिकशब्दसाधुत्वं नैव दर्शितम्, तन्नास्ति वेदाङ्गम् । किं च वेदाङ्गत्वाभावात् तस्य पुण्यजनकत्वेऽपि संदेहः कश्चिद् वर्तते इत्यादि । अत्र कातन्त्रव्याख्याकाराणामभिमतमिदमवधेयमस्ति – वेदेऽपि लौकिका एव शब्दा बाहुल्येन प्रयुक्ताः सन्ति, 'देवासः–जभार' प्रभृतयोऽल्पीयांस एव वैदिकाः । एवं वेदेऽपि प्रयुक्तानां बहूनां लौकिकशब्दानामेव यस्मिन् साधुत्वान्वाख्यानं वर्तते तदपि वेदाङ्गमेव, नास्ति तस्य वेदाङ्गत्वाभावः । एतेन लौकिकशब्दसाधनपरस्य कातन्त्रव्याकरणस्यान्येषां चापि तथाविधानां व्याकरणानां वेदाङ्गत्वमेव सम्पद्यते ।

अथ च वैदिकसम्प्रदायस्य वैदिकपरम्पराया वाऽविच्छिन्नत्वादल्पीयसां वेदे एव प्रयुक्तानां शब्दानां साधुत्वावबोधाय शास्त्रं नास्त्यावश्यकम् । लौकिकशब्दानां चानन्तत्वात् तेषां साधुत्वबोधो लक्षणमन्तरा न संभाव्यते ।

कातन्त्रे वैदिकशब्दाः कथन्न व्याख्यातास्तेन तेषां साधुत्वं कथमवगन्तव्यमिति समाधानाय कातन्त्रीयं सूत्रमस्ति – "लोकोपचाराद् ग्रहणसिद्धिः" (१।१।२३) इति । गृह्यन्तेऽर्था अनेनेति ग्रहणं शब्दः । दुर्गसिंहोऽपि वृत्तिकार एवं व्याचष्टे –

**वैदिका लौकिकाश्चैव ये यथोक्तास्तथैव ते ।**

**निर्णीतार्थास्तु विज्ञेया लोकात् तेषामसंग्रहः ॥** इत्यादि ।

## ४. सूत्रशैलीगतं वैशिष्ट्यम्

पूर्वाचार्याः कार्यिणं प्रथमान्तम्, कार्यं च द्वितीयान्तमेव निर्दिष्टवन्तः । इमामेव पद्धतिं कातन्त्रकारोऽप्यनुससार । अत एव "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) इति सूत्रे कार्यिणः समानस्य प्रथमया निर्देशः, लोपमिति कार्यस्य च द्वितीयया निर्देशस्तेन कृतः । एवमेव "अकारो दीर्घं घोषवति" (२।१।१४) इत्यादिसूत्रेष्वपि पद्धतिरियं दृश्यते । अत्र पाणिनीयः पन्था भिन्न एव ।

सारल्येन विवक्षितार्थावबोधाय "अवर्ण इवर्णे ए, उवर्णे ओ, ऋवर्णे अर्, लृवर्णे अल्" (१।२।२-५) इति सूत्रचतुष्टयं कृतम्, यदर्थं पाणिनीयं केवलमेकमेव सूत्रमुपलभ्यते – "आद् गुणः" (६।१।८७) इति । एवम् "एचोऽयवायावः" (६।१।७८) इति पाणिनीयाभिप्रेतार्थे "ए अय्, ऐ आय्, ओ अव्, औ आव्" (१।२।१२-१५) इत्येतानि चत्वारि सूत्राणि पृथक्त्वेन कृतानि ।

व्याकरणेऽस्मिन् प्रत्याहाराभावादचो बोधाय "स्वरेऽक्षरविपर्ययः"(२।५।२३) इत्यादौ स्वरपदम्, हलश्च बोधाय "व्यञ्जने चैषां निः" (२।२।३८) इत्यादौ व्यञ्जनपदं च प्रयुक्तम्।

पाणिनीयवैदिकप्रकरणे स्वरार्थं येऽनुबन्धा विहितास्ते कातन्त्रे नैव प्रयुज्यन्ते, अत्र वैदिकप्रकरणाभावात्।

## ५. अर्थलाघवप्रयुक्तं वैशिष्ट्यम्

लाघवं द्विविधं भवति – शब्दकृतमर्थकृतं चेति। शब्दकृतलाघवेऽर्थबोधो झटिति विलम्बेन वा भवेदिति न चिन्त्यते, किं च शब्दानामल्पप्रयोग एव। अल्पशब्दानां प्रयोगेण प्रायोऽर्थबोधे सौकर्यं लाघवं वा न भवति। अर्थलाघवे तु अर्थबोधो झटिति भवेदिति चिन्त्यते। अत एव कातन्त्रे स्वर-व्यञ्जन-अद्यतनी-श्वस्तनी-भविष्यन्ती-क्रियातिपत्तिप्रभृतयो महत्यः किं चान्वर्थाः संज्ञाः प्रणीताः सन्ति। अतस्तेषां संज्ञाशब्दानामर्थावबोधे महल्लाघवमापद्यते। पाणिनीये शब्दलाघवं प्रत्याहारप्रयोगे विशेषतो दृश्यते।

## ६. विपुलवाङ्मयकृतं वैशिष्ट्यम्

व्याकरणस्यास्य शारदा-वङ्ग-उत्कल-ग्रन्थ-देवनागराद्यक्षरैर्निबद्धं विपुलं वाङ्मयं समुपलभ्यते। वङ्गाक्षरेषु नागराक्षरेषु च केचिद् मुद्रिता अपि ग्रन्थाः सन्ति, परं धातु-गण-उणादि-लिङ्गानुशासन-परिशिष्ट-परिभाषा-शिक्षादिसूत्राणि प्रायेण विविधलिपिमयेषु हस्तलेखेष्वेव विकीर्णानीति तानि महता आयासेनैव लब्धुं शक्यन्ते। काश्मीरका राजस्थानीयाश्चानेके कातन्त्रस्य व्याख्यानग्रन्था बालबोधिन्यादयः शारदाक्षरेषु नागराक्षरेषु च निबद्धा बालानामेव कृते प्रायेणोपयोगिनः सन्ति, तदुद्देश्येनैवाचार्यैस्तत्तद्ग्रन्थानां प्रणीतत्वात्। शेषांशपूरणाय कातन्त्रपरिशिष्ट-कातन्त्रोत्तरादयो ग्रन्थाः पश्चादाचार्यैर्विरचिताः। कातन्त्रमन्त्रप्रकाश-कातन्त्र-विभ्रमादयः केचिद् ग्रन्था अवश्यं मननीयं वैशिष्ट्यमापादयन्ति।

## ७. व्यापकप्रचारकृतं वैशिष्ट्यम्

व्याकरणस्यास्य प्रचारः सीमान्तप्रदेशेषु प्रामुख्येण समभूत्। अङ्ग – वङ्ग - कलिङ्ग - कश्मीर - राजस्थानादिप्रदेशाः प्रयोगभूमिरस्य। भारताद् बहिः 'श्रीलङ्का - तिब्बत - भूटान' - प्रभृतिविदेशेष्वपि व्याकरणस्यास्य प्रचारो बभूवेति

बहुभिरितिवृत्तवचनैर्विज्ञायते। तिब्बतदेशे तु एतदीयद्वादशग्रन्थानां भोटभाषायामनुवादः, त्रयोविंशतिटीकानां भोटभाषायां प्रणयनं च संजातम्। एतद् वाङ्मयमद्यापि उपलभ्यते।

## ८. लोकव्यवहारसमादरकृतं वैशिष्ट्यम्

कातन्त्रे लोकव्यवहारः पाणिनीयादप्याधिक्येन समाद्रियते। तद् यथा – "सिद्धो वर्णसमाम्नायः" (१।१।१) इति सूत्रेण वर्णानां पाठक्रमो लोकप्रसिद्ध एव गृह्यते। अत एवात्र चतुर्दशस्वरेषु दीर्घस्वरा अपि पठ्यन्ते। पाणिनीये दीर्घवर्णा नैव सन्ति। कातन्त्रे 'ए-ऐ-ओ-औ' इति लोकव्यवहृतः पाठः। पाणिनीये तु कृत्रिमता दृश्यते 'ए-ओ-ऐ-औ' इति पाठे।

कातन्त्रे स्वरवर्णानन्तरमनुस्वार - विसर्ग - जिह्वामूलीय - उपध्मानीया अपि पठिताः, अत एव ते योगवाहा भवन्ति, पाणिनीये पाठाभावादेषामयोगवाहत्वम्। किं च पाणिनीये वर्णसमाम्नाये 'श्-ष्-स्-ह्' इत्येतान् हल्वर्णान् विहायान्ये सर्व एव हल्वर्णा व्यत्यासेनैव पठ्यन्ते, तत्रापि च हकारस्य द्विः पाठो व्याख्यानगम्यः।

लोकव्यवहारसाधकमपरमप्येकं सूत्रं वर्तते– "लोकोपचाराद् ग्रहणसिद्धिः" (१।१।२३) इति। उपचारो व्यवहारः। गृह्यतेऽर्थोऽनेनेति ग्रहणः शब्दः। एतेन लोकव्यवहारात् शब्दसिद्धिर्वेदितव्या इत्यर्थः। केषां शब्दानाम् ? अत्रात्यन्तमनुक्तानां वैदिकानां केषांचिल्लौकिकानां चापि। कलापचन्द्रकारेण कविराजसुषेणविद्याभूषणेनेदमप्युक्तं यद् ये शब्दाः 'वा-अपि' इत्यादिशब्दानां सूत्राणां चाप्यनुवृत्त्या न सिध्यन्ति ते लोकव्यवहारप्रसिद्ध्या साधनीयाः –

> **वाशब्दैश्चापिशब्दैर्वा शब्दानां (सूत्राणाम्) चालनैस्तथा।**
> **एभिर्येऽत्र न सिध्यन्ति ते साध्या लोकसम्मताः॥** इति।

## सम्पादितस्य व्याख्याचतुष्टयस्य परिचयः

### १. कातन्त्रदुर्गवृत्तिः [सं० ६००-६८०]

शर्ववर्मोपज्ञः, वररुचिकात्यायनप्रणीतो 'दुर्घट' - वृत्तिग्रन्थश्च सम्प्रति नोपलभ्यते, हरिरामादिकृता व्याख्यासारादयश्चांशत एवोपलभ्यन्ते। भावसेनादिप्रणीताः कातन्त्ररूपमालादयो वर्गविशेषव्याख्यानप्रधाना एव परिलक्ष्यन्ते। 'शिष्यहिता-बालबोधिनी'

प्रभृतयश्चाभिधानानुसारिणीमेवोपयोगितामावहन्ति। एवमनुशीलनेनेदमेवाभाति यत् साम्प्रतम् उपलब्धेषु पूर्णवृत्तिग्रन्थेषु दुर्गसिंहविरचिता वृत्तिः प्राचीनतमा प्रौढा च वर्तते। कातन्त्रसम्प्रदायेऽस्यास्तदेव स्थानं वर्तते यत् पाणिनीये महाभाष्यस्य।

कातन्त्रीयेषु चतुर्दशशतसूत्रेषु वृत्तेरस्या रचनाकारस्य दुर्गसिंहस्य समयो मन्यते वि० सं० ६००-६८० इति, देशो नास्ति निश्चितः।उज्जयिनी कम्पिलानदीसम्बद्धप्रदेशो वा समुद्भावयितुं शक्यते।दुर्गे कातन्त्रव्याकरणात्मके सिंहवदाचरणशीलत्वाद् 'दुर्गसिंह' इति नाम जातम्। कातन्त्रवृत्तिकारस्य, अमरसिंहस्य, निरुक्तभाष्यकारस्य चाभेदमपि केचिदामनन्ति। ग्रन्थादौ स एवं प्रतिजानीते –

**देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम्।**
**कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं शार्ववर्मिकम्॥**

कस्मिंश्चिद् हस्तलेखे श्लोकान्तरमप्युपलभ्यते –

**ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः।**
**कामदं मोक्षदं देवमोङ्काराय नमो नमः॥** इति।

अत्र ओङ्काररूपो देवविशेषो नमस्कृतः। दुर्गवृत्तेर्नामान्तरं 'सिद्धान्तकौमुदी' इत्युपलभ्यते। दुर्गसिंहेन स्वकीयवृत्तौ पूर्वाचार्याणां ग्रन्थानां चापि बहूनि मतानि व्याख्यातानि, क्वचिदाक्षेपसमाधानमपि कृतम्। अपेक्षितांशानां पूर्तिरपि कृता व्याख्यानप्रदर्शनपुरस्सरम्। एवं पदच्छेदादिपञ्चलक्षणोपेता, उपोद्घात-पद-पदार्थ-पदविग्रह-चालना-प्रत्यवस्थारूपषड्लक्षणोपेता, उद्देश-लक्षण-विभाग-परीक्षेति लक्षण-चतुष्टयोपेता वा या वृत्तिर्मन्यते, तादृशी दुर्गवृत्तिर्नूनं साधयितुं शक्यते। सारसम्भृतां वृत्तिमिमां कुलचन्द्र-वर्धमानप्रभृतयस्त्रयोदश आचार्या दुर्गवाक्यप्रबोध-कातन्त्र-विस्तरादिग्रन्थरचनया व्याख्यातवन्तः। अस्मादपि हेतोर्वृत्तिरियं विजयतेऽधुना कातन्त्रव्याकरणवाङ्मये।

### २. कातन्त्रदुर्गवृत्तिटीका [सं० ६००-६८०]

इयमपि कृतिर्वर्तते दुर्गसिंहस्य। पाणिनीये काशिकावत् टीकेयं राजते कातन्त्रे। ग्रन्थारम्भे वृत्तिकारदुर्गसिंहो भगवत्पदेनाभिहितः - **'इति भगवान् वृत्तिकारः श्लोकमेकं चकार – देवदेवम्' इत्यादि**। तेन वृत्तिकार-टीकाकारयोर्भेद आभाति, परं 'देवदेवम्' इत्यादिश्लोकस्य वररुचिकर्तृकत्वाद् भगवद्विशेषणेनात्र टीकाकारो वररुचिं स्मरतीति

तयोरैक्यमपि कल्पयितुं शक्यते ।युधिष्ठिरमीमांसक – गुरुपदहालदाराभ्यामत्र विविधानि मतानि प्रस्तुतानि । प्रतिज्ञावचनानुसारं टीकाकारो बौद्धः परिलक्ष्यते –

**भग्नं मारबलं येन निर्जितं भवपञ्जरम् ।**
**निर्वाणपदमारूढं तं बुद्धं प्रणमाम्यहम् ॥**
**शिवमेकमजं बुद्धमर्हदग्र्यं स्वयम्भुवम् ।**
**कातन्त्रवृत्तिटीकेयं नत्वा दुर्गेण रच्यते ॥**

टीकायामस्यां वृत्तेर्गूढाः प्रौढाश्चांशा विस्तरेण स्पष्टं व्याख्याताः । इमामन्तरा दुर्गवृत्तिर्नैवावबोद्धुं शक्यते । स्वकीयमतसमर्थने परकीयमतदूषणे च बहवः पूर्वाचार्या ग्रन्थाश्च स्मृताः प्रमाणरूपेण । टीकेयं विद्यानन्देन (विजयानन्देन) विद्यासागरेण च कातन्त्रोत्तर – आख्यातमञ्जरीति ग्रन्थाभ्यां व्याख्याता । कृत्सूत्राणि च शिवरामशर्मा मञ्जरीव्याख्यया रघुनन्दनभट्टाचार्यश्च कलापतत्त्वार्णवनाम्या कृत्शिरोमणिनाम्या वा व्याख्यया व्याख्यातवान् ।

**३. दुर्गवृत्तिविवरणपञ्जिका** [सं० ११००?]

व्याकरणवाङ्मये न्यासो विवरणपञ्जिका वा सैव भवति, यत्र सूत्राभिप्रायः सूत्रकाराभिप्रायो वा प्राधान्येन प्रकाश्यते । आचार्यत्रिलोचनदासेन दुर्गवृत्तिविवरण-पञ्जिका प्रणीता । प्रतिज्ञावचनानुसारं कातन्त्रव्याकरणानभिज्ञानामवबोधाय ग्रन्थोऽयमाचार्येण विरचितः । पाणिनीये यत् स्थानमधिकरोति जिनेन्द्रबुद्धिप्रणीतो न्यासस्तदेव स्थानमिहावगन्तव्यं पञ्जिकायाः । ग्रन्थादौ स एवं प्रतिज्ञामाचरति –

**प्रणम्य सर्वकर्तारं सर्वदं सर्ववेदिनम् ।**
**सर्वीयं सर्वगं सर्वं सर्वदेवनमस्कृतम् ॥**
**दुर्गसिंहोक्तकातन्त्रदुर्गवृत्तिपदान्यहम् ।**
**विवृणोमि यथाप्रज्ञमज्ञसंज्ञानहेतुना ॥**

पञ्जिकाया अस्याष्टीकाग्रन्था एते उपलभ्यन्ते –

१. कविराजसुषेणविद्याभूषणस्य कलापचन्द्रः ।

२. आचार्यबिल्वेश्वरस्य टीका ।

३. कर्णोपाध्यायस्य उद्द्योतव्याख्या ।

४. मणिकण्ठभट्टाचार्यस्य त्रिलोचनचन्द्रिका ।

५. सीतानाथसिद्धान्तवागीशस्य संजीवनी ।

६. पीताम्बरविद्याभूषणस्य पत्रिका ।

७. प्रबोधमूर्तिगणेर्दुर्गपदप्रबोधः ।

८. देशलस्य पञ्जिकाप्रदीपश्च ।

**४. कलापचन्द्रः**

विद्याभूषण – कविराजादिविरुदधारिणा आचार्येण सुषेणेन ग्रन्थोऽयं विनिर्मितः । प्रतिज्ञानुसारं विदुषामाह्लादनाय (विनोदाय) पञ्जिकादोषान्धकारविनाशाय चास्य रचना संजाता । मङ्गलश्लोके सः शिवं नमस्करोति, तस्मात् तस्य शैवमतानुयायित्वं प्रसिद्ध्यति –

**नत्वा शिवं कृतिकृताप्तनिबद्धसिन्धुमुन्मथ्य सूक्तिमयचारुपयःप्रबन्धम् ।**
**ज्ञात्वा गुरोर्विबुधवृन्दविनोदनाय कामं तनोति विकलङ्ककलापचन्द्रम् ॥**
**श्रीमत्त्रिलोचनकृताखिलपञ्जिकायां दोषान्धकारनिकरं प्रतिपक्षदत्तम् ।**
**निःसार्य सत्पथगतेरपि दर्शकोऽयं कामं भविष्यति मदीयकलापचन्द्रः ॥**

**श्रीविद्याभूषणाचार्यसुषेणेन विनिर्मितः ।**
**आस्तां कलापचन्द्रोऽयं कालापानां मनोमुदे ॥**

न केवलमनेन प्रतिज्ञावचनेन किं च कलापचन्द्रस्यानुशीलनेनापि तथ्यमिदमायाति यद् यदि ग्रन्थोऽयं विस्तरेण विषयस्य यथार्थसमीक्षां न कुर्यात् तर्हि प्रमापेक्षया भ्रमाधिक्यं प्रसरेत् कातन्त्रसिद्धान्तावबोधे । पाणिनीयवाङ्मये हरदत्तकृतपदमञ्जरीवदयं कातन्त्रवाङ्मये समाद्रियते ।

## सम्पादन – प्रकाशनयोजनापरिचयः

१९६८ तमयीशवीयवत्सरान्मया यद् यावच्च कातन्त्रमधीतम्, तत्र ग्रन्थद्वयं च सम्पादितम्, तदधिकृत्य संप्राप्तानुभवबलेन मया संक्षिप्ता सम्पादनयोजनेयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयप्रकाशनविभागे प्रस्तुता २।२।१९९० तमे दिनाङ्के । तस्याः स्पष्टीकरणं च विस्तरेणानुष्ठितं २०।६।९४ तमदिनाङ्कितपत्रेण । तदनुसारं सूत्र-सूत्रार्थप्रदर्शनपुरस्सरं दुर्गसिंहविरचितायाः कातन्त्रवृत्तेः, कातन्त्रवृत्तिटीकायाः,

त्रिलोचनदासस्य कातन्त्रवृत्तिपञ्जिकायाः, सुषेणविद्याभूषणस्य कलापचन्द्रस्य च सम्पादनम् आयोजितमासीत्। अत्रापि चानिवार्यं महत्त्वपूर्णमासीद् हिन्दीभाषायां व्याख्याचतुष्टयस्यास्य विषयाणां वैशिष्ट्यप्रदर्शनं पाणिनीयेन व्याकरणेन सह समीक्षाकार्यं च। परं कार्यमिदं दुरूहं समयसाध्यं चासीत्, तथापि पाणिनीये महाभाष्य-काशिकावृत्ति-न्यास-पदमञ्जरीणामनुशीलनानुभवबलेन तादृशस्य 'दुर्गवृत्ति-टीका-पञ्जिका कलापचन्द्र' इत्येतस्य व्याख्याचतुष्टयस्याध्ययनादिबलेन च सोत्साहमहं कार्यमिदं सम्पूरयितुं संकल्पितवान्।

कार्यस्य गौरवम् उपयोगितां व्यापकतां चाकलयन्ती प्रकाशनसमितिरन्ते मामकीनां योजनामङ्गीचकार, चतुर्षु खण्डेषु ग्रन्थस्यास्य प्रकाशनं च निश्चिकाय, प्रतिवर्षं खण्डस्यैकस्य प्रकाशनं यत् संकल्पितं समित्या, तस्यैव फलभूतं सन्धिप्रकरणात्मकमिदं मुद्रितं प्रथमं खण्डं करतलगतमाभाति।

सम्पादनकार्यस्याधारा भवन्ति हस्तलेखाः। एषां चतुर्णां ग्रन्थानां बहवो हस्तलेखा मया अधीता विविधलिपिनिबद्धास्तत्तत्संस्थासु स्वयमुपस्थाय। वङ्गाक्षरेषु ये मुद्रिता ग्रन्था उपलभ्यन्ते तेष्वपि केचित् शतवर्षपूर्वकालिकाः सपादशतवर्षपूर्वकालिका वा सन्तीति तेऽपि हस्तलेखवदेव संजातास्तस्मादक्षरपरिचयसौविध्याय सम्पादनार्थं मया त एव ग्रन्था निर्धारिताः। सन्धिप्रकरणव्याख्यात्मकं यद् ग्रन्थद्वयं मत्पार्श्वे वर्तते तत्र प्राथमिकपत्राणामभावात् प्रकाशनपरिचयो नैव परिज्ञायते। पत्राणां जीर्णतातिशयवशाद् यान्यक्षराणि एकस्मिन् ग्रन्थे नोपलभ्यन्ते, तेषामन्यत्रोपलब्धिवशादभावो नैवानुभूयते। मुद्रणदोषवशाद् यत्र क्वचित् कश्चिदंशस्त्रुटितो भवति, स ग्रन्थान्तरपाठतुलनयाऽर्थसमीक्षया च यः समीचीनो विभाव्यते स एवेहोपस्थाप्यते।

**कृतज्ञताप्रकाशः**

सर्वप्रथममहं तांस्तान् कातन्त्राचार्यान् प्रति प्रणतः सन् कृतज्ञतां प्रकाशयामि, येऽद्यापि पाणिनीयादिव्याकरणान्तरापेक्षया सरलं संक्षिप्तं च कातन्त्रमुपस्थाप्य व्याकरण-वाङ्मये लोकव्यवहारप्रधानां माहेन्द्रीं परम्परामुज्जीवयन्तो जयन्ति। ततस्तदीयान्वेषणाय संप्रेरकान् **आचार्यबलदेवोपाध्याय - रामशंकरभट्टाचार्य - दीनानाथयक्ष - विश्वबन्धुशास्त्रि - फतहसिंह - युधिष्ठिरमीमांसक**प्रभृतीन् विद्वद्वर्यान् स्मारं स्मारं महतीं मुदमावहामि।

**श्रीक्षेत्रेशचन्द्रचट्टोपाध्याय - वेणीमाधव - व्रजमोहनजावलिया - नीलमणिमिश्र - मानगोविन्दादीन**पि विदुषो नैव विस्मरामि यैरन्वेषणप्रसङ्गे शारदा-उत्कल - वङ्गादिलिपिवाचनेन पाठसंशोधन-इतिवृत्तपरिचयादिना च पूर्वमपूर्वं साहाय्यमारचितम् ।

अद्यत्वे यादृशी आङ्ग्लभाषादिमयग्रन्थप्रकाशनप्रवृत्तिर्वर्तते प्रकाशकानाम्, तां समीक्षमाणो नैव कोऽपि विज्ञः सहसा विश्वसेत् कातन्त्रप्रभृतेरप्रचलितसंस्कृत-व्याकरणस्य प्रकाशने । भोटदेशीया बौद्धाः कातन्त्रं बौद्धम्, जैनाचार्याश्च जैन-व्याकरणमामनन्ति, तथात्वेऽपि बौद्धजैनसंस्थानानि नैवैतादृशस्य ग्रन्थस्य प्रकाशने गौरवमनुभवन्ति । अस्यामवस्थायां खण्डचतुष्टये कातन्त्रप्रकाशनस्य स्वीकृतिप्रदानेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य बलीयान् कश्चित् प्राच्यभारतीयग्रन्थनिधि-संरक्षणसंकल्पः कल्पयितुं शक्यते, तदर्थं न केवलं प्रकाशनसमितिसदस्या अभिनन्दनीयाः सन्ति, किं च निर्देशन - व्यवस्था – समाधानादिकार्यजातस्य निर्वाहाय कुलपति - कुलसचिव - निदेशक - प्रकाशनाधिकारि - तदीयसहयोगिनोऽपि भवन्ति यशोभाजः । तस्मात् परममाननीयान् कुलपति**श्रीमण्डनमिश्र**महोदयान् प्रति प्रणामाञ्जलिना कुलसचिव - निदेशकवर्यान् प्रति विनयव्यापारेण, अथ च सुहृद्वर्यान् प्रकाशनाधिकारि-**श्रीहरिश्चन्द्रमणित्रिपाठि**महोदयान् प्रति सुहृत्सम्मितसद्भावध्वनितधन्यवादप्रदानेन च स्वीयां कृतज्ञतां विज्ञापयामि । ईक्ष्यपत्रसंशोधनादिकार्येषु कौशलेन संसक्ता **डॉ० हरिवंशपाण्डेय - कन्हईसिंहकुशवाहा**प्रभृतयः प्रकाशनविभागीयसदस्यास्त्वरितसन्मुद्रण-योजनाव्यापारपरा आनन्दप्रिण्टिङ्गप्रेससदस्या अपि सन्ति नूनं धन्यवादार्हाः ।

**कार्त्तिकेयप्रसादेन कातन्त्रं प्रथितं भुवि ।**
**मानसं रमयेन्नित्यं शब्दविद्यानुरागिणाम् ॥**

वि० सं० २०५४
वैशाखपूर्णिमा
दि० २२।५।९७

विदुषामाश्रवः
**जानकीप्रसादद्विवेदः**
**सम्पादकः**
उपाचार्यः संस्कृतविभागे
के० उ० ति० शि० संस्थानम्,
सारनाथ – वाराणसी ।

●

# विषयानुक्रमणी


| विषयाः | पृ० सं० |
| --- | --- |
| **प्रास्ताविकम्** | **१-५४** |
| १. **कातन्त्रव्याकरण-रचना के प्रयोजन** | **१-३** |
| [सातवाहन-विदुषी रानी-शर्ववर्मा-स्वामिकार्त्तिकेयसंवाद, आचार्य शशिदेव की व्याख्यानप्रक्रिया] | |
| २. **विविध नाम** | **३-५** |
| [कातन्त्रम्, कलापम्, कालापम्, कलापकम्, कौमारम्, शार्ववर्मिकम्, दौर्गसिंहम्, दुर्गसिंहीयम्] | |
| ३. **विषयपरिचय** | **५-१९** |
| [सभी अध्यायों-पादों की सूत्रसंख्या, वररुचि का कृत्प्रकरण, श्रीपतिदत्त का कातन्त्रपरिशिष्ट, वर्णों की विविध संज्ञाएँ, स्वर तथा व्यञ्जनवर्णों में सन्धि, प्रकृतिभाव आदि] | |
| ४. **आचार्यशर्ववर्मकृत विषयविभाजन** | **१९-२१** |
| [सन्धि – नामचतुष्टय तथा आख्यात] | |
| ५. **कातन्त्रव्याकरण का इतिहास** | **२१-४२** |
| [कातन्त्रकार शर्ववर्मा का देश-काल, कृत्सूत्रों की रचना और आचार्य वररुचि, कातन्त्रपरिशिष्ट और आचार्य श्रीपतिदत्त, कातन्त्रपरिशिष्ट की टीकाएँ, कातन्त्रोत्तरपरिशिष्ट और आचार्य विजयानन्द, कातन्त्रधातुपाठ, कातन्त्रगणपाठ, उणादिसूत्र, कातन्त्रलिङ्गानुशासन, कातन्त्रव्याकरण के वृत्तिकार, वृत्तिकार दुर्गसिंह का परिचय, कातन्त्रदुर्गवृत्ति का परिचय, व्याख्यासार, बालबोधिनी, कातन्त्रलघुवृत्ति, कातन्त्रकौमुदी, कातन्त्रवृत्तिटीका, कातन्त्रवृत्तिपञ्जिका, कलापचन्द्र, बिल्वेश्वरटीका, उद्द्योत, त्रिलोचनचन्द्रिका, सञ्जीवनी, पत्रिका, दुर्गपदप्रबोध, पञ्जिकाप्रदीप] | |

६. **अन्य उपयोगी ग्रन्थ** ४२-४३

[कातन्त्रविभ्रम, चर्करीतरहस्य, परिभाषावृत्ति, कातन्त्रशिक्षासूत्र, उपसर्गसूत्र, शब्दरूपकल्पद्रुम, रत्नबोध, कलापव्याकरणोत्पत्तिप्रस्ताव, पादप्रकरणसङ्गति, दशबलकारिका, बालशिक्षाव्याकरण, शब्दरत्न, गान्धर्वकलापव्याकरण, कलापदीपिका]

७. **भोटभाषा में अनूदित कातन्त्रग्रन्थों का परिचय** ४४-४५

[कलापसूत्र आदि १२ ग्रन्थ]

८. **भोटभाषा में लिखित टीकाएँ** ४५-४६

[ग्रन्थकार-नाम के साथ २३ टीकाएँ]

९. **मुद्रितग्रन्थपरिचय** ४६-४८

[४२ ग्रन्थों का प्रकाशन-परिचय]

१०. **पाणिनीयेतर मान्यताएँ** ४८-४९

११. **कातन्त्रव्याकरण की सूत्रसंख्या** ४९-५०

१२. **कातन्त्रव्याकरण की प्रधान विशेषताएँ** ५१-५४

[रचनाप्रयोजन-सूत्रशैली आदि विशेषताएँ]

## [सन्धिप्रकरणम्]

**प्रथमः सिद्धपादः** पृ० १-११८

१. **टीकाचतुष्टये मङ्गलश्लोकव्याख्या** १-२९

**समीक्षा** २९-३०

[त्रिविध मङ्गल = कायिक, वाचनिक, तथा मानसिक। अनुबन्धत्रयी, महाभाष्य आदि ग्रन्थों तथा जयादित्य, भगवत्पाद शङ्कर, कुलचन्द्र आदि आचार्यों के मतों का स्मरण, केचित् - अन्ये – मूर्ख आदि प्रतीक, 'वस्तुतस्तु, परमार्थतस्तु' आदि प्रतीकों द्वारा विषय का स्पष्टीकरण, वाक्-देव-सर्वज्ञ आदि शब्दों की व्युत्पत्ति, दुर्गसिंह से पूर्ववर्ती वृत्तिग्रन्थ, केवल सूत्रव्याख्यानपरक दुर्गसिंह के शैव-बौद्ध-वैदिक मतानुयायी होने में आधार]

२. प्रथमसूत्र – "सिद्धो वर्णसमाम्नायः" इत्यस्य व्याख्या ३०-४०

समीक्षा ४०-४३

[कातन्त्रीय – पाणिनीय वर्णसमाम्नाय, पाणिनीय वर्णसमाम्नाय की कृत्रिमता तथा कातन्त्रीय वर्णसमाम्नाय की लोकप्रसिद्धिपरता, योगवाह-अयोगवाह, व्याकरण का सर्वपारिषदत्व, कातन्त्ररचना के प्रयोजन और रचयिता शर्ववर्मा, अक्षरसमाम्नाय की उपदेशपरम्परा तथा उसका महत्त्व, अहिर्बुध्न्यसंहिता, वशिष्ठशिक्षा आदि में वर्णपाठ]

३. स्वरसंज्ञा ४३-५१

[१४ वर्णों की स्वरसंज्ञा, स्वरों के लिए 'अक्षर' तथा 'वर्ण' का व्यवहार, दीर्घ लृकार की मान्यता, 'स्वर' शब्दार्थविचार, सूत्रभेद]

४. समानसंज्ञा ५१-५४

[समानसंज्ञा की अन्वर्थता, प्राचीनता, पाणिनीय व्याकरण में 'अक्' प्रत्याहार का व्यवहार]

५. सवर्णसंज्ञा ५४-६०

[समानसंज्ञक १० वर्णों की सवर्णसंज्ञा, सवर्णसंज्ञा की अन्वर्थता, पूर्वाचार्यों तथा अर्वाचीन आचार्यों द्वारा संज्ञा का व्यवहार]

६. 'ह्रस्व-दीर्घ' संज्ञे ६०-६६

[अन्वर्थता, पूर्वाचार्य - अर्वाचीन आचार्यों द्वारा व्यवहार, सज्जन पुरुषों के स्नेह से तुलना, ह्रस्व – दीर्घ के लिए लघु – गुरु का प्रयोग]

७. 'नामि-सन्ध्यक्षर' संज्ञे ६६-७५

[अन्वर्थता, पाणिनीय व्याकरण में नामी के लिए 'इच्' का तथा सन्ध्यक्षर के लिए 'एच्' का प्रत्याहार का प्रयोग]

८. व्यञ्जनसंज्ञा ७५-७८

[क् से क्ष् तक के वर्णों की व्यञ्जन संज्ञा, क्ष् वर्ण की मान्यता, व्यञ्जन का स्वरानुयायी होना, पूर्वाचार्यों द्वारा प्रयोग]

९. 'वर्ग-अघोष-घोषवत्-अनुनासिक-अन्तस्था-ऊष्म' संज्ञाः ७८-९१
[व्यञ्जनवर्णों की छह संज्ञाएँ, पूर्वाचार्यों द्वारा इनका प्रयोग, अन्वर्थता, पाणिनीयव्याकरण में इनके लिए प्रयुक्त शब्द, विविध भेदकथन]

१०. 'विसर्जनीय – जिह्वामूलीय-उपध्मानीय' संज्ञाः ९१-९६
[विसर्जनीय का उभयविधत्व, अन्वर्थता, कलापव्याकरण में इसकी योगवाहता तथा पाणिनीय व्याकरण में अयोगवाहता, लिपिस्वरूप, इसके स्थान में होने वाले आदेश-जिह्वामूलीय तथा उपध्मानीय, कलाप तथा पाणिनीय व्याकरण में इनका लिपिभेद]

११. अनुस्वारसंज्ञा ९६-९९
[अनुस्वार की स्वरात्मकता तथा व्यञ्जनात्मकता, लिपिस्वरूप, इसका योगवाह होना]

१२. पदसंज्ञा ९९-१०८
[ऐन्द्र व्याकरण तथा वाजसनेयिप्रातिशाख्य के आधार पर की गई यह संज्ञा, पद के अनेक भेद, अन्वर्थता, पूर्वाचार्यों तथा अर्वाचीन आचार्यों द्वारा व्यवहार, वाक्यपदीय की मान्यता]

१३. व्यञ्जनवर्ण – सम्मिलितवर्णविषयकनियमः १०८-११
[व्यञ्जन को परवर्ती वर्ण के साथ मिला देना, सम्मिलित वर्णों का विभाग विना ही अतिक्रमण किए करने का निर्देश, पाणिनि द्वारा लोकप्रसिद्धिवशात् या वर्णस्वभाववशात् इस प्रकार के नियम न बनाना]

१४. लोकोपचारादनुक्तशब्दसिद्धिः १११-१८
[अनुक्तशब्दों की विविध आचार्यों द्वारा की गई साधुत्वव्यवस्था, लोकार्थकथन, वैदिक शब्दों के साधुत्वविधान न करने का स्पष्टीकरण, कलापव्याकरण का वेदाङ्गत्व, पाणिनीय व्याकरण का अकालकत्व]

**द्वितीयः समानपादः** ११९-१७५

१५. सवर्णदीर्घसन्धिः ११९-२८
[पूर्ववर्ती समानसंज्ञक वर्ण को दीर्घ तथा परवर्ती सवर्णसंज्ञक वर्ण का लोप, आगम-विकार-आदेश-लोप में अन्तर, पाणिनीय दीर्घविधि का अपकर्ष, आदेश-

विकारविषयक आपिशलीय मान्यता की कुलचन्द्र, हेमकर, श्रीपति आदि आचार्यों द्वारा व्याख्या, स्थानी-आदेश-निमित्त का पूर्वाचार्यों द्वारा प्रयोग, १० रूपों की सिद्धि]

१६. **गुणसन्धिः** १२९-३७

[कातन्त्र के अनुसार पूर्ववर्ती अवर्ण को ही 'ए-ओ-अर्-अल्' हो जाना और परवर्ती 'इवर्ण-उवर्ण-ऋवर्ण-लृवर्ण' का लोप, अनेक वार्तिकवचन, श्रीपति-सुभूति-चन्द्रगोमिन्-काशिकाकार आदि आचार्यों के अभिमत, भाष्य और चान्द्रव्याकरण में विरोध होने पर दोनों की प्रामाणिकता, अनेक परिभाषावचनों की व्याख्या तथा ८ शब्दरूपों का साधनप्रकार]

१७. **वृद्धिसन्धिः** १३७-४६

[पूर्ववर्ती अवर्ण को 'ऐ-औ' आदेश तथा परवर्ती 'ए-ऐ-ओ-औ' का लोप, अनेक वार्तिकवचन, अनेक परिभाषावचन, कुलचन्द्र-श्रीपति-हेमकर आदि आचार्यों के विविध मत, ४ शब्दों की सिद्धि ]

१८. **यकाराद्यादेशसन्धिः (यण्सन्धिः)** १४७-५४

[पूर्ववर्ती इवर्ण को यकार, उवर्ण को वकार, ऋवर्ण को रकार, लृवर्ण को लकार आदेश तथा परवर्ती असवर्ण स्वर के लोप का अभाव, अनेक शब्दों की व्युत्पत्ति, पाणिनीय प्रक्रिया में शब्दलाघव और कातन्त्रप्रक्रिया में अर्थलाघव, 'अन्ये-केचित्' आदि प्रतीकों से विविध मतों का स्मरण, आठ शब्दरूपों की सिद्धि]

१९. **अयाद्यादेशसन्धिः** १५४-६३

[पूर्ववर्ती 'ए-ओ-ऐ-औ' के स्थान में क्रमशः 'अय्-अव्-आय्-आव्' आदेश एवं परवर्ती असवर्ण स्वर का लोपाभाव, शार्ववर्मिक कातन्त्रव्याकरण में विभक्ति-पद-वर्णों का आदि-मध्य-अन्तलोप, सूत्रों में विवक्षानुसार सन्धि, कुलचन्द्र-श्रीपति-टीकाकार आदि आचार्यों के अभिमत, वर्णागम आदि ५ प्रकार के निरुक्त की व्याख्या, संहिता में नित्यता और विवक्षा, पाणिनि-कात्यायन-भाष्यकारों में उत्तरोत्तर की प्रामाणिकता, आठ शब्दरूपों की सिद्धि]

२०. **'य्-व्-अ'–लोपः** १६३-७१

[पदान्तवर्ती 'अय्-आय्-अव्-आव्' में 'य्-व्' का वैकल्पिक लोप तथा स्वरसन्धि का अभाव, पदान्तस्थ 'ए-ओ' से परवर्ती अकार का लोप, अयादिप्रभृति शब्दों की व्युत्पत्ति, 'कुलचन्द्र-शिवदेव-ऋजु-मूर्ख-पञ्जीकार' आदि आचार्यों के अभिमत, सुहृदुपदेश की चर्चा, अनेक परिभाषावचनों का स्मरण, १० शब्दरूपों की सिद्धि]

२१. **स्वरसन्ध्यभावपरिभाषा** १७१-७५

[व्यञ्जनवर्ण के पर में रहने पर स्वरवर्णों की सन्धि का अभाव, नञ्निर्दिष्ट विधि की अनित्यता, कुछ शब्दों की व्युत्पत्ति, मन्दबुद्धिवाले शिष्यों के अवबोधार्थ सूत्ररचना, सम्बद्ध न्यायवचनों का स्मरण]

**तृतीय ओदन्तपादः** **१७६-१९२**

२२. **प्रकृतिभावसन्धिः** १७६-९२

[चार सूत्रों द्वारा 'ओकारान्त-अ-इ-अ-आ-द्विवचनान्त-ई-ऊ-ए-बहुवचन – अमी-प्लुत' में सन्ध्यभाव, नित्यशब्दार्थसम्बन्ध, अर्थभेद से 'आ' का सानुबन्धत्व-निरनुबन्धत्व, कुलचन्द्र आदि आचार्यों के अभिमत, अनेक परिभाषावचनों की व्याख्या, शब्दरूपसिद्धि, प्लुत वर्णों का द्विमात्रिकत्व]

**चतुर्थो वर्गादिपादः** **१९१-२४५**

२३. **वर्गीयतृतीयपञ्चमवर्णादेशः** १९३-२०१

[पदान्तवर्ती वर्गीय प्रथम वर्णों के स्थान में 'तृतीय-पञ्चम' वर्णादेश, पाणिनीय प्रक्रिया का विवेचन, संज्ञापूर्वक निर्देश की सुखार्थता, पाणिनीय निर्देश की गौरवाधायकता, विविध आचार्यों के अभिमत, अनेक परिभाषावचनों की योजना, विविध शब्दों की रूपसिद्धि]

२४. **शकारस्य छकारादेशः** २०१-०५

[शकार के स्थान में वैकल्पिक छकारादेश, 'ल्-अनुनासिक' के भी पर में रहने पर छकारादेश की प्रवृत्ति, 'पर' शब्द का श्रुतिसुखार्थ पाठ, कुछ परिभाषावचनों की योजना, १२ शब्दों की रूपसिद्धि]

२५. पूर्वचतुर्थवर्णादेशः २०५-१०

[हकार के स्थान में पूर्वचतुर्थ वर्णादेश, 'एव' पदपाठ की तृतीयमतव्यवच्छेदार्थता, श्रुत – अनुमित विधियों में श्रुतविधि की बलवत्ता, विद्यानन्द-भर्तृहरि-कुलचन्द्र आदि आचार्यों के अभिमत, पाणिनि के द्वारा पूर्वसवर्णादेश का विधान, दो विभाषाओं के मध्य में पठित विधि की नित्यता, ५ शब्दों की रूपसिद्धि]

२६. तकारस्य पररूपम् २१०-१३

[पदान्तवर्ती तकार को पररूप, विविध आक्षेपों का समाधान, सुखार्थ विधि - शब्दपाठ आदि का महत्त्व – 'अहो रे पाण्डित्यम्, सुखादन्यः कः पदार्थो गरीयान्', टीकाकार-कुलचन्द्र-विद्यानन्द आदि आचार्यों के अभिमत, शब्दरूपसिद्धि]

२७. तकारस्य चकारादेशः २१३-१६

[पदान्तवर्ती तकार को चकारादेश, सूत्र का आनर्थक्य तथा सार्थक्य, हेमकर-विद्यानन्द आदि आचार्यों के अभिमत, शब्दव्युत्पत्ति, प्रश्न के रूप में प्रसिद्धवचन का स्मरण –

**चं शे सूत्रमिदं व्यर्थं यत् कृतं शर्ववर्मणा।**
**तस्योत्तरपदं ब्रूहि यदि वेत्सि कलापकम्॥**

उत्तर के रूप में प्रसिद्ध श्लोकवचन –

**मूढधीस्त्वं न जानासि छत्वं किल विभाषया।**
**यत्र पक्षे न च छत्वं तत्र पक्षे त्विदं वचः॥**

दो शब्दों की रूपसिद्धि]

२८. ङ्-ण्-न्वर्णानां द्वित्वम् २१६-१९

[पदान्तवर्ती इन तीन वर्णों का द्वित्व, विविध परिभाषावचनों की योजना, पाणिनीयप्रक्रिया की दुरूहता, तीन शब्दों की रूपसिद्धि]

२९. **नकारस्य शकार-षकार-सकारादेशाः** २१९-२८

[पदान्तवर्ती नकार के स्थान में अनुस्वारपूर्वक शकार-षकार-सकार आदेश, पाणिनीय प्रक्रिया में गौरव और दुर्बोधता, कातन्त्रीय प्रक्रिया में संक्षेप और सरलता, 'पुंस्कोकिल' शब्द की परिभाषा –

**संवर्धितः पितृभ्यां य एकः पुरुषशावकः।**

**पुंस्कोकिलः स विज्ञेयः परपुष्टो न कर्हिचित् ॥**

आठ शब्दों की रूपसिद्धि]

३०. **नकारस्य 'ल्-ञ्-न्च्-ण्' आदेशाः** २२८-३९

[पदान्तवर्ती नकार को लकारादि ४ आदेश, कारहीनपाठ की सार्थकता, पाणिनि का सावर्ण्यज्ञान गौरवाधायक, परिभाषावचनों का स्मरण, हेमकर-कुलचन्द्र आदि आचार्यों के अभिमत, अठारह शब्दों की रूपसिद्धि]

३१. **मकारस्यानुस्वारादेशः, अनुस्वारस्य पञ्चमवर्णादेशश्च** २३९-४५

[पदान्तवर्ती मकार को अनुस्वारादेश तथा अनुस्वार को पञ्चम वर्णादेश, पाणिनीय प्रक्रिया की प्रयत्नसाध्यता, पाँच शब्दों की रूपसिद्धि]

**पञ्चमो विसर्जनीयपादः** **२४६-३२०**

३२. **विसर्गस्य श्-ष्-स्- जिह्वामूलीय- उपध्मानीयादेशाः** २४६-५३

[चकारादि वर्णों के पर में रहने पर विसर्ग के स्थान में शकारादि ५ आदेश, कातन्त्र-पाणिनीय प्रक्रियाओं का उत्कर्षापकर्ष, दोनों व्याकरणों में जिह्वामूलीय-उपध्मानीय का लिपिभेद, विविध अभिमत तथा दश शब्दों की रूपसिद्धि]

३३. **विसर्गस्य पररूपादेशः** २५३-५५

[शकार के परवर्ती होने पर पूर्ववर्ती विसर्ग को शकार, षकार के परवर्ती होने पर षकार तथा सकार के परवर्ती होने पर सकारादेश, पाणिनीय प्रक्रिया में गौरव, तीन शब्दों की रूपसिद्धि, इस सूत्र में चार प्रश्नों के उत्तर –

क्व हरिः शेते ? का च निकृष्टा, को बहुलार्थः ? किं रमणीयम् ।

क्व कातन्त्रे कीदृक् सूत्र शेपे, सेवा, वा, पररूपम् ॥]

**३४. विसर्गस्य 'उ-लोप-र्' आदेशाः** २५५-८१

[दो अकारों के मध्यवर्ती विसर्ग को अकार – घोषवान् वर्णों के मध्यवर्ती विसर्ग को उकारादेश, वैकल्पिक यकारादेश, लोप तथा रकारादेश, विविध आचार्यों के अभिमत, शब्दरूपसिद्धि, पाणिनीयप्रक्रिया का गौरव, चतुर्विध बाहुलकविधि, 'महच्चरण' प्रतीक से दो विशिष्ट अभिमतों का तथा कुलचन्द्र के एक विशिष्ट अभिमत का उपस्थापन]

**३५. विसर्जनीयलोपे पुनः सन्धेरभावः** २८१-८५

['क इह, देवा आहुः, भो अत्र' में प्राप्त गुण-दीर्घ-अयादेशसन्धि का अभाव, विविध आचार्यों के अभिमत, परिभाषावचन, द्रुतादि वृत्तियों का विशेष उपयोग –

**अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्।**
**शिष्याणामवबोधार्थं कुर्याद् वृत्तिं विलम्बिताम्॥**

**३६. रकारस्य लोपः पूर्ववर्तिनः स्वरस्य दीर्घादेशश्च** २८५-८७

['अग्नी रथेन, पुना रौति' आदि प्रयोगों में पूर्ववर्ती रेफ का लोप तथा उससे पूर्ववर्ती स्वर वर्ण को दीर्घ आदेश, सूत्रपठित चकार को अन्वाचयशिष्ट मानना, कुछ विशेषताएँ, शब्दरूपसिद्धि]

**३७. छकारस्य द्विर्भावः** २८७-९१

['इच्छति, गच्छति, कुटीच्छाया' आदि में छकार को द्विर्भाव तथा पूर्ववर्ती छकार को चकारादेश, पाणिनीयप्रक्रिया में गौरव-तुगागम आदि के विधान से, शब्दरूपसिद्धि]

**३८. प्रथमं परिशिष्टम्** २९२-३२०

[ग्रन्थकार श्रीपतिदत्त का मङ्गलाचरण, वृद्धि-दीर्घ-पररूप-प्रकृतिभाव-ह्रस्व-प्रकृतिभावनिषेध-पञ्चमवर्णादेश-विसर्ग-अनुनासिक-ककार-णकार-मलोप-अकारलोप-द्वित्व-सुडागम-निपातनविधिविषयक सन्धिप्रकरण के १४२ सूत्र]

**३९. द्वितीयं परिशिष्टम्** ३२१-२५

['अ अपेहि, इ इन्द्रं पश्य, कः शेते, को धावति, गच्छति, तज्जयति, तद्धितम्, देवा आहुः, नायकः, भवाँल्लिखति, माले इमे, लाकृतिः, वाङ्मती,

सर्कारेण, होतृकारः' आदि पाँच सन्धियों के दुर्गवृत्ति में उदाहृत तथा रूपसिद्धिवाले १९६ शब्दों की वर्णानुक्रम सूची]

४०. **तृतीयं परिशिष्टम्** ३२६-३७

[दुर्गवृत्ति, दुर्गटीका, विवरणपञ्जिका तथा कलापचन्द्र नामक चार व्याख्याओं में उद्धृत १४५ श्लोकों का सङ्ग्रह। इसमें कुछ अर्धश्लोक भी सम्मिलित हैं]

४१. **चतुर्थं परिशिष्टम्** ३३८-४१

[दुर्गवृत्ति, दुर्गटीका, विवरणपञ्जिका तथा कलापचन्द्र नामक चार व्याख्याओं में जिन शब्दों के लौकिक विग्रह, समासादि उक्त हुए हैं, वे १६७ शब्द इस परिशिष्ट में संगृहीत है]

४२. **पञ्चमं परिशिष्टम् = विशिष्टशब्दाः** ३४२-४८

[विषय, प्रक्रिया, पारिभाषिक प्रयोग, शैली आदि के सूचक लगभग ३०० विशिष्ट शब्दों का संग्रह इस परिशिष्ट में किया है]

४३. **षष्ठं परिशिष्टम् = उद्धृता ग्रन्थाः** ३४९-५२

[दुर्गवृत्ति, दुर्गटीका, विवरणपञ्जिका, कलापचन्द्र नामक चार व्याख्याओं तथा समीक्षा में जिन लगभग १५० ग्रन्थों का स्मरण किया गया है, उनका यहाँ संग्रह है]

४४. **सप्तमं परिशिष्टम् = उद्धृतानि आचार्यनामानि** ३५३-५६

[दुर्गवृत्ति, दुर्गटीका, विवरणपञ्जिका, कलापचन्द्र नामक चार व्याख्याओं में तथा समीक्षा में प्रसङ्गतः जिन लगभग १४० आचार्यों का समुदाय या व्यक्ति के रूप में स्मरण किया गया है, उनका यहाँ संकलन है]

४५. **अष्टमं परिशिष्टम् = हस्तलेखादिसहायकग्रन्थपरिचयः** ३५७-६१

[१६१ हस्तलेखों तथा १३ मुद्रित ग्रन्थों का परिचय (हस्तलेखसूची, ग्रन्थसंख्या, प्रकाशनस्थान, प्रकाशनसमय)। कातन्त्र के अतिरिक्त भी लगभग ४० ग्रन्थों का प्रकाशनादि परिचय दिया गया है, जिनसे उद्धरण – समीक्षा आदि कार्यों में सहायता प्राप्त हुई है]

४६. **नवमं परिशिष्टम् = साङ्केतिकशब्दपरिचयः** ३६२-६४

●

॥ श्रीः ॥

# प्रास्ताविकम्

## कातन्त्र व्याकरण की रचना के प्रयोजन

कथासरित्सागर आदि के अनुसार आन्ध्रदेशीय राजा **सातवाहन** एक बार वसन्त ऋतु में रानियों के साथ जलक्रीडा कर रहे थे। उस जलक्रीडा में की जा रही पानी की बौछार से श्रान्त होकर उनकी ब्राह्मणजातीया महारानी ने प्रार्थना की – **'मोदकैर्मां ताडय'**। इस वचन का विवक्षित अर्थ था – 'मुझ पर पानी मत फेंको', क्योंकि मैं जलक्रीडा से पर्याप्त श्रान्त हो गई हूँ। किन्तु संस्कृतभाषा तथा उसके व्याकरणशास्त्रीय सन्धिविषयक ज्ञान से अनभिज्ञ होने के कारण राजा ने उसका अर्थ समझा – 'मुझे मोदक = लड्डुओं से मारो'। इस अभिप्राय से राजा ने सेवक भेजकर अनेक मोदक मँगवाए और महारानी को समर्पित किए। तब उपहास करते हुए रानी ने राजा से कहा –

**राजन्नवसरः कोऽत्र मोदकानां जलान्तरे।**
**उदकैः सिञ्च मा त्वं मामित्युक्तं हि मया खलु॥**
**सन्धिमात्रं न जानासि माशब्दोदकशब्दयोः।**
**न च प्रकरणं वेत्सि मूर्खस्त्वं कथमीदृशः॥**

(क० स० सा० ७।११६-१७)।

महाराज ! जलाशय में मोदकों का क्या उपयोग ? मैंने तो आपसे कहा था – 'मुझ पर पानी मत फेंको'। आप 'मा' और 'उदक' शब्दों की सन्धि भी नहीं जानते। जलक्रीडा का यह अवसर (प्रकरण) भी आपके ध्यान में नहीं आया। आप इतने अज्ञानी कैसे ?

यह सुनकर राजा लज्जित हुए और उसने अपनी सभा के दो पण्डितों – **गुणाढ्य** और **शर्ववर्मा** को बुलवाया और उनसे पूछा – संस्कृत सीखने में कितना

समय लगेगा ? तब **गुणाढ्य** ने कहा – महाराज ! सभी विद्याओं का मुख व्याकरण है, उसमें पारङ्गत होने के लिए १२ वर्ष लगते हैं, किन्तु मैं आपको छह वर्षों में ही उसे सिखा दूँगा। इस पर शर्ववर्मा ने छह महीनों में ही व्याकरण सिखा देने की प्रतिज्ञा की। शर्ववर्मा की इस प्रतिज्ञा पर गुणाढ्य ने घोषणा की – यदि आप महाराज को छह महीनों में संस्कृत-व्याकरण सिखा देंगे तो मैं प्रचलित संस्कृत, प्राकृत और देशी भाषाओं में से किसी भी भाषा में ग्रन्थरचना नहीं करूँगा। शर्ववर्मा ने अपनी प्रतिज्ञा के सम्बन्ध में और भी दृढता दिखाते हुए कहा – 'यदि मैं महाराज को छह महीनों में संस्कृत नहीं सिखा सका तो आपकी (गुणाढ्य की) पादुकाएँ १२ वर्षों तक शिर पर धारण करूँगा'। शर्ववर्मा ने यह प्रतिज्ञा तो कर ली, परन्तु इसका निर्वाह करने में कठिनाई प्रतीत हुई। उन्होंने इसके निर्वाह हेतु पर्याप्त विचार किया। तदनुसार तपस्या करके स्वामिकार्त्तिकेय को प्रसन्न कर लिया और उनकी कृपा से **कातन्त्र** या **कालाप** नामक सुलभ बालबोध संस्कृत-व्याकरण प्राप्त किया। फिर उन्हीं की अनुकम्पा से सातवाहन राजा को पूर्वोक्त अवधि के अन्तर्गत संस्कृत-व्याकरण में पारङ्गत कर दिया।

ज्ञातव्य है कि स्वामिकार्त्तिकेय ने प्रसन्न होकर अपना व्याकरण प्रदान करने के लिए जब **"सिद्धो वर्णसमाम्नायः"** इस प्रथम सूत्र का उच्चारण किया था तो विना ही उनके आदेश के शर्ववर्मा ने अग्रिम सूत्र **"तत्र चतुर्दशादौ स्वराः"** का उच्चारण कर दिया। इस पर क्रुद्ध होकर स्वामिकार्त्तिकेय ने कहा था कि अब यह व्याकरण पाणिनीय व्याकरण का उपमर्दक नहीं हो सकता, किन्तु अब यह एक संक्षिप्त व्याकरण के ही रूप में प्रतिष्ठित हो सकेगा – **'अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति'** (कथा० सा० १।६-७)।

इस प्रकार इस व्याकरण की रचना का मुख्य प्रयोजन सिद्ध होता है – 'राजा सातवाहन को अल्पकाल में ही व्याकरण का ज्ञान प्राप्त करा देना'। इस सम्बन्ध में उपर्युक्त घटना का चित्रण कलापचन्द्रकार कविराज **सुषेण** विद्याभूषण ने इस प्रकार किया है –

**राजा कश्चिन्महिष्या सह सलिलगतः खेलयन् पाणितोयैः**
**सिञ्चंस्तां व्याहतोऽसावतिसलिलतया मोदकं देहि देव !**
**मूर्खत्वात् तन्न बुद्ध्वा स्वरघटितपदं मोदकस्तेन दत्तो**
**राज्ञी प्राज्ञी ततः सा नृपतिमपि पतिं मूर्खमेनं जगर्ह ॥**

पुरा किल श्रीसातवाहनाभिधानं वसुधाधिपं झटिति व्युत्पादयितुं प्रतिश्रुतवता भगवता शर्ववर्माचार्येण कुमाराभिधानो भगवान् भवानीसुतस्तपसा समाराधितः, स च तदाराधनाधीनतामुपगतः सन् निजव्याकरणज्ञानमाविर्भावयितुं पद्यपादरूपं सूत्रमिदमादिदेश – **सिद्धो वर्णसमाम्नाय** इति (क० च० १।१।१)।

आचार्य **शशिदेव** ने अपने **व्याख्यानप्रक्रिया** नामक ग्रन्थ में कहा है कि अल्पमतिवाले वैदिकों, अन्य शास्त्रों का अनुशीलन करने वालों, दूसरों की निन्दा करने वाले धनिकों, आलसी व्यक्तियों, लोभ में फँसे व्यापारियों तथा अन्य विविध जीविकाओं का अर्जन करने वाले व्यक्तियों को अतिशीघ्र व्याकरण का बोध कराने में यह कलाप व्याकरण समर्थ है। इस प्रकार सरल और संक्षिप्त होने के कारण अल्प समय और अल्प श्रम में ही विविध प्रकार के व्यक्तियों को ज्ञान प्राप्त कराने में समर्थ इस व्याकरण के अनेक, विविध या व्यापक प्रयोजन कहे जा सकते हैं। शशिदेव का वचन इस प्रकार है–

**छान्दसाः स्वल्पमतयः शास्त्रान्तररताश्च ये।**
**ईश्वरा वाच्यनिरतास्तथालस्ययुताश्च ये॥**
**वणिजस्तृष्णादिसंसक्ता लोकयात्रादिषु स्थिताः।**
**तेषां क्षिप्रं प्रबोधार्थमनेकार्थं कलापकम्॥**

(व्या० प्र० १।१५-१६)

## विविध नाम –

### १. कातन्त्रम्

ईषद् अल्पं संक्षिप्तं वा तन्त्रं कातन्त्रम्। ईषदर्थक 'कु' शब्द को 'का' आदेश होता है – **"का त्वीषदर्थेऽक्षे"** (कात० १।५।२५)। तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेन इति तन्त्रं व्याकरणम्। अर्थात् संक्षिप्त व्याकरण को 'कातन्त्र' कहते हैं। ज्ञातव्य है कि यह पूर्ववर्ती पाणिनीय व्याकरण की अपेक्षा संक्षिप्त है, क्योंकि इसमें मूलभूत १४०० ही सूत्र हैं। यह भी ज्ञातव्य है कि स्वामिकार्त्तिकेय ने इसे पाणिनीय व्याकरण का उपमर्दक न कहकर उसकी अपेक्षा इसे स्वल्प महत्त्व का बताया था। इसलिए भी इसे कातन्त्र कहते हैं। कुछ विद्वान् कार्त्तिकेयतन्त्र, काशकृत्स्नतन्त्र, कात्यायनतन्त्र या कालापकतन्त्र को संक्षेप में कातन्त्र कहते हैं। किसी बृहत्तन्त्र का संक्षेप होने के कारण भी इसे कातन्त्र नाम दिया गया है।

**२. कलापम्, कालापम् या कलापकम्**

गौडदेशीय तथा तिब्बतदेशीय विद्वान् इस नाम का व्यवहार करते हैं। कलाम्= व्याकरणांशम्, संक्षेपम्, अल्पशब्दान् वा आप्नोति व्याप्नोति अधिकरोति वा कलापम्, तदेव कालापम्। संज्ञा अर्थ में कन् प्रत्यय किए जाने पर कलापक शब्द बनता है। अर्थात् अनेक व्याकरणों के सार अंश को जो समाहृत किए हुए है, उसे कलाप कहते हैं। कलाप का अर्थ संग्रह भी होता है। अर्थात् बहुत से व्याकरणों का जिसमें संग्रह किया गया हो, उसे कलाप कहते हैं। कलाप = मयूरपिच्छ। शर्ववर्मा की तपस्या से प्रसन्न होकर भगवान् शंकर ने कुमार कार्त्तिकेय को मनोरथ-पूर्ति हेतु आदेश दिया। तदनुसार कार्त्तिकेय ने अपने वाहन मयूर के पङ्ख (पिच्छ) पर सूत्र लिखकर शर्ववर्मा को प्रदान किया। इस कारण भी इसको कलाप नाम दिया गया है–

**शङ्करस्य मुखाद् वाणीं श्रुत्वा चैव षडाननः।**
**लिलेख शिखिनः पुच्छे कलापमिति कथ्यते॥**

कलापी = मयूर द्वारा इसकी प्राप्ति में सहायता किया जाना भी इस नाम का कारण है।

इसी कलाप शब्द से स्वार्थ में अण् प्रत्यय करने पर कालाप तथा संज्ञा अर्थ में कन् प्रत्यय करने पर कलापक शब्द निष्पन्न होता है।

**३. कौमारम्**

कुमार = कार्त्तिकेय द्वारा प्राप्त तथा प्रोक्त होने के कारण इसे कौमार कहते हैं। कुमार = सुकुमारमतिवाले बालकों के लिए अधिक उपकारक होने के कारण भी इसे कौमार नाम दिया गया है। वादिपर्वतवज्र भावसेन के अनुसार इस नाम का कारण बताया गया है– कुमारी = सरस्वती के द्वारा इसे अधिष्ठित = स्वीकार या प्रवर्तित किया जाना–

**ब्राह्म्या कुमार्या प्रथमं सरस्वत्याऽप्यधिष्ठितम्।**
**अर्हम्पदं संस्मरन्त्या तत्कौमारमधीयते॥**
**कुमार्या अपि भारत्या अङ्गन्यासेऽप्ययं क्रमः।**
**अकारादिहपर्यन्तस्ततः कौमारमित्यदः॥**

(कातन्त्ररूपमाला के अन्त में)

राजकुमारों के उद्देश्य से बनाया जाना भी इस नाम का कारण माना जाता है।

**४. शार्ववर्मिकम्**

स्वामिकार्तिकेय की आराधना करके उनकी प्रसन्नता से प्राप्त व्याकरण का प्रवचन आचार्य शर्ववर्मा ने किया था, अतः इसे शार्ववर्मिक कहते हैं –

**देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम्।**
**कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं शार्ववर्मिकम्॥**

(कात० दु० वृ०-ग्रन्थारम्भ)

**श्रीमन्नत्वा परं ब्रह्म बालशिक्षां यथाक्रमम्।**
**संक्षेपाद् रचयिष्यामि 'कातन्त्रात्' शार्ववर्मिकात्॥**

(बा० शि० व्या०-ग्रन्थारम्भ)

**५. दौर्गसिंहम्, दुर्गसिंहीयम्**

वृत्ति, टीका, उणादिवृत्ति, लिङ्गानुशासन, परिभाषावृत्ति इत्यादि की रचना करके दुर्गसिंह ने कातन्त्र व्याकरण का पर्याप्त परिष्कार तथा परिबृंहण किया है। अतः उनके नाम पर इसे दौर्गसिंह या दुर्गसिंहीय कहते हैं।

## विषयपरिचय

आचार्य शर्ववर्मा ने अपने व्याकरण की रचना में **'मोदकं देहि'** वाक्य को आधार माना है। 'मोदकम्' पद में 'मा+उदकम्' ऐसा सन्धिविच्छेद किया जाता है। अतः सर्वप्रथम सन्धिप्रकरण की रचना की गई है। इस अध्याय के ५ पादों तथा ७९ सूत्रों में स्वर-व्यञ्जन-प्रकृतिभाव-अनुस्वार तथा विसर्गसन्धि-विषयक नियम बताए गए हैं। 'मोदकम्' एक स्याद्यन्त पद भी है, तदनुसार द्वितीय अध्याय में नामपदसम्बन्धी विचार है। तीन पादों में षड्लिङ्गविचार, चतुर्थ में कारक, पञ्चम में समास तथा षष्ठ पाद में तद्धित प्रकरण प्राप्त है। तद्धित और समासपाद के सूत्र श्लोकबद्ध हैं। 'षड्लिङ्ग – कारक – समास-तद्धित' इन चार प्रकरणों के कारण इस अध्याय को नामचतुष्टय कहते हैं। इसके छह पादों में क्रमशः ७७, ६५, ६४, ५२, २९, ५० सूत्र तथा कुल सूत्रसंख्या ३३७ है। उक्त वचन में 'मोदकम्' के

**शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः॥**

(श्लो० वा०– प्रतिज्ञासूत्रीयः श्लो० १७) इति।

[2]ननु च काय-वाङ्-मनोव्यापारजन्मा नमस्कारस्त्रिधा सम्भवति, पुनश्चतुर्धा, मानसिकस्य द्वैविध्यात्। एकः संकल्पवशादनपास्तेतरव्यापारस्यापि पुरुषस्य तदेकाग्रतालक्षणः, अन्यश्च व्यावृत्तसकलेन्द्रियवृत्तिः केवलमनोव्यवलोक्यमानतत्त्वैकरूपः समतालक्षणः। तत् 'केनाभिप्रायेण वाचनिकमेव नमस्कारम् अकार्षीद् वृत्तिकारः' इति न देश्यम्, कायमनोव्यापारजन्मनोऽपि नमस्कारस्यासत्त्वप्रतिपादने प्रमाणाभावेनावधारणस्यानुपपत्तेः। अथवा वाचनिकशास्त्रप्रस्तावाद् नमस्कारोऽपि वाचनिक एव युज्यते, किमत्र नमस्कारान्तरपरिकल्पनयेति स्थितम्।

---

१. महाकविमाघेन 'शिशुपालवध' नामकं महाकाव्यं प्रणीतम्।

२. संस्कृतवाङ्मये सामान्यतया आशीर्वादात्मको नमस्कारात्मको वस्तुनिर्देशात्मकश्चेत्येतत्त्रिविधो मङ्गलविधिरङ्गीक्रियते, न तु कायवाङ्मनोव्यापाररूपः। ग्रन्थेषु शब्दानां वाङ्मात्रविषयत्वात्।

तत्र दीव्यन्तीति **देवाः**, "अच् पचादिभ्यश्च" (४।२।४८) इत्यच्। न चात्र नाम्युपधत्वाद् बाधकस्य कप्रत्ययस्य प्रसङ्गः। तत्राज्विधौ पचादिग्रहणं बाधक-बाधनार्थमिति वक्ष्यति। एवमपरोऽपि देवशब्दो व्युत्पाद्यः। प्रणम्येतिप्रपूर्वान्नमः (णमः) "एककर्तृकयोः०" (४।६।३) इत्यादिना कृतस्य क्त्वाप्रत्ययस्य "समासे भाविनि" (४।६।५५) इत्यादिना यबादेशः। आदावित्याङ्पूर्वाद् ददातेः **"उपसर्गे दः किः"** (४।५।७०) इति भावे किप्रत्ययः। **सर्वज्ञम्** इति। सर्वं जानातीति "आतोऽनुप-सर्गात् कः" (४।३।४) इति कप्रत्ययः। **सर्वदर्शिनम्** इति। सर्वं द्रष्टुं शीलमस्येति **"नाम्यजातौ णिनिस्ताच्छील्ये"** (४।३।७६) इति णिनिः। तत्रायमर्थः– दीव्यन्तीति देवाः प्रतिनियतविश्वव्यापारास्तपोविधानादिना लब्धमाहात्म्याः पुरन्दरादयः। **यः** पुनरनियतविश्वव्यापारः सदा समुदितमाहात्म्यः पुरन्दरादीनपि निर्माय स्वधर्मानु-विधानेन प्रतिनियतेषु विश्वव्यापारेषु नियुङ्क्ते, स देवानां देवो भगवानीश्वरः। सम्बन्धलक्षणा चेयं षष्ठी समस्यते। स हि भगवांस्तेषामाराध्यतया सम्बन्धीभवति। न तु निर्धारणे, तत्र षष्ठीसमासप्रतिषेधात्। (द्र०, कात० परि० सूत्रम्– "निर्धार्यपूरणाभ्याम्"– सं० ९३)। तमित्थम्भूतं देवानामपि देवं सर्वज्ञं सर्वदर्शिनं शास्त्रादौ प्रणम्य कातन्त्रस्य व्याख्यानं प्रवक्ष्यामीति सम्बन्धः। प्रणम्येति **प्रशब्देन** प्रकर्षार्थो द्योत्यते, अन्यथा प्रियतमादावुपहासपरोऽपि नमस्कारः संभवतीति। **अथात्र** सर्वज्ञं सर्वदर्शिनमिति द्वयोः पदयोरुपादानं किमर्थम्? न ह्यनयोरर्थभेदमुपलभामहे, दृशेरपि ज्ञानवचनत्वात्।

अथ सर्वं द्रष्टुं शीलमस्येति ताच्छील्यार्थो भिद्यते इति चेत्, नैवम्। ताच्छील्यं हि फलनिरपेक्षा प्रवृत्तिः। सा सर्वज्ञपदेनाप्यर्थतः कथ्यते, न हि सर्वं जानन् किमप्यभिलषति, अपि तु शीलमिदमस्य भगवतः, यदुत सर्वं जानातीति नार्थो भिद्यते। नैतदेवम्। पदद्वयोपादानद्वारेणावस्थाद्वयेऽपि तस्य भगवतो नमस्कार इति दर्शयति। तथा ह्यर्वाचीनं पदमध्यासीनः खल्वसौ भगवान् अधिष्ठितकरणग्रामः = करणाधीनज्ञानः प्रत्यक्षादिभिरेव प्रमाणैः सर्वं जानातीति न तदा ताच्छील्यम्। प्रत्यक्षादिप्रमाणायत्त-प्रकाशकत्वात्तस्येति।

यद्येवम्, कथमस्मदादिभ्यो विशिष्यते [१]भगवानिति चेद्? नैवम्। अव्याहत-प्रमाणत्वाद् भगवतः। नहि तस्य प्रत्यक्षादीनि प्रमाणानि क्वचिदपि व्याहन्यन्ते। यदा

---

१. **उत्पत्तिं च स्थितिं चैव लोकानामगतिं गतिम्।**
**वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥** (द्र०, उ०रा०च०–चन्द्रकला टीका १।९, पृ०१६)।

पुनरपगतसकलकरणवृत्तिरपराधीनज्योतिः करतलकलितकुवलयफलवदखिलमिदमनवरतमवलोकयति, तदा ताच्छील्यात् **सर्वदर्शी** भवति।

कातन्त्रस्येति।तत्रि कुटुम्बधारणे (९।१०१) चुरादाविनन्तः।तन्त्र्यन्ते व्युत्पाद्यन्ते **शब्दा** अनेनेति **"स्वरवृदृगमिग्रहामल्"** (४।५।४१) इति करणेऽल्प्रत्ययः। स चायमनेकार्थत्वाद् धातूनां व्युत्पादनेऽपि वर्तते, तेन तन्त्रमिह सूत्रम् उच्यते। ईषत् **तन्त्रं कातन्त्रम्**।कुशब्दस्य तन्त्रशब्दे परे **"का त्वीषदर्थेऽक्षे"** (२।५।२५) इति ईषदर्थे **कादेशः**। व्याख्यानम् इति। विशेषेणाख्यायतेऽनेनेति करणे युट् (४।५।९५)। **व्याख्यानं वृत्तिग्रन्थ इति, तेन हि सूत्रं व्याख्यायते। नन्वीषत् तन्त्रं जयदेवादिप्रोक्तमप्यस्ति इत्याह – शार्ववर्मिकम्** इति। शर्ववर्मणाचार्येण यत् कृतं तत् **शार्ववर्मिकम्** इति। **क्रीतादित्वाद् इकण्** (२।६।८)।

ननु यदि व्याख्यानं वृत्तिग्रन्थस्तत् कथं शार्ववर्मिकमिति, इदानीं दुर्गसिंहेन **क्रियमाणत्वात्**? सत्यमेतत्, किन्तु शर्ववर्मकृतसूत्रसम्बन्धाद् व्याख्यानमपि **शार्ववर्मिकमित्युच्यते**। तथाहि कातन्त्रशब्देन वृत्त्यादिकमपि तत्सम्बन्धाल्लोको व्यपदिशतीति। अत एव कातन्त्रसूत्रमिति षष्ठीसमासोऽपि सिद्ध इति। एतेन **श्लोकार्द्धेनाभिधानाभिधेयलक्षणः** सम्बन्धोऽभिहित इति दर्शितम्।

तथाहि कातन्त्रमभिधानम्, अभिधेयः शब्दः इत्यभिधानाभिधेयलक्षणः सम्बन्धः। **प्रयोजनं** च शब्दव्युत्पत्तिरेव। वृत्तिकातन्त्रयोरपि व्याख्यानव्याख्येयलक्षणः संबन्ध इति। **अत** एव व्याख्यानशब्दः करणसाधनो न भावसाधन इति।प्रयोजनं च कातन्त्रार्थविनिश्चयः। **परमार्थतस्तु** शब्दव्युत्पत्तिरेव प्रयोजनम्। यस्मात् कातन्त्रार्थविनिश्चयेनापि शब्दा एव व्युत्पाद्यन्त इति स्थितम्।

**[क० च०]**

**नत्वा शिवं कृतिकृताप्तनिबद्धसिन्धुमुन्मथ्य सूक्तिमयचारुपयःप्रबन्धम्।**
**ज्ञात्वा गुरोर्विबुधवृन्दविनोदनाय कामं तनोति विकलङ्कलापचन्द्रम्॥**
**श्रीमत्त्रिलोचनकृताखिलपञ्जिकायां दोषान्धकारनिकरं प्रतिपक्षदत्तम्।**
**निःसार्य सत्पथगतेरपि दर्शकोऽयं कामं भविष्यति मदीयकलापचन्द्रः॥**

**श्रीविद्याभूषणाचार्यसुषेणेन विनिर्मितः।**
**आस्तां कलापचन्द्रोऽयं कालापानां मनोमुदे॥**

**सूचीकटाहन्यायेन पूर्वं सन्धिर्निगद्यते।**
**ततश्चतुष्टयः पश्चादाख्यातमिति सङ्गतिः॥**
यद् वा– **सन्ध्यादिक्रममादाय यत् कलापं विनिर्मितम्।**
**[1]मोदकं देहि देवेति वचनं तन्निदर्शनम्॥**

ग्रन्थारम्भे विशिष्टशिष्टाचारपरिप्राप्ततया कृतम् इष्टदेवतानमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति– प्रणम्येति। तथा च– 'सर्वत्रेप्सितकार्येषु नतिरादौ प्रशस्यते' इति।

**अयमर्थः।** सर्वं महादेवं ग्रन्थादौ प्रणम्य दुर्गसिंहोक्तायाः कातन्त्रवृत्तेर्दुर्गपदान्यहं विवृणोमि। विवृणोमीति भविष्यत्सामीप्ये वर्तमाना (वर्तमानसामीप्ये वर्तमानवद् वा पा० ३।३।१३१), विवरिष्यामीत्यर्थः। प्रलयकाले यः सर्वान् हन्ति स सर्व उच्यते। आत्मनो न्यूनतां प्रतिपादयन्नाह– यथाप्रज्ञमिति। यद् वा भवतो दुर्गपदविवरणे का शक्तिरित्याह– यथाप्रज्ञम् इति। प्रज्ञा बुद्धिस्तस्या अनतिक्रमेणेत्यव्ययीभावे "वा तृतीयासप्तम्योः" (२।४।२) इति टा-स्थाने अम्भावः। विवरणक्रियाविशेषणमिति कश्चित्।

ननु 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते[2]' इति, तत् कथं दुर्गपदविवरणम् इत्याह– 'अज्ञ' इत्यादि। अज्ञानां सम्यग् ज्ञानं तदेव हेतुः कारणं तेनेत्यर्थः। अथ कथमसौ नमस्क्रियते इत्याह– सर्वकर्तारम् इति। ननु कथमत्र सर्वेषां कर्तेति षष्ठीसमासः? "तृचा च" (कात० परि०-स० ९०) इत्यनेन श्रीपतिना निषिद्धत्वात्। तथा च 'ग्रामस्य गन्ता, कटस्य कर्ता' इति न समासः। न च तृन्प्रत्यये सति "न निष्ठादिषु" (२।४।४२) इत्यनेन षष्ठ्यां प्रतिषिद्धायां द्वितीयातत्पुरुषेण सिध्यतीति

---

१. 'मोदकं देहि' इति वचने 'मोदकम्' इत्यत्र 'मा+उदकम्' इति सन्धिः, पुनश्च 'मोदकम्' इति स्याद्यन्तपदम्। तदनु 'देहि' इति क्रियापदम्। तदनुसारमेव कातन्त्रे सन्धि-नामचतुष्टय-आख्यात' इत्येतत्प्रकरणत्रयमुपनिबद्धमाचार्येण शर्ववर्मणा।

'मोदकं देहि' इति क्वत्यः पाठ इति नाहं वेद्मि। कथासरित्सागरे तु 'मोदकैर्देव! परिताडय' (१।६।११४) इति पाठ उपलभ्यते।

२. प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते (मी०श्लो० वा०-सम्बन्धाक्षेपपरिहार – श्लो० ५५)।

वाच्यम्, द्वितीयातत्पुरुषस्य नियतविषयत्वात्। यथा– "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" (पा० २।१।२४) इति। नापि सप्तमीसमासेन भवितव्यमिति वाच्यम्, षष्ठीसमासनिषेधस्य व्यर्थत्वात्? सत्यम्। "तृचा च" (कात० परि०-स० ९०) इत्यनेन कर्मणि षष्ठ्या एव समासो निषिध्यते। नात्र कर्मणि षष्ठी, किन्त्वत्र कार्यकारणसम्बन्धे षष्ठीति तस्याः समासे को विरोध इति। तथा च श्रीपतिः 'भीष्मः कुरूणां भयशोकहर्ता' (कात० परि०- समास० ९०) इति शैषिक्याः षष्ठ्याः समासः। यद् वा "जनिकर्तुः प्रकृतिः" (पा० १।४।३०) इत्यादिदर्शनात् "तृचा च" (कात० परि०-स० ९०) इत्यस्य भाषाभिन्नविषयत्वं बोध्यम्। श्रीपतिनापि तस्मिन् सूत्रे इदमेवोक्तमिति संक्षेपः।

ननु तथापि कथं सर्वकर्तृत्वं घटते, यावता वर्तमान-घटादिषु कुलालादेः कर्तृत्वं दृश्यते? सत्यम्, कुलालादेर्यत् कर्तृत्वं दृश्यते, तत्रापि तच्छक्तिरेव साधिका। अत एव तस्य भगवतः कुलालादिव्यपदेशः श्रूयते। तथा च– "[1]नमोऽस्तु कर्तृभ्यो रथकारेभ्यश्च वो नमः। नमोऽस्तु कुलालेभ्यः कर्मकारेभ्यश्च वो नमः" इति। तस्मान्मदीयग्रन्थकरणे तच्छक्तिरेव साधिकेति भगवान् नमस्य इति तात्पर्यम्। ननु तथापि दिगादीनां नित्यत्वात् कथं तस्य सर्वकर्तृत्वम्? सत्यम्, भगवतः सूर्यादिरूपेण दिगादिप्रकाशकत्वात् तत्कर्तृत्वम् अविरुद्धम्। यद्वा सर्वपदेनात्र कार्यत्वेनाभिमतवस्त्वेवोच्येत। यथा– 'सर्वशुक्ला सरस्वती[2]'। अत्र केशादिभिन्नस्य शुक्लत्वमवगम्यत इति। यद्वा– 'पद्भ्यां भूमिर्दिशः श्रोत्रात्', 'नाभ्या आसीदन्तरिक्षम्' (शु० य० ३१।१३) इति श्रुतिः।

ननु तथापि कथमसौ नमस्क्रियत इत्याह– **'सर्वदम्'** इति। ग्रन्थसमाप्त्यर्थं विमलां बुद्धिं दास्यतीति भावः। ननु यदि सर्वदो भगवांस्तदा कुबुद्धिरपि कथं न दीयते इत्याह– **'सर्वीयम्'** इति। हितार्थे ईयः। ननु यदि सर्वीयस्तदा कथमसुरास्ताड्यन्ते तेन, कथं वा केचिद् दोलारूढाः, केचिद् वाहकाः? इति, सत्यम्। ताडनादिदुःखद्वारेण

---

१. नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः।
कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः॥ (शु० य० – रुद्राष्टाध्यायी ५।२७)।

२. चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥ (काव्यादर्शः १।१)।

तेषाम् (असुराणाम्) पापानि नाशयन् तेषामपि हितायैव भवति। ननु **ग्रन्थकरणे** प्रवृत्तेन भवता स नमस्क्रियते इति कथं तेन देवेन ज्ञातव्यम्, येन शक्तिं दास्यतीत्याह– **'सर्ववेदिनम्'** इति। ननु तथापि भगवतः कैलासवासित्वात् कथं दास्यतीत्याह– **'सर्वगम्'** इति।

नन्वन्येऽपि देवा वरदाः सन्ति, तान् विहाय कथम् असावेव नमस्क्रियते इत्याह– **'सर्वदेवनमस्कृतम्'** इति। दुर्गे विषमे पदे, सिंह इव सिंहः, कातन्त्रस्य कौमारसूत्रस्य वृत्तिः। दन्त्यादिसर्वशब्देनापि महादेव उच्यते– 'सर्वः शर्वश्च शङ्करः' इति कोषदर्शनात् 'शॄ सॄ' हिंसायाम् (८।१५) इति गणपाठदर्शनाच्च युक्तो दन्त्यादिपाठ इति। अत एव **वासवदत्तायां** श्लेषः– 'गौरी सर्वान्तःपुरचारिणी' इत्यपि संगच्छते। "सर्तेर्वः" (कात० उ० ३।६१) इत्युणादिसूत्रे दन्त्यादिस्तालव्यादिश्च पाठः।

**अज्ञसंज्ञानहेतुना** इति। ननु कथं 'हेतुना' इति तृतीया, "षष्ठी हेतुप्रयोगे" (२।४।३७) इति तृतीयाबाधिका षष्ठ्येव प्राप्नोति ? नैवम्, "षष्ठी हेतुप्रयोगे" (२।४।३७) इत्यनेन हेतुशब्दस्य प्रयोगे हेत्वर्थे वर्तमानाल्लिङ्गात् हेतुशब्दभिन्नात् षष्ठी विधीयते, न तु हेतुशब्दात्। यत्तु 'अन्नस्य हेतोर्वसति' इत्यत्र हेतुशब्दात् षष्ठी दृश्यते, तत्तु अन्नशब्दस्य सामानाधिकरण्यादिति। अतो हेत्वर्थे तृतीया इति सम्प्रदायः। तन्न। "षष्ठी हेतुप्रयोगे" (२।४।३७) इत्यत्र हेत्वर्थे द्योत्ये हेत्वर्थसमानाधिकरणा षष्ठी भवन्ती अर्थाद् हेतुशब्दाद् अपीति टीकायामुक्तत्वात्। तस्माद् युक्तमिदं "कर्तृकर्मणोः कृति नित्यम्" (२।४।४१) इत्यत्र नित्यग्रहणेन तस्मिन् प्रकरणे विकल्पो लभ्यते। तथा च तत्रोक्तम्– "उत्तरत्र नित्यग्रहणादनित्यमपि प्रकरणेऽस्मिन्" इति। तेन षष्ठीविकल्पपक्षे हेत्वर्थे तृतीया प्रवर्तते। तथा च पुरुषेण संबन्धाद् हेतोरिति नदादिसूत्रे (२।४।५०) टीकाप्रयोगः– 'स्युर्ब्रह्मचरणाद्धेतोः' इति वृत्तिः।

[1]उमापतिस्तु योग्यतायाः साधकतम्यविवक्षया करणे तृतीयामाह। तथाहि–

**"अत्राज्ञसंज्ञानकहेतुनेति कृता तृतीया करणे, न हेतौ।**
**न योग्यतासाधकतम्यमत्र विवक्षितं सत्यपि तत्र षष्ठी॥"**

१. श्लोकबद्धस्य कातन्त्रव्याख्यानस्य कस्यचित् प्रणेता संभाव्यते।

ननु करणत्वं कथं संगच्छते, करणं हि साधकतमं भवति, तत्र च नियतपूर्ववर्तित्वमेव। **अत्र** तु अज्ञसंज्ञानस्योत्पत्स्यमानत्वाद् नियतपूर्ववर्तित्वं नास्ति ? सत्यम्। भाविनो ज्ञानस्य **बुद्धौ** करणत्वविवक्षेति। यद्वा अज्ञसंज्ञानहेतुः पञ्जीग्रन्थस्तस्य नियतपूर्ववर्तित्वाद् **अज्ञ**संज्ञानस्यापि नियतपूर्ववर्तित्वमुपचर्यते। तथा च –

**"अत्राज्ञसंज्ञानपदेन लक्ष्यं तज्ज्ञानमेवेति वयं प्रतीमः।**

**हेतुत्वमस्येति यथा विवाहज्ञानं निमित्तं किल वृद्धिकार्ये॥"**

वस्तुतस्तु 'यथाप्रज्ञम्' इत्यस्यैव विशेषणम्। तथाहि यथाप्रज्ञं कीदृशेन **अज्ञ**संज्ञानहेतुना ? अज्ञानां सम्यग् ज्ञानं तदेव हेतुः कारणं यस्य तेन तथा। **प्रयोजनाभिधानार्थमिति।** यद्यपीह साक्षात् प्रयोजनं नोक्तम्, तथापि **का**तन्त्रपदव्युत्पत्त्यनुसारेण शब्दव्युत्पत्तिरूपप्रयोजनलाभः। ननु 'श्लोकं चकार' इत्युक्ते **एक**मिति गम्यते, किमेकग्रहणेन ? सत्यम्, इष्टदेवतानमस्कारप्रतिपादनार्थं **संबन्ध**प्रयोजनाभिधानार्थं च। 'श्लोकं चकार' इत्युक्ते श्लोकद्वयमपि संभाव्यते, **त**न्निरासार्थम् एकग्रहणम्। यद् वा नमस्कारसम्बन्धप्रयोजनानां त्रयाणामेकेनैव श्लोकेन निर्वाहः कृत इति प्रौढिप्रतिपादनार्थमेकग्रहणमिति।

ननु [1]वररुचेः श्लोकोऽयं तत् कथं चकारेत्युक्तम् ? सत्यम्, कृधातुरिहार्पणार्थः। **यथा** भित्तौ चित्रं (त्तम्) चकार। ननु तथापि दुर्गस्याशक्तिः प्रतीयते, यतोऽन्यदीय-श्लोको लिख्यते इति, नैवम्। अन्यत्र ग्रन्थान्तरेऽस्य श्लोकस्य फलसिद्धौ सामर्थ्यदर्शना-दत्रापि स एवार्पित इति न शक्तिविरहः। वस्तुतस्तु शब्दानामनित्यत्वपक्षे वररुचि-वाक्यादन्यदेवेदं दुर्गसिंहजनितं वाक्यम्, किन्तु समानवर्णोच्चारणे न दोष इति। न हि समानवर्णकरणे कृधातोः शक्तिर्नास्ति। नित्यत्वपक्षेऽपि आनुपूर्वीविशेषविशिष्टतया चकारेति न व्याहन्यते। यथा स्मृतिवेदयोरनादित्वेऽपि स्मृतिकारा वेदकारा इति शिष्टप्रयोगः। 'कृ विक्षेपे' (५।२१) इत्यस्य प्रयोग इति कश्चित्, तन्न। टीकायां कृतवान् इत्युक्तिविरोधात्। 'कृ विक्षेपे' इत्यस्य क्तवन्तौ कीर्णवान् इति वक्तुं युज्यते।

**देवदेवम्** इत्यादीति। ननु श्लोकशब्दस्य पुंलिङ्गत्वात् तद्विशेषणस्यापि पुंस्त्वं युक्तम्, तत् कथं देवदेवमित्यादिनपुंसकनिर्देशः ? सत्यम्, नपुंसकलिङ्गोऽपि श्लोकशब्दो

---

१. कातन्त्रसूत्राणां दुर्घटवृत्तेः, स्वकृतकातन्त्रीयकृत्सूत्राणां चैत्रकूटी-वृत्तेश्च प्रणेता (द्र० – कात० व्या० वि०, पृ० ७, ८)।

दृश्यते । यथा – 'श्लोकान्यमूनि दश पर्वतराजपुत्र्या' इति । अपरं आह – 'ग्रामो दग्धः, पटो दग्धः' इतिवत् श्लोकार्द्धे श्लोकशब्दो वर्तते । एवञ्चौपचारिकाः शब्दाः **क्वचित्** स्वलिङ्गं परित्यजन्तीति । **अन्ये** तु सामान्योपक्रमम् इत्याहुः । यथा 'शक्यं श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्' (म० भा० – पस्पशा०, पृ० ४६, ४७) इति ।

केचित्तु 'देवदेवम्' इत्यादिर्यत्र श्लोककरणे इति क्रियाविशेषणमाहुः । **अपरे तु** गम्यमानेनेतिशब्देनोक्तार्थत्वाद् विभक्तिरेव न विहिता । यथा काल इति । तत् **कथमत्र** लिङ्गविचारः ? ननु चेत्यादि । अथ ननु च शब्दविप्रतिषिद्धशब्दयोरेकार्थत्वाद् **युगपत्** कथमुभयशब्दप्रयोगः ? तथा च 'ननु च स्याद् विरोधोक्तौ' (अमर० ३।४।१४) **इति** कोषः ? सत्यम् । 'ननु च' शब्दोऽयं विरोधसूचको न तु वाचकः । वाचकत्वे **हि** विप्रतिषिद्धं कर्म कृतम् इत्यर्थे, ननु च कर्म कृतम् इत्यपप्रयोगः स्यात् । यद् **वा** "ननु च प्रश्नदुष्ययोः' (द्र०, अमर० ३।३।२४८) इति विश्वप्रकाशदर्शनात् 'ननु च' शब्दः प्रश्नसूचक इति । यद् वा एकार्थशब्दद्वयोपादानादतिशयविप्रतिषेध उच्यते इति न दोषः । यद् वा चकारोऽत्रावधारणे, ननु प्रश्ने विप्रतिषिद्धमेवेत्यर्थः । एष इति । दुर्गसिंहस्यातीतत्वेऽपि तस्य ग्रन्थदर्शनात् तं बुद्धावारोप्य वर्तमानता । कथमित्यादि । गुणकथनं स्तवः, नमस्कारश्च तदुद्दिश्य स्वापकर्षबोधानुकूलव्यापारविशेषः, तथापि नमस्कारस्य गुणाधिक्यसूचकत्वात् स्तवत्वं न व्यभिचरतीति । यद्वा सर्वज्ञादिस्तुतिपद–सम्बन्धित्वाद् नमस्कारस्यापि स्तवत्वमुच्यते । तथाहि कादम्बर्यादाविति – एकद्वित्रिदेवतानमस्कारसम्भवेऽपि तावन्न भवतीत्यपेरर्थः ।

कादम्बर्यादाविति यदा बहुव्रीहिस्तदायमर्थः कुत्रचिद् वाचनिकः **कुत्रचिच्च** कायिकः । अपिशब्दः पुनरर्थे । ननु यथा कारणीभूते दण्डे विद्यमाने कुलालादेरभावाद् घटानुत्पत्तावपि दण्डस्य कारणत्वं न व्यभिचरति । तद्वदत्रापि, इत्याह – **क्वचिद्** इत्यादि । क्वचिद् ग्रन्थे इत्यर्थः । कुत्र नास्ति नमस्काराभिधानम् इत्याह – **शिशुपाल** इत्यादि । अथ भवतु नामाप्रस्तुतत्वम्, तथापि क्रियते इति चेत् – **अप्रस्तुताभिधायी** स्यात् । ततः किमिति चेत् – य एवाप्रस्तुताभिधायी स एवोपालभ्यत इति दर्शयितुमाह – तथा चेत्यादि । ननु '[1]एकदा तूभयप्राप्तौ कर्मण्येव न कर्तरि' इति **नियमाद्** व्याख्यातुकामस्येति कथं कर्तरि षष्ठी ? कथं वा 'षट्पदार्थोपवर्णनम्' इति **षष्ठी-**

---

१. द्र० – उभयप्राप्तौ कर्मणि (पा० २।३।८) ।

समासः "कर्तृप्रयोगे नियमार्थायाः' (कात० प०, स० ९१) इति परिशिष्टवचनेन निषिद्धत्वात् ? सत्यम्। व्याख्यातुकामस्य इत्यत्र सम्बन्धे षष्ठी, न कर्तरि। एवं चोभयप्राप्तेरभावात् कर्मण्येव न कर्तरीति नियमाभावात् समासो भवत्येव। ननु 'षट्पदार्थोपवर्णनम्' इति कः समासः ? न तावत् कर्मधारयः, "दिक्संख्ये संज्ञायाम्" (पा० २।१।५०) इति नियमात्। समाहारे च ईप्रत्ययप्रसङ्गान्न समाहारः। सत्यम्, समाहारद्विगुरयं समासान्तविधेरनित्यत्वादीप्रत्ययाभावः। यद् वा द्रव्यगुणादीनामियं संज्ञेति कर्मधारय एव। अथवा षण्णां पदार्थानामुपवर्णनं यत्र ग्रन्थे इति भिन्नाधिकरणबहुव्रीहिरिति। "आगामिवर्तमानाहर्युक्तायाम्" इतिवत् त्रिपदतत्पुरुषो वेति।

ननु किमर्थं सम्बन्धप्रयोजनाभिधानम् ? न चादौ संबन्धं प्रयोजनं च ज्ञात्वा विगतशङ्कः सन् प्रवर्तते इति वाच्यम्, इतरेतराश्रयदोषात्। तथाहि – प्रवृत्तो हि संबन्धादिकं जानाति, ज्ञातसम्बन्धप्रयोजनश्च प्रवर्तते इति। एतदेव मनसि कृत्वा आह – न चेत्यादि। ननु अनधीतशास्त्रं पुरुषं सम्बन्धप्रयोजनप्रतिपादकेन वचनशतेनाप्येतत् सम्बन्धप्रयोजनं प्रतिपादयितुं शक्यते, न चेति वस्त्वर्थः। तर्हि कथमनधीतशास्त्रशब्दात् कर्मणि षष्ठी ? तुम्-प्रयोगे "न निष्ठादिषु" (२।४।४२) इत्यनेन निषिद्धत्वाद् द्वितीयैव युज्यते। सत्यम्, तादर्थ्यसम्बन्धविवक्षायां षष्ठी। यत एतच्छब्दोक्तस्य सम्बन्धप्रयोजनस्यैवानिनन्तकर्तृत्वम्, न त्वनधीतशास्त्रस्य। अन्यथा सम्बन्धप्रयोजनं प्रतिपद्यमानं पुरुषं यदि तत् प्रतिपादयितुं न शक्नोति, तदा प्रतिपादयितुरेव दूषणं स्यात्, न तु सम्बन्धाद्यभिधानस्य। एतदेवोमापतिराह –

**तादर्थ्यसम्बन्धभवैव षष्ठी नात्र द्वितीया त्वनधीतशास्त्रात्।**
**यस्मादशक्या प्रतिपत्तिरेषा न प्रेषणं तद्विषयस्त्विनर्थः॥**

एतदसङ्गतमिव लक्ष्यते। तथाहि 'शक्यते' इत्यनेनोक्तार्थत्वाद् अनधीतशास्त्रशब्दात् कथं द्वितीया, अपि तु प्रथमैव। अतो नात्र प्रथमेति वक्तुं युज्यते। अपि च प्रतिपत्तिं विना प्रतिपादना न घटते, तत् कथं प्रतिपत्तिविषयः कारितार्थः शक्य इति, न हि कर्तृद्वारा क्रियामनिष्पादयतामपि हेतुकर्तृत्वं घटते।

**अपरे** अनधीतं च तत् शास्त्रं चेति अनधीतशास्त्रम्, तस्य वचनशतेन कर्तृभूतेन एतत् सम्बन्धप्रयोजनं प्रतिपादयितुं शक्यते न चेत्याहुः। अनधीतशास्त्रस्य सम्बन्धप्रयोजनमिति वा। तन्न शोभनम्, परपङ्क्तौ समधिगतसकलशास्त्रार्थशब्देन

पुरुषस्यैवोक्तत्वात् प्रक्रमाशुद्धेः। **अन्ये** तु अनधीतशास्त्रस्य पुरुषस्य स्थाने एतत् सम्बन्धप्रयोजनादिकं प्रतिपादयितुं शक्यते न चेत्यर्थ इत्याहुः। अथ अधीतशास्त्रार्थं भविष्यतीत्याशङ्क्याह – समधिगत इति। हिशब्दो यस्मादर्थेऽवधारणे वा। तदेतद् इति। तद्भगवद्वृत्तिकर्तुः श्लोकपूर्वार्द्धे यन्नमस्कारवैफल्यभाषणम्, तत् सर्वमनुचितमित्यर्थः। (तत् पूर्वार्द्धम्, एतच्च परार्द्धमित्यपि पाठो दृश्यते)। वाक्यभेदात् चकारोऽत्राध्याहार्य्यः। एतदेव व्यक्तीकुर्वन्नाह – अभिमत इति। प्रेक्षेति –

**यस्यामुत्पद्यमानायामविद्या नाशमर्हति।**
**विवेककारिणी बुद्धिः सा प्रेक्षेत्यभिधीयते॥**

(द्र०, व्या० द० इति०, पृ० ३१३)

प्रेक्षैव पूर्वं यस्मिन् करणे, तत् कर्तुं शीलं येषां ते तथा। अभीष्टेत्यादि। पुरःसरमिति कार्यविशेषणं क्रियाविशेषणं वा।

ननु तेऽपि पण्डिताः कथमेवं कुर्वन्तीत्याह – तथा चेति। ननु निष्फले कर्मणि शिष्टा एव कथं प्रवर्तन्ते इत्याह – नमस्कारेत्यादि। अविघ्नितेत्यादि। अविघ्नः संजातोऽस्या इति तारकादित्वादितच्। प्रसरतीति प्रसरा विश्वव्यापिनी, पचादित्वाद् अच्। अविघ्निता चासौ प्रसरा चेति कर्मधारयः। समर्थिता परैरनभिभवनीया (परैरनिन्दितेत्यर्थः)। अवष्टम्भ आश्रयः। **"अवादौर्जित्यनिकटाश्रयेषु"** (कात० परि०-ष० २७) इति षत्वम्। सोऽप्यनुचित इति। अपिशब्दः पुनरर्थे नतु समुच्चये, समुच्चीयमानपरपक्षस्याङ्गीकारात्। शास्त्रान्तरेत्यादि। न्यायशास्त्रप्रसिद्धैरनुमानैरित्यर्थः। अनुमानं चैतत्, नमस्कारो धर्मजनकोऽविगीतालौकिकशिष्टक्रियमाणत्वात्। यद् यद् अविगीतालौकिकशिष्टक्रियमाणं तत् तत् कर्मजनकं दर्शवत् प्रमाणेनोपलब्धमिति। तथा च नमस्कारसाध्यो धर्म उपकारसमर्थः प्रेक्षावत्साधनसाध्यत्वात्। यद् यत् प्रेक्षावत् साधनसाध्यं तत्तदुपकारसमर्थं यागधर्मवत्।

ननु यदि नमस्कारः सफलः, कथं तर्हि **कादम्बर्यादौ** व्यभिचार इत्याह – यत्रेति। ननु तत्रैव कुतोऽधर्मस्य प्राचुर्यं ज्ञातमित्याह – कार्यस्य इत्यादि। कार्यस्य सिद्धिर्न भवतीति हेतोरनुमीयते इत्यर्थः। उपसंहरन्नाह – तेनेत्यादि। इवशब्दोऽत्रासम्भावनायाम्, मात्रशब्दोऽवधारणे। प्रतिबन्धुम् = दूरीकर्तुम् इत्यर्थः। भूयांसम् **इति**।

बहुशब्दादीयन्सुप्रत्ययः। "बहोर्यादिर्भूश्च[1]" इति बहुशब्दस्य भूरादेशः, ईकारस्य च लोपः।

ननु यदि नमस्कारसाध्यो धर्मोऽधर्मप्रतिबन्धनाय न क्षमस्तर्हि नमस्कारेण किं कृतम् इत्याह– तस्य इति। यदुत इति। यत् पुनरित्यर्थः। धर्मश्चानेकसाधनसाध्य इति। तथा चोक्तम्–

**इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।**

**अलोभ इति मार्गोऽयं धर्मश्चाष्टविधः स्मृतः॥ इति।**

यद्येवं नमस्कारपुरःसरमेव कार्यं समारभन्ते इति यदुक्तम्, तदसङ्गतमित्याह– कथं चैतद् इत्यादि। इदानीं शास्त्रादौ सम्बन्धप्रयोजनाभिधाने हेतुमुक्त्वा न चैतदित्यादिना कृतदेश्यसिद्धान्तमाह– न चैतन्न शक्यते इत्यादि। अथेतरेतराश्रयरूपं दूषणं यदुक्तं तन्नोचितम्, यतो यत्नपूर्वकप्रवृत्तौ हि पुरुषः प्रयोजनादिकमपेक्षते, न त्वनुभवकृतायाम्। घनगर्जितेष्टवियोगादिवदनपेक्षितस्यापि मनसि कृत्वा ॐ ई– वचनाद् इत्यादि। अन्यैरन्यथैव व्याख्यायते। अर्थस्याधिगतिर्धर्माद् वचनादिति वचनविशेषणेऽपि "नामिनः स्वरे" (२।२।१२) इति न नुरागमः, "भाषितपुंस्कम्" (२।२।१४) इत्यादिना पुंवद्भावात्। वचनाद् याऽर्थाधिगतिस्तत्सकाशाद् इति व्यधिकरणेऽपि न दोषः। अर्थस्याधिगतिर्यस्माद् गुर्वादिस्तस्य वचनादिति वा।

ननु यस्मिन् पक्षेऽनधीतशास्त्रशब्देन पुरुष उच्यते, तस्मिन् पक्षे तस्य पुरुषस्य कर्तृकर्मज्ञानमेव नास्ति, तस्य घनगर्जितवद्ग्रहणेनापि कथमर्थबोधः, येन तत्र प्रवर्तिष्यते (प्रवृत्तिरिष्यते)। सत्यम्, अनधीतशास्त्रशब्देनात्रानधीतशास्त्रं पुरुषं प्रति मम यत्नोऽयमिति। एतदेवोपसंहरति-वचनाद्धि इति। ननु च इत्यादि। ननु कायादिव्यापार एव नमस्कारः कथं तज्जन्मेत्युच्यते ? सत्यम्। कायव्यापारशब्देनात्र हस्तादिपरिस्पन्दनलक्षणः प्रथमव्यापार उच्यते, तद्व्यापारजन्यस्य करशिरःसंयोगादिरूपस्य शेषव्यापारस्य कायव्यापारजन्यत्वम् इति।

तथा च साङ्ख्यमते वाक्शब्देन वागिन्द्रियमुच्यते, उच्यतेऽनया इति व्युत्पत्त्या। तद्व्यापारो वाय्वभिघातस्तज्जन्मा [2]वाचनिकनमस्कार इत्यर्थः। एवं मनोव्यापारशब्देन

---

१. बहोर्लोपो भू च बहोः (पा० ६।३।१५८)।

२. द्र०, पा० शि०-श्लो० ६,९

आत्ममनःसंयोग उच्यते, तदनन्तरं य आराध्यसम्बन्धः स एव मानसिकनमस्कार इति। तथा च– **"आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियम् अर्थेन"** इति क्रमः। **सङ्कल्पेत्यादि**। मानसक्रियास्वरूपाधीनत्वादित्यर्थः। तस्मिन् ध्येये, एकाग्रता = तत्परता, सैव लक्षणं चिह्नं यस्य स तथा। गच्छतस्तृणादिस्पर्शज्ञानवद् अन्यस्मिन्नपि कर्मणि ध्येयगतरूपादिग्रहणेऽपि मनोव्यापारो भवतीति भावः। ध्येयगतरूपादिदर्शनादन्यदितरव्यापारशब्देनोच्यते। समतालक्षण एकतास्वरूपः, तत्र हि तदात्मलयवशाद् ध्येयमभेदे जानन्, तेन सहैकता, सोऽहमिति, ममायं ध्येय इत्यपि ज्ञानं न भवति। ग्रन्थादौ निबन्धनान्नमस्कारस्य वाचनिकत्वमेव संभवतीत्यङ्गीकृत्य आह– तत् केन इत्यादि। **अवधारणस्यानुपपत्तेरिति**। कायिकमानसिकयोरकृतत्वे प्रमाणाभावाद् वाचनिक एव नमस्कारः कृतः, न तु कायिकमानसिकाविति स्वरूपनिश्चयस्यानुपपत्तेरित्यर्थः। ननु यथा असत्त्वे प्रमाणं नास्ति तथा सत्त्वेऽपि प्रमाणं नास्तीत्याह-- **अथवा** इति। सत्त्वप्रतिनेति पाठे द्विधा देश्यार्थः। तथाहि कथं वाचा निबन्धं ग्रन्थादौ लिखितमकार्षीत्, नमस्कारनिबन्धो ग्रन्थादौ कर्तव्य इति नियमाभावादित्येकं देश्यम्। अन्यच्च वाचनिकं वाग्व्यापाररूपमेव न कायादिव्यापाररूपमिति।

अत्राद्ये सिद्धान्तयति– **न देश्यम्** इति। कायमनोव्यापारजन्मनोऽपीत्यपिशब्दाद् वाचनिकस्यापि नमस्कारस्य निबन्धं विना शिष्यं प्रति सत्त्वज्ञापने प्रमाणाभावात्। अत्र नमस्कारः कृत इत्यवधारणानुपपत्तेः। अतो नमस्कारनिबन्धो युक्त इत्यभिप्रायः। अन्तपक्षे सिद्धान्तयति– **अथवेति**। अवश्यं शिष्यशिक्षार्थं नमस्काराणां युक्तत्वम्। वाचनिकस्य शास्त्रस्य प्रस्तावात् स वाचनिक एव लाघवादौचित्याच्च न्याय्य इति।

ननु वाचनिकमेव शास्त्रम्, न त्ववाचनिकमिति व्यर्थं वाचनिकपदम्, व्यावृत्तेरभावात् ? सत्यम्। उच्यतेऽर्थोऽनेनेति **वचनं** शब्दः, करणे युट्; **"तेन दीव्यति"** (२।६।८) इतीकण्। तेनायमर्थः शब्द एव प्रयोजनमस्येति **वाचनिकम्**। ततो वाचनिकपदेन शाब्दिकमुच्यते। अत एव शाब्दिकशास्त्रप्रस्तावान्नमस्कारोऽपि शाब्दिक एव युज्यते, व्याकरणस्य शब्दप्रधानत्वाद् इति भावः। वाचनिकपदं स्वरूपविशेषणमिति **कश्चित्**। तन्मते मेरुमहीधरादिवद् व्यवच्छेद्याभावेऽपि कर्मधारयः। **अन्ये** तु यदा शास्त्रशब्दस्य केषांचित् सङ्केतादिनाऽर्थान्तरशङ्का, तदा वाचनिकस्यार्थान्तरव्यवच्छेदकस्य कर्मधारय इत्याहुः। **मूर्खास्तु** अवाचनिकमपि गारुडादिशास्त्रमस्ति, तद्व्यवच्छेदार्थं वाचनिकपदम् इत्याहुः।

ननु कथं नमस्कारस्य वाचनिकत्वं निश्चितम्, यावता कायिकमानसिकावपि कृत्वा शिष्यशिक्षार्थं लिखितुं शक्यत इति चेत्, शिष्यशिक्षार्थमवश्यं लेखनं कर्तव्यम्। लेखनञ्च पाठपूर्वकमेव भवति, तस्माल्लाघवात् स एव पाठो नमस्कारत्वेन कल्प्यत इत्यालोच्याह – किमत्र इति। ननु तथापि न्यूनता, यावता नमस्कारान्तरापेक्षयाऽस्या महत्त्वं पौराणिकैरुक्तमिति ? सत्यम्। यावता नमस्कारान्तरावपि संभवतस्तथापि वचनगतकुशलतामभिसंधाय वाचनिक एव कृत इति। किञ्च –

**स्वकृतश्च परोक्तश्च पुराणोक्तश्च स त्रिधा।**

**वाग्रूपोऽपि नमस्कार उत्तमाधममध्यमाः॥ इति।**

तत्र इत्यादि। दिव्धातोरुकारः **"उदनुबन्धपूक्लिशाम्"** (४।६।८४) इत्यस्य विशेषणार्थः। अमङ्गलार्थकत्वाद् 'देवृ देवने' (१।४२१) इत्यस्य न ग्रहणम्। तथा च [1]**भट्टमल्लः** – देवनं रोदनमिति केचिदाहुः। **प्रणम्य इति**। "प्रपूर्वण्णमेर्णो नः" (३।८।२५) इति मूर्धन्यस्य दन्त्यः, "[2]उपसर्गादसमासे णोपदेशस्य" (पा० ८।४।६४) इति पुनर्णत्वम्।

ननु कथमत्र समासाश्रितो यबादेशः, प्रादीनां नामत्वाभावेन **"नाम्नां समासो युक्तार्थः"** (२।५।१) इत्यस्याविषयत्वात्, नामानि वस्तुवाचीन्येव, उपसर्गाणां तु धातुवाच्यार्थद्योतकतया वस्तुवाचित्वं नास्ति। तथा च **"नाम्नि वदः क्यप् च"** (४।२।२०) इत्यत्र नाम्नीति किम् ? अनुवाद्यमिति प्रत्युदाहृतम्। ननु वस्तुवाचित्वात् पचतीत्यादीनामपि नामत्वे 'देवदत्तः पचति' इत्यादावपि समासः स्यादिति न वाच्यम्, **"आख्याताच्च तमादयः"**(२।६।४०) इत्यत्र आख्यातग्रहणादाख्यातभिन्नस्यैव नामत्वमिति ज्ञापितत्वात्। अन्यथा नामद्वारेणैवाख्यातादपि तमादयः सिद्धाः, किम् आख्यातग्रहणेनेति। अत्र [3]हेमकरः – "प्रादीनां नामत्वमस्तीति समासः"। "यस्मात् स्यादयस्तन्नाम" इति

---

१. भट्टमल्लः कश्चिद् धातुव्याख्याकार इति स्मर्यते रमानाथेन स्वकीयकातन्त्रधातुवृत्तौ –

**क्षुणाति च क्षुणीते च क्षुणोत्याप्लवनेऽपि च।**

**क्षन्दते क्षुन्दते वापि षडाप्लवनवाचिनः॥** इति भट्टमल्लः (कात०धा०वृ०, भू०२९७)।

२. उपसर्गाण्णोपदेशस्य (कात० परि० – ण० १६)।

३. हेमकरः कश्चित् कातन्त्रसूत्रव्याख्याकार आसीदिति व्याख्यासारादिवचनैर्विज्ञायते। द्र० – कात० व्या० वि०, पृ० १७।

नामलक्षणम्। तथाहि नामप्रकरणं लिङ्गप्रकरणं चोच्यते। **वस्तुवाचीनीति** यदुक्तं तस्यायमभिप्रायः – ननु वर्णमयानि घटपटादीनि नामानि, तानि कीदृशानि, येन युक्तार्थः समास इत्याह – वस्तुवाचीनि इति।

यद्येवम् 'अनुवाद्यम्' इत्यत्र "नाम्नि वदः क्यप् च" (४।२।२०) इति क्यप् स्यात्, नैवम्। प्रत्ययविधानं प्रति उपसर्गाणां नामत्वं नास्ति **"उपसर्गे त्वातो डः"** (४।२।५२) इति ज्ञापकात्। अन्यथा **"नाम्नि स्थश्च"** (४।३।५) इति कप्रत्यये 'सुग्लः, सुम्लः' इति सिध्यति। न च तर्हि 'प्रज्यः, प्रह्वः' इत्यत्र कप्रत्यये सम्प्रसारणे इयुवादेशस्य विषयत्वान्न सिध्यतीति वाच्यम्, **"अन्यतोऽपि च"** (४।३।४९) इति डप्रत्ययेनैव सिद्धत्वात्। यथा 'मित्रह्वः, ब्रह्मज्यः' इत्यत्र **"आतोऽनुपसर्गात्"** (४।३।४) को न भवतीति प्राह। तन्न, नामत्वेऽपि युक्तार्थत्वाभावात् कथं समासः स्यात्। तथाहि – टीकायां नामपदानां युक्तार्थः समासाख्यो भवति, शब्दार्थयोर्वाच्यवाचकलक्षणः **संबन्ध** इति शब्द एव समाससंज्ञाफलं लभते, तस्मात् प्रादीनां वाचकत्वाभावाद् युक्तार्थतैव नास्तीति। अत्र सिद्धान्त उच्यते, नात्र **"नाम्नां समासो युक्तार्थः"** (२।५।१) इति समासः, किन्तु **"[1]अनुकरणं च कृता"** इति वचनात्।

**अस्यायमर्थः –** अनुकरणं समस्यते कृता कृदन्तेन सह। चकारात् प्रादयः समस्यन्ते। ननु **"उपसर्गादसमासेऽपि णोपदेशस्य"** (पा० ८।४।१४) इत्यत्रासमास-ग्रहणात् कथं णत्वम्? सत्यम्, समासपदेनात्र "नाम्नां समासो युक्तार्थः" (२।५।१) इत्यनेन विहितस्य समासस्य ग्रहणम्, मुख्यत्वात्। अतोऽत्र **"[1]अनुकरणं च कृता"** इत्यनेन समासस्य विहितत्वाद् णत्वं भवत्येव। यद् वा यदत्र असमासग्रहणं तद् यत्रोपसर्गता नास्ति तद्व्यावर्तनार्थं बोध्यम्। **'उद्वृत्तो हि ग्रन्थः समधिकं फलमाचष्टे'** इति [2]न्यायात्। तेन प्रगतो नायको यस्मात् स 'प्रनायको देशः' इत्यत्र णत्वं न भवति।

अथात्र उपसर्गता कथं नास्तीति चेदुच्यते – [3]यत्क्रियायुक्ताः प्रादयस्तं प्रत्युपसर्गाः' इति न्यायात्। अत्र गतिक्रियासम्बन्धिनः प्रशब्दस्य नयतिं प्रत्युपसर्गत्वं नास्त्येव।

---

१. द्र०- अनुकरणं चानितिपरम् (पा० १।४।६२), कुगतिप्रादयः (पा० २।२।१८)।

२. इङ्गितेनोन्मिषितेन महता वा सूत्रप्रबन्धेनाचार्याणामभिप्रायो लक्ष्यते (का० वृ० न्यास० १।१।७)।

३. प्रादयः, उपसर्गाः क्रियायोगे (पा० १।४।५८, ५९);
यत्क्रियायुक्तस्तं प्रति गितिसंज्ञको भवति (जै० परि० वृ०, परि० ९९)।

यद्येवम्, उपसर्गत्वाभावादेव न भवति किमसमासग्रहणेन ? प्रशब्दोऽयं गतिक्रियां प्रत्युपसर्गत्वेन दृष्टः, अतो भूतपूर्वगत्या कदाचिदिहाप्युपसर्गत्वाशङ्का स्यात्, अतोऽसमासग्रहणमिति ।

ननु षष्ठी त्रिविधा सम्भवति – कृल्लक्षणा, सम्बन्धलक्षणा, निर्धारणलक्षणा च । तदत्र कस्या ग्रहणमित्याह – सम्बन्ध इत्यादि । च पुनरर्थे । ननु कथमत्र षष्ठीसमासो व्यवच्छेद्याभावात् ? तथाहि यत्रोभयोर्व्यवच्छेद्यव्यवच्छेदकभावस्तत्र षष्ठीसमास इति । अत्र तु स एव देवो देवानां स्वामी, नान्य इति । यथा देवेन देवाः स्वाम्यन्तराद् व्यवच्छिद्यन्ते, न तथा स देवो देवानामेव आराध्य इत्याराधकान्तराद् व्यवच्छिद्यते । मादृशानामपि तदाराधकत्वाद् अनाराधकत्वे नमस्कारोऽयुक्तः स्यात् ? सत्यम्, एकतरव्यवच्छेदेऽपि षष्ठीसमासो दृश्यते । यथा 'कर्णकुण्डलं करिकरभः' इति । अथ कर्णादिपदमप्रयुक्तम् इति चेत्, न । स्वरूपविशेषणस्यापीष्टत्वादिति **कुलचन्द्रः** ।

**महान्तस्तु** 'अहो रे गरीयान् कालः समागतः, यदश्रुतं श्रावयति अदृष्टमपि दर्शयति, न हि पाणिनिकातन्त्रादितन्त्रे उभयोर्व्यवच्छेद्यव्यवच्छेदकभाव एव षष्ठी-समास आदृतः, कर्णकुण्डलादिपददर्शनात् । अथ कदाचित् कुण्डलाधारं करादिकं व्यावर्त्य कर्णारूढत्वप्रतिपादनाय यदि कर्णादिशब्दप्रयोगस्तदा संभवतीति चेद्, भवतु । भूष्यभूषकभावसंबन्धे कः समाधिः ? अपप्रयोग इति चेत्, दृष्टस्त्वमपरो भगवान् ईश्वरः, यतः साधुत्वासाधुत्वे स्वयमेव नियमयसि । एवं प्रमेयाधारः सर्वेश्वर इत्यादयः शिष्टप्रयोगा दृश्यन्ते इत्याहुः । तर्हि यत्रोभयोर्व्यवच्छेद्यव्यवच्छेदकभावस्तत्र षष्ठी समस्यते इति यदुक्तं तत् कथं संगच्छते इति चेत्, कटी शृणोति, न तु मादृशः ।

**अन्ये** तु – अत्रोभयोर्व्यवच्छेद्यव्यवच्छेदकभावो घटत एव । यतः **'सामान्ये विशेषबुद्धिजनकत्वं व्यवच्छेदकत्वम्'** इति जयादित्यादिभिर्ग्रन्थकृद्भिरुक्तम्, तच्चोभयोरेव परस्परं विद्यते । तथाहि – देवा देवस्याराध्यत्वेन बुद्धिं जनयन्ति । अन्यथा केवलं 'देव' इत्युक्ते तस्याराध्यत्वं न प्रतीयते, किन्तु दिविस्थत्वमेव प्रतीयते । एतेन विशेष-बुद्धिजनकत्वाद् देवा व्यवच्छेदकाः । दिविस्थत्वमात्रादाराध्यत्वेन देवो व्यवच्छिद्यते इति देवस्य व्यवच्छेद्यत्वम्, तथा इन्द्रादयो देवा ममैवाराधका इति देवोऽपि देवाना-मेवाराधकत्वेन विशेषबुद्धिं जनयति, अन्यथा केवलं देवानामित्युक्ते सामान्यसम्बन्धः प्रतीयते ।एतेन सामान्ये विशेषबुद्धिजनकत्वाद् देवस्य व्यवच्छेदकत्वम्, सामान्यसंबन्धिभ्यो देवा व्यवच्छिद्यन्ते इति देवानां व्यवच्छेद्यत्वम् । **वस्तुतस्तु** यथा 'राज्ञः पुरुषः' इति

वाक्ये राजा स्वाम्यन्तराद् व्यवच्छिद्यते, पुरुषश्च स्वान्तरात्, तथा देवदेवम् इत्यत्र बोध्यम् । तथाहि – 'देवानां देवः' इति वाक्ये आराधकैर्देवैरन्येभ्य आराधकेभ्य आत्मानो व्यवच्छिद्यन्ते । अतो देवानां व्यवच्छेदकत्वं व्यवच्छेद्यत्वं च ।

अयं भावः – देवा वदन्ति अस्माकमेवाराध्योऽयं देवो नान्येषाम्, भगवदाराधकत्वमन्याराधकेभ्यो व्यवच्छिद्य देवा आत्मनि स्थापयन्ति, तथा आराध्येन देवेन अन्यस्मादाराध्यादात्मा व्यवच्छिद्यते । अतो देवस्य व्यवच्छेद्यत्वं व्यवच्छेदकत्वं च ।

**अयं भावः**– देवो वदति 'एते देवा ममैवाराधका नान्यस्य इत्याराध्यत्वमन्यस्मादाराध्याद् व्यवच्छिद्य आत्मनि देवः स्थापयति । एतत्प्रकारस्य समासमात्रौपयिकत्वाद् देवानामेवाराध्योऽयं कथमसौ शास्त्रकर्त्रा नमस्क्रियते इति नास्ति देश्यावतार इति । नहि नरपतेरश्वादिपतित्वं नास्तीति । अत एव 'देवानामपि देवः' इत्यत्र [1]**त्रिलोचनो**ऽपिशब्दं दत्तवान्, किन्त्वस्मिन् पक्षे [2]**कुलचन्द्रेण** यदुक्तम् "यथा देवेन देवाः स्वाम्यन्तराद् व्यवच्छिद्यन्ते न तथा स देवदेवः" इति । तच्चिन्त्यम्, टीकाविरोधात् । **वस्तुतस्तु** समासराशेर्नित्यत्वादखण्ड एवायं शब्दः । तथाहि– **"देवदेवो महादेवो लेलिहानो वृषध्वजः"** इति ।

ननु आराध्याराधकसम्बन्धस्योभयनिष्ठत्वात् परदेवशब्दान्न कथं षष्ठी ? नैवम् । तत्र द्वितीयैवास्ति बाधिकेति, किन्तु भेदकादेव षष्ठी, न तु भेद्यात् । तदुक्तम् –

**भेद्यभेदकयोः श्लिष्टः सम्बन्धोऽन्योऽन्यमिष्यते ।**
**द्विष्ठो यद्यपि संबन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ इति ।**

भेदकं विशेषणम्, भेद्यो विशेष्यः, न तु निर्धारणे इति । अत्र **कुलचन्द्रः** आक्षिपति पञ्जिकाम् । तथाहि – नात्र निर्धारणप्रसङ्गो जात्यादेरभावात् । तथाहि – जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम्[3] । यथा जातौ-पुरुषाणां

---

१. कातन्त्रवृत्तिपञ्जिकाकारस्त्रिलोचनः ।

२. दुर्गवाक्यप्रबोधनामकव्याख्यायाः प्रणेता । साम्प्रतं तद्व्याख्यांशो धातुसूत्रीयः कारकपादीयश्च संप्राप्यते ।

३. काशिका २।२।१० ।

क्षत्रियः शूरः । गुणे – गवां कृष्णा सम्पन्नक्षीरा । क्रियायाम् – गच्छतां धावन्तः शीघ्राः इति । तत्कथम् एकतमस्याभावे देवदेवमित्यत्र स्यादिति । अत्र केचिद् देवानां मध्ये यो देवो महान् इति महत्त्वगुणेन निर्धार्यते इति वदन्ति, तन्न । शूरादिपदवद् महच्छब्दस्यानुपात्तत्वात्, अध्याहारेऽपि प्रमाणाभावात् ।

**अपरे** त्वाहुः – बहुषु घटेषु मध्ये घटमानयेत्यादिवद् इहाप्येकवचनेन एकत्वाभिधानम्, बहूनां देवानां मध्ये देवमित्येकत्वगुणेन निर्धार्यते इति । तदप्यसङ्गतम्, बहूनां मध्ये सर्वेषामेव प्रत्येकमेकत्वस्य विश्रान्तत्वात् कृष्णादिपदवत् शब्दानुपात्तत्वाच्च । **महान्तस्तु –** 'क्रियाप्रधानसर्वज्ञादिपदसान्निध्याद् बहूनां देवानां मध्ये सर्वज्ञं देवं प्रणम्येत्यर्थे 'गच्छतां धावन्तः शीघ्राः' इत्यादिवन्निर्धारणं निर्विवादमेव घटते' इति प्राहुः । तन्न, यावता 'पुरुषाणां मध्ये क्षत्रियः शूरः' इत्यादिषु यथा समुदायस्य पुरुषशब्दस्य निर्धारणेन क्षत्रियपदेन समासयोग्यताऽस्ति, न तथा प्रथमदेवशब्दस्य निर्धारणेन सर्वज्ञपदेनेति, किन्तु परदेवशब्देन सहास्ति ।

अथात्र यथा निर्धार्येण परदेवशब्देन समासप्राप्तिविचारः, तथा अत्रापि निर्धार्येण शूरपदेनेति न वाच्यम्, यावता निर्धारणे या षष्ठी तस्याः शूरादिपदापेक्षया निर्धारणप्रत्ययात् न समास इति टीकायामुक्तत्वात् । तस्मादेवमुच्यते-देवानां मध्ये यो देवः सर्वनियोजकः स सर्वज्ञ इति निर्धार्यते । एवं सति समासयोग्यताऽस्ति ।

**परमार्थतस्तु** जातिक्रियागुणाभावेऽपि यथा केनचिद् विशेषणेन पुरुषोत्तम इति समस्यते, तद्वदत्रापि समासप्राप्तिः । तथा च **शङ्कराचार्यचरणाः** सहस्र[1]नामभाष्ये (वि० स० ना०-श्लो० १६) "पुरुषोत्तम इति निर्धारणषष्ठ्याः समासः "न निर्धारणे" (पा० २।२।१०) इति प्रतिषेधो न भवति जात्याद्यनपेक्षया समर्थत्वात् । यत्र च जातिगुणक्रियापेक्षया पृथक् क्रियते तत्रासमासः" इति । अत एव **उमापतिना यदुक्तम्** – 'षष्ठ्या अयुक्तार्थतयाऽसमासोऽत्राभावमात्रे प्रतिषेधशब्दः' इति, तदसङ्गतमेव । पुरुषोत्तमशब्दवदत्रापि युक्तार्थाभावस्य विद्यमानत्वादिति । तस्मात्

---

१. अथवा पञ्चमीसमासः, तथा च भगवद्वचनम् –

**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥** (गीता १५।१८) ।

लक्षणेन प्रसक्तस्य समासस्यानभिधानेन निराकृतत्वात् पञ्जिकायां यत् प्रतिषेधोपादानं तद् युक्तमेव, अभिधानस्य प्रयोगानुसारित्वात् 'पुरुषोत्तमः' इत्यत्र समासः स्यादिति ब्रूमः। **तमित्थमित्यादि**। ननु क्रीडतामाराध्यं क्रीडन्तमित्यर्थे को विशेषः प्रतीयते इत्याह – **सर्वज्ञम्** इति। यद्यपि नमतिरयमकर्मकः, यथा **'नमन्ति फलिनो वृक्षाः'** इति, **'इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य'** (रघु० १३।७०) इति, तथापि नमिरयं पूजार्थे सकर्मकः, अवनतिमात्रार्थे त्वकर्मकः।

**वस्तुतस्तु** यदुद्दिश्य स्वापकर्षबोधानुकूलव्यापारविशेषः स तस्य नमस्कार इति नमस्कारलक्षणे सति उद्देशक्रियान्तर्भावात् सकर्मकता। ननु तथापि 'नमः शिवाय'[1] इतिवत् **'देवदेवं प्रणम्य'** इति स्वरूप एव वाचनिकनमस्कारो नमेरर्थः। ततश्च देवदेवम् इति कथं कर्मत्वम् ? न ह्यात्मनो व्याप्य आत्मा भवितुमर्हति, नैवम्। 'प्रणम्य' इति पदमात्रं वाचनिकनमस्कारः। अतो व्याप्यताऽस्ति, किन्तु नमस्कारप्रधानत्वाद् वाक्यस्यापि वाचनिकनमस्कारत्वमित्यदोषः। ननु आदिशब्दस्य कतमोऽर्थः ? न तावत् सामीप्यार्थः, तदा ग्रन्थसमीपे नमस्कृत्य व्याख्यानं प्रवक्ष्यामीत्युक्ते उपलक्षणत्वान्नमस्कारस्य ग्रन्थानिविष्टत्वाद् ग्रन्थावयवत्वं न स्यात्।

अथ न स्यादेवेति चेत्, प्रतीतिविरोधः स्यादिति अवयवार्थोऽपि न घटते। तथाहि– ग्रन्थादौ ग्रन्थावयवे इत्यर्थे सति वाचनिकनमस्कारस्यैवाद्यावयवरूपत्वाद् देवदेवं प्रणम्यादाविति आधाराधेयभावो न घटते भेदाभावादिति नैवम्, भ्रान्तोऽसि। आदिशब्दस्य धर्मवचनत्वादाद्यवयवत्वे वर्तते। ततश्च धर्मधर्मिणोः सुतरामेवाधाराधेयभावो घटते। एवञ्चायमर्थः स्यात् – ग्रन्थादौ तदाद्यावयवीभूतं देवदेवकर्मकं नमस्कारं कृत्वा व्याख्यानं वृत्तिग्रन्थं प्रवक्ष्यामीति।

ननु तथापि नमस्कारादिसमुदायस्यैव वृत्तिग्रन्थत्वेन व्यवहारात् प्रवक्ष्यामीत्यपेक्षया पूर्वकालानुपपत्तौ क्त्वाप्रत्ययो न स्यात्। नमस्कारपुरस्सरमेव कार्यं समारभन्त इति शिष्टाचारविरोधश्च स्यात्। तस्माद् दुरुत्तर एवायं पूर्वपक्षः। नैवं भ्रान्तोऽसि, न ह्यत्र व्याख्यानशब्देन समुदायग्रन्थ उच्यते, किन्तर्हि विशेषेणाख्यायतेऽनेनेति व्युत्पत्तिमहिम्ना विवरणग्रन्थ एवोच्यते। अतो विवरणापेक्षया आदिशब्दस्य

---

१. भगवत्पादशङ्करविरचितस्य शिवपञ्चाक्षरस्तोत्रस्य प्रतिश्लोकमन्ते 'नमः शिवाय' इति पठ्यते।

**सामीप्यार्थो**ऽपि घटते, समुदायापेक्षया सूत्रे वक्तव्यादिवन्नमस्कारस्य ग्रन्थत्वमस्तीति **न दोषः**। एवञ्चावयवपक्षेऽपि नमस्कारस्य ग्रन्थत्वे विवरणापेक्षया तस्य पूर्वकालत्वमिति **क्त्वाप्रत्ययः**। नमस्कारपुरस्सरमेव कार्यं समारभन्त इत्यत्र कार्यशब्देन उद्देश्य-**कार्यमेवोच्यते**, अन्यथाऽनवस्था स्यात्।

ननु तथापि किमादिग्रहणेन? क्त्वाप्रत्ययेनैव तदर्थस्योक्तत्वादिति। सामीप्यप्रतिपादनायेति चेन्न, नमस्कारवृत्तिग्रन्थयोः सुतरामेव समीपत्वात्। अत्र **ऋजवः**– 'परकालेऽपि क्त्वाप्रत्ययो दृश्यते, यथा **'ठात्कृत्वा भग्नो दण्डः'** इति। नैवम्, अत्रापि ठाच्छब्दपूर्वको दण्डो भग्न इति लौकिकविवक्षया पूर्वकाल[1] एव क्त्वाप्रत्यय इति। अथ **'मुखं व्यादाय स्वपिति'** इत्यत्र परकालेऽपि क्त्वाप्रत्ययो दृश्यते। अत्र हि स्वपनानन्तरमेव मुखव्यादानमिति, तस्मात् पूर्वकालताबोधनार्थमादिग्रहणं कर्तव्यमेव। सत्यम्, अत्रापि व्यादानोत्तरमपि स्वपनमित्यभिप्रायेण प्रयोगोऽयमिति **केचित्**। अतः पूर्वकाल एव क्त्वाप्रत्यय इति चेत्, सुखबोधार्थमादिग्रहणम्। यथा–

**प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।**
**पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः॥** (प्र० पा० भा०– मङ्ग०)

इत्यत्र स्पष्टार्थोऽनुशब्दः इत्याहुः। **अपरे** तु आदौ सार्ववर्मिकं व्याख्यानं पश्चाद् वाररुचिकम् इति प्रतिपादनार्थम् आदिग्रहणमित्याहुः। तन्न, टीकापञ्ज्योरस्वरसात्। **कुलचन्द्रस्त्वाह**– सामीप्यप्रतिपादनार्थमादिग्रहणमिति चेन्न, नमस्कार-वृत्तिग्रन्थयोः सुतरामेव समीपत्वात्। तस्मात् प्रयोगाविर्भावार्थम् इति। **महान्तस्तु**– नतिवृत्त्योरति-सन्निकृष्टत्वप्रतिपादनार्थमादिग्रहणम्। अन्यथा शतवर्षानन्तरकृतग्रन्थेऽपि (वर्षशतोप-स्थितनमस्कारस्य) पूर्वकालता सम्भवतीत्याहुः। एतच्च न चारुतरम्, यतः प्रतीति-बलेनाव्यवधान एव शक्तिग्रहः। नहि भुक्त्वा व्रजतीत्यत्र प्रातर्भोजन– सायंगमनयोः प्रतीतिरस्ति, अपि तु अविलम्ब एव भोजनपूर्वकं गमनप्रतीतिः।

वयं तु ब्रूमः– आदिशब्दं विना केवलं प्रणम्येत्युक्ते प्रतिसूत्रादौ नमस्कारबोधः स्यात्। आदिग्रहणे तु आदावेवेत्यर्थे ग्रन्थसमुदायस्यादाविति लभ्यते। **प्रशब्देन** इति। प्रशब्दोऽयं नोपहासनिरासार्थः। उपहासनिरासस्य भक्तेर्वा नमस्कार्यतो वा प्रतीतेः।

---

१. एककर्तृकयोः पूर्वकाले (कात० ४।६।३)।

"तन्वङ्गि ! प्रणमामि सत्यवचसा यत् पाण्डवो निर्जितः" इत्यादौ सत्यपि प्रशब्दे उपहासावगमात् । "नत्वा शङ्करवचनं ज्ञात्वा शास्त्राण्यनेकशो विदुषाम्" इत्यादौ प्रशब्दाभावेऽपि भक्तिश्रद्धातिशयेन प्रकर्षदर्शनादिति **कुलचन्द्रो** हसितवान् ।

अत्रेदमालोचयामः– भक्तिश्रद्धातिशयलक्षणं प्रकर्षं द्योतयता प्रशब्देन प्रकृष्टे (तादृश) एव नमस्कारो विघ्नविघाताय समर्थ इति सूच्यते, तेन शिष्या व्युत्पाद्यन्ते । अन्यथा भक्तिपूर्वकमुपहासपूर्वकं वा नमस्कारमात्रमेव फलसाधकमिति शिष्याः संभावयेयुः । अत्र च नमस्कार्ये भगवति नोपहासः संभवतीति को दोषः, निबन्धनस्य शिष्यशिक्षार्थत्वात् । योजना पुनरीदृशी । प्रशब्देन प्रकर्षार्थो द्योत्यते, अन्यथा प्रकर्षार्थ-द्योतकं प्रशब्दं विना प्रियतमादावुपहासपरोऽपि नमस्कारः संभवतीति हेतोर्नमस्कार-मात्रमपि फलसाधकमिति शिष्याः सम्भावयेयुरिति भावः । अथवा प्रशब्देन प्रकर्षार्थो द्योत्यते, न तूच्यते । वाचकत्वे किं दूषणमित्याह– **अन्यथा** इति । प्रियतमादावन्यथा-प्रकारोऽपि नमस्कारः संभवतीति, स एव क इत्याह-**उपहास** इत्यादि । एतदुक्तं भवति – यदि भक्तिश्रद्धातिशयलक्षणप्रकर्षार्थस्य वाचकः प्रशब्दः स्यात्तदा 'तन्वङ्गि ! प्रणमामि' इत्यादावपि भक्तिश्रद्धातिशयलक्षणप्रकर्षस्यावगमः स्यात् । द्योतकत्वे पुनर्यत्र यादृशो भक्तिश्रद्धातिशयलक्षणप्रकर्षो वा उपहासलक्षणप्रकर्षो वा तत्र तादृश एव द्योत्यते इति नास्ति **कुलचन्द्राक्षेपः** ।

**अपरे** तु प्रकृते प्रशब्देन प्रकर्षार्थो द्योत्यते, प्रियतमादावन्यथोपहासो द्योत्यते इत्यर्थः । कुत इत्याह – उपहास इत्यादि, इति हेतोरित्याहुः । ताच्छील्यम् इत्यादि । ननु फलनिरपेक्षा **प्रवृत्तिस्ताच्छील्यम्**[1] इति ताच्छील्यलक्षणं तस्य भगवतस्तु कर्मणि प्रवृत्तौ फलमेव नास्तीति सद्भिर्निश्चितम्, तत् कथं तस्य फलस्य सापेक्षत्वं निरपेक्षत्वं वा संभवतीति । सत्यम्, फलाभावेऽपि फलनिरपेक्षत्वं संभवतीति । तथाहि – फलं भवतु, न भवतु वा, तन्नापेक्षत एवेति न दोषः । **अन्ये** तु हेतुरहितत्वमपि ताच्छील्यमिति, हेतवश्च दर्शनक्रियासाधकनेत्रादीनीति । अर्वाचीनमाधुनिकमित्यर्थः ।

इदानीं कातन्त्रपदव्युत्पत्तिरूपप्रयोजनप्रतिपादनार्थं दर्शयन्नाह – **तन्त्र्यन्ते** इति । "आमन्त्रिते सिः संबुद्धिः" (२।१।५) इति ज्ञापकाद् व्यञ्जनद्वयपूर्वमप्यनुषङ्गो

---

१. "ताच्छील्यं तत्स्वभावता । पुष्पाहरः । पुष्पाद्याहरणे स्वाभाविकी फलानपेक्षा प्रवृत्तिरस्येत्यर्थः" (काशिका ३।२।११)। तच्छीलो यः स्वभावतः फलनिरपेक्षस्तत्र प्रवर्तते (काशिका ३।२।१३४)।

नकार इति कातन्त्रपदसिद्धिः। प्रवक्ष्यामीति "पचिवचिसिचि०" (३।७।१८) इत्यादिनाऽनिट्। करणे युडिति।

अत्र **कुलचन्द्रः** – "सूत्रविधायकत्वात् तस्मिन् कातन्त्रे सर्ववर्मविहितं यद् व्याख्यानं तदहं वक्ष्यमाणग्रन्थेन प्रवक्ष्यामि इति ग्रन्थकारस्य किल प्रतिज्ञासीत्। अतोऽस्य वृत्तिकरणं युक्तम्, अन्यैः कृतासु वृत्तिषु सूत्रमात्रव्याख्यानात्। ये तु करणसाधनं व्याख्यानं वृत्तिग्रन्थः, सर्ववर्मकृतसूत्रसंबन्धात् सार्ववर्मिकम् इत्याहुः, तेषां मते सर्ववर्मविहितं व्याख्यानं प्रवक्ष्यामीति भावसाधनं दर्शयता टीकाकृता सह विरोधः। अन्यवृत्तितुल्या प्रतिज्ञा, लक्षणया शब्दप्रयोगः, उपचारकातन्त्रपदयोरेकतरपौनरुक्त्यम्। ये पुनः कातन्त्रशब्दस्य नानार्थकल्पनायां संशयमुत्पाद्य सार्ववर्मिकपदेन व्याख्यानं विशेषयन्तस्तत् त एव बुध्यन्ते, न तु मादृशाः" इति पञ्जिकाम् आक्षिपति। अत एव **केचित्** पठन्ति –

**त्रिलोचनो ह्यत्र समाधिलोचनो न दौर्गसिंहीयपदे मनो ददौ।**

**यतस्तु मुख्यार्थ इहोपपद्यते ततः कथं स्याद् उपचारचातुरी॥इति।**

अत्रोच्यते– भावसाधनं दर्शयता टीकाकृता सह विरोध इति यदुक्तं तदकिञ्चित्करमेव। न हि भावसाधनपक्ष एव कश्चिद् विशेषोऽस्ति करणसाधनपक्षे वा दोष इति, उक्तदोषाणामुद्धरिष्यमाणत्वात्। यत्तु न भावसाधन इति पञ्जीकृद् वक्ष्यति, तत्रापि शिरश्चालने नञ् प्रतिपत्तव्यः। नाप्यन्यवृत्तितुल्या प्रतिज्ञा, यावता सार्ववर्मिकसूत्रसम्बन्धाद् व्याख्यानम् अपि सार्ववर्मिकमिति यदुक्तं तदपि सूत्रकृत्तात्पर्यसम्बन्ध्यपीति प्रकटीकृतमिति। लक्षणया शब्दप्रयोगस्त्ववश्यं कर्तव्यः, लक्षणया यथा सूत्रकृत्तात्पर्यं प्रतीयते, न तथा मुख्यया वृत्त्या।

तथा च **आलङ्कारिकाः** – "गङ्गायां घोषः इत्यत्र गङ्गापदेन [1]तीराभिधाने यथा [2]शैत्यपावनत्वादिकं प्रतीयते न तथा 'गङ्गातीरे घोषः' इत्यनेन। अन्यथा मुख्यवृत्त्यैव प्रयोगस्य प्रशस्तत्वाद् गौणवृत्तिकल्पना विफलैव" इति प्राहुः।

---

१. लक्षणावृत्तिबलेन। नागेशभट्टस्तु परमलघुमञ्जूषायां शक्तेरेव प्रसिद्धाप्रसिद्धरूपं भेदद्वयं मनुते। तदनुसारमप्रसिद्धशक्तिबलेनैव गङ्गापदेन तीराभिधानम्।

२. व्यञ्जनावृत्तिबलेन।

एवं च सति न भावसाधन इति नञो निषेधार्थ एव। किञ्च भावसाधनपक्षेऽपि उपचारस्यानिवार्यत्वम्, तथाहि– व्याख्यानशब्देन स्वशिष्यबोधानुकूलव्यापारविशेष उच्यते – न ह्येकस्य सर्ववर्मजनितत्वं दुर्गसिंहजनितत्वं च संभवति। अतोऽन्यथानुपपत्त्या सार्ववर्मिकपदेन तत्समानतात्पर्यकत्वं तत्समानजातीयत्वं वा लक्ष्यते इत्यवश्यं वाच्यम्। यच्चोपचारकातन्त्रपदयोरेकतर-पौनरुक्त्यमित्युक्तं तदप्यसङ्गतम्, सूत्रसंबन्धेनोपचारस्य सूत्रकृत्तात्पर्यविशेषोपलभायोपादानात् कातन्त्रपदव्युत्पत्तिमहिम्ना प्रयोजनाभिधानार्थत्वाच्च। यच्च संशयम् उत्पाद्य व्याख्यानं विशेषयन्त इत्युक्तम्, तदप्यसङ्गतम्। कातन्त्रपदं हि आधुनिकसङ्केतितं तत्कथमस्य [1]कौमार-व्याकरणे रूढित्वम्? व्युत्पत्तिमहिम्ना जयदेवादिप्रोक्तस्यापि वाचकत्वात्। यच्चोक्तं त एव बुध्यन्ते न तु मादृशा इति, तेन काऽस्माकं हानिः? [2]न ह्ययं दर्पणस्यापराधो यदेनम् अन्धो न पश्यतीति जितं त्रिलोचनेन। ननु सार्ववर्मिकसूत्रसम्बन्धाद् व्याख्यानमपि सार्ववर्मिकम् इत्युक्तमस्ति। कोऽसौ संबन्ध इत्याह– वृत्तिकातन्त्रयोः इत्यादि। ननु कातन्त्रार्थविनिश्चयस्य पुरुषार्थत्वाभावात् कस्यचिदिह प्रवृत्तिर्न स्यादित्याह– परमार्थतः इत्यादि।

**[समीक्षा]**

१. संस्कृतग्रन्थों में आशीर्वादात्मक, नमस्कारात्मक तथा वस्तुनिर्देशात्मक मङ्गलाचरण प्रसिद्ध हैं – "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि मङ्गलम्" (का० आ० १।१४)। यहाँ टीकाकार आदि ने इनसे भिन्न तीन प्रकार के मङ्गल माने हैं– कायिक-वाचनिक- मानसिक और प्रकृत ग्रन्थ में वाचनिक नमस्कार को ही उचित सिद्ध किया है। शिशुपालवध ग्रन्थ की निर्विघ्न परिसमाप्ति में यज्ञ– यागादि धर्म को कारण माना गया है, क्योंकि इसमें मङ्गलाचरण नहीं किया गया है।

२. ग्रन्थ का विषय = शब्द, प्रयोजन या फल = शब्दव्युत्पत्ति या अर्थनिर्णय तथा सम्बन्ध = अभिधानाभिधेयभाव स्वीकार किया गया है।

३. व्याख्याकारों ने प्रसङ्गतः महाभाष्य, श्लोकवार्तिक, कादम्बरी, शिशुपालवध तथा वासवदत्ता आदि ग्रन्थों के कुछ वचन उद्धृत किए हैं।

---

१. भगवतः कुमारस्यानुग्रहेण प्राप्तत्वात्, कुमार्या सरस्वत्या सहास्य सम्बन्धसत्त्वाच्च कौमारम्।

२. नैष स्थाणोरपराधो यदेनमन्धो न पश्यति। पुरुषापराधः स भवति। (नि०-अ०१ पा० ५)।

४. श्रीपति, उमापति, भट्टमल्ल, कुलचन्द्र, जयादित्य तथा शङ्कराचार्य आदि के भी मतों का स्मरण किया गया है।

५. महान्, मूर्ख, आलङ्कारिक, केचित्, अन्ये, अपरे तथा साङ्ख्यमत आदि प्रतीकों द्वारा कुछ मतों की चर्चा की गई है।

६. 'अस्यायमर्थः, अयं भावः, वस्तुतस्तु, परमार्थतस्तु' आदि वचनों द्वारा कुछ विषयों का स्पष्टीकरण किया गया है।

७. 'वाक्, देव, ताच्छील्य, सर्वज्ञ, तन्त्र, कातन्त्र' प्रभृति कुछ शब्दों की व्युत्पत्तियाँ दिखाई गई हैं।

८. कलापचन्द्रकार ने प्रसङ्गतः शब्द के अनित्यत्व की चर्चा की है तथा दुर्गसिंह से पूर्ववर्ती कातन्त्रवृत्तियों को केवल सूत्रव्याख्यानपरक माना है।

९. कलापचन्द्रकार सुषेण विद्याभूषण के अनुसार वृत्तिकार दुर्गसिंह को शैवमतानुयायी मानना होगा, जबकि वृत्तिकार-टीकाकार के अभेद से उन्हें बौद्धमतानुयायी तथा कुछ अन्य प्रमाणों के आधार पर वैदिकमतानुयायी भी माना जाता है (द्र०, संस्कृत के बौद्ध वैयाकरण, पृ० १५९-६६)।

किंवदन्ती के अनुसार यदि दुर्गसिंह की ही उपाधि अमरसिंह मान ली जाए तो दुर्गसिंह तथा अमरसिंह को अभिन्न व्यक्ति स्वीकार किया जा सकेगा और उस स्थिति में इन्हें तिब्बती-वाङ्मय के अनुसार 'बौद्ध' तथा जैन-मान्यता के अनुसार 'जैन' भी कहना उचित होगा (द्र०, संस्कृत के बौद्ध वैयाकरण, पृ० १३७-५४)।

१०. कातन्त्रलिङ्गानुशासन के अन्तिम वचन के आधार पर दुर्गसिंह के अन्य भी तीन नाम हैं– दुर्गात्मा, दुर्ग, दुर्गप। 'दुर्गसिंहोऽथ दुर्गात्मा दुर्गो दुर्गप इत्यपि'।

११. कलापचन्द्रकार ने दुर्गसिंह के मङ्गलवचन "देवदेवं प्रणम्यादौ" को वररुचिकृत माना है।

## १. सिद्धो वर्णसमाम्नायः (१।१।१)

**[सूत्रार्थ]**

कलापव्याकरण (शास्त्र) में अकारादि वर्णों का पाठक्रम लोकव्यवहार के ही अनुसार समझना चाहिए, स्वकल्पित नहीं ॥१।

[दु० वृ०]

सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः। न पुनरन्यथोपदेष्टव्य इत्यर्थः। [१]सिद्धशब्दोऽत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा। यथा – सिद्धमाकाशम्, सिद्धमन्नम्, काम्पिल्यः सिद्ध इति। वर्णा अकारादयः, तेषां समाम्नायः पाठक्रमः ॥१।

[दु० टी०]

सिद्धः। सिद्धः प्रज्ञातश्च। वर्णा अकारादयो न तु ब्राह्मणशुक्लादयः, शब्दानुशासनत्वात्। सम्यग् आम्नायन्ते ज्ञायन्तेऽस्मिन्निति समाम्नायः वर्णानां व्यूहो लोकत एव सिद्धो न पुनरन्यथोपदेष्टव्यः। तत्रैव हि स्वरादिव्यवहारोऽनादिप्रवृत्तस्तेनैव व्यवहारेण प्रकृति-प्रत्यय-लोप-आगम-वर्णविकारैः शब्दा व्युत्पाद्यन्ते। यदि पुनर्व्यवहारोऽपि साध्यते, शब्दाश्च व्युत्पाद्यन्ते, तदा यत्नगौरवं प्रसज्येत। ननु "तत्र चतुर्दशादौ स्वराः, कादीनि व्यञ्जनानि" (१।१।२, ९) इति संज्ञाविधिरस्ति, नास्तीति ब्रूमः।

नायं सञ्ज्ञाविधिः, अपि तु वर्णानामन्यथोपदेशप्रतिषेधः। अन्यथोपदेशेन हि वर्णानां सञ्ज्ञा विधीयन्ते, ताः पुनरिहैव वर्णसमाम्नाये लोकप्रवृत्ताः, किमन्यथोपदेशेनेति प्रतिषेध एव साध्यत्वेन परिणत इति। किमर्थं पुनरिह दीर्घोपदेशः संवृतविवृतोदात्तानुदात्तसमाहारभेदभिन्नानामकारादीनां यथा ग्रहणमेवमिकारादीनामपि। नहि तेष्वत्वादिसामान्यं न सम्भवति, कथमिकारादिषु तर्हि तदत्वं नास्ति ? श्रुतिभेदादिति चेत्, अथ मन्यसेऽकारोऽन्यथा श्रूयते अन्यथा चेकारः, न हि भिन्नस्वभावतया श्रूयमाणयोरेव जातिरुपलभ्यते। किमकाराकारयोरेका श्रुतिः। न ह्यकारमुच्चरन्तमाकारतया आकारं वा अकारतया प्रतिपद्यते लोकः। नहि 'आनेतव्या गावः' इति गवामानयनमानेतव्या गाव इति च गवानयनप्रतिषेधं प्रतिपद्यते।

यद्येवं प्लुतोपदेशप्रसङ्गो नहि ते भिन्नश्रुतयो न भवन्ति। नैतदेवम्, स्वराः (दीर्घाः) एवानवच्छिन्नसन्ततयो बहुशोऽभिधीयमानाः प्लुतव्यपदेशं लभन्ते। दीर्घोपदेशाद् वा अकारादिजातयः प्लुता अपि निर्दिष्टा वेदितव्याः। नहि दीर्घप्लुतयोः

---

१. "सिद्धे शब्दार्थसंबन्धे" (म० भा० - पस्पशा०) इति वार्त्तिकसूत्रस्य महाभाष्ये नित्यानित्यरूपमर्थद्वयमेव सिद्धशब्दस्य दर्शितम्।

श्रुतिभेदः संभवति, येनानयोर्जातिभेदं प्रतिपद्यामहे। कथं पुनर्ह्रस्वदीर्घयोरवर्णादिव्यपदेशः, नहि तत्रात्वादिसामान्यमस्तीति ? सत्यम्। नायं वर्णशब्दो जातिमाह, अपि तु यस्य वर्णस्य येन वर्णेन सवर्णसञ्ज्ञा, तयोः समुदायोऽवर्णादिव्यपदेशं लभते। यदि पुनर्वर्णशब्दो जातिमभिधत्ते, सन्ध्यक्षरेष्वपि समुदायमभिदधीत। विसर्जनीयोपदेशात् तदादेशयोरपि जिह्वामूलीयोपध्मानीययोरुपदेशो वेदितव्यः। कस्मात् पुनर्ऌकार उपदिश्यते ? नहि धात्वादिषु ऌकारः प्रयुज्यते। ननु ऌकारम् उच्चारयतीति किमिदं नाम न भवतीति। तथा च–

**समालम्बितकौपीनसत्करण्डकशोभिना।**

**ऌकाराकारदण्डेन धर्मावासमुपागतः॥**

इति सकललोकप्रसिद्धश्चायम्। वर्णसमाम्नाये [1]ऌकारस्य प्रयोजनं चिन्त्यम्, न पुनरपह्नवो विधेय इति। सिद्ध इति अकर्मकलक्षण एव कर्तरि क्तप्रत्ययः, तदन्तश्च मङ्गलमप्याविष्करोति। यथा दधि, दूर्वा इति। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते। तथा च "अथ परस्मैपदानि" (३।१।१) इति मध्ये अथशब्दो मङ्गलार्थः, "आरुत्तरे च वृद्धिः" (३।८।३५) इति अन्ते च वृद्धिशब्दः ॥१।

**[वि० प०]**

सिद्धः। सिद्ध इत्यादि। अस्यैव तात्पर्यार्थमाह– न पुनरन्यथोपदेष्टव्य इति। **अयमर्थः**– पूर्वाचार्यप्रसिद्धां स्वरव्यञ्जनादिसञ्ज्ञामपनीय [2]केचिदपूर्वामिव अज्झलादिसंज्ञां प्रणीतवन्तस्तत्प्रतिषेधार्थमिदमुच्यते। कुतः ? यतः शब्दाः खल्विह साध्यत्वेनाभिमताः। ते च लोकप्रसिद्धाभिरेव संज्ञाभिः साध्यमानाः सुबोधा भवन्ति, नाप्रसिद्धाभिरिति। अथ संज्ञापि कथन्न साध्यते इति चेत्, नैवम्। प्रथमतः सञ्ज्ञा साध्या साधितया च पश्चात् तया शब्दा व्युत्पाद्या इति यत्नगौरवम् आपद्येत। एतेन प्रतिषेध एव साध्यत्वेन परिणत इति। यथा 'दक्षिणेन चक्षुषा पश्यति' इत्युक्ते वामेन न पश्यतीत्यवगम्यते। ननु "तत्र चतुर्दश०" (१।१।२) इत्यादिभिर्योगैः स्वरादिसंज्ञा

---

१. ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः (म०भा० – प्रत्याहारा०, ऋ ऌक् – वा० १)।

२. पाणिनिस्तदनुसारिणोऽन्ये चन्द्रजिनेन्द्रप्रभृतयः शाब्दिकाचार्याः।

विधीयमाना दृश्यन्ते इत्ययुक्तम्, पूर्वाचार्यप्रसिद्धसञ्ज्ञान्वाख्यानद्वारेणेतरप्रणीतसञ्ज्ञान्तर-प्रतिषेध एव तैरपि साध्यः, अन्यथा स्वरादिसञ्ज्ञा हि प्रसिद्धाः किमर्थं विधीयन्त इति। सिद्धशब्द इत्यादि। [1]सर्वपारिषदत्वाद् व्याकरणस्यार्थत्रयं घटते। तत्र नित्या वर्णा इति दर्शने नित्यार्थः। अनित्यवादिनां च मते निष्पन्नार्थः।

ये तु मन्यन्ते– नामी वर्णा नित्यास्तल्लक्षणायोगात्। तथाहि– सदकारण-वन्नित्यमिति नित्यलक्षणम्। वर्णाश्च कण्ठताल्वादिकारणक्रमानुविधायिजन्मानः कथं नित्या भवितुमर्हन्तीति, व्योमादिष्वनुपलब्धेः। नाप्यनित्याः। स एवायं शब्दो यः पूर्वमुपलब्ध इति प्रत्यभिज्ञानादर्थप्रतिपत्त्यन्यथानुपपत्तेश्च। शब्दा हि संकेतवशादर्थे धियम् आविर्भावयन्ति। ते यद्यनित्याः स्युस्तर्हि गृहीतसङ्केतस्य शब्दस्य प्रध्वंसे सत्यगृहीत इदानीमन्य एव प्रतिपत्तिकाले शब्द उपलभ्यते, तत्कथमर्थप्रत्ययः स्यात्, न चासौ न भवतीति। तस्मान्नामी वर्णा नित्याः, नाप्यनित्याः। किं तर्हि वृद्धपरम्परयाऽनवच्छिन्नसन्तानाः प्रसिद्धा एव।

न खल्वसौ कालोऽस्ति यत्रामी प्राणिनो गोशब्दादिव्यवहारविकला इति। तस्मात् प्रसिद्धार्थ एव सिद्धशब्द इति। स चायं 'षिधू शास्त्रे माङ्गल्ये च' (१।९) इत्यस्माद् "गत्यर्थाकर्मक०" (४।६।४९) अकर्मकलक्षणेन कर्तरि क्तप्रत्ययेन सिद्धः। तदन्तश्च मङ्गलमप्याविष्करोति। ततश्च [2]मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राण्यव्याहतप्रसराण्यायुष्मद्व्याख्यातृश्रोतृकाणि च भवन्ति। तथा च "अथ परस्मैपदानि" (३।१।१) इति मध्येऽथशब्दो मङ्गलार्थः, "आर् उत्तरे च वृद्धिः" (३।८।३५) इत्यन्ते वृद्धिशब्दो मङ्गलार्थः।

अथ वर्णशब्दो यद्यप्यनेकार्थः, यदाह– वर्णा गुणाक्षरयशःप्रकाराः स्युः, तथापि शास्त्रप्रस्तावाद् अकारादय एव वर्णा इत्याह– वर्णा अकारादयः इति। तेषाम-

---

१. सर्ववेदपारिषदं हीदं शास्त्रम् (म० भा० २।१।५८)।

२. द्र०, म० भा०– पस्पशा०, पृ० ४१; १।१।१;

"भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमागमं प्रयुङ्क्ते। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युरिति" (म० भा० १।३।१)।

कारादीनाम् । सम्यग् आम्नायन्ते ज्ञायन्तेऽस्मिन्निति **समाम्नायः** । "इङाभ्यां च" (४।५।६) इत्यधिकरणे घञ्, "आयिरिच्यादन्तानाम्" (३।६।२०) इत्यायिरादेशः। पाठक्रमो नियतव्यूह इत्यर्थः ॥१।

[क० च०]

**सिद्धः ।**

**[1]राजा कश्चिन्महिष्या सह सलिलगतः खेलयन् पाणितोयैः**

**सिञ्चंस्तां व्याहृतोऽसावतिसलिलतया मोदकं देहि देव।**

**मूर्खत्वात् तन्न बुद्ध्वा स्वरघटितपदं मोदकस्तेन दत्तो**

**राज्ञी प्राज्ञी ततः सा नृपतिमपि पतिं मूर्खमेनं जगर्ह ॥**

पुरा किल श्रीशालि (सालि) वाहनाभिधानं वसुधाधिपं झटिति व्युत्पादयितुं प्रतिश्रुतवता भगवता सर्ववर्माचार्येण कुमाराभिधानो भगवान् भवानीसुतस्तपसा समाराधितः, स च तदाराधनाधीनतामुपगतः सन् निजव्याकरणज्ञानमाविर्भावयितुं पद्यपादरूपं सूत्रमिदमादिदेश– सिद्ध इत्यादि ।

**अल्पाक्षरमसन्दिग्धं सारवद् गूढनिर्णयम् ।**

**निर्दोषं हेतुमत्तुल्यं सूत्रमित्युच्यते बुधैः ॥ इति वररुचिः ।**

तत्र साम्प्रदायिकमिदं व्याख्यायते–

**उपोद्घातः पदं चैव पदार्थः पदविग्रहः ।**

**चालना प्रत्यवस्था च व्याख्या तन्त्रस्य षड्विधा ॥**

**अस्यायमर्थः** – तत्र व्याख्यानार्थं गुरोः समीपोच्चारणम् उपोद्घातः, विभक्त्या परिच्छेदः पदम्, प्रकृतिविभक्त्योरन्वाख्यानं पदार्थः, समासपदस्य विभागकथनं पदविग्रहः, प्रकृतिप्रत्ययाभ्यां लब्धस्यार्थस्यादेशश्चालना, चालितपदस्य प्रयोजनोपन्यासपूर्वकं स्थापनं प्रत्यवस्था । एतत्तु यथासम्भावनमूहनीयम् । षड्विधा इति । न्यूनाधिकत्वनिराकरणाय षड्-ग्रहणम् । ननु कथमस्मिन् डत्वप्रसङ्गः, "अनव्यय०" (२।५।२९)

---

१. कथासरित्सागरे (१।६।१४) कथेयं विस्तरेणोपलभ्यते ।

इत्यादिना सत्वविषयत्वात्। न हि वर्णशब्दीयवकारस्य पवर्गत्वं नास्तीति वाच्यम्, क्तान्तस्य वृञ्धातोर्वर्ण इति निपातनात्।

तथा च – ओष्ठ्यत्वाद् उरोष्ठ्योपधस्य च (३।५।४३) इत्यनेन प्रावुवूर्षतीत्यादिकं सिद्धमिति। यदि पुनर्वर्ण [1]वर्णक्रियायामिति (९।२४३) वर्णधातोरेवेदं रूपम्, तथापि उदूटोरभावात् पवर्गीयत्वं बोध्यम्। तथा हि – उदूटो यत्रेत्यादि। नैवं प्रायिकमेतत्। किञ्च तत्राव्ययप्रकृतिविसर्गवर्जनादनव्ययस्यापि प्रकृतिविसर्गस्यायं विधिः, न प्रत्ययविसर्गस्य। "नञिवयुक्त०" (कात० परि० ५१; काला० परि० ६४) इति यादृग्जातीयस्येति न्यायात्। किञ्च कखपफेष्वेव सकारस्य विषयः। तथा च तत्रैव टीकायामुक्तम् – "घोषवति घोषवत् कार्यमेव गम्यते"। यथा अयोघोषः, पयोघोषः, पयोभोजनमित्यादीति केचित्। **केचित्तु** – तस्य सकारस्य समासविषयत्वाद् असमासे कथं स्यादित्याहुः। तन्न। अव्ययादन्यदनव्ययं लिङ्गमुच्यते, तस्य विसृष्ट इति विभक्तेर्न स्यात् तदा कः पठति, कः फलति इति दर्शयता टीकाकृता सह विरोधः। तर्हि कथं 'भ्रातुष्पुत्रः, शुनस्कर्णः' इत्यादौ प्रत्ययस्थस्य सकारो दृश्यते ? सत्यम्, क्वचिदधिकारादित्युक्तम्।

यद् वा यथा 'अयोघनः, पयोवसनम्, पयोभावः' इत्यादौ घोषवति न भवति, तथात्रापीति। तत्रैव कथं न स्यादिति चेत्, तत्र टीकाकृतोक्तं घोषवत्युत्त्वमेव। तर्हि 'कखपफेषु' इति वक्तुमुचितम्, किं वर्गग्रहणेन ? सत्यम्, अनुष्टुप्पूरणार्थमेव। ननु तथापि कथमोत्वप्रसङ्गः ? असिद्धं बहिरङ्गमन्तरङ्गे' (कात० परि० ३५; काला० परि० ४२) इति न्यायादिति चेत् ? न, स्वरानन्तर्ये तस्यानित्यताभ्युपगमात्।

ननु किमिदं सूत्रम् ? तल्लक्षणं चोक्तम् –

**[2]अधिकारो विधिः संज्ञा निषेधो नियमस्तथा।**
**परिभाषा च शास्त्रस्य लक्षणं षड्विधं विदुः॥**

---

१. वर्ण क्रियाविस्तारगुणवचनेषु (कात० धा० पा० ९।२४३)।

२. गोयीचन्द्रस्तु अतिदेशभेदं पृथक्त्वेन परिगणयति, न च निषेधम् –
**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥** (संक्षिप्तसार – विवरणटीका १)।

तत्र नायमधिकार:– वर्णसमाम्नायो वेदितव्य इति वाक्यार्थसमाप्तावधिक्रियते इत्यनन्वयापत्तेः। नापि विधिः – वर्णसमाम्नायस्य प्रसिद्धत्वादत्यन्ताप्राप्तेरभावात्। तथा च "विधिरत्यन्तमप्राप्तौ" (द्र०, व्या० द० इ०, पृ० ३७९) इति। नापि संज्ञा – प्रयोजनाभावात्। नापि निषेध:– नञोऽनुपात्तत्वात्। यदि तात्पर्यार्थमादाय निषेधो भविष्यति, तदा तत्र चतुर्दश इत्यादिभिरपि निषेधः स्यात्। तेषामपि अच्संज्ञानिषेधार्थत्वात्। स्यादिति चेत्, न। व्यवहाराभावात्। नापि नियम:– वर्णसमाम्नायः सिद्ध एव। नापि सिद्ध इति नियम:– सिद्धस्यापि वर्णसमाम्नायस्य 'अ-इ-उ-ऋ-ऌ-क्' इत्यादिप्रत्याहाररूपेणाप्रसिद्धीकृतस्यापि वर्णसमाम्नायवाच्यत्वात्। नापि परिभाषा – सिद्धान्तरम् अनूद्य नियमकारित्वाभावात्। अतः कुलचन्द्र उद्देशसूत्रमिदमित्याह। तदुक्तम् –

**उद्देशोऽथ विभागश्च लक्षणं च त्रिधा मतम्।**
**परीक्षा च चतुर्द्धा च क्वचित् केचित् प्रचक्षते॥**

प्रतिपादयितुमिष्टस्य विभागाद्यर्थस्य नाममात्रेण सङ्कीर्तनमुद्देशः। उद्देशस्य संज्ञाभिर्विभजनं विभागः। इतरव्यावृत्त्या येन स्वरूपं लक्ष्यते तल्लक्षणम्। संशये स्वरूपं परीक्ष्यते यया सा परीक्षा। एषा च क्वचिदेव, सर्वत्र संशयाभावात्। तन्न, व्याकरणसम्प्रदायसिद्धषड्विधभिन्नत्वात्।

अपरस्त्वाह – विधिनिषेधसूत्रम् इदम्, तदप्यसङ्गतम्, वक्ष्यमाणवचनानामपि संज्ञानिषेधत्वापत्तेः। वयं तु नियम इति ब्रूमः। तथाहि ज्ञेयत्वेन द्वयमेव समुपस्थितम् – प्रसिद्धोऽप्रसिद्धश्चेति। अत्र नियमयति – सिद्ध एव वर्णसमाम्नायो ज्ञातव्यो न तु 'अ इ उण्, ऋ ऌक्' (मा० सू० १,२) इत्यादिप्रत्याहाररूपेणाप्रसिद्ध इति।

यद्येवम् अजादिसंज्ञा स्वरादिसंज्ञा च द्वयमेव समुपस्थितम्, तत्र स्वरादिसंज्ञाभिरेव व्यवहर्तव्यं नाजादिभिरिति वक्ष्यमाणवचनमपि नियमार्थं स्यात्? सत्यम्। किन्त्वेवं मन्यते – सर्वेषां वाक्यानामवधारणफलकत्वान्नियम एवेति। यद्येवमनेनैव न्यायेन वक्ष्यमाणानामपि सर्वेषां नियमत्वं स्यादिति चेत्, न। तेषां साक्षात् संज्ञादिभिर्विशेषवचनैरेवाघ्रातत्वात्।

यद्यपि नियमेन निषेध एव साध्यते, यथा **"जस्शसौ नपुंसके"** (२।१।४) इति, तथापि यत्र साक्षान्निषेधोऽवगम्यते तत्र निषेधः। यत्र तु तात्पर्यवशादेव गम्यते तत्र नियम इत्यनयोर्भेदः। यद्यपि परिभाषापि नियम एव, यथा "प्रत्ययः परः"

(३।२।१)। तदुक्तम्– "अनियमे नियमकारिणी या सा परिभाषा" इति, तथापि विधीनां पाक्षिकप्रवृत्तौ सत्यां यया नियम्यते सा परिभाषा। तथाहि– "गुपूतिज्किद्भ्यः सन्" (३।२।२) इत्यादिना विहितः सन्नादिः कदाचिद् गुपादेः पार्श्वतः पृष्ठतो वा प्राप्तस्तदा "प्रत्ययः परः" (३।२।१) इत्यनेन परत्वं नियम्यते। एवं "युगपद्वचने परः पुरुषाणाम्" (३।१।४) इत्यादिष्वपि बोद्धव्यम्। **अन्ये** तु येन विध्यन्तरमनूद्य किञ्चिन्नियम्यते तस्य परिभाषात्वमिति भेदः। तथाहि– "प्रत्ययः परः" (३।२।१) इत्यनेन "गुपूतिज्किद्भ्यः सन्" (३।२।२) इत्यादिकमनूद्य परत्वं नियम्यते। "अनि च विकरणे" (३।५।३) इत्यादौ तु न तथा। नैवम्, तदैकवाक्यतापक्षे "शेषाः कर्मकरण०" (२।४।१९) इत्यादिसूत्रस्यापि परिभाषात्वप्रसङ्गः स्यात्, तस्यापि "तस्मात् परा विभक्तयः" (२।१।२) इत्यनूद्य प्रवर्तमानत्वात्।

तस्मादिदमालोचयामः– विधीनां नित्यप्रवृत्तौ सत्यां येन नियम्यते स नियमः। तथाहि– "पञ्चादौ घुट्" (२।१।३) इत्यनेन नित्यं सर्वस्मिन्नेव लिङ्गे घुट्त्वप्राप्तौ "जसुशसौ०" (२।१।४) इत्यनेन नियम्यते। एवं "शेषाः कर्मकरण०" (२।४।१९) इत्यादीनामपि बोद्धव्यम्। यच्च "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति" इति श्रूयते, तत्तु नाम्नो विपर्ययमात्रम्, न तु वस्तुनः। तदुक्तम्– "श्लिष आलिङ्गने" (दि० २९) इति सूत्रे अर्थन्यासकृता अस्मिन् व्याकरणे नियम एव परिसंख्यायते इति परिसंख्या परिभाषा इत्यर्थ इति (टीकायां विधौ नियमकारिणीति विधिपदस्वरसादिदं व्याख्यातम्)।

इदानीं प्रकृतमनुसरामः– यद्यपीह 'वेदितव्यः' इति पदं शब्दानुपात्तम्, तथापि भगवतः कुमारस्याप्तत्वात् तद्वचनान्यथानुपपत्तिभयादिदं व्याख्यायते, तद् यथा– खलु भोः शर्ववर्मन्! तव शिष्यैः 'अ आ' इत्यादिरूपः सिद्धो वर्णसमाम्नायो वेदितव्य इति, न पुनर्भवता तेभ्यः पाणिनिवदन्यथाप्रकारम् 'अ इ उण्, ऋ ऌक्' इत्येवं प्रत्याहाररूप उपदेष्टव्य इति।

ननु पाणिनीयैरप्येतादृशवर्णसमाम्नायः पठ्यते, तत्कथमन्यथात्वं तस्येति चेत्, न। तादृशं पठित्वापि प्रत्याहाररूपेण यदन्यथात्वं परिकल्प्यते, तदेवात्र निषिध्यते इति भावः। ननु सूत्रे नञोऽनुपात्तत्वात् कथं वृत्तौ न पुनरित्यादिकं विवृतमित्याह– **अस्यैवेति** सूत्रस्यार्थः। तात्पर्यार्थो यस्मिन् वाक्ये तद् वाक्यमाह। तदेव किमित्याह– **न पुनरन्यथोपदेष्टव्य** इति।

यद् वा तात्पर्यार्थमाह – केन पुनरित्यादि इत्यनेन इत्यर्थः। अस्मिन् पक्षे न पुनरन्यथोपदेष्टव्य इति कश्चित् पञ्जिकापाठोऽपि संगच्छते, तत्प्रतिषेधार्थमिदमिति। यद्यपि सूत्रेण प्रत्याहाररूपस्यैव निषेधः क्रियते, तथापि प्रत्याहारस्याजादीनां संज्ञाकारणीभूतत्वात् कारणनिषेधेनैव कार्यनिषेधः सुतरामेव संगच्छते इत्यजादिसंज्ञानिषेधो युक्त इति न दोषः।

अथ अप्रसिद्धाभिः संज्ञाभिः साध्यमानाः कथं सुबोधा न भवन्तीति अज्ञातार्थत्वादिति चेत्, तदा आदौ संज्ञां विधाय ज्ञातार्थायां सत्यां पश्चाद् विधिसूत्रतयैव व्यवहारः क्रियतामिति मनसि कृत्वा आह – अथ संज्ञा इति। साधितया प्रसिद्धार्थतया ज्ञानार्थतयेति यावत् तात्पर्यार्थं विविच्य समुदायार्थं सङ्कलयन्नाह–तेन इत्यादि। परिषीदन्ति अस्यामिति **परिषत्** सभा, सम्पदादित्वादधिकरणे क्विप्। सर्वेषां परिषत् सर्वपरिषत् तत्रोपस्थितं व्याकरणं सर्वपारिषदम्[1], तस्य भावस्तस्मात् सर्वसभायामुपस्थितत्वादित्यर्थः। अर्थत्रयं घटते इति, सिद्धशब्दस्येति शेषः।

त एव के इति शिष्यजिज्ञासायामाह – ये तु इति। किं तर्हि प्रसिद्धा इति शेषः। नित्या एव कथन्न भवन्तीत्याह – तल्लक्षणायोगादिति। सदकारणवन्नित्यमित्यस्यायमर्थः – सत् सत्ताशालि, अकारणवत् कारणरहितं यत् तन्नित्यमिति। केवलं सदित्युक्ते घटादीनामपि नित्यत्वप्रसङ्गः। केवलमकारणवदित्युक्ते प्रागभावस्यापि स्यात्। नहि तस्य किमपि कारणमस्ति। अनादित्वाद् इत्युक्तं पदद्वयोपादानम्। नाप्यन्योऽन्याभावात्यन्ताभावयोरव्याप्तिः, सत्पदेन महाप्रलयकालीनस्य विवक्षितत्वात्। तर्हि प्रागभावेऽप्यव्याप्तिरिति चेत्, न। महाप्रलये सति पुनः सृष्ट्यभावात् तस्य प्रतियोगिजनकत्वाभावेऽपि सत्यभावात्।

एवं सत्यकारणवद्ग्रहणं व्यर्थमिति चेत्, न। ध्वंसाभावव्यावर्तनार्थत्वात्। ताल्वादि इति। विधायो विधानं तदस्यास्तीति विधायि। ताल्वादिकारणक्रमेणानुविधायि कण्ठदेशसंयोगस्य पश्चाद्भावि जन्म येषां ते तथा इत्यर्थः। कारणवत्तोपपत्तौ नित्यत्वाभावे किं प्रमाणमित्याह – व्योमादिषु इति। नित्यस्य सर्वसम्मतम् उदाहरणमिदम्, अत्र तथानुपपत्तेः कारणवत्तोपपत्तेरभावादित्यर्थः। अनुभूतस्यानुभूयमाने अभेदबुद्धिः प्रत्यभिज्ञा, यथा 'सैवेयं प्रदीपज्वाला, स एवायं रवेरातपः' इत्यादि।

---

१. सर्ववेदपारिषदं हीदं शास्त्रम् (म० भा० २।१।५८)।

ननु प्रत्यभिज्ञानं भ्रमज्ञानमित्याह – अर्थप्रतिपत्ति० इति । अन्यथा अन्येन प्रकारेण अर्थप्रतिपत्तेरनुपपत्तेः । ननु शब्दस्यानित्यत्वे कथमर्थप्रतिपत्त्यन्यथानुपपत्तिरित्याह – शब्दा हि इति । न चासाविति । असावर्थप्रत्ययो न च न भवति, अपि तु भवत्येवेत्यर्थः, शब्दानां नित्यत्वाद् इति । उपसंहरन्नाह – तस्मादिति । नामी वर्णा इति नित्यत्वानित्यत्वेन निश्चेतुमशक्या इत्यर्थः । अनवच्छिन्नसन्तानाः अनवच्छिन्नसन्ततयः इत्यर्थः ।

ननु यदि अनवच्छिन्नसन्ताना वर्णास्तर्हि कथं संज्ञा भवतीत्याह – न खलु इत्यादि । प्राणिनो लोका गोशब्दव्यवहारशून्या इत्यर्थः । स चायम् इत्यादि । अनित्यपक्षे कथं कर्तरि क्तः, धातोः सकर्मकत्वात् । यो हि अनित्यभावः सोऽन्यसाध्य इति नियमात् ततः स्वयं कर्तृत्वाभावात् । वर्णसमाम्नायो यः सिद्धोऽन्येन साधित इत्यर्थे कथमकर्मकत्वम् ? सत्यम् । अनित्यपक्षेऽपि धातोर्निष्पत्त्यर्थविवक्षया स्वयं कर्तृता विवक्षणीया । यथा विक्लित्तिवचने ओदनः पचतीति उमापतेर्दुर्बुद्धिः । तन्न । सिद्धशब्दस्य उत्पन्नत्वाभिधायकत्वात् । उत्पत्तिश्चाद्यक्षणसम्बन्धस्तस्य वर्ण एव कर्ता, नहि तत्साधकः कश्चित् । न चास्य धातोर्व्याप्यः सम्भवतीति ।

धात्वर्थतावच्छेदकक्रियाफलाभावादिति कुतः सकर्मकत्वसम्भावनामात्रमपि कुतो वा स्वयं कर्तृत्वविवक्षा, अन्यथा भूप्रभृतीनामपि सकर्मकत्वं कथं न ब्रूयाः । तदन्तश्च मङ्गलमप्याविष्करोतीति, यथा दध्यानीयतां दूर्वा चेति अन्यार्थमुक्तं कार्येषु प्रवर्तमानानामपि मङ्गलाय तद् भवतीति, अत एवादौ प्रयुक्तः । अन्यथा प्रतिपाद्यत्वाद् वर्णसमाम्नायस्यादौ निर्देशो युक्त इति । एतदेव मनसि कृत्वाह – **मङ्गलादीनीति** ।

ननु अत्र [1]सिद्धशब्दस्य मङ्गलार्थत्वाद् मङ्गलवाचकादीनि इत्येव वक्तुं युज्यते, न तु मङ्गलादीनीति । यदि तु सिद्धशब्द एव मङ्गलं तदा मङ्गलमप्याविष्करोतीति वचनमनुपपन्नम् । न चोद्यमेवम्, यतो मङ्गलशब्दः प्रारीप्सितप्रतिबन्धकविघ्नध्वंसेऽपि तदसाधारणकारणेऽपि दृश्यते ।

एवं सति मङ्गलमप्याविष्करोतीति विघ्नध्वंसं जनयतीत्यर्थः । तथा विघ्नध्वंसकारणं मङ्गलं सिद्धशब्दः, स एवादौ येषां तानीति न दोषः । अस्मिन् पक्षे सिद्धशब्दो

---

१. सिद्धे शब्दार्थसम्बन्धे (म० भा० – पस्पशा०, पृ० ४१)–
"माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दम् आदितः प्रयुङ्क्ते"।

मङ्गलार्थाभिधायी न भवति, किन्तु स्वयमेव मङ्गलम् । यत्तु 'षिधू शास्त्रे माङ्गल्ये च' (१।९) इति गणे पाठः, तस्यायमर्थः – मङ्गले कार्ये कर्तव्ये षिधधातुः प्रयुज्यते । यथा वै पादपूरणे । पादपूरणे कर्तव्ये वैशब्दः प्रयुज्यते, न तु तस्यार्थ इति ॥१।

**[समीक्षा]**

(कलापीय वर्णसमाम्नाय, ५२ वर्ण) –

अ आ, इ ई, उ ऊ, ऋ ॠ, ऌ ॡ, ए ऐ, ओ औ, –ं - –ँ (अनुस्वार), : (विसर्ग), × (जिह्वामूलीय), ɯ̈m - ტ - ɯ - ⊙ (उपध्मानीय), क् ख् ग् घ् ङ्, च् छ् ज् झ् ञ्, ट् ठ् ड् ढ् ण्, त् थ् द् ध् न्, प् फ् ब् भ् म्, य् र् ल् व्, श् ष् स् ह्, क्ष् ।

(पाणिनीय वर्णसमाम्नाय – १४ माहेश्वर सूत्र, ४२ वर्ण) –

१. अ इ उण् । २. ऋ ऌक् । ३. ए ओङ् । ४. ऐ औच् । ५. ह य व रट् । ६. लण् । ७. ञ म ङ ण नम् । ८. झ भञ् । ९. घ ढ धष् । १०. ज ब ग ड दश् । ११. ख फ छ ठ थ च ट तव् । १२. क पय् । १३. श ष सर् । १४. हल् ।

कलापव्याकरण के कश्मीरी संस्करण में जिह्वामूलीय, उपध्मानीय तथा क्ष् वर्ण प्रायः नहीं देखे जाते । जिनमें जिह्वामूलीय तथा उपध्मानीय वर्णों की अनुपलब्धि प्रामादिक हो सकती है, क्योंकि मूल सूत्रों में इनका उल्लेख हुआ है । इस प्रकार इस संस्करण में ४९ या ५१ वर्ण ही पठित हैं, जबकि वङ्गीय संस्करण में 'क्ष्' वर्ण भी समादृत है । इसे संयोगसंज्ञक वर्णों से मिलकर बनने वाले वर्णों के निदर्शनार्थ यहाँ प्रस्तुत किया गया है । अतः इस संस्करण के अनुसार ५२ वर्ण मान्य हैं । ये सभी वर्ण लोकव्यवहार में प्रसिद्ध पाठक्रम के ही अनुसार पढ़े गए हैं । इनमें १४ स्वर, ३४ व्यञ्जन तथा अनुस्वार – विसर्ग-जिह्वामूलीय-उपध्मानीय (४) प्रायः उभयविध माने जाते हैं ।

पाणिनीय व्याकरण में वर्णों का पाठ लोकव्यवहारानुसारी नहीं है । इसके वर्णक्रम में भी भिन्नता है । तथा 'ह' को दो बार पढ़ा गया है । पाणिनि ने इस कृत्रिमता का आश्रयण प्रत्याहारप्रक्रिया के निर्वाह-हेतु ही किया है । इनके वर्ण-समाम्नाय में ९ अच् (स्वर) तथा ३३ हल् (व्यञ्जन) देखे जाते हैं । अनुस्वार- विसर्ग-जिह्वामूलीय-उपध्मानीय को वर्णसमाम्नाय में पठित न होने के कारण अयोगवाह कहा जाता है । कलाप में ये योगवाह हैं ।

कातन्त्ररूपमालाकार भावसेन अ से ह तक ४७ वर्ण ही स्वीकार करते हैं– "अकारादि हान्तं सप्तचत्वारिंशद् वर्णाः" (कात० रू० मा० १।१।१)। परन्तु सम्पादकीय टिप्पणी में ५३ वर्णों का परिगणन किया गया है–

अ से औ तक = १४ स्वर

क् से क्ष् तक = ३४ व्यञ्जन

अनुस्वार – विसर्ग –जिह्वामूलीय-उपध्मानीय-प्लुत ।

---

योग – ५३

---

**व्यञ्जनानि चतुस्त्रिंशत् स्वराश्चैव चतुर्दश।**
**अनुस्वारो विसर्गश्च जिह्वामूलीय एव च॥१।**
**गजकुम्भाकृतिर्वर्णः प्लुतश्च परिकीर्तितः।**
**एवं वर्णास्त्रिपञ्चाशन्मातृकाया उदाहृताः॥२।**

(कात० रू० मा० १।१।१)

अस्तु, कलापव्याकरण के ४७, ४९, ५१, ५२ या ५३ वर्णों वाले पाठक्रम में अर्थकृत लाघव तथा पाणिनीय व्याकरण के ४२ वर्णों वाले पाठक्रम में शब्दकृत लाघव माना जा सकता है। यद्यपि ये दोनों ही वर्णसमाम्नाय बुधजनों द्वारा समादृत हैं, तथापि कलापीय वर्णसमाम्नाय शास्त्र तथा लोक दोनों में ही उपादेय है, जबकि पाणिनीय वर्णसमाम्नाय केवल पाणिनीय शास्त्र के लिए ही उपयोगी है। अतः उपयोगिता-बाहुल्य की दृष्टि से कलापव्याकरण के वर्णसमाम्नाय को ही प्रशस्त कहा जा सकता है।

व्याख्याकारों के अनुसार यह सूत्र सञ्ज्ञासूत्र या नियमसूत्र है। कलाप के वर्णसमाम्नाय से यह स्पष्ट है कि इसमें प्रत्याहारप्रक्रिया नहीं अपनाई गई है, जिससे कहीं-कहीं सूत्रों में शब्दावली बड़ी हो गई है या एक से अधिक सूत्र बनाने पड़े हैं, परन्तु प्रत्याहारप्रक्रिया के ज्ञानार्थ प्राप्त क्लेश का अनावश्यक सामना भी नहीं करना पड़ता है।

सूत्रपठित 'सिद्ध' शब्द के यद्यपि व्याख्याकार ३ अर्थ करते हैं – नित्य, निष्पन्न तथा प्रसिद्ध, परन्तु वर्णसमाम्नाय के सम्बन्ध में उन्हें प्रसिद्ध अर्थ ही मुख्यतः मान्य है, जबकि "सिद्धे शब्दार्थसम्बन्धे" (वा० सू० १) इस वार्त्तिक में पठित 'सिद्ध' शब्द के अर्थ महाभाष्यकार आदि नित्य-कार्य स्वीकार करते हैं (द्र०, म० भा०, पस्पशाह्निक)।

पञ्जिकाकार त्रिलोचन के अनुसार सिद्ध शब्द के उल्लिखित तीन अर्थों का आधार है – व्याकरणशास्त्र का सर्वपारिषदरूप होना – 'सर्वपारिषदत्वाद् व्याकरणस्यार्थत्रयं घटते'। ज्ञातव्य है कि तैत्तिरीय प्रातिशाख्यकार आदि वर्णों को अनित्य मानते रहे हैं – "विनाशो लोपः" (तै० प्रा० १।५८)।परन्तु वाजसनेयिप्रातिशाख्यकार – पाणिनि आदि वर्णनित्यतावादी हैं – **"वर्णस्यादर्शनं लोपः"** (वा० प्रा० १।१४१); **"अदर्शनं लोपः"** (पा० १।१।६०)। इनके अतिरिक्त वर्णविषयक तृतीय पक्ष रहा है – 'उनका लोकव्यवहार में प्रचलित तथा प्रसिद्ध होना।' इन्हीं तीन दृष्टियों से 'सिद्ध' शब्द के उक्त तीन अर्थ किए जाते हैं।

व्याख्याकारों ने "सिद्धो वर्णसमाम्नायः" – सूत्रपठित 'सिद्ध' शब्द को ग्रन्थारम्भ में मङ्गलार्थक माना है। पञ्जिकाकार के विचार से कातन्त्रसूत्रकार ने "अथ परस्मैपदानि" (३।१।१) सूत्रस्थ 'अथ' शब्द से मध्यमङ्गल तथा "आरुत्तरे च वृद्धिः" (३।८।३५) सूत्रस्थ 'वृद्धि' शब्द से अन्तिम मङ्गल किया है। पाणिनीय व्याकरण में भी 'वृद्धि' शब्द से आदि मङ्गल (१।१।१), वकारागम (१।३।१) से मध्यमङ्गल तथा उदय या अकार से (८।४।६७, ६८) अन्तमङ्गल किया गया है।

कलापचन्द्र के अनुसार विदुषी रानी-द्वारा किया गया राजा सातवाहन का उपहास ही कातन्त्रव्याकरण की रचना का प्रेरणासूत्र है और स्वामिकार्त्तिकेय के अनुग्रह से आचार्य शर्ववर्मा ने इसकी रचना की थी।

प्रसङ्गतः व्याख्याओं में सूत्रों के ४ तथा ६ भेद, प्रत्येक सूत्र की व्याख्या के छह प्रकार, परिभाषा-नियम की व्याख्या एवं 'समाम्नाय-सिद्ध-विधायि' प्रभृति शब्दों की व्युत्पत्ति भी दी गई है।

वर्णसमाम्नाय को अक्षरसमाम्नाय तथा वाक्समाम्नाय भी कहते हैं। ऋक्तन्त्र के अनुसार इसकी उपदेशपरम्परा इस प्रकार है – 'ब्रह्मा-बृहस्पति-इन्द्र-भरद्वाज-ऋषिवृन्द-ब्राह्मण'। –

"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते" (ऋ० त० १।४)।

पतञ्जलि के अनुसार यह वाक्समाम्नाय शब्दज्ञान से पुष्पित तथा शब्दों के समुचित प्रयोग से फलित होता है। अनादिकाल से सिद्ध चन्द्र-तारों के समान सुशोभित यह ब्रह्मराशि है। इसके ज्ञान से सभी वेदों के अध्ययन का पुण्य प्राप्त होता है और ज्ञानसम्पन्न व्यक्ति के माता-पिता स्वर्गलोक में पूजनीय होते हैं–

"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते" (म० भा०, आ० २ – अन्ते)।

ज्ञातव्य है कि शास्त्रकारों ने वर्णों की संख्या भिन्न-भिन्न रूप में स्वीकार की है। जैसे–

अहिर्बुध्न्यसंहिता – अ० १६ = १४ स्वर + ३४ व्यञ्जन = ४८

अहिर्बुध्न्यसंहिता – अ० १७ = १७ स्वर + ३४ व्यञ्जन = ५१

यजुःप्रातिशाख्य – = २३ स्वर + ४२ व्यञ्जन = ६५

पाणिनीयशिक्षा – = ६३, ६४

वैदिकाभरण – = ५९

वशिष्ठशिक्षा = ६८

नन्दिकेश्वर ने २७ कारिकाओं में ४२ वर्णों का क्रम तथा उनके अर्थ पर विशेष विचार किया है। वर्णों के उच्चारणस्थान, प्रयत्न तथा करणों का विचार शिक्षाग्रन्थों में उपलब्ध होता है ॥१॥

## २. तत्र चतुर्दशादौ स्वराः (१।१।२)

**[सूत्रार्थ]**

वर्णसमाम्नाय के ५२ वर्णों में प्रारम्भिक १४ वर्णों की स्वरसञ्ज्ञा होती है॥२।

**[दु० वृ०]**

तस्मिन् वर्णसमाम्नायविषये आदौ ये चतुर्दश वर्णास्ते स्वरसञ्ज्ञा भवन्ति। अ आ, इ ई, उ ऊ, ऋ ॠ, ऌ ॡ, ए ऐ, ओ औ। यथाऽनुकरणे ह्रस्वऌकारोऽस्ति

तथा दीर्घोऽप्यस्तीति मतम्। स्वरप्रदेशाः– "स्वरोऽवर्णवर्जो नामी" (१।१।७) इत्येवमादयः ।।२।

### [दु० टी०]

तत्र ।तत्रेत्यनेन विषयो निर्दिश्यते ।अर्थवशाद् विभक्तिविपरिणामो हि गरीयान्। चत्वारश्च दश चेति, चतुर्भिः सह दश, चतुर्भिरधिका दशेति विग्रहः सम्भवति ।तत्राद्ये त्वपेक्षया आदावित्यनेन सह सम्बन्धः स्यात्। द्वितीयेऽपि सहार्थतृतीयायाः समासस्यानभिधानात्। तृतीयस्तु पक्षो न्याय्य एव, सद्य आद्यत्वाद् (२।६।३७) अध्यारूढस्योत्तरपदलोपः कश्चान्तो निपात्यते। स पुनरिह कर्मसाधनः समासे गत्यर्थ इति न प्रयुज्यते, तेन सम्बन्धाच्चतुर्भिरिति कर्तरि तृतीया। आदिशब्दादिह तु भेदवृत्तेर्विषयलक्षणैव सप्तमी।

स्वयं राजन्त इति स्वराः, एकाकिनोऽप्यर्थप्रतिपादने समर्था इत्येवं पदानि सिद्धानि। लोके ह्यर्थवन्त्यनर्थकानि च वाक्यानि दृश्यन्ते। यथा-देवदत्तो गामभ्याज शुक्लां दण्डेन। अनर्थकानि च– नदीतीरे दश दाडिमानि, षट् प्रपा इति। तत्र भगवत्कुमारसूत्रानन्तरं तदाज्ञयैव श्रीशर्ववर्मणा प्रणीतं सूत्रं कथमनर्थकं भवतीति। अर्थान् सूत्रयति, सूते, सूचयति वा सूत्रम्। तच्च भिद्यते–

**सञ्ज्ञा च परिभाषा च विधिर्नियम एव च।**

**प्रतिषेधोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥इति।**

तत्र परिभाषा द्विविधा – लिङ्गवती, विध्यङ्गशेषभूता च ।विधौ नियमकारिणी। विधिरपि भिद्यते प्रत्ययागमादेशपूर्व-परनिपाततया। संज्ञानियमप्रतिषेधभेदा विधेरेव भिदा। अधिकारोऽपि गङ्गास्रोतोमण्डूकप्लुत्यादिभेदभिन्नः पदार्थ इति। तथा च यथास्थानमेते निगदिष्यन्ते – संज्ञाधिकारमन्तरेणापि संज्ञासूत्रमिदं परिशिष्यते ।प्रसिद्धा हि स्वरादिसञ्ज्ञा आवर्जनीयाः "स्वरोऽवर्णवर्जो नामी" (१।१।७) इत्यादिषु। साकाराः सञ्ज्ञिनो निराकाराश्च संज्ञा इति। सम्यग् ज्ञायतेऽनयेति **संज्ञा,** संज्ञेयश्च संज्ञी, सतोऽपि भेदस्याविवक्षितत्वात् प्रथमा। यथा 'पुरुषोऽयं देवदत्तः' इति।

अथ किमर्थं [1]लृवर्णस्य स्वरसंज्ञोपदिश्यते ? लृकारः क्लृपिस्थ एव युज्यते, तत्र न किञ्चित् फलम्। तर्हि यदशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वम् इष्यते,

---

१. महाभाष्यकारेण द्वितीये प्रत्याहाराह्निके "ऋ लृक्" इति माहेश्वरसूत्रव्याख्यानप्रसङ्गे विषयोऽयं विस्तरेणोपन्यस्तः।

तत्रस्थस्य लृकारस्य स्वरसंज्ञा यथा स्यात् । अतो ऋतक इति प्रयोक्तव्ये शक्तिवैकल्याद् अहो लृतक इति केनचित् प्रयुक्तम्, तदन्योऽनुकरोति 'अहो लृतकः' इति स्वरे प्रकृतिर्भवति इत्याह – यथानुकरण इत्यादि ।

एवम् 'अहो लृतकः' इति मतं मतान्तरमेव, तन्न वयं मन्यामहे । मुख्य एव लृकारः सम्भवति । यथा अमू लृकारं पश्यतोऽमी लृकारं पश्यन्तीति । लृच्छाया, लृच्छाया । स्वरात् परश्छकारो द्विर्भावमापद्यते । योषिद् लृकारं पठति, विद्युद् लृकारायते इति स्वरे तृतीयश्च । यदृच्छाशब्दश्चास्ति अहो लृतकाख्य इति । आदिग्रहणं मध्यान्तनिवर्तनेन सुखप्रतिपत्त्यर्थम् इति ॥२।

[वि० प०]

तत्र । तत्र इत्यनेन वर्णसमाम्नायो विषयतया निर्दिश्यते इत्याह – तस्मिन् इति । यदि पुनरर्थवशात् सप्तम्या विपरिणामो भविष्यति, किं तत्रेत्यनेन सप्तमीनिर्देशेनेति उच्यते, तदा सुखार्थं भवतीति । अथ कथमत्र समासः – किं चत्वारश्च दश चेति द्वन्द्वः ? उतस्वित् चतुर्भिः सह दश ? आहोस्वित् चतुर्भिरधिका दश चतुर्दश इति ? सत्यम्, न तावद् द्वन्द्वोऽयं यदुत्तरे दश गृह्यमाणाः किं पूर्वैश्चतुर्भिः सह गृहीतव्या उत भिन्ना एवेति सन्देहः स्यात् । अथ द्वन्द्वस्य स्वपदप्रधानत्वात् कथमेवमाशङ्केति चेत्, सत्यमेतत् । किन्त्वतिमन्दबुद्धयः सन्दिहीरन्निति । यद्येवमादौ चत्वारश्च पुनरादौ दश चेति आदिशब्दस्य प्रत्येकमभिसंबन्धः करिष्यते ? सत्यम्, तथापि प्रतिपत्तिगौरवं स्यात् । द्वितीयः पुनः पक्षः सहार्थतृतीयायाः समासस्यानभिधानान्निरस्तोऽयम् । यथा 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यनभिधानादिति । तृतीयस्तु पक्षो न्याय्य एव, शाकपार्थिवादिदर्शनान्मध्यमपदलोपी समासः ।

नन्विह लृकारस्य स्वरसंज्ञायाः किं प्रयोजनम् ? लृकारः क्लृप्तिस्थ एव प्रयोगी । यथा क्लृप्तिरिति । न चेह स्वरत्वे फलमस्ति, तथा लृकार इत्यादिप्रयोगे दीर्घस्यापीति ? सत्यम् । यद् अशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते । यथा 'अहो ऋतकमानय' इति प्रयोक्तव्ये शक्तिवैकल्याद् 'अहो लृतकमानय' इति केनचित् प्रयुक्तम् । तत्समीपवर्ती किमयमाह इत्यपरेण पृष्टस्तत्र अहो लृतकमानय इत्याह इति कथयति । तत्र च लृकारस्य स्वरसंज्ञया "ओदन्ता अ इ उ आ निपाताः" (१।३।१) इत्यादिना ओकारस्य स्वरे प्रकृतिर्भवतीति । तस्माद् येन प्रकारेण ह्रस्वलृकारः स्वरसंज्ञायां सप्रयोजनो विद्यते, तेनैव दीर्घोऽपीति । यथा 'अहो लृतकः' इति वक्तुम् आह – **यथानुकरण** इत्यादि ।

ननु 'प्रकृतिवदनुकरणं भवति' (व्या०परि०सू०,परि०८६), तत् कथमसाधुशब्दस्यानुकरणं साधु भवितुमर्हतीति ? सत्यम्, प्रकृतिवदनुकरणमित्यत्र शास्त्रीया प्रकृतिराश्रिता, न चाशक्तिजमसाधुशब्दरूपं शास्त्रीया प्रकृतिः। किं च प्रकृतिवदिति कार्यातिदेशोऽयम्, कार्यं च शास्त्रीयमेवातिदिष्टमभिप्रेतमाचार्यैः। न चासाधुशब्दरूपं शास्त्रविहितं कार्यम्, शास्त्रस्य साधुशब्दसंस्कारायैव प्रवृत्तत्वात्। तस्मादर्थभेदेन शब्दान्तरत्वात् शिष्टप्रयुक्तत्वाच्चानुकरणं साधु, तदन्यदसाधुशब्दवदिति स्थितम्। मतमिति मतान्तरमित्यर्थः।

अयं पुनर्मन्यते अकारादीनामिव ऌवर्णस्यापि स्वरसंज्ञाया मुख्यमेव प्रयोजनमस्ति। यथा 'अमू ऌकारं पश्यतः, अमी ऌकारं पश्यन्ति' इति "द्विवचनमनौ, बहुवचनममी" (१।३।२, ३) इति स्वरे प्रकृतिर्भवतीति। 'ऌच्छाया' इत्यादिषु स्वरपरत्वाच्छकारस्य द्विर्भावः सिद्धः। तथा 'योषिद् ऌकारं पठति, विद्युद् ऌकारायते' इत्यादिषु "वर्गप्रथमाः०" (१।४।१) इत्यादिना स्वरे तृतीयश्चेति, एवमन्यत्रापि। स्वर इति महतीयं संज्ञा अनुगतार्था सुखार्थमन्वाख्यायते। स्वयं राजन्ते इति **स्वराः**। एकाकिनोऽप्यर्थप्रतिपादने समर्थाः। तथापि लिङ्गधातुनिपातानामसहायानामप्यर्थप्रतिपादने सामर्थ्यमुपलभ्यते, नैवं व्यञ्जनानामिति ॥२।

**[क० च०]**

तत्र। तत्रेति लुप्तप्रथमैकवचनम् इति सम्प्रदायः। **वस्तुतस्तु** लुप्तसप्तमीकं पदम्। तथाहि "अव्ययाच्च" (२।४।४) इति ज्ञापकात् पदसंज्ञार्थं विधीयमाना विभक्तिः स्वार्थ एव विधीयते, स्वार्थश्चात्र अधिकरणरूपः। अत एव तदर्थप्रतिपादिका औचित्यात् सप्तम्येव प्रवर्तते, न तु प्रथमा। तथा च तत्रकृतं तत्रभुक्तमिति सप्तमीसमासप्रस्तावे दर्शितं टीकाकृता। अथ अनन्तरत्वाद् वर्णसमाम्नाय एवानुवर्त्तिष्यते किं तत्रेत्यनेनेत्याह – तत्र इत्यादि। **अन्ये** तु आदिशब्दस्य सम्बन्धात् तस्य इति षष्ठी युज्यते इत्याह – तत्रेत्यादि।

[1]अथ कथमत्र समास इति, कः प्रकारः समास इत्यर्थः। सत्यमित्यादि। ननु चतुर्षु गृहीतेषु तेषामुत्तरे दश ग्रहीतव्या इत्युक्ते उकाराद्यौकारान्तानां ग्रहणं युक्तं तेषामेव

१. ननु तथापि तत्रेति न क्रियताम्, अनन्तरत्वाद् वर्णसमाम्नायोऽनुवर्तिष्यते यतस्तच्छब्दस्थितावपि विभक्तिविपरिणामस्यावश्यकता सप्तम्यन्तत्वेनान्वयार्थम्। अतोऽत्र तत्रशब्दमधिकृत्यार्थवशादित्याश्रयणे गौरवमित्याह – यदि पुनरिति। सप्तमीनिर्देशेनेति सप्तमीनिर्देशो येन अर्थवतस्तु समाम्नायात्तेन तत्र किमित्यर्थः। अस्याः पङ्क्तेः पूर्वोक्तक्रमेणैव।

चतुर्दशत्वात् कुतः साहित्याशङ्का ? नैवम् । उत्तरशब्दोऽत्र चतुर्णां ग्रहणापेक्षया पश्चात्कालीनवचनः, तेन उत्तरे उत्तरकालीना ये ग्रहीतव्या इत्यर्थः । यद् वा किमिह वर्णसमाम्नायादिभूतेषु चतुर्षु गृहीतेषु उत्तरे उवर्णादयो गृह्यमाणास्तैरेव चतुर्भिः सह दशत्वसङ्ख्याविशिष्टा गृह्यन्ते, उत तद्भिन्ना इत्येतदेवाह – यदुत्तर इति ।

यद्येवम् उभयशब्दयोरेकार्थप्रतिपादकत्वाद् द्वन्द्व एव कथम् ? तथाहि नाम्नां युक्तार्थो हि द्वन्द्वः, स च भिन्नार्थनामेव भवति, एकार्थनामेकदा प्रयोगाभावात्, न हि भवति वृक्षद्रुमाविति ? सत्यम् । एकार्थानामपि प्रवृत्तिनिमित्तभिन्नानां यः समुच्चयः सोऽपि द्वन्द्वो भवेदिति । तथा चाभिधेयनिवृत्तिप्रयोजनधनेष्विति पञ्जी, कथमन्यथा निवृत्त्यादीनां सर्वेषामभिधेयवाच्यानां द्वन्द्वः स्यादिति ।

अथ चतुर्ग्रहणोपादानवैयर्थ्यं स्यात् चेत्, न । अत्र चतुर्ग्रहणं दत्त्वा चतुर्दश इति विभागेन यदुपादानं तदुत्तरत्रैव चतूरहिता दश एवानुवर्तन्त इति ज्ञापनार्थम् । एतेनान्यूनातिरिक्तपदेनार्थद्वयस्य शास्त्रे एकसञ्ज्ञतयैव व्यवहारसिद्धेः पुनस्तेषामेव दशानां सर्वेषामभिधेयशब्दवाच्यानां समानसंज्ञोपादानमनर्थकमित्यपि चोद्यमपास्तम् ।

अथ द्वन्द्वः स्वपदप्रधानः, अत्र मुख्यं धर्मिणमपेक्ष्य समुच्चयसंभवे गौणरूपं प्रवृत्तिनिमित्तसमुच्चयं परिकल्प्य कथं शङ्कावतार इत्याह – अथ इत्यादि । सन्देह एव कथमिति । तथाहि – "दश समानाः" (१।१।३) इत्यत्रायमेव दशशब्दः प्रवर्तते एकारमपेक्ष्य दशानामादित्वं प्रतिपादयन्, तद्वदत्रापि तदपेक्षया आदित्वम् बोधयेत्, ततश्च केवलानां दशानामेव स्यादिति शङ्काबीजम् । यद् वा आदिशब्दोऽयमेकत्वात्, यदकारावच्छेदेन चतुर्णामादित्वं बोधयति, तदकारावच्छेदेनैव दशानामपि आदित्वं बोधयतीति संमोहः ।

यद् वा आदौ चत्वारो दश चेति वाक्ये सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् । यद्येवं चतुर्णामेवादित्वं बोधयेत्, तदा यत्र कुत्र स्थितानां दशानां ग्रहणं स्यादिति संमोहः स्यादिति तमेव निरसितुमाह – यद्येवम् इत्यादि । चतुःशब्ददशशब्दयोरादित्वापेक्षत्वात् समासो न स्यात्, तत्र वक्तव्यं सापेक्षेऽपि समास इति प्रतिपत्तिगौरवं स्यादिति **कश्चित्** । (चतुर्णां सर्वापेक्षयैवादित्वं दशानां तु किञ्चिदपेक्षया इत्युभयपृथगपेक्षया आदिशब्दान्वये वाक्यभेदेन प्रतिपत्तिगौरवं स्यादिति भट्टः) ।

**वस्तुतस्तु** आवृत्तिं परिकल्प्य प्रत्येकमभिसम्बन्ध एव प्रतिपत्तिगौरवं स्यादिति । सह दशभिरिति । ननु कथं दृष्टान्तदार्ष्टान्तयोः समता । तथाहि दृष्टान्तो बहुव्रीहिः,

दार्ष्टान्तिकस्तत्पुरुषः ? सत्यम्, सहार्थे तृतीयायाः समासाभिधाने दृष्टान्तितं न तु समासे। [1]लृकारः क्लृप्तिस्थ एव प्रयोगीति एवशब्देन स्वरत्वप्रयोजनकर्तव्यतया शङ्क्यमानम् – अनुकरणमेव व्यावर्तते, क्लृप्तपदं स्वरसञ्ज्ञाप्रयोजनरहितस्थानोपलक्षणं स्वरत्वप्रयोजन-रहितस्थान एव लृकारः प्रयोगीति तात्पर्यार्थः। तेन क्लृप्तिस्थ एव लृकारः प्रयोगी नान्यत्रेति नियमे लृकार इति प्रयोगे कथमुच्चार्यते लृकार इति देश्यमपास्तम्, न चेह स्वरत्वे फलमस्तीति। ननु कथमिदमुच्यते यावता क्लृप्त इत्यत्र स्वरत्वे सति "न व्यञ्जने स्वराः सन्धेयाः" (१।२।१८) इत्यनेन "लम् लृवर्णः" (१।२।११) इत्यनेन विहितस्य लत्वस्य निषेध एव फलम् ? सत्यम्, अन्यत्र प्रयोजनाभावमाचक्षाणेन "लम् लृवर्णः" (१।२।११) इति लत्वविधानमपि निरस्तम्। अस्य तु मते लनुबन्धो लाकृतिरिति प्रयोगोऽसम्मत एव।

अथ क्लृप्तिस्थ एव लृकारः स्वरूपेण प्रयोगीति यन्मतं तन्मते लनुबन्धो लाकृतिरिति सिद्ध्यर्थं लत्वविधानं कर्तव्यमेव, तथापि रश्रुतेर्लश्रुतिरिति वचनान्न लत्वम्। तथाहि 'कृपे रो लः" (३।६।९७) इत्यत्र प्रश्लेषेण पक्षान्तरं व्याख्यायते, तद् यथा ऋकारादकारमुच्चार्य 'र' इति पदम्। ततश्च ऋकारस्य लृकारो भवतीत्ययमर्थः प्राप्तः।

एवं च सति यदि क्लृप्तः, क्लृप्तिरित्यत्र ऋकारस्य लृकारे कृते "लम् लृवर्णः" (१।२।११) इति लकारो भविष्यति, तदा किमर्थं प्रश्लेषव्याख्यायाम् ऋकारस्य लृकारविधानम्, 'र' इत्यत्र प्रश्लेषव्याख्यया ऋकारस्य यथाश्रुत एव लकारो विधीयताम्, एवं च प्रक्रियालाघवं च भवति तस्माद् अत एव लृकारविधानात् क्लृप्त इत्यादौ "लम् लृवर्णः" (१।२।११) इति लकारो न वर्तते। अतो लृकारस्य स्वरत्वेन न किञ्चित् फलमस्तीति युक्तमुक्तं पञ्जीकृता। ननु तथापि लृकार इत्यत्र लृकारशब्दे परे "न व्यञ्जने

---

१. तृतीयः पुनः पक्ष इति। ननु बहुव्रीहिसूत्रे बहुग्रहणं बोधयति बहूनां बहुव्रीहिरेवेति नियमात् त्रिपदे कथं तत्पुरुषः ? सत्यम्, चतुर्भिरधिका इति समासे पश्चाद् दशशब्देन कर्मधारयः, ततोऽन्तर्वर्तिनीं विभक्तिमाश्रित्याधिकपदस्य लोपः पदलोपं प्रति कश्चिद् युक्तिमाह, तथाहि "तत्स्था लोप्याः" (२।५।२) इत्येकयोगः, "विभक्तयः" (२।५।२) इति द्वितीयः। ततश्च पूर्वविधेर्लक्ष्यानुसारित्वात् शाकपार्थिवादौ अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदस्यापि लोप इति। शकनं शाकः, स एव प्रधानं यस्य सः, शाकप्रधानश्चासौ पार्थिवश्चेति कर्मधारयः। शाकपार्थिवादौ चतुर्दशशब्दोऽपि द्रष्टव्य इति दिक्।

स्वराः सन्धेयाः" (१।२।१८) इत्यनेन सन्धिप्रतिषेध एव फलं स्यादिति, नैवम्। कारशब्दस्य स्वरूपप्रतिपादनफलत्वाद् विकृतिर्न भवतीति **हेमकरः।** तन्न। तवल्कार इत्यत्र विकृतिविलोकनात्। सिद्धान्तस्तु "लम् लृवर्णः" (१।२।११) इति ज्ञापकात् लृकारस्य व्यञ्जने सन्धिर्न भवतीति।

**अन्ये** तु "न व्यञ्जने स्वराः सन्धेयाः' (१।२।१८) इत्यत्र स्वरग्रहणमपनीय अव्यञ्जनग्रहणं कृत्वा अव्यञ्जनानि न सन्धेयानि इति वदन्ति। तथापि नातिपेशलम्, स्वरपदमपहाय अव्यञ्जनपदपक्षे प्रमाणाभावात्। प्रत्युत गौरवापत्तेः। ननु तथापि लृकारस्य स्वरसंज्ञायाः प्रयोजनमस्त्येव, कथमन्यथा अचीक्लृपद् इत्यादावेकस्वरत्वाभावे क्लृपेर्द्विवचनम्? सत्यम्, इनन्तक्लृपेर्द्विवचनेऽभ्यासलोपे ऋवर्णस्याकार इत्यत्र तु वर्णग्रहणसामर्थ्याद् लोकोपचाराद् ऋकारलृकारयोः स्वरसंज्ञत्वात् लृकारस्यापि अकारे सति सन्वद्भावादित्वे "दीर्घो लघोः" (३।३।३६) इति दीर्घत्वे सति सिद्धम्, तर्हि कथं चक्लृपिव इति? सत्यम्। स्वरविधिः स्वरे (३।८।३०) इति न्यायात् स्वरावस्थायामेव स्वराद्यैर्द्विवचने पश्चाल्लश्रुतिः।

यद्येवं व्यञ्जनादौ का वार्ता? यथा चिक्लृप्सत इति? सत्यम्, अत्रापि सना सह द्विर्वचनमिति संक्षेपः। तथेति। होतॄकार इत्यादि प्रयोगे दीर्घस्यापीति स्वरत्वे फलं नास्तीति शेषः। यथा 'अहो लृतकः' इत्यत्रेति। इतिशब्दोऽन्वयवशादुभयत्र संबन्धनीयः। अथान्वयाश्रयणं कष्टमित्याह – किञ्च इति। तस्माद् अनुकार्यानुकरणयोर्भेदेन शब्दान्तरत्वादनुकार्यभिन्नत्वादित्यर्थः। ननु यावता अर्थभेदेन शब्दान्तरत्वं तावता शब्दसाम्येऽपि एकशब्दत्वं स्यादित्याह – **शिष्टप्रयुक्तत्वाच्च** इति।

ननु अचकलाकद् इति कथं क्लृप्धातोः सम्पदादित्वाद् भावे क्विपि कृते कलायाः क्लृप् 'कलाक्लृप्' इति स्थिते तामकार्षीदितीनि कृते लृकारस्यास्वरत्वे अकारमादाय अन्त्यस्वरादिलोपः स्यादिति। न चान्त्यव्यञ्जनादेर्लोप इति कर्तव्यमिति वाच्यम्, गौरवापत्तेः। यत्र यत्र स्वरग्रहणं तत्र तत्राव्यञ्जनग्रहणेनैवार्थसिद्धौ संज्ञाविधानवैफल्याच्च। सत्यम्, अनुकरणवादिनो मते योषिद् लृकारं पठति इत्यादिवदेतदपि दूषणान्तरमेव। नैवमित्यादि। यद्यपि अनुकरणयोरित्यादौ व्यञ्जनस्याप्यर्थप्रतिपादनेऽन्यापेक्षा नास्ति, तथापि उच्चारणेऽवश्यमन्यापेक्षयाऽर्थप्रतिपादनेऽपि तथोच्यते। अर्थपदं स्वरूपातिरिक्तपरमित्येके।

ननु चतुर्दशग्रहणं किमर्थम्, अन्वर्थबलाच्चतुर्दशानामेव भविष्यति। तथा च **वररुचिः**–

**विश्लिष्टसन्धिभिन्नार्थौ गुरुर्व्याहत एव च।**

**पुनरुक्तपदार्थश्च पञ्च दोषाः प्रकीर्तिताः॥**

सत्यम्, अनुवादार्थमिदम्। अथ "औ यावत् स्वराः" इति कथं न कृतम् ? सत्यम्। यावच्छब्दोऽपि मर्यादायां वर्तते। मर्यादा सीमा, अत उक्तमुपलक्षणत्वादिति। उपलक्षणत्वादौकारस्य स्वरत्वं न स्यात्। द्विवचनमनावित्यादि ज्ञापकशरणं च गरीय इति।अं-प्राक् स्वराः इति कर्तव्यम्, तथापि न बहुव्रीहिः, प्राक्शब्दस्य पूर्वनिपातप्रसङ्गात्। तस्माद् अं इत्यस्य प्राग् अं-प्रागिति तत्पुरुषो भविष्यति ? सत्यम्, अंप्राक् पश्चाद् येषाम् इति कृते तद्गुणे दूषणं स्यात्। नैवम्, "अं इत्यनुस्वारः" इत्यस्य विधानात्, सत्यम्। अयमपि पक्षो गरीयान्॥२।

**[समीक्षा]**

१. स्वरसंज्ञाविधायक यह सञ्ज्ञासूत्र है। इसके अनुसार वर्णसमाम्नाय के प्रारम्भिक १४ वर्णों की स्वरसंज्ञा कलापव्याकरण में होती है– 'अ आ, इ ई, उ ऊ, ऋ ॠ, ऌ ॡ, ए ऐ ओ औ'। 'स्वर' शब्द का अर्थ है– जो स्वयं उच्चरित या प्रकाशित होता है, जिसके उच्चारण में दूसरे की अपेक्षा नहीं होती– 'स्वयं राजन्ते इति स्वराः, एकाकिनोऽप्यर्थप्रतिपादने समर्थाः।' (१।१।१९)। लोक में इन वर्णों के लिए 'स्वर' संज्ञा का व्यवहार होता है। इस प्रकार कलापव्याकरण की यह संज्ञा अन्वर्थ है।

पाणिनि ने इसके लिए 'अच्' संज्ञा का व्यवहार किया है और उनकी 'अच्' संज्ञा में केवल ९ ही वर्ण पढ़े गए हैं– 'अ इ उ ऋ ऌ ए ओ ऐ औ'। दीर्घ का बोध सवर्णसंज्ञा के बल पर होता है। पाणिनि की यह 'अच्' संज्ञा उनकी यादृच्छिकी प्रवृत्ति की द्योतक है। यह संज्ञा किसी भी प्रकार अन्वर्थ नहीं कही जा सकती है। कलापव्याकरण में ऌ-वर्ण को दीर्घ भी माना गया है, जबकि पाणिनीय व्याकरण में यह दीर्घ नहीं है।

२. इन वर्णों के लिए अक्षर तथा वर्ण संज्ञा का भी व्यवहार किया जाता है। ऋक्प्रातिशाख्य (१८।३२) आदि में कहा गया है– "सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्"।वाजसनेयिप्रातिशाख्य में (१।९९-१०१)–"स्वरोऽक्षरम्, सहाद्यैर्व्यञ्जनैः, उत्तरैश्चावसितैः"।

३. दूसरों की अपेक्षा न रखने वाले सामर्थ्यसम्पन्न पुरुष भी स्वर कहे जाते हैं, परन्तु जो सामर्थ्यहीन होने के कारण दूसरों के साहाय्य की अपेक्षा रखते हैं, वे व्यञ्जनवत् आचरण करने के कारण व्यञ्जन कहे जाते हैं–

**एकाकिनोऽपि राजन्ते सत्त्वसाराः स्वरा इव।**

**व्यञ्जनानीव निःसत्त्वाः परेषामनुयायिनः॥**

(द्र० – टे० ट० टे०, पृ० १८६)

४. इस संज्ञा के प्रदेश (प्रयोगसूत्र) हैं–

"स्वरोऽवर्णवर्जो नामी" (१।१।७) आदि। प्रदेश = जिसमें प्रयोजन कहे जाते हैं– "प्रदिश्यन्ते कथ्यन्ते प्रयोजनानि यत्र स प्रदेशः"।

५. स्वर के ह्रस्व-दीर्घ-प्लुत-उदात्त-अनुदात्त-स्वरित-अनुनासिक-निरनुनासिक भेद से १८ भेद माने जाते हैं। सन्ध्यक्षर वर्णों (ए, ऐ, ओ, औ) का ह्रस्व भेद नहीं होता, अतः उनमें से प्रत्येक के १२ भेद होते हैं– अ = १८; इ = १८; ऋ = १८; ऌ = १८; ए = १२; ऐ = १२; ओ = १२; औ = १२।

६. स्वरों का दीर्घ, गुण, वृद्धि, अयादि सन्धियों में विशेष उपयोग होता है। पाँच सन्धियों में स्वरसन्धि का विशेष महत्त्व है–

**स्वरसन्धिर्व्यञ्जनसन्धिः प्रकृतिसन्धिस्तथैव च।**

**अनुस्वारो विसर्गश्च सन्धिः स्यात् पञ्चलक्षणः॥**

७. कातन्त्रव्याकरण में स्वरसंज्ञक १४ वर्णों में से 'ए, ऐ, ओ, औ' इन चार वर्णों को छोड़कर शेष १० वर्णों की समानसंज्ञा, समानसंज्ञक १० वर्णों में से २-२ वर्णों की सवर्णसंज्ञा, सवर्णसंज्ञक वर्णों में से पूर्ववर्ती वर्णों की ह्रस्व, उत्तरवर्ती वर्णों की दीर्घ, स्वरसंज्ञक १४ वर्णों में से अ-आ को छोड़कर शेष १२ वर्णों की नामी तथा 'ए-ऐ-ओ-औ' इन ४ वर्णों की सन्ध्यक्षरसंज्ञा की गई है।

पाणिनि ने सवर्ण को छोड़कर अचों की अन्य कोई संज्ञा नहीं की है।

८. वैदिक शब्दों में जो उदात्त, अनुदात्त, स्वरित की योजना की गई है, उन्हें स्वर इसीलिए कहते हैं कि उनकी प्रवृत्ति स्वरसंज्ञक वर्णों में ही होती है, क्-ख् आदि व्यञ्जनों में नहीं ॥२।

# ३. दश समानाः (१।१।३)

## [सूत्रार्थ]

वर्णसमाम्नाय के अन्तर्गत जिन प्रारम्भिक १४ वर्णों की स्वरसंज्ञा की गई है, उनमें प्राथमिक १० वर्णों की समानसंज्ञा होती है॥३।

## [दु० वृ०]

तस्मिन् वर्णसमाम्नायविषये आदौ ये दश वर्णास्ते समानसंज्ञा भवन्ति। अ आ, इ ई, उ ऊ, ऋ, ॠ, ऌ ॡ। समानप्रदेशाः– "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) इत्येवमादयः॥३।

## [दु० टी०]

दश।उदात्तानुदात्तसमाहारसानुनासिकनिरनुनासिकभेदादष्टादशधा भिद्यतेऽवर्णः, तथा इवर्णादयोऽपीति। इवर्णः, उवर्णः, ऋवर्णः, ऌवर्णश्चेत्यतः समानं तुल्यं मानं परिमाणं येषामिति **समानाः** सिद्धाः। ऌकारस्य समानसंज्ञया किं प्रयोजनम्-कल्पनं क्लृप्, सम्पदादित्वाद् भावे क्विप्। कलायाः क्लृप् कलाकॢप्, तामकार्षीदिति इनि अन्त्यस्वरादिलोपे सत्युपधायाश्च ह्रस्वोऽभ्यासस्य सन्वद्भावो न भवति समानलोपत्वाद् अचकलाकदिति प्रयोगविवक्षायां पुनर्ॡकारात् समानात् दीर्घात् परलोपः फलम्। 'कॄकारः, क्लॄकारः' इति। समानानामेव हि द्वौ द्वौ सवर्णौ तयोश्च पूर्वो ह्रस्वः परो दीर्घ इति चोपपद्यते॥३।

## [वि० प०]

दश। ननु परस्परविलक्षणमाकारं बिभ्राणाः कथमकारादयः समानपरिमाणाः, येन समानं मानं तुल्यं परिमाणमेषाम् इत्यन्वर्थः कथ्यते ? सत्यम्, उदात्तानुदात्तसमाहारभेदात् त्रयस्तावदकारादयः, पुनश्च सानुनासिकनिरनुनासिकभेदादेव द्विप्रकारा भवन्ति। केचिद् उदात्तानुदात्तसमाहाराः सानुनासिकाः केचिन्निरनुनासिका इत्यकारः षोढा भिद्यते। एवं दीर्घप्लुतयोरपि प्रत्येकं भेदो वक्तव्यः। ततश्चाष्टादशधा भिद्यतेऽवर्णः, तथा इवर्णादयोऽपीति सिद्धोऽन्वर्थः॥३।

## [क० च०]

दश। संख्यैवात्र मानं मतं न तु बृहत्त्वादि, असंभवात्। अत एव निर्देशात् समानस्य सभावो लोकोपचाराद् वा।

नन्वेवं दीर्घप्लुतयोरपि प्रत्येकं भेदो वक्तव्य इति किमुक्तम् ? अकारादीनामपि प्रत्येकं भेदो वक्तव्य इति वक्तुं युक्तम्। एवमाकारादीनामपि प्रत्येकं भेद इति वक्तुमुचितम्। एवं सति तथेवर्णादयोऽपीति न वक्तव्यं भवति ? सत्यम्, एतदुक्ति-भङ्ग्याऽवर्णस्य अष्टादशभेदभिन्नतामापाद्य एतेषां सवर्णानामष्टादशभेदत्वं सूचयति। एतेन एकारादीनां न समानसंज्ञत्वम्, तेषां ह्रस्वत्वाभावेन दीर्घप्लुतत्व-निबन्धनाद् द्वादश-प्रकारभेदभिन्नत्वादिति। दशग्रहणव्यावृत्त्या 'ए'-प्रभृतीनां समानसंज्ञा न स्यादिति कुसिद्धान्त एव, एतद्व्यावर्तनार्थकत्वादर्थनिर्वचनस्य वैफल्यात्।

यद्येवमकारस्याकारेण कथं साम्यम् अष्टादशप्रकारभेदभिन्नत्वरहितत्वात्। तथाहि अकारे षट्प्रकारादभिन्नत्वम्, आकारे च द्वादशप्रकारभेदभिन्नत्वमिति। अत एव **वैद्यः**-अकारादिभिन्न एव आकारोऽत्रापि अवर्णत्वादिसामान्यस्य विद्यमानत्वादिति, तेनैतद् उक्तं भवति-अतोऽकार एवोक्तह्रस्वदीर्घप्लुतभेदभिन्नोऽष्टादशधा भिद्यते, एवमाकारोऽपि, तथैव इकारोऽपीति समानत्वं न विरुध्यते। यद् वा अवर्णादीनां सर्वेषामष्टादशधा-भेदभिन्नत्वोपदर्शनेन प्रत्येकं सर्वेषां षड्भेदभिन्नत्वं सूचितमिति चेत्, तुष्यतु दुर्जनस्तथापि अकाराकारयोः साम्यं जातेर्व्यक्तेश्च अष्टादशभेदभिन्नत्वाभावात्।

यद् वेति कृत्वा यत् सिद्धान्तितं यदा तु षड्भेदभिन्नत्वेन साम्यम्। एकारैकार-योरपि समाननिराकरणं दुरुत्तरमेव, किञ्च प्लुतस्य वर्णाभिन्नत्वादेतयोरेव षड्भेद-भिन्नत्वोपदर्शनेन चरितार्थत्वात्, अस्यापि प्रथमषड्भेदोपदेशनमन्याय्यम्, किञ्चाष्टा-दशत्वेन समानत्वाकल्पने ततश्चाष्टादशधा भिद्यतेऽवर्ण इति त्रिलोचनवचनं सुतरां विफलं स्यात्, प्राक् षड्भेदभिन्नत्वोपदर्शनेनैव चरितार्थत्वात्। अत्रोच्यते-विग्रहवाक्ये येषामिति समूहसम्बन्धे षष्ठी, स च समूहः सवर्णद्वयात्मकः। तथा च द्वादश-समुदायान्तरापेक्षया येषां सवर्णसमुदायेऽष्टादशत्वसंख्या तुल्या तेषां समानत्वमिति (द्विरुक्तवादिनः उभयमेव) विवक्षितम्, तथा चाष्टादशभेदभिन्नसवर्णसमुदायान्त-र्निविष्टतया सर्वे समाना इति न दोषः॥३।

## [समीक्षा]

समान परिमाणवाले १० वर्णों की यह समानसंज्ञा अन्वर्थ है। ऋग्वेदप्रातिशाख्य में इसी अर्थ में आठ वर्णों की समानाक्षर संज्ञा की गई है-"अष्टौ समानाक्षराण्यादितः" (१।१)। इसमें ऌवर्ण को छोड़ दिया गया है। तैत्तिरीय प्रातिशाख्य में ९ वर्णों की समानाक्षर संज्ञा की गई है-"अथ नवादितः समानाक्षराणि" (१।३)। यहाँ

ह्रस्व-दीर्घ-प्लुतसंज्ञक 'अ-इ-उ' ये तीन वर्ण ही अभिप्रेत हैं। ऋक्तन्त्र (१।२) तथा नाट्यशास्त्र (१४।२०) में उन्हीं १० वर्णों की समानसंज्ञा निर्दिष्ट है, जिनकी कलापव्याकरण में व्याख्यात है। समान परिमाण का तात्पर्य है– उदात्त-अनुदात्त-समाहार (स्वरित)-सानुनासिक–निरनुनासिक भेदों से जो वर्ण ६ प्रकार के मान्य हैं। कलापव्याकरण के वर्णसमाम्नाय में 'अ आ, इ ई, उ ऊ, ऋ ॠ, ऌ तथा ॡ ये १० वर्ण ऐसे हैं, जिनमें से प्रत्येक के ६-६ भेद ही होते हैं। पाणिनीय व्याकरण में इन वर्णों के बोधार्थ 'अक्' प्रत्याहार का व्यवहार होता है, जो सर्वथा कृत्रिम है॥३।

## ४. तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ (१।१।४)

### [सूत्रार्थ]

समानसंज्ञक १० वर्णों में से प्रति दो-दो वर्णों की परस्पर सवर्णसंज्ञा होती है॥४।

### [दु० वृ०]

तेषामेव दशानां यौ द्वौ द्वौ वर्णौ तावन्योऽन्यस्य सवर्णसंज्ञकौ भवतः। अ आ, इ ई, उ ऊ, ऋ ॠ, ऌ ॡ। तेषां ग्रहणं व्यक्त्यर्थम्। तेन ह्रस्वयोर्द्वयोर्दीर्घयोश्च सवर्णसंज्ञा सिद्धेति। सवर्णप्रदेशाः– "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) इत्येवमादयः॥४।

### [दु० टी०]

तेषामिति निर्धारणे षष्ठी प्रतिपत्तव्या, निर्धारणं पुनरत्र द्वित्वगुणेनैव संभवति। यौ द्वाविति वीप्सायां द्विर्वचनं लोकतः सिद्धम्, नानाभिधायकानामभिधेयस्य क्रिया-गुणद्रव्यैर्युगपत् प्रयोक्तुर्व्याप्तुम् इच्छा **वीप्सा** उच्यते। सा पुनरिह सवर्णगुणेनैव सम्भवति। अन्योऽन्यस्येत्यन्यशब्दस्य क्रियाविनिमये द्विर्वचनं सश्चान्तः पूर्वस्यैकस्य पुंवद्भावश्च यथासम्भवं लोकत एव सिद्धः, यथा परस्परम्। योऽपि हि लक्षणं नावगच्छति सोऽपि शब्दोच्चारणात् क्रियाविनिमयं प्रतिपद्यते। समानो वर्णः सवर्णः, स पुनरस्मादेव वचनाद् भिन्नजात्योरपि ह्रस्वदीर्घयोरुपपद्यते। समानजात्योस्तु ह्रस्वयोर्द्वयोर्दीर्घयोश्च सावर्ण्यं सिद्धमेव।

कथमेकस्य पुनरनेकत्वं चेद् आदिमध्यान्तोदात्तादिभेदकृता व्यक्तिरस्तीति। यथा बाल्यादिभेदेनैकस्य देवदत्तस्यानेकत्वं सिद्धम्। नहि व्यक्तिमन्तरेण जातिरुपपद्यते, येन

भावे तत्वौ प्रसज्येते। यथा देवदत्तत्वं तथा अत्वं कत्वमिति। अथ वर्णसमाम्नाये प्रस्तुतयोरेव ह्रस्वदीर्घयोः सवर्णत्वं तदा पारिभाषिकत्वाद् धान्याढकः इत्यादिष्वेव दीर्घ उपपद्यते, नतु दण्डाग्रम् इत्यादिष्विति ? सत्यम्, तदर्थमेव तेषां ग्रहणम्। अन्यथा अनन्तरत्वाद् द्वौ द्वौ समानौ वर्णौ भवन्तौ तेषां समानसंज्ञकानां मध्ये द्वौ द्वौ अव्यवहितावेव सवर्णौ भवत इत्याह– तेषां ग्रहणम् इत्यादि।

ननु बहूनामेकत्रानवस्थानाद् व्यञ्जनैर्व्यवहितत्वाच्च द्वौ द्वावेव सवर्णौ भवितु-मर्हतः, किं द्वौ द्वावित्यनेन ? न च वक्तव्यम्, व्यवहितसम्बन्धः स्यादिति, तर्हि सत्यपि द्वौ-द्वौ-ग्रहणे कथं न भवति वर्णसमाम्नायस्य क्रमसिद्धत्वादसत्यपि स एव न्याय्य इति। किञ्चासवर्णे यत्वादिकं विफलम् अवशिष्टत्वाच्च वीप्सार्थो गम्यते एव। नैवं प्रतिपत्तिरियं गरीयसी भवतीति।अन्योऽन्यस्येति क्रियाव्यतीहारार्थम्, अन्यथा द्वयोरेव सवर्णत्वं स्यात्।ततश्च सवर्णे दीर्घत्वं 'छात्र अ अपेहि, दधि इ इन्द्रं पश्य' इत्यादिष्वेव प्रकृतिः पुनरसवर्णे प्रयोजनवती, यथा-अ इति।

ननु समाने दीर्घीभवति इत्युक्ते 'क्व पुनरस्या आवर्तनम् अस्ति' इति चेत्, सवर्णापेक्षयाऽप्यसवर्णःप्रतिपत्तव्यः,स खलु लोकोपचारादिति चेत्, सवर्णापेक्षयाऽप्यसवर्णः प्रतिपत्तव्यः, स खलु लोकोपचारादिति चेत्, एवं ह्रस्वस्य दीर्घेणासवर्णत्वमेवेत्युक्तं दधीहनम् इत्यादिषु यत्वादिकं स्यादिति ॥४।

**[वि० प०]**

तेषाम् ।अथ तेषां-ग्रहणं किमर्थम्, अनन्तरत्वात् समाना एवानुवर्तिष्यन्ते, ततो द्वौ द्वौ समानौ सवर्णौ भवत इत्यर्थः। अथ वा निर्धारणार्थविवक्षायामर्थवशाद् विभक्तिविपरिणामे सति तेषां समानानां मध्ये यौ द्वौ द्वौ क्रमसिद्धौ, तावन्योऽन्यस्य सवर्णाविति सूत्रार्थ इत्याह– **तेषाम्** इत्यादि।

**अयमर्थः** – वर्णसमाम्नायस्य क्रमसिद्धत्वाद् ह्रस्वदीर्घयोरेव सवर्णसंज्ञा स्यात्, न तु ह्रस्वयोर्द्वयोश्चेति ततो धान्याढकः इत्यादिष्वेव दीर्घः स्यान्न तु दण्डाग्रम् इत्यादिष्विति।

ननु समानो वर्णः **सवर्णः** इत्यन्वर्थे सवर्णशब्दे सति कथं ह्रस्वदीर्घयोरेव सवर्णसंज्ञा स्यात्, असमानत्वादनयोरिति ? नैतदस्ति, वर्णसमाम्नायक्रमसिद्धत्वाद् वचनबलादेवा-समानयोरपि स्यात् तेषां-ग्रहणे तु व्यक्तेः प्रतिपादितत्वात् क्रमाविवक्षायामपि व्यक्तिद्वारेण

भिन्नयोर्ह्रस्वयोर्द्वयोर्दीर्घयोश्च सवर्णसंज्ञा सिद्धेति भावः। व्यक्त्यर्थमिति। व्यक्तिरर्थः प्रयोजनमस्येति विग्रहः ॥४।

[क० च०]

तेषाम्। द्वौ द्वाविति वीप्सायां द्विर्वचनम्, सा पुनरिह सवर्णगुणेनैव। ननु सङ्ख्याया गुणत्वाभावात् कथं सवर्णगुणेनैवोक्तम् इति ? सत्यम्, सञ्ज्ञात्र गुणः, तस्याः शास्त्रे गुणवदुपचारादिति **कुलचन्द्रः**। तन्न। सञ्ज्ञा हि अभिधायिकोच्यते, सा च शब्दरूपा, शब्दश्च गुण एव। द्वौ द्वौ वाच्यवाचकभावसम्बन्धेन सवर्णशब्दवाच्यौ भवतः। द्वौ द्वावित्येकपदमित्यादि शब्दवेदिनः। पदद्वयमिति द्विरुक्तिवादिनः, उभयमेव प्रमाणम्। 'श्वलिट्, श्वलिट्' इत्यत्र एकपदत्वे छकारादर्शनात्। "नवानधोऽधो बृहतः पयोधरान्" (शिशु० १।४) इत्यत्रैकपदत्वाभावेऽकारलोपदर्शनात्। तेषां समानानां मध्ये यौ द्वौ द्वौ क्रमसिद्धौ तावन्योऽन्यस्य परस्परापेक्षिसवर्णशब्दवाच्यौ भवत इत्यर्थः। तेनाकारापेक्षयाऽऽकारस्य सवर्णत्वमाकारापेक्षया अकारस्येति, एवं सर्वत्र।

ननु तथापि वर्णसमाम्नायस्य क्रमसिद्धत्वात् क्रमस्थितयोरेव सवर्णत्वं न व्यतिक्रमस्थितयोरिति कथं न स्यात् ? ततश्च तवागमनम् इत्यत्रैव दीर्घः स्यान्न सात्रेति। नैवमक्रमव्यक्तिप्रतिपादकेन तेषां-ग्रहणेनैव तदपि निराकृतम्। एतदेव ह्रस्वयोर्द्वयोर्दीर्घयोश्चेत्यत्र द्वयोरुपादानाद् वृत्तिकृतापि सूचितमिति **केचित्। परमार्थतस्तु** यदानुपूर्व्या संज्ञा विधीयते तदानुपूर्व्यैव संज्ञाव्यवहार इति नियमो नास्त्येव, कथमन्यथा "पूर्वो ह्रस्वः" (१।१।५) इत्यनेन पूर्वत्वविशिष्टस्य संज्ञाविधानाद् यत्र कुत्रचित् स्थितस्यापि अकारादेर्ह्रस्वत्वेन व्यवहार इति।

ननु द्वौ द्वावित्युक्तेऽपि अकारेकारयोः सवर्णत्वं कथन्न स्यात् ? न च भवतु वा (यद् अवर्ण इवर्णे ए (१।२।२) इत्यनेन एत्वेनैव भाव्यं न तु समानदीर्घो भवतीति वाच्यम्) तथापि एत्वेन भवितव्यमिति ? सत्यम्, 'तव इयम्, सा ईहा' इत्यत्रैव चरितार्थत्वाद् नैवं वीप्सायाः (सामर्थ्यात्) स्वभावाद् द्वौ द्वाविति इतरानपेक्षत्वेन खण्डशः प्रतीतेः। ननु तेषां ग्रहणाभावे 'विशेषातिदिष्टः प्रकृतं न बाधते' (कात० परि० वृ० १९, ५४) इति न्यायाद् वर्णसमाम्नायस्यानुवृत्तिः कथं न स्यात् ? नैवम्। एवं सति "सिद्धो वर्ण०" (१।१।१) इत्यस्यानन्तरमेव विदध्यात्। अथ तर्हि तेषां ग्रहणाभावाद् व्यवहिताः स्वरा अनुवर्त्यन्ताम्, यथा "तस्माद् भिस् भिर्" (२।३।३८) इति, नैवम्। तदा "परो दीर्घः" (१।१।६) इत्यस्यानन्तरं "दश समानाः" (१।१।३)

इति पठित्वा स्वरसंज्ञानन्तरमिदं क्रियताम्, एतदेव एवकारेण सूचयन्नाह – तेषां दशानामेव इति वृत्तिः।

ननु 'समानाः' इति बहुवचनान्तम्, द्वौ द्वाविति द्विवचनान्तम्, अर्थवशाद् विभक्तीनामेव विपरिणामो दृश्यते (कात० परि० वृ० २५, १३), न तु वचनानामिति। तस्मात् तेषां ग्रहणं विना कथमर्थसङ्गतिः स्यादित्याह-अथवा इति। (एतच्च न चारुतरम्, यतो निर्धारणमन्तरेणापि सूत्रार्थसम्भवात् तस्मादत्र पक्षे वचनव्यत्ययं दृष्ट्वा विभक्तिव्यत्ययेनैव वचनं यदुक्तं तदेव साधु। अत्र यद्यपि पूर्वश्रुतसङ्ख्याबाधो वा प्रथमाबाधो वा इत्यत्र विनिगमकाभावः, तथापि यस्तु मन्यते अर्थवशाद् विभक्तिव्यत्ययमात्रम्, न तु वचनव्यत्ययस्तन्मतेऽयमेव पक्षः साधीयानित्यवधेयम्। तेषामित्यादीति। तेषां-ग्रहणस्य यावद्व्यक्तिप्रतिपादकत्वाद् दश जात्यालिङ्गिता यावद्व्यक्तयः सम्भवन्ति तावत्य एव इह गृह्यन्त इति भावः)।

नन्वित्यादिना कृतं पूर्वपक्षं निरसितुमाह – नैतदस्ति इति। एतत् पूर्वपक्षकृतं चोद्यं नास्तीति, किन्तु असमानयोरेव ह्रस्वदीर्घयोरन्वर्थाभावेऽपि स्यात्। कुत इत्याह – वचनबलाद् इत्यन्वयः। तेषाम् इत्यादि। द्वौ द्वावित्यत्र क्रमविवक्षायां तावद् भवत्येव, तेषां-ग्रहणेन तु व्यक्तेः प्रतिपादितत्वात् क्रमाविवक्षायामपि भवतीत्यर्थः। ननु तथापि कथमेकस्याप्यनेकत्वमित्याह – व्यक्तिद्वारेण भिन्नयोः इति। ननु तेषां-ग्रहणस्य सामान्यव्यक्तिप्रतिपादकत्वेन क्रमाविवक्षायाः साधितत्वाद् अकारादिना इकारादेः सवर्णत्वं कथन्न स्यात्। एत्वादिभिराघ्राततत्वादिति चेत् तदा इकारादेरेकारादिना सवर्णसंज्ञा स्यात्? सत्यम्, संज्ञायां दध्यत्रेत्यादिषु दीर्घः स्यात्, 'दध्येतद्' इत्यादिषु यत्वविधेश्चरितार्थत्वम्।

न च एकारैकारयोः पूर्वभागोऽकारः परभागश्चेकारः इति न्यायात् सन्ध्यक्षरेऽपि अकारभागस्य सत्त्वात्तत्रापि सवर्णत्वेन यत्वं न स्यादिति वाच्यम्, समानानुवृत्तिबलात्, संपृक्तसमानस्य ग्रहणात्। अन्यथा व्यावृत्तिरेव नास्ति? सत्यम्, द्वौ-द्वौ-ग्रहणसामर्थ्यात् खण्डशः एव प्रतीयमानौ यौ द्वौ द्वौ क्रमसिद्धौ तयोर्या व्यक्तयः श्रुतत्वात् तास्वेव क्रमचिन्ता नान्यत्र। अन्यथाऽविशेषात्ते सवर्णा इति क्रियतां किं द्वौ द्वाविति विशेषवचनेन। नच क्रमपठितानामेव व्यक्तिक्रमः सम्भवति, न चात्राकारो व्यक्त्यर्थक्रमेण पठित इति वाच्यम्, यतः क्रमाविवक्षायामित्यत्र क्रमाभावमात्रे तात्पर्यम् इति **हेमकरस्य** दुराशयः। तन्न, द्वौ द्वावित्यस्य सुखार्थत्वात्।

तथाहि, ननु द्वौ द्वाविति किमर्थम्, न चैषाम् अन्योऽन्यस्येत्यनेनान्वयात् सर्वेषामाकारादिॡकारपर्यन्तानां सवर्णसंज्ञेति वाच्यम्, बहूनामेकत्रानवस्थानात्। न च देवदत्तागमनम् इत्यत्र बहूनामेकतः सम्भवोऽस्ति। ततश्च सर्वेषां सवर्णत्वे सर्वेषामेव लोपः स्यादिति वाच्यम्, व्यञ्जनैर्व्यवधानात्, सवर्णाविति द्विवचनाच्च। यद्येवं व्यवहितयोरपि स्यादिति ? सत्यम्, द्वौ-द्वौ-ग्रहणसत्त्वेऽपि व्यवहितयोः कथन्न भवति ? वर्णसमाम्नायस्य क्रमसिद्धत्वादिति चेदत्रापि स एव न्याय्य इति।

यद्येवम्, तेषां-ग्रहणेन सामान्यव्यक्तिप्रतिपादकत्वेन क्रमाविवक्षायां द्वौ द्वावित्यत्र वीप्साबलात् खण्डशः प्रतीतिः। इकारोकारयोः सवर्णत्वं निराकृतम्। तत् कथमेतदभावे एतदर्थप्रतीतिः स्यादिति चेत्, न। असवर्णे यत्वादिविधानस्य विफलत्वात्। ननु कथं विफलत्वं दध्येतद् इत्यादिषु चरितार्थत्वादिति चेत्, न। मूर्ख ! भ्रान्तोऽसि। पश्य **"उवर्णे ओ"** (१।२।३) इत्यादौ हि वर्णग्रहणे सवर्णग्रहणमिति वक्ष्यति, ततः सर्वेषामेव सवर्णत्वे सर्वेषामेव सवर्णादिति (सवर्णादित्वम्) वाच्यं स्यात्, ततो दध्येतद् इत्यादिषु यत्वादिविधायकानां सूत्राणामेकदैव प्रवृत्तिसम्भवे परस्परविरोधान्न कस्यापि प्रवृत्तिः स्यादिति, किञ्च एत्वादिभिराघ्रातत्वात्। कुत्र वा समानः सवर्णे दीर्घः स्यात्, कुत्र वा एत्वादिविधिरिवणदिरप्यवर्णत्वात्।

न च सर्वत्र पक्षे सर्वविषयो भविष्यतीति वाच्यम्, असवर्ण इत्यादिविभाग-कल्पनावैयर्थ्यात्। यद्येवं द्वौ द्वावित्यस्याभावाद् वीप्सार्थः कुतो लभ्यत इति चेद्, अविशेषात् संज्ञिनां बहुत्वात् सापि लभ्यत एव। नैवम्, प्रतिपत्तिर्गरीयसीति। तस्मादुक्तस्यैवात्र हेमकरकृतपूर्वपक्षसिद्धान्तोऽनुसन्धेयः। यद्येवम्, तेषां-ग्रहणेन नाक्रमक्रमव्यक्तौ प्रतिपादितायां सत्याम् अन्वर्थबलाद् ह्रस्वयोर्द्वयोर्दीर्घयोरेव सवर्णसंज्ञा स्यात्, नासमानयोर्दीर्घह्रस्वयोरिति कथं न स्यात् ? सत्यम्, रूढेर्योगापहारितेति न्यायाद् रूढ्या योगार्थस्त्यज्यते मण्डपादिशब्दवत्।

ननु अन्योऽन्यग्रहणं **किमर्थम्** ? सत्यम्, क्रियाव्यतीहारार्थम्। तथाहि, अन्योऽन्यस्येति **पदात्** पूर्वापेक्षया परः, परापेक्षया पूर्वः, न तु द्वावेव सवर्णस्तदभावे द्वावेव सवर्णौ स्यातामिति। ततश्च सवर्णे दीर्घो भवन् 'छात्र ! अ अपेहि, दधि इ इन्द्रं पश्य' इत्यादिष्वेव स्यात्, न दण्डाग्रम् इत्यादिषु एकतरस्यासवर्णत्वात्। अथ मिलितयोः सवर्णत्वे द्विवचनस्यानन्वयः। **'अग्नीषोमौ देवता'** इतिवत् सवर्ण एकवचनान्त एव निर्दिश्यताम्

इति चेदहो रे पाण्डित्यम् । यस्मादुभयस्मिन् विधीयमानं सवर्णत्वं द्वयोरेव प्रवर्तते, द्वौ- द्वौ-ग्रहणं च विद्यत एव तथापि द्विवचनानुपपत्तेः प्रति भावना इति । यत्तु 'अग्नीषोमौ देवता' इत्यत्रैकवचनं तत् पुनर्बहुष्वेकवाक्यप्रतिपादनार्थम् । तेन अग्नीषोमाभ्यामाहुतिरेकेति ज्ञायते न तु पृथगिति ।।४।

**[समीक्षा]**

कलाप और पाणिनीय दोनों ही व्याकरणों में सवर्ण संज्ञा की गई है, परन्तु कलापव्याकरण में समानसंज्ञक १० वर्णों में से २-२ वर्णों की सवर्ण संज्ञा की गई है। वर्णसमाम्नाय के क्रम से ह्रस्व की दीर्घ वर्ण के साथ तो सवर्ण संज्ञा होती ही है, इसके अतिरिक्त ह्रस्व की ह्रस्व के साथ, दीर्घ की दीर्घ के साथ तथा दीर्घ की ह्रस्व के भी साथ सवर्णसंज्ञा सम्पन्न होती है–

**ह्रस्वे ह्रस्वे ततो दीर्घे दीर्घे ह्रस्वे परस्परम्।**
**सवर्णत्वं विजानीयात् तेषां-ग्रहणहेतुना ॥**

यह कार्य सूत्रपठित 'तेषाम्' पद से ज्ञापित किया गया है।

पाणिनीय व्याकरण में सवर्णसंज्ञा करने वाला सूत्र है– "तुल्यास्यप्रयत्नं सवर्णम्" (१।१।९)। अर्थात् ताल्वादि स्थान तथा आभ्यन्तर प्रयत्न जिन वर्णों के तुल्य होते हैं, उनकी सवर्णसंज्ञा होती है। इसके अनुसार सवर्णसंज्ञा के ज्ञान के लिए स्थान-प्रयत्नों का जानना नितान्त आवश्यक है। केवल तुल्य स्थान वाले या केवल तुल्य प्रयत्न वाले वर्णों की सवर्ण संज्ञा नहीं होती।

सवर्ण का अर्थ है सदृश। अतः सदृश = तुल्य स्थान– प्रयत्न वाले वर्णों की की गई यह संज्ञा अन्वर्थ मानी जाती है। जैसा कि तैत्तिरीयप्रातिशाख्य के त्रिभाष्यरत्न नामक भाष्य में कहा गया है– "इयमन्वर्थसंज्ञा। सवर्णत्वं नाम सादृश्यमुच्यते" (१।३)। ऋक्प्रातिशाख्य आदि ग्रन्थों में भी यह संज्ञा की गई है। यथा ऋक्प्रातिशाख्य– "स्थानप्रश्लेषोपदेशे स्वराणां ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ" (१।५५)। तैत्तिरीयप्रातिशाख्य– "द्वे द्वे सवर्णे ह्रस्वदीर्घे" (१।३)। वाजसनेयिप्रातिशाख्य– "समानस्थानकरणास्यप्रयत्नः सवर्णः" (१।४३)। जैनेन्द्रव्याकरण– "सस्थानक्रियं स्वम्" (१।१।२)। शाकटायनव्याकरण– "स्वः स्थानास्यैक्ये" (१।१।६)। हेमचन्द्रव्याकरण– "तुल्यस्थानास्यप्रयत्नः स्वः"

(१।१।१७)। मुग्धबोधव्याकरण– "ञपोऽक् समो र्ण ऋक् च, चपोदिताकानिता र्णः" (१।१।६, ७)। देवनन्दी, शाकटायन तथा हेमचन्द्र ने सवर्ण के लिए सादृश्य-वाची स्वशब्द का एवं बोपदेव ने सवर्ण के एकदेश र्ण का ही व्यवहार किया है ॥४।

## ५. पूर्वो ह्रस्वः (१।१।५)

### [सूत्रार्थ]

सवर्णसंज्ञक दो दो वर्णों में से पूर्ववर्ती वर्ण की ह्रस्व संज्ञा होती है ॥५।

### [दु० वृ०]

द्वयोर्द्वयोः सवर्णसंज्ञयोर्यो यः पूर्वो वर्णः स स ह्रस्वसंज्ञो भवति। अ इ उ ऋ ऌ। ह्रस्वप्रदेशाः– **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इत्येव-मादयः ॥५।

### [दु० टी०]

पूर्वः। पूर्वादयो हि दिग्देशकालाभिधायिनः। अयं पुनरिह देशवृत्तिरेव। नन्वेकोऽयं पूर्वशब्दः कथमनेकं पूर्वार्थमभिधत्ते। अथैकोऽपि शब्दोऽनेकार्थस्या-भिधायको दृष्ट इति। यथा द्यावापृथिव्यो रोदसीशब्दः, एवं सति बहुवचनं प्रतिपद्येत। नैवम्, द्वौ द्वौ सवर्णौ तयोर्मध्ये यः पूर्व इत्युक्तेऽगृहीतवीप्सोऽयं पूर्वशब्दो वीप्सार्थं गमयतीत्याह– यो यः पूर्व इति। ऌकारस्य तु ह्रस्वत्वविवक्षायां हे क्लृ !, ह्रस्वात् सम्बुद्धेः सेर्लोपो भवति। अचीक्लृपद् इति। अत्र च ऌकारे ह्रस्वे लघुसंज्ञे सत्यभ्यासस्येनि चण्परे सन्वत्कार्यं भवतीति ॥५।

### [वि० प०]

पूर्व०। निरन्वयेयं संज्ञा तथा दीर्घसंज्ञापीति। अथ कथमिह वीप्सा गम्यते ? सत्यम्, तेषामित्यतो द्वौ द्वौ सवर्णावित्यनुवर्तते, तदनुवृत्तौ चानेकसंज्ञिनः प्रतीयन्ते। पूर्वशब्दश्चायमनेकार्थत्वाद् यद्येकं पूर्वमाचक्षीत तदा न सकलस्य संज्ञित्वमुक्तं स्यात् तस्माद् द्वौ द्वावित्यनुवृत्तिसामर्थ्याद् अनेकस्य संज्ञिनः सम्भवादेवागृहीतवीप्सोऽयं पूर्वशब्दो वीप्सां गमयतीत्याह– यो य इति ॥५।

[क० च०]

पूर्वः । अथ पूर्वशब्दोऽयं न तावद् दिक्कालवाचकः, वर्णस्य तद्भावासम्भवात्, नापि देशवाचकस्तस्यापि दिक्कालावच्छेदेनैव वाचकत्वात् । न हि भवति दक्षिणे **पश्चिमे** वाऽयं पूर्वदेशः इति, तस्मादत्र पूर्वशब्देन किमुक्तमिति विकला वैयाकरणाः । अत्र **कुलचन्द्रः** – नायं पूर्वशब्दो व्यवस्थावचनः, किन्तु क्रमावस्थितानां प्रथमपर्यायः, सोऽपि क्वचित् कालदेशवृत्तिः । यथा कायस्य पूर्व इति । तन्न, पूर्वशब्दस्य पूर्वकालावच्छिन्नदेशवृत्तितयात्र व्यवस्थावाचित्वात् । व्यवस्था चात्र दिग्देशकालानामवधिनियमः । स चात्र व्यभिचारादेव घटते इति । तर्हि द्वयोरिति कथं षष्ठी, "दिगितरर्तेऽन्यैश्च" (२।४।२१) इति पञ्चम्या विषयत्वात् । नैवम्, सवर्णयोर्मध्ये यः पूर्व इत्यवधारणार्थत्वात् । अवधिविवक्षायां तु तद्विषय इति । अथ ह्रसति अल्पं ध्वनतीति **ह्रस्वः** । एवं मुखं दीर्य्यते इति **दीर्घ** इति कुलचन्द्रेणान्वर्थः कृतः । तन्न, औणादिकानामव्युत्पन्नत्वेन योगार्थाभावात् "गमादेर्डो" (गमेर्डोः कात० उ० २।२८) प्रत्ययादिना साधितेषु गोशब्दादिषु योगार्थानङ्गीकारात्, स्वरादीनां यादृशोऽन्वयस्तादृशाभावाच्च ह्रस्वत्वयोगाद् ह्रस्व इत्यादिकन्तु वर्णानां धर्मकथनमात्रं नान्वय इत्याह – **निरन्वयेयं संज्ञा** इति ।

ननु सकृदुच्चरितः शब्दः सकृदर्थं गमयितुमर्हति न तु वीप्सार्थमित्याह – **अथ** इति । तस्माद् इत्यादि । ननु तावदयमर्थो यदि द्वौ द्वावित्यनुवर्तते लाघवात् तेषां ग्रहणमेवानुवर्तते ! लाघवं च यद् द्वयोरिति प्रथमार्थे षष्ठीविपरिणामो न क्रियते ततश्च तेषां समानानां मध्ये यः पूर्वः स ह्रस्व इत्यर्थः । स च पूर्वो वर्णोऽकार एव । नैवम्, अह्रस्व इत्यकरणात् तेषामिति नानुवर्तते । एतदर्थं न बुद्ध्वा हेमकरेण एकस्य पूर्वस्य संज्ञायाम् अह्रस्व इत्यादिकं करोतीति कुसिद्धान्तोऽयमिति यदुक्तं तत्तुच्छमेव । तेषां ग्रहणनिवृत्तावेतत्सिद्धान्तं विना द्वौ द्वावित्यनुवर्तनाभावाद् वीप्सार्थलाभो न स्यादेव ।

एतेन पूर्वसूत्रटीकायां यद् द्वौ द्वौ-ग्रहणं प्रतिपत्तिगौरवनिरासार्थमुक्तं तत् पूर्वस्मिन्नेव, इह तु प्रयोजनार्थमिति सूचितम् । तस्माद् अह्रस्व **इत्यकरणाद्** हेतोः सर्वेषां संज्ञित्वमुक्तं **तस्मादित्यर्थः** । द्वौ द्वावित्यनुवर्तनं सहायमासाद्य **यत्** सामर्थ्यग्राह्यं तेनेत्यर्थः । पूर्वशब्दः समर्थोऽभूदिति साभिप्रायवचनम् । **अगृहीतवीप्स** इति अकृतद्विर्वचन इत्यर्थः । सवर्णयोरिति यद् वृत्तौ विवृतं तद् यदृच्छयैव, न तु कार्यार्थम् ।

न च सवर्णयोः पौर्वापर्यनैयत्याभावाद् दीर्घस्य ह्रस्वसंज्ञा कथं न स्यादिति वाच्यम् इत्युभयसंज्ञावैयर्थ्यादेकसंज्ञयैव व्यवहारसिद्धेः। वस्तुतस्तु अत्र तेषां ग्रहणानुवर्तनाभावात् तत्कृतक्रमाविवक्षाया निरस्तत्वाद् वर्णसमाम्नायस्य क्रमापेक्षयैव पूर्वत्वं बोध्यम् ॥५।

**[समीक्षा]**

कोई भी स्वर न्यूनतः एकमात्रिक अवश्य होता है। इसी एकमात्रिक स्वर वर्ण की ह्रस्व संज्ञा की गई है। ह्रसति = अल्पीभवति दीर्घाद्यपेक्षया इति ह्रस्वः। अतः इसे अन्वर्थ माना जाता है। कलापव्याकरण में उसके वर्णसमाम्नाय के अनुसार सवर्णसंज्ञक दो-दो वर्णों (अ-आ, इ-ई, उ-ऊ, ऋ ॠ, ऌ-ॡ) में से पूर्व वर्ण (अ, इ, उ, ऋ, ऌ) की ह्रस्वसंज्ञा की गई है, जब कि पाणिनि का सूत्र है "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" (पा० १।२।२७)। अर्थात् एकमात्रिक वर्ण की ह्रस्व-संज्ञा होती है। इसके अनुसार शिक्षाशास्त्रीय वर्णोच्चारणसंबन्धी नियम जानने के बाद ही इस संज्ञा का ज्ञान हो सकता है।

पूर्वाचार्यों ने भी इस संज्ञा का प्रयोग किया है। यथा –

निरुक्त – अहिरयनादेत्यन्तरिक्षे। अयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति (२।१७।१)। अयं हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति (६।११।१)।

नि० भा० – "आङ्पूर्वस्य हन्तेः स पुनरयमुपसर्गं निर्ह्रस्य ह्रस्वं कृत्वा अहिरुच्यते" (२।१७।१)।

काशकृत्स्नधातुव्याख्यान – ह्रस्वोऽभ्यासस्य, प्वादेर्ह्रस्वः (सू० ८०, ११३)।

गोपपथब्राह्मण – ह्रस्वोदात्त एकाक्षर ओङ्कारोऽथर्ववेदे (१।१।२५)।

ऋक्प्रातिशाख्य – ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम् (१।१७)।

वाजसनेयिप्रातिशाख्य – अमात्रस्वरो ह्रस्वः (१।५५)।

तैत्तिरीयप्रातिशाख्य – ऋकारऌकारौ ह्रस्वौ, अकारश्च, तेन च समानकालस्वरः, अनुस्वारश्च (१।३१-३४)।

अथर्वप्रातिशाख्य – मतौ ह्रस्वः (३।१।९)। ऋक्तन्त्र – अकालो ह्रस्वः (२।४।१०)। इसके दो सूत्रों में ह्रस्व के लिए एकदेश 'स्व' शब्द का भी प्रयोग किया गया है – "स्पर्शः स्वे, भे स्वे मान्तस्थी" (२।३।५; ४।१।१०)।

नाट्यशास्त्र – य इमे स्वराश्चतुर्दश निर्दिष्टास्तत्र वै दश समानाः। पूर्वो ह्रस्वस्तेषां परश्च दीर्घो विधातव्यः; एकमात्रं भवेद् ह्रस्वम् (१४।२०; १६।१२३)।

कलाप से परवर्ती अधिकांश व्याकरणों में एकमात्रिक अच् की ह्रस्व संज्ञा मानी गई है। जैसे,

चान्द्रव्याकरण – अत्र चावर्णो ह्रस्वो दीर्घः प्लुत इति त्रिधा भिन्नः, एकमात्रिको ह्रस्वः (वर्णसूत्र ३६;४१)।

जैनेन्द्रव्याकरण – आकालोऽच् प्रदीपः (१।१।१)।

हेमशब्दानुशासन – एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः (१।१।५)।

मुग्धबोधव्याकरण – आवत् स्वर्घप्लु (सू० ५)। इसमें एकदेश 'स्व' शब्द का ही व्यवहार किया गया है।

**[विशेष]**

लोकव्यवहार में ऐसा देखा जाता है कि सज्जन पुरुषों का स्नेह प्रारम्भ में तो अल्प होता है तथा क्रमशः दीर्घ होता जाता है। इसके विपरीत असज्जन (दुष्ट) पुरुषों का स्नेह प्रारम्भ में तो अधिक होता है, परन्तु वह क्रमशः क्षीण (ह्रस्व) होता जाता है। किसी कवि ने कलापव्याकरण के इन ह्रस्व-दीर्घसंज्ञाविधायक सूत्रों को आधार मानकर ऐसा कहा भी है –

**पूर्वो ह्रस्वः परो दीर्घः सतां स्नेहो निरन्तरम्।**
**असतां विपरीतस्तु पूर्वो दीर्घः परो लघुः॥**

(द्र०, टे० ट० टे०, भा०१, पृ० १९२)

तु० – नीतिशतक,

**आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।**
**दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम्॥** (श्लो०६०)॥५।

## ६. परो दीर्घः (१।१।६)

**[सूत्रार्थ]**

सवर्णसंज्ञक दो-दो वर्णों में परवर्ती स्वर वर्णों की दीर्घ सञ्ज्ञा होती है॥६।

**[दु० वृ०]**

द्वयोर्द्वयोः सवर्णसंज्ञयोर्यो यः परो वर्णः स स दीर्घसंज्ञो भवति। आ ई ऊ ॠ ॡ। ह्रस्वो लघुर्दीर्घो गुरुरित्युच्चारणवशाद् गम्यते। तथा संयोगे सति ह्रस्वोऽपि गुरुः "गुरुमतोऽनृच्छः" (३।२।१९) इति वर्जनाच्च। दीर्घप्रदेशाः– "रो रे लोपं स्वरश्च पूर्वो दीर्घः" (१।५।१७) इत्येवमादयः॥६।

[दु० टी०]

**परः**। ननु "पूर्वो ह्रस्वः" (१।१।५) इत्युक्ते "परो दीर्घः" इति गम्यते, सम्बन्धिशब्दत्वात्, किं परवचनेन ? ह्रस्वदीर्घाविति च कृते यथासङ्ख्यं पूर्वग्रहणेनापि किं कृतम्, यत् कृतं तत् सुखप्रतिपत्त्यर्थमेव। लघुगुरुसंज्ञापि लोकोपचारादित्याह – ह्रस्वो लघुः इत्यादि। किञ्च यदि संयोगपरस्य ह्रस्वस्य गुरुसंज्ञा नास्तीति तदा "नाम्यादेर्गुरुमतोऽनृच्छः" (३।२।१९) इत्यादिना विधीयमाने परोक्षायामृच्छेः कः प्रसङ्गः, येन प्रतिषिध्यते, तस्मादनुमीयते 'संयोगे सति पूर्वो ह्रस्वोऽपि गुरुः' इति। तेन 'कुण्डा, हुण्डा' इति "गुरोश्च निष्ठासेटः" (४।५।८१) इति अप्रत्ययो भवति। ननु तर्हि ह्रस्वदीर्घावपि लोकत एव सिद्धौ ? सत्यम्, बालबुद्धिनिष्पत्त्यर्थाविव हि तौ, ततो हि लघुगुरुसंज्ञां प्रतिपद्यन्ते श्रोतारः। कथम्, नित्यं सन्ध्यक्षराणि दीर्घाणि तान्यपि द्वादशप्रभेदानि इत्याचक्षते। न च वचनमिह प्रयोजयति। यदि 'रैच्छाया, गोच्छाया, नौच्छाया' इति सन्ध्यक्षराद् इति पदान्ताद् द्विर्विभाष्यते, तदा येनाप्यधिकारेण दीर्घात् पदान्ताद् वा छस्य द्विर्भाव इष्यते, तेनैव सन्ध्यक्षरादपि। "दीर्घस्योपपदस्यानव्ययस्य" (४।१।२०) इत्यत्र मतं दर्शयिष्यामः ॥६।

[वि० प०]

**परः**। पूर्ववदिहापि वीप्सार्थो मन्तव्यः। "ह्रस्वो लघुः, संयोगे परे ह्रस्वो गुरुः, गुरुर्दीर्घश्च" इति लघुगुरुसंज्ञार्थं सूत्रत्रयं केनचित् कृतम्, तदिह न वक्तव्यमित्याह – ह्रस्व इत्यादि। तथेत्युच्चारणवशादेवेति। किञ्च यदि ह्रस्वो वर्णः संयोगे गुरुसंज्ञो न भवेत् तदा "नाम्यादेर्गुरुमतोऽनृच्छः" (३।२।१९) इति ऋच्छेः प्रतिषेधो व्यर्थः स्यात्। तत्र हि गुरुमतो धातोर्विधीयमान आम्प्रत्ययः कथमृच्छेः प्रसज्येत, येन अर्थवानिति दर्शयति गुरुमत इत्यादि ॥६।

[क० च०]

**परः**। इहापि परशब्दः पूर्वशब्दापेक्षया देशवृत्तिः। ननु परग्रहणं किमर्थं पूर्वादीनां सम्बन्धिशब्दत्वादेव पूर्व-परत्वलाभो भविष्यति। न च पूर्वशब्दोऽनुवर्तते इति वाच्यम्, पृथग् योगात्। ननु तत्र विभक्तिविपरिणामे कारणमुक्तम्। अत्र च कारणाभावात् सवर्णानुवृत्तौ सत्यां द्वौ द्वौ सवर्णौ दीर्घौ भवतः इत्यर्थः कथं न स्यात् ? नैवम्। लोके दीर्घभिन्नस्यैव ह्रस्वव्यवहारात् चेत्, अकिञ्चित्करमेव तत्संज्ञापरिभाषितत्वात्। तदयुक्तम्, तथाहि दीर्घाविति कृतं स्यात् तथा सवर्णाविति एकस्वरस्य द्विर्वचने सति अभ्यासे

दीर्घस्य ह्रस्वत्वाच्च। तर्हि समान इत्यनुवर्तताम्, नैवम्, तत्रैव दीर्घग्रहणाकरणात्। सत्यम्, प्रतिपत्तिरियं गरीयसीति परग्रहणम्। एवं ह्रस्वदीर्घावित्यनुवृत्तौ यथासङ्ख्येन ह्रस्वदीर्घवाच्यौ भवत इत्यर्थे परग्रहणं भिन्नयोगसुखार्थम्। दीर्घो गुरुरिति **वृत्तौ** दीर्घ-ग्रहणं द्विमात्रोपलक्षणार्थम्। तेन सन्ध्यक्षराणामपि गुरुत्वात् 'एधाञ्चक्रे, ओखाञ्चकार' इति सिद्धम्।

ननु यन्मते गुरुसंज्ञायाः कार्यमेव क्रियते न तु उच्चार्यते, तन्मते कथमुच्चा-रणवशाद् गम्यत इत्याह **किञ्च** इति। यद् वा यो लघुरुच्चरति स कथं संयोगे गुरुर्भवतु संयोगोच्चारणकालावस्थानादित्याह **किञ्च** इति। सर्वोद्दिष्टमिदं तदा 'कुण्डा, हुण्डा' इत्यादौ **"गुरोश्च निष्ठासेटः"** (४।५।८१) इति अप्रत्ययः ॥६।

**[समीक्षा]**

दोनों ही व्याकरणों में यह संज्ञा की गई है। पाणिनि ने द्विमात्रिक अच् की तथा शर्ववर्मा ने सवर्णसंज्ञक दो-दो वर्णों में से परवर्ती वर्णों की दीर्घसंज्ञा की है। पाणिनि की दीर्घसंज्ञा **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** (१।२।२७) का बोध तभी हो सकता है जब शिक्षाग्रन्थों के अनुसार वर्णोच्चारणविधि का सम्यक् ज्ञान हो, परन्तु कलाप-व्याकरण में ऐसी असुविधा नहीं है। 'द्राघृ आयामे' (भू० ८०, ८१) धातु से निष्पन्न होने के कारण दीर्घसंज्ञा अन्वर्थ है। महर्षि **यास्क** ने भी कहा है- **"दीर्घं द्राघतेः"** (नि० २।५)। पूर्वाचार्यों द्वारा प्रयुक्त होने के कारण यह संज्ञा प्राचीन है। जैसे,

**ऋक्प्रातिशाख्य**– "अन्ये दीर्घाः" (१।१८)।

**वाजसनेयिप्रातिशाख्य**– "द्विस्तावान् दीर्घः" (१।५७)।

**तैत्तिरीयप्रातिशाख्य**– "द्विस्तावान् दीर्घः" (१।३५)।

**अथर्ववेदप्रातिशाख्य**– "उपसर्गस्योत्तरपदे दीर्घः, अभ्यासस्य दीर्घश्छन्दसि" (३।३।११,१३)।

**ऋक्तन्त्र**– "द्वे दीर्घम्" (२।५।३)। इसके अनेक सूत्रों में एकदेश 'घ' का ही प्रयोग किया गया है-

"घम्, रौ घम्, घाद् ग्रा, घे णः" (२।५।१०, ३।४।३; ६।३; ४।१।८)।

**काशकृत्स्नधातुव्याख्यान**– "गुहो दीर्घः, यनि दीर्घश्च, शमादेर्दीर्घो यनि, नथादेरिनि दीर्घः" (सू० ६४, ८४, ८७, १२०)।

**गोपथब्राह्मण**– "दीर्घप्लुतोदात्त एकाक्षर ओङ्कारः सामवेदे" (१।१।२५)।

**नाट्यशास्त्र –** "य इमे स्वराश्चतुर्दश निर्दिष्टास्तत्र वै दश समानाः, पूर्वो ह्रस्वस्तेषां परश्च दीर्घो विधातव्यः"(१४।२०)।"द्विमात्रं दीर्घमुच्यते"(१६।१२३)।

कलाप के अतिरिक्त कुछ अन्य अर्वाचीन व्याकरणों में दीर्घ-संज्ञाविधायक सूत्र इस प्रकार हैं –

**चान्द्रव्याकरण –** अत्र चावर्णो ह्रस्वो दीर्घः प्लुत इति त्रिधा भिन्नः; द्विमात्रिको दीर्घः" (वर्णसूत्र ३६, ४२)।

**जैनेन्द्रव्याकरण –** "आकालोऽच् प्रदीपः" (१।१।१)।

**हेमचन्द्रशब्दानुशासन –** "एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः" (१।१।५)।

**मुग्धबोधव्याकरण –** "आवत् स्वर्घप्लु" (सूत्र ५)।

उक्त के अनुसार देवनन्दी ने इसके लिए एकदेश **'दी'** का तथा बोपदेव ने 'र्घ' का प्रयोग किया है।

**[विशेष]**

वृत्तिकार दुर्गसिंह ने ह्रस्व की लघुसंज्ञा तथा दीर्घ की गुरु संज्ञा उच्चारण के आधार पर मानी है और इस प्रकार उन्होंने शर्ववर्मा-द्वारा लघु-गुरु संज्ञाओं के लिए सूत्र न बनाया जाना उचित ठहराया है। संयोग-संज्ञक वर्ण के पर में रहने पर पूर्ववर्ती ह्रस्व के भी उच्चारण में प्रायः द्विमात्रिक काल अपेक्षित होता है, अतः तादृश ह्रस्व की भी संयोग संज्ञा स्वीकार की जा सकती है। तदर्थ पृथक् सूत्र की कोई आवश्यकता नहीं है। पाणिनीय व्याकरण में इन संज्ञाओं के लिए सूत्र पढ़े गए हैं – **"ह्रस्वं लघु, संयोगे गुरु, दीर्घं च"** (१।४।१०, ११, १२)।६।

## ७. स्वरोऽवर्णवर्जो नामी (१।१।७)

**[सूत्रार्थ]**

स्वरसंज्ञक १४ वर्णों में से अवर्ण (अ-आ) को छोड़कर शेष १२ स्वरों की नामी संज्ञा होती है। नामिसंज्ञक वर्ण – इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥७।

**[दु० वृ०]**

अवर्णवर्जः स्वरो नामिसंज्ञो भवति। इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। नामिप्रदेशाः – "नामिपरो रम्" (१।५।१२) इत्येवमादयः ॥७।

[दु० टी०]

**स्वरः।** वर्जनयोग्यमवर्णं वर्जयतीति प्राप्ये **कर्मण्यण्** (४।३।१)। नमनं **नामः,** सोऽस्यास्तीति नामी। तथा चैषां ध्वनिर्ह्रस्वदीर्घभेदेन तत्र ध्वनिर्निःसरति न चोर्ध्वं स्पृशति। स्वरग्रहणं चेह समाननिवृत्त्यर्थं चेदयुक्तम्, नामीत्येकवचनान्तत्वात्। तथाहि– पूर्वो हि समानशब्दो बहुवचनान्तस्तत् सुखप्रतिपत्त्यर्थं बहुवचनान्तमेव विदधीत। तर्हि अनन्तरत्वाद् दीर्घो वा नामी स्यात्। अग्निर्गतो वायुरत्र नीचैर्यातो गौरिहेति ह्रस्वात् सन्ध्यक्षराच्च न विसर्जनीयो रमापद्यते। ननु सन्ध्यक्षराणां नामिसंज्ञास्ति, ग्लायति – म्लायतीति कथं गुणो न भवति ? सत्यम्, ऐकारोपदेशबलात्। वर्जग्रहणं **'नञा निर्दिष्टमनित्यम्'** (का० परि० ३७) इति ज्ञापनार्थमेव ॥७।

[वि० प०]

**स्वरः।** अवर्णं वर्जयतीति प्राप्ये **"कर्मण्यण्"** (४।३।१)। नमनं नाम इति भावे घञ्, सोऽस्यास्तीति नामी। तथा च अमीषां ह्रस्वदीर्घभेदेन स्वत एव ध्वनिरुच्चरति, नैवोर्ध्वं स्पृशति इति। अनन्तरत्वाद् दीर्घोऽनुवर्तते इति शङ्का-निरासार्थं स्वरग्रहणम्। 'स्वरोऽनवर्णो नामी' इति सिद्धे यद् वर्जग्रहणम्, तत् **'नञा निर्दिष्टमनित्यम्'** (कालाप-परि० ३७) इति ज्ञापनार्थम्, तेन **'पित्र्यम्'** इत्यादयः सिद्धाः ॥७।

[क० च०]

**स्वरः।** प्राप्ये कर्मण्यण् इति। यद्यपि **'आदित्यं पश्यति'** इत्यादौ प्राप्ये कर्मण्यण् नास्ति, तथापि अभिधानादित्यर्थः। **अवर्णं वर्जयतीत्यादि।** ननु कथमवर्णवर्जः स्वर इति विवृतम्। वर्जनं हि परित्यागः, नहि स्वरोऽवर्णं वर्जयति अवर्णस्यापि स्वरत्वात्। किन्तर्हि नामिसंज्ञाप्राप्तिदशायां ततश्च निषेधस्य प्राप्तिपूर्वकत्वात् स्वरो नाम्यवर्णवर्ज इति निर्देशो युज्यते ? सत्यम्, नामिसंज्ञाप्राप्तिदशायां स्वरोऽवर्णं वर्जयिष्यतीति कृत्वा तत् पूर्वदशायामपि योग्यतया अवर्णवर्जमित्युच्यते। क्रियायोग्य-तयैव कृदन्तस्य प्रयोगात्। यथा अपचन्नपि सूपकारः **पाचक** इति।

ननु तथापि अवर्णवर्जशब्दस्य कतमोऽर्थेऽवर्णात्यन्ताभाववत्त्वं तत्सम्बद्धा-भाववत्त्वं वा ? न तावदाद्यः। अवर्णस्यापि अवर्णात्यन्ताभाववत्त्वान्नामित्वप्रसङ्गात्, न ह्यवर्णोऽवर्णं वर्तते। नापि द्वितीयः। नयतीत्यादौ ईकारस्य एकारपदनिबन्धनाद-वर्णसम्बन्धस्य विद्यमानत्वात्। ततश्च नामित्वाभावाद् गुणो न स्यात्। अत्रोच्यते –

**जातिरेव पदार्थ** इति पक्षे यथा गोशब्देन गोत्वमभिधीयते, तथा अवर्णशब्देन अवर्णत्वम् उच्यते। ततश्चावर्णत्वात्यन्ताभाववान् यः स्वरः स नामीत्यर्थः।

अथवा अवर्णशब्देन अवर्णव्यपदेश उच्यते अवर्णव्यपदेशात्यन्ताभाववान् इत्यर्थः। ननु तथापि सन्ध्यक्षरे पूर्वभागस्यापि अकारत्वात् तद्वर्जनं कथं न स्यात्, नैवम्। तत्रावर्णव्यवहाराभावात्। **तथा चेत्यादि।** ननु वर्णानामेव ध्वनिरूपत्वात् कथम् **'अमीषाम्'** इति षष्ठी, भेदाभावात्। सत्यम्, **'राहोः शिरः'** इतिवत् सत्यप्यभेदविवक्षा इति न दोषः। यद् वा अमीषाम् इत्यनेन ह्रस्वदीर्घभेदेनेति योजनीयम्। **ऊर्ध्वम्** इति। ननु यदि ऊर्ध्वं स्पृशतीत्युच्यते तदा कथमीकारादीनामुदात्तव्यपदेश इति।

**अत्र कुलचन्द्रः—** नामिनो वर्णाः स्थानेन वैदिकहस्तस्वरेण ऊर्ध्वमाददते न ध्वनिनेति भावः। अवर्णस्तु ध्वनावपि ऊर्ध्वमादत्ते इति, तन्न, वर्णातिरिक्तो ध्वनिरस्ति शब्दानित्यताभावादेव वर्णातिरिक्तध्वनिपक्षस्य निराकृतत्वात्। तस्मादिदमेव युक्तम्, अवर्णवद् ऊर्ध्वं न स्पृशतीत्यर्थः। अत एव **पञ्जिकायामपि** प्रश्लेषो व्याख्यायते, तथाहि न अ-आ इव ऊर्ध्वं **नैवोर्ध्वम्।** यद्येवम वर्णवर्जनमनर्थकम्, अन्वर्थादिव अवर्णवर्जनसिद्धेः। अन्यथा विशेषाभावे स्वरसंज्ञयैव व्यवहारसिद्धेर्नामिसंज्ञाविधानमनर्थकं स्यात्। नैवम्, **"तत्र चतुर्दश०"** (१।१।२) इत्यादौ चतुर्दशादिग्रहणवत् संज्ञानुवादार्थमिति। किञ्च इनोऽतिशयनार्थशङ्कया ह्रस्वस्यैव स्यान्न दीर्घस्येत्यपि प्रतिपद्येत। तस्मात् कर्तव्यमेवावर्णवर्जग्रहणम्। ननु स्वरग्रहणं किमर्थम्, प्रस्तुतत्वात् स्वरा एवानुवर्त्तिष्यन्ते। नच दीर्घानुवृत्तिरिति वाच्यम्, आवर्जमित्यकरणात्।

अथ प्लुतव्यवच्छेदार्थं वर्णग्रहणमिति चेत्, न। एकजातीयत्वादावर्जनेनैव तस्यापि वर्जनात् तर्हि इष्टाधिकारत्वात् सवर्णानुवृत्तिः स्यात्? सत्यम्, नामिनाविति द्विवचनाकरणात्। अथ तथापि अर्थवशाद् वचनव्यत्ययेन सवर्णा एव नामीत्यर्थः कथं न स्यात्। यत्तु अर्थवशाद् विभक्तिविपरिणामो न वचनस्येति **"ह्रस्वोऽम्बार्थानाम्"** (२।१।४०) इति **कुलचन्द्रेणोक्तम्,** तत्तुच्छम्। आकाङ्क्षाया: सत्त्वे हि यावतैवार्थोपपत्तिस्तावतैव ऊहनीयत्वात्। अत एव **"न व्यञ्जने स्वराः सन्धेयाः"** (१।२।१८) इत्यतः स्वरग्रहणमेकवचनान्तीभूय "द्विवचनमनौ" (१।३।२) इत्यनुवर्तते इति वक्ष्यति, तर्हि **"नाम्यन्तयोर्धातुविकरणयोर्गुणः"** (३।५।१) इति न सङ्गच्छते, वर्णद्वयस्य सवर्णसंज्ञत्वात्। भवति— करोतीत्यादौ धातुविकरणयोः सवर्णत्वाभावान्नाम्यन्तत्वानुपपत्तेः। अथ प्रयोगे उभयाभावेऽपि प्रयोगान्तरस्थित-

व्यक्त्यन्तरापेक्षया सवर्णत्वमस्तीति चेत् तर्हि समानानुवृत्तिप्रकार एवायं भवतु, तर्हि समानानुवृत्तिरेवेति चेत्, न, **"गोरौ घुटि"** (२।२।३३) इति ज्ञापकात्। कथमन्यथा अनामिन ओकाराद् विसर्गस्य रेफः स्यादिति।

यद्येवं दृष्टानुवृत्तिकतया वर्णसमाम्नाय एवानुवर्तताम्। ततो वचनविपरिणामप्रयासश्च परिहृतो भवति, नैवम्। व्यञ्जनस्यापि नामित्वप्रसङ्गः स्यात्। न च **"नामिकरपरः"** (२।४।४७) इत्यादौ करग्रहणसामर्थ्याद् व्यञ्जनस्य नामित्वं न भवतीति वाच्यम्, नियमार्थेनैव तस्य चरितार्थत्वात्। तर्हि **"नामिव्यञ्जनान्ताद् आयेरादेः"** (३।६।४२) इत्यत्र नामिग्रहणेनैव सिद्धे यद् व्यञ्जनग्रहणं तद् बोधयति – व्यञ्जनानां नामित्वं नास्तीति चेद् अनुस्वारविसर्जनीययोरपि नामित्वं स्यात्।

नैवम्। **"नामिकरपर०"** (२।४।४७) इत्यत्र नुविसर्जनीयग्रहणान्न भविष्यति। अन्यथा नामिद्वारेणैव सिद्धे नुविसर्जनीयग्रहणमनर्थकं स्यात् चेत्, न। सर्वत्रैव वर्णसमाम्नायस्य सप्तम्यन्तत्वेनैव वर्तमानत्वात्। कथमत्र प्रथमान्तत्वेनावृत्तिः स्यात्। भवतु वा। तथापि स्वरानुवर्तनप्रकार एवायं भवतु नाम स्वराणामेवानुवर्तनं साध्यस्य सिद्धेः किं पुनः स्वरग्रहणेन। ततोऽन्वर्थवशाद् विभक्तिविपरिणामे सति अवर्णवर्जः स्वरो नामीत्यर्थो भविष्यतीत्याह – **स्वरग्रहणमित्यादि**। स्वरग्रहणमुत्तरार्थमिति **कुलचन्द्रः**। एतेन एकारादीनि स्वरनामानीति वक्ष्यति, यदि नामिग्रहणमनुवर्तिष्यते तदा शङ्कानिरासार्थमिति ॥७॥

**[समीक्षा]**

टीकाकार – पञ्जिकाकार आदि व्याख्याकारों के अनुसार नामी का अर्थ है वे वर्ण (ह्रस्व-दीर्घ), जिनके उच्चारण में ध्वनि का स्पर्श ऊपर की ओर न होता हो। ऐसा देखा जाता है कि अवर्ण के उच्चारण में तो ध्वनि का स्पर्श ऊपर की ओर होता है, परन्तु इ से लेकर औ तक के स्वर वर्णों की उच्चारणध्वनि नीचे की ओर ही होती है। इसीलिए अवर्ण को छोड़कर नामी संज्ञा की गई है। पाणिनि ने इसके लिए 'इच्' प्रत्याहार का प्रयोग किया है। 'नमनमिति **नामः** सोऽस्यास्तीति **नामी**' इस व्युत्पत्तिलभ्य अर्थ का इकारादि संज्ञियों में अन्वय होने के कारण यह संज्ञा अन्वर्थ है जबकि उक्त वर्णों के लिए पाणिनिद्वारा किया गया 'इच्' प्रत्याहार का प्रयोग विशुद्ध यादृच्छिक ही है।

काशकृत्स्नव्याकरण में इसका व्यवहार दृष्ट होने से इसकी प्राचीनता सिद्ध होती है– **"नामिनो गुणः सार्वधातुकार्धधातुकयोः, स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणामन्त्यस्वरादेर्लोपो गुणश्च नामिनाम्"** (काश० धा० व्या०, सू० २२, १३६)। युधिष्ठिर मीमांसक ने प्रमादवश ८ ही स्वरों की नामिसंज्ञा का उल्लेख किया है (द्र०, काश० धा० व्या०, पृ० ४४, टि० २)॥७।

## ८. एकारादीनि सन्ध्यक्षराणि (१।१।८)

### [सूत्रार्थ]

स्वरसंज्ञक वर्णों में से 'ए ऐ ओ औ' इन चार वर्णों की सन्ध्यक्षर संज्ञा होती है॥८।

### [दु० वृ०]

एकारादीनि स्वरनामानि सन्ध्यक्षरसंज्ञकानि भवन्ति। ए ऐ ओ औ। सन्ध्यक्षरप्रदेशाः– **"सन्ध्यक्षरे च"** (३।६।३८) इत्येवमादयः॥८।

### [दु० टी०]

**एकारादीनि**। सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे चादिशब्दो दृश्यते। सामीप्ये यथा– 'ग्रामादौ घोषः'। व्यवस्थायाम्– वर्णा ब्राह्मणादयः। प्रकारे– 'आढ्या देवदत्तादयः'। अवयवे– 'स्तम्भादयो गृहाः' इति। तत्र सामीप्ये पुनरेकारस्य न सन्ध्यक्षरसंज्ञा स्यात्, उपलक्षणस्य कार्येऽनुपयोगित्वात्। यथा चित्रगुरानीयताम् इत्युक्ते चित्रगवोपलक्षितः पुरुष एवानीयते, न तु चित्रा गौरिति। एवं सति सन्ध्यक्षरान्तानामाकारादेशे **"न व्ययतेः परोक्षायाम्"** (३।४।२१) इत्यनर्थकमेव। व्यवस्थापि नैव, व्यभिचाराभावाद् वर्णसमाम्नायो हि क्रमसिद्ध एव। प्रकारश्च सादृश्यम्, तच्च न संभवति। सन्ध्यक्षराणि हि सदैव परस्परविसदृशानि, तस्मादेकारादिरवयवो येषां तान्येकारादीनि। तद्गुणसंविज्ञानो बहुव्रीहिरयं समुदायेऽवयवस्यान्तर्भावात्।

अथ समुदायस्यैकत्वात् कथं बहुवचनमिति चेत्, समुदायिभ्योऽन्यः समुदायोऽन्यो वा। अनन्यपक्षे बहुवचनम्, अवयवा एवावयविन इति। सन्धावक्षराणि **सन्ध्यक्षराणीति**। तथा चैषां पूर्वभागोऽकारः एकारैकारयोः परो भाग इकारः। ओकारौकारयोश्चोकारश्चेति। ननु दीर्घेषु ह्रस्वाः सन्ति, ऋकारे त्रय स्वरभागास्तन्मध्यवर्ती तुरीयो रेफः, ॡकारे ऌकारश्च। तदा 'प्रलीय, प्रलूय' इति ह्रस्वाश्रयः "तोऽन्तः" (धातोस्तोऽन्तः पानुबन्धे

४।१।३०) प्रसज्येत। 'याता, वाता' इत्यत्र **"अस्य च लोपः"** (३।६।४९) स्यात्। नैवम्, अव्यवपृक्तेषु दृष्टो विधिर्न व्यवपृक्तेषु भवितुमर्हति। यथा – तैलं न विक्रेतव्यम् इत्युक्ते व्यवपृक्तास्तु तिला विक्रीयन्ते एवेति। येषामिदं दर्शनं तेषां **"कृपे रो लः"** (३।६।९७) इति ऋकारस्थस्य रेफस्य लृकारस्थस्य लकारस्य चार्द्धस्य सम्पूर्णस्य वा सामान्यनिर्देशेन निर्विशेषाल्लत्वं सिद्धम्। मातॄणामिति णत्वार्थम् ऋवर्णग्रहणं कर्तव्यम्, स्वरभागेन व्यवधानादिति। न हि स्वरभागः स्वरो भवितुमर्हति, येन स्वरान्तरत्वाण्णत्वं स्यात्, **इह तु पृथक् प्रयत्नसाध्य एव वर्ण उच्यते। वर्णैकदेशास्तु वर्णच्छायानुकारिणो न पुनस्त एव।** यथा – मरुमरीचयो जलच्छायामनुकुर्वते, न तु जलम्। 'क्लृप्तः' इत्यत्र ऋकारस्य लृकारः प्रतिविधातव्य एव। सन्ध्यक्षरेषु पृथक् प्रयत्नसद्भाव एव उभयाकारप्रतिपत्तेरुभयशब्दप्रयोगो नरसिंह इति।

तथा च ए-ऐ कण्ठतालव्यौ, ओ-औ कण्ठ्योष्ठ्यौ इत्येकैकस्य स्थानद्वयव्यापार इति। तथा च सन्ध्यक्षराणामिदुतौ ह्रस्वादेश इति न्यायोऽयम्, अन्यथा 'अतिरि, अतिनु' इत्यत्र **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इति स्वरो ह्रस्वो भवन्नकारोऽपि प्राप्नोति। तथा 'अग्ने इन्द्र, पटो उदकम्' इति समानदीर्घप्रसङ्गश्चेत्, नैवम्। केवलानां समानसंज्ञाविधानात्। तर्हि गौरित्यत्रानेकवर्णत्वात् सर्वस्यौकारो 'देहि, धेहि' इति **"दाऽस्त्योरेऽभ्यासलोपश्च"** (३।४।५०) इति। द्यौरिति **"औ सौ"** (२।२।२६), नैवम्, अनेकवर्णः सर्वस्येति लोकप्रसिद्ध एव वर्णो गृह्यते इति पूर्वस्माद् योगात् स्वरोऽनुवर्तते, तेन एकारादीनि स्वरनामानीति। तच्च किमर्थम् 'शक्ता, वक्ता' इति सन्ध्यक्षरसंज्ञया आत्वं स्यात्। अथ अन्वर्थसंज्ञया न भविष्यति तर्हि संज्ञयापि किम् ? **सञ्ज्ञापूर्वको व्यवहारः शिष्यावबोधनार्थ इति** ॥८।

**[वि० प०]**

**एकारादीनि**। एकार एवादिर्येषां तान्येकारादीनि। आदिशब्दः सामीप्यादिषु चतुर्ष्वर्थेषु वर्तते। तद् यथा – **ग्रामादौ घोषः,** ग्रामसमीपे इत्यर्थः। व्यवस्थायाम् – **वर्णा ब्राह्मणादयः,** अनवच्छिन्नक्रमेण व्यवस्थिता इत्यर्थः। प्रकारे – **आढ्या देवदत्तादयः,** देवदत्तसदृशा इत्यर्थः। अवयवे – **स्तम्भादयो गृहाः,** स्तम्भावयवा इत्यर्थः।

तथा **चापिशलीयाः** पठन्ति –

**सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा।**
**चतुर्ष्वर्थेषु मेधावी आदिशब्दं तु लक्षयेत्॥ इति।**

तत्र सामीप्यार्थस्य ग्रहणे सति एकारस्य सन्ध्यक्षरसंज्ञा न स्यात्। तस्योपलक्षणत्वात् तत्समीपवर्तिनामेकारप्रभृतीनामेव स्यात्, उपलक्षणस्य कार्येऽनुपयोगित्वात्। यथा – चित्रगुरानीयताम् इत्युक्ते चित्रगवोपलक्षितः पुरुषः एवानीयते, न तु चित्रा गौरिति। अथ विशेषाभावादस्त्वेवमिति चेत्, नैवम् **"न व्ययतेः परोक्षायाम्"** (३।४।२१) इत्याकारप्रतिषेधात्। तत्र हि सन्ध्यक्षरान्तानां धातूनामाकारे (३।४।२०) विधीयमाने कथमेकारान्तस्य व्ययतेः प्रसङ्गः, येन प्रतिषेधोऽर्थवानिति।

व्यवस्थार्थोऽपि नैव, अव्यभिचारात्। वर्णसमाम्नायो हि क्रमसिद्ध एव घटते, किन्तत्र व्यवस्थया। प्रकारार्थोऽपि न घटते, यतः प्रकारः सादृश्यं तच्च परस्परवैसादृश्यं बिभ्राणेषु सन्ध्यक्षरेषु कथं सम्भवति। अवयवार्थः पुनर्निर्विवाद एव घटते। एकार एवादिरवयवो येषां **तान्येकारादीनि**। अत एव तद्गुणसंविज्ञानो बहुव्रीहिरयं समुदायेऽवयवस्यान्तर्भावात्। एवन्तर्हि समुदायस्यैकत्वाद् बहुवचनम् अनुचितमिति चेत्, सत्यम्। समुदायिन एव समुदाय इति दर्शने बहुवचनम्, व्यतिरिक्तसमुदायपक्षस्तु नेहाश्रित इति। अन्वर्थसंज्ञा चेयं सन्ध्यक्षराणि। एकारैकारयोः पूर्वभागोऽकारः, परश्च भाग इकारः। ओकारौकारयोः पूर्वभागोऽकारः परश्च भाग उकार इति ॥८।

## [क० च०]

**एका०।** आदिशब्दः करणसाधनो धर्मवृत्तिः प्राथम्यमादाय चतुर्ष्वर्थेषु वर्तते। तत्रावयवत्वेऽवयवान्तरापेक्षया प्राथम्यात् समुदायापेक्षयाऽवयवत्वं बोद्धव्यम्। अत्रावयवत्वं सामीप्यं च नादिशब्दार्थः, किन्तु प्राथम्यमेव उभयत्र युगपत् शक्तिकल्पने गौरवात्। अवयवत्वसामीप्यार्थौ सम्बन्धिगतषष्ठ्युपस्थाप्यावेव। यथा शरीरस्यादिः, ग्रामस्यादिः। तत्रावयवत्वेन शरीरसम्बन्धी सामीप्यत्वेन च ग्रामसम्बन्धी भवन् अवयवान्तरापेक्षया समुदायापेक्षया च प्रथमो भवतीति गम्यते। अत एव तात्पर्यवशाद् आदिशब्दस्य सामीप्यार्थत्वमवयवार्थत्वं च इति सिद्धिः।

**अन्ये** तु सामीप्यादावप्यादिशब्दस्य शक्तिरस्तीत्याहुः। व्यवस्थाप्रकारौ तु अवयवसामीप्यान्तर्गतौ। ननु चित्रगवोपलक्षित इति कथमुक्तम्, चित्रा चासौ गौश्चेति कर्मधारये राजादित्वादति कृते **"स्त्रियामी"** (१।७।१-४) प्रत्यये च चित्रगव्युपलक्षित इति भवितुमर्हति ? सत्यम्। **समासान्तविधेरनित्यत्वात्** (काला०परि०३९)

इत्यत्– प्रत्ययाभावादीप्रत्ययो न स्यात्। ततश्च वर्णागमने तृतीयान्तेन वा रूपसिद्धिः। तथा च दृश्यते **महाकवि**-प्रयोगे–

**केनात्र चम्पकतरो बत रोपितोऽसि कुग्रामपामरजनान्तिकवाटिकायाम्।**

**यत्र प्रवृद्धनवशाकविवृद्धलोभगोभग्नवाटघटनोचितपल्लवोऽसि॥**

अत्र विवृद्धलोभगोशब्दयोः कर्मधारयेऽपि अत्प्रत्ययस्यानित्यत्वम्। [1]**सुभूतिस्तु** राज्ञो गोः क्षीरं **राजगोक्षीरम्** इति। भाष्यकृता त्रिपदसमासस्येष्टत्वात् **"आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी"** (अ० को० १।४।५) इति **अमरसिंह**प्रयोगे चित्रगवोपलक्षित इत्यत्र तदहर्जातस्तदहर्दिनम् इत्यत्र पदत्रयेण सामान्यसमासो बहुलाधिकारात्। यदा तु द्विपदसमासस्तदा चित्रगव्युपलक्षितमिति भवतीति व्याचष्टे, तदा च प्रकृते चित्रया गवा उपलक्षित इति सामान्यसमासवाक्ये गोशब्दादपि अकारवर्णागमे सतीदं पदं सिद्धम्। **अन्ये** तु मन्यन्ते चित्रा गौरिति **पञ्जी**पाठे पुंसा निर्देशः। **विशेषाभावादिति**। अथ सामीप्यार्थस्य ग्रहणे को दोषः, एकारस्य सन्ध्यक्षरसंज्ञा न स्यादिति चेत् तर्हि ऐकारादीनीति कृतं स्यात्। ननु तथापि स एव दोष इति चेत्, न। बहुवचनासङ्गतेः सिद्धान्तान्तरम् आह– **नैवम्** इति। अवयवार्थः पुनर्निर्विवाद एव घटत इति, एतेनान्योऽपि पक्षः सविवादो घटत इति ध्वनितम्।

तथा हि एकारादिक्रमेण व्यवस्थितानि सन्ध्यक्षरसंज्ञकानि भवन्ति, किन्तु वर्णसमाम्नायस्य क्रमसिद्धत्वात् किं पुनर्व्यवस्थयेति सविवादता। तद्गुण इति तस्य गुणस्य उपसर्जनस्य सम्यग् विज्ञानं कार्यार्थयोर्यत्र इति भिन्नाधिकरणोऽयं बहुव्रीहिः। नन्ववयवो हि समवायिकारणमुच्यते, एकारस्तु कथं समुदायस्य समवायिकारणमित्याह– **समुदायस्य** इत्यादि। समुदायिन एव समुदाय इति ये समुदायिनः सकाशाद् भिन्नं समुदायं मन्यन्ते तन्मतमवलम्ब्योक्तम्। ननु यदि समुदायिन एव समुदाय इत्यभेदादेकारादीनीति बहुवचनम्, तदा समासवाक्ये येषामिति कथं बहुवचनम्। न ह्यत्रापि अभेद इति वाच्यम्, भेदलक्षणायाः षष्ठ्याः स्वभावात्? सत्यम्, एकस्यापि समुदायस्य विवक्षयानेकत्वम्।

---

१. सुभूतिचन्द्राभिधः आचार्योऽमरकोशस्य 'कामधेनु' नाम्नीं टीकामेकां प्रणिनाय, अपि च 'सुबन्तरत्नाकर' नामकं ग्रन्थं रचितवान्। यस्य पञ्च हस्तलेखा नेपालदेशे सुरक्षिताः सन्ति– (द्र०, संस्कृत के बौद्ध वैयाकरण– पृ० १५३, १८९-९०)।

ननु यदि समुदायिन एव समुदाय इति स्वीकृतं तदा कथं येषामित्युपस्थाप्यानां परस्परभिन्नप्रवृत्तिनिमित्तानामैकारादीनामादिरवयव एकार इति परस्परानपेक्षत्वात्, नैवम्, बहुवचनोपपत्तौ तादृशी चिन्ता न सर्वत्र। ननु यदि समुदायिनः सकाशाद् भिन्न एव समुदाय इति मतम्, तदा किं स्यादित्याह– **व्यतिरिक्त** इति। समुदायिनः समुदायो भिन्न इति मतं नाश्रितमित्यर्थः। एकारौकारयोरित्यादि। ननु एदोतोः पूर्वभागोऽकारः परभाग इकार एवमुकारः सम्भवति, ऐदौतोः कथमिति चेत्, काऽत्र चिन्ता, इकारोकारयोः परयोरकारस्य स्थाने एदोतौ निष्पाद्य पश्चादकारसंबन्धे इकारोकारयोस्तत्परत्वं केन निवार्यताम्, पराकारापेक्षयानयोः परत्वे तत्पूर्वाकारं प्रति सुतरां परत्वात्।

ननु तथा हि– इकारोकारयोर्लुप्तत्वात् कथं परत्वमिति चेत्, न। सन्धौ परत्वदृष्टत्वादिदानीमपि तथोच्यत इति न दोषः। न च **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (कलापव्या०, पृ० २२१) इति न्यायाद् एकारे ऐत्वं भविष्यतीति वाच्यम्, यतोऽनया परिभाषया व्यपदेशान्तरमेवारोप्य तेन तद्वर्णत्वम्, अत्र तु **"यन्योकारस्य"** (३।६।३६) इत्यत्र नकारकरणमेव ज्ञापकं वर्णयिष्यामः। **वस्तुतस्तु** अमीषामुच्चारणदशायां पूर्वभागोऽकारः परश्च भाग इकार इति सूक्ष्मतया उच्चरति स्वभावादित्यर्थः। तथा चैकस्य स्थानद्वयं निबद्धम्। ए ऐ कण्ठ्यतालव्यौ, ओ औ कण्ठ्योष्ठ्याविति दिक्॥८।

**[समीक्षा]**

सन्धौ यानि अक्षराणि तानि सन्ध्यक्षराणि। स्वर वर्णों की अक्षर संज्ञा भी पूर्वाचार्यों ने की है। उनमें से पूर्ववर्ती अकार की इकार से सन्धि होने पर एकार-ऐकार, तथा उकार से सन्धि होने पर ओकार-औकार वर्ण निष्पन्न होते हैं। इस प्रकार दो स्वरवर्णों की सन्धि होने से निष्पन्न वर्णों की यह सन्ध्यक्षर संज्ञा अन्वर्थ[1] है। अ+इ (गुण) = ए, अ+इ (वृद्धि) = ऐ, अ+उ = (गुण) = ओ, अ+उ (वृद्धि) = औ। यहाँ 'अ' आदि से अवर्णादि अभिप्रेत है।

पूर्वाचार्यों द्वारा प्रयुक्त होने के कारण यह संज्ञा प्राचीन भी है। जैसे **ऋग्वेदप्रातिशाख्य में–** "ततश्चत्वारि सन्ध्यक्षराणि उत्तराणि" (१।२)।

---

१. सन्ध्यानि सन्ध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु (ऋ० प्रा० १३।३८)। सन्ध्यक्षराणीत्यन्वर्था पूर्वाचार्यसंज्ञा, सन्धीयमानावयवत्वात् (म० भा० प्र० – द्वि० आ०, पृ० ८०)।

**वाजसनेयिप्रातिशाख्य**– सन्ध्यक्षरं परम् (१।४५)।

**गोपथब्राह्मण**– सन्ध्यक्षरमवर्णलेशः पूर्वो विवृतकरणस्थितश्च (१।१।२७)।

**ऋक्तन्त्र**– (१।१)।

**काशकृत्स्नधातुव्याख्यान**– सन्ध्यक्षराणाम् आकारः (सू० २६)।

पाणिनि ने इन वर्णों का बोध 'ऐच्' प्रत्याहार से कराया है। इस प्रकार एकारादि ४ वर्णों की सन्ध्यक्षर संज्ञा अन्वर्थ है और 'ऐच्' का प्रयोग हस्तचेष्टावत् यादृच्छिक या सांकेतिक है॥८।

## ९. कादीनि व्यञ्जनानि (१।१।९)

### [सूत्रार्थ]

क् से लेकर ह् (अथवा क्ष्) वर्ण तक की व्यञ्जनसंज्ञा होती है॥९।

### [दु० वृ०]

ककारादीनि हकारपर्यन्तानि व्यञ्जनसंज्ञकानि भवन्ति। क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स ह। व्यञ्जनप्रदेशाः – **"व्यञ्जनमस्वरं परं वर्णं नयेत्"** (१।१।२१) इत्येवमादयः॥९।

### [दु० टी०]

**कादीनि**। वर्णसमाम्नाये कादिष्वकार उच्चारणार्थः। इह पूर्वस्मिंश्च विशेषस्याविवक्षितत्वात् सामान्यरूपं नपुंसकलिङ्गमेव प्रयुज्यते। **व्यज्यन्ते एभिः व्यञ्जनानि**, यथा सूपादीनि ओदनस्य इत्यर्थः। तथेमान्यपि व्यञ्जनानि स्वरस्येति। ननु यत्र व्यञ्जनसञ्ज्ञा प्रयोजनं तत्रास्वरग्रहणमेव किमिति न कुर्यात्। वाक्, तडिदिति अन्वयाच्चेति सेर्लोपो भविष्यति, नैवं विसर्जनीयादेशा अप्यन्वया भवितुमर्हन्ति। ततश्चान्वये चैषान्निरिति[1] सूत्रे स्थिते 'पन्था × करोति, मन्था ᳵ फलति' इति निर्लोपः स्यात्। **अथासिद्धं बहिरङ्गमन्तरङ्गे** (कात० परि० ३५) इति जिह्वामूलीयोपध्मानीययोर्न भवतीति तर्हि विसर्जनीये केन निवार्यते॥९।

---

१. व्यञ्जने चैषां निः (कात० २।२।३८)।

[वि० प०]

**कादीनि**। व्यज्यन्ते एभिरिति **व्यञ्जनानि**। स्वराणामर्थप्रतिपादने उपकारकाणि। यथा सूपादीन्योदनस्येत्यर्थः ॥९।

[क० च०]

**कादीनि**। ननु पूर्वसूत्रे सामीप्यार्थस्य ग्रहणे तु पुनरुक्त इति कथं तस्य न ग्रहणम् ? सत्यम्, इहापि **"पूर्वोऽक् कः"** (२।२।६४) इति परगमनेन ज्ञापकमिति **हेमकरः**। तन्न, असत्यपि तस्य सूत्रस्यावकाशे स्वभावादेव परगमनस्य सिद्धत्वात्। अत एवैतत् सूत्रं सुखार्थमिति व्याख्यास्यामः। तस्मात् ककाराद् **"व्यञ्जनाच्च"** (२।१।४९) इति सेर्लोपः इति ज्ञापकमिति युक्तम्। **"स्कोः संयोगाद्योरन्ते च"** (३।६।५१) इत्यत्र संयोगव्यवहारादिति अनयोरनन्तरः संयोग इति पाणिनिस्मरणात्।

ननु हकारपर्यन्तानि इति कथमुक्तं क्षकारस्यापि विद्यमानत्वात्, नैवम्, क्षकारस्योक्तवर्णेष्वेवान्तर्भावात्। कथन्तर्हि वर्णसमाम्नाये तदुपदेश इति चेत् ? कादीनां संयोगसूचनार्थमिति न दोषः। व्यज्यन्ते एभिरिति स्वरप्रतिपाद्या अर्था द्योत्यन्ते इत्यर्थः। ननु किमर्थमिदं यत्र यत्र व्यञ्जनग्रहणं तत्र तत्रास्वरग्रहणं क्रियताम्। नैवम्, **"अस्वरे चैषां निः"** इति कृते पन्था **X** करोतीति जिह्वामूलीयेऽपि नकारलोपः स्यात्, नैवम् **"असिद्धं बहिरङ्गमन्तरङ्गे"** (कात० परि० ३५) इति न्यायात् जिह्वामूलीये न भविष्यति, तर्हि विसर्गेऽपि स्यादिति चेत्, अथ सौ परे कथन्न स्यात्, स्थितिपक्षेऽप्ययं पूर्वपक्षस्तत्रावश्यं व्याख्येयः। अघुट्स्वरसाहचर्याद् व्यञ्जने घुट्येव ततश्चात्रापि तदेव वाच्यम्, सत्यम्। सञ्ज्ञापूर्वकव्यवहारः सुखार्थ इति ॥९।

[समीक्षा]

क् से लेकर ह् तक के वर्णों की व्यञ्जनसंज्ञा कलाप में तथा 'हल्' संज्ञा पाणिनीय व्याकरण में की गई है। स्वरवर्णों का अर्थ निश्चय करने में उपकारक होने के कारण, स्वरों का अनुसरण करने के कारंण अथवा स्वरप्रतिपाद्य अर्थों को द्योतित करने के कारण इन वर्णों को **व्यञ्जन** कहते हैं। व्यज्यन्ते एभिरिति व्यञ्जनानि। इस प्रकार कलापव्याकरण की यह संज्ञा अन्वर्थ है और पाणिनि की सर्वथा कृत्रिम।

कलाप के कुछ व्याख्याकार 'क्ष्' को भी स्वीकार करते हैं। उनके अनुसार संयोगसंज्ञक व्यञ्जनों के मिलने से निष्पन्न होने वाले वर्णों के निदर्शनार्थ 'क्ष्' को मानना आवश्यक है। ज्ञातव्य है कि क्-ष् के संयोग से क्ष्, त्-र् के संयोग से त्र् तथा ज्-ञ् के संयोग से ज्ञ् वर्ण निष्पन्न होता है। भगवत्पाद **शङ्कराचार्य** ने अन्नपूर्णास्तोत्र में अ से लेकर क्ष् तक वर्णों को स्वीकार किया है – **"आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी"** (अन्नपूर्णा०, श्लो० ८)।

पूर्वाचार्यों द्वारा भी यह संज्ञा प्रयुक्त है। जैसे –

**ऋक्प्रातिशाख्य** – "सर्वः शेषो व्यञ्जनान्येव" (१।६)।

(व्यञ्जयन्ति प्रकटान् कुर्वन्त्यर्थानिति व्यञ्जनानि – उ० भा० १।६)।

**तैत्तिरीयप्रातिशाख्य** – शेषा व्यञ्जनानि (१।६)।

**वाजसनेयिप्रातिशाख्य** – व्यञ्जनं कादि (१।४७)।

**अथर्वप्रातिशाख्य** – एष सव्यञ्जने (२।३।५)।

**ऋक्तन्त्र** – अथ व्यञ्जनानि (१।२)।

**गोपथब्राह्मण** – अ-उ इत्यर्धचतस्रो मात्रा मकारे व्यञ्जनमाहुर्या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता वर्णेन यस्तां ध्यायते नित्यं स गच्छेद् ब्राह्म्यं पदम् (१।१।२५)।

**नाट्यशास्त्र** – हकारान्तानि कादीनि व्यञ्जनानि विदुर्बुधाः (१४।८)। स्वरों को सत्त्वसम्पन्न (समर्थ) तथा व्यञ्जनों को दुर्बल माना जाता है। व्यञ्जनों की दुर्बलता इसलिए सिद्ध है कि इनका उच्चारण भी विना स्वरों की सहायता के नहीं होता। इस विषय में कुछ प्रसिद्ध वचन इस प्रकार हैं –

"अन्वर्थं खल्वपि निर्वचनं स्वयं राजन्ते इति स्वराः, अन्वग् भवति व्यञ्जनम्" (म० भा० १।२।२९-३०)।

गतिरपि व्यञ्जेरर्थः, विविधं गच्छत्यजुपरागवशादिति व्यञ्जनम्" (म० भा० १।२।२९-३०)।

"व्यञ्जनानि पुनर्नटभार्यावद् भवन्ति। तद् यथा – नटानां स्त्रियो रङ्गं गता यो यः पृच्छति, कस्य यूयं कस्य यूयमिति ? तं तं तवेत्याहुः। एवं व्यञ्जनान्यपि यस्य यस्याचः कार्यमुच्यते तं तं भजन्ते" (म० भा० ६।१।२) इति।

**दुर्बलस्य यथा राष्ट्रं हरते बलवान् नृपः।**
**दुर्बलं व्यञ्जनं तद्वद् हरते बलवान् स्वरः॥**

(याज्ञ० शि०, श्लो० १११)।

**एकाकिनोऽपि राजन्ते सत्त्वसाराः स्वरा इव।**
**व्यञ्जनानीव निःसत्त्वाः परेषामनुयायिनः॥**

(वृ० त्र० वा०। द्र०, टे० ट० टे०, भा० १, पृ० १८६)॥९।

## १०. ते वर्गाः पञ्च पञ्च पञ्च (१।१।१०)

### [सूत्रार्थ]

क् से लेकर म् तक के २५ वर्णों में से क्रमशः पाँच-पाँच वर्णों की वर्गसंज्ञा होती है और ये वर्ग संख्या में पाँच ही होते हैं। जैसे– १. कवर्ग, २. चवर्ग, ३. टवर्ग, ४. तवर्ग तथा ५. पवर्ग॥१०।

### [दु० वृ०]

ते कादयो मावसाना वर्णाः पञ्च पञ्च भूत्वा पञ्चैव ते वर्गसञ्ज्ञा भवन्ति। क ख ग घ ङ। च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म। वर्गप्रदेशाः– **"वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः"** (१।१।११) इत्येवमादयः॥१०।

### [दु० टी०]

**ते वर्गाः**। तच्छब्दस्य पूर्ववस्तुपरामर्शितया तद्गतनपुंसकलिङ्गेनैव निर्देशो युज्यते, कथमिदं पुंल्लिङ्गमिति ? नैवम्, कादयो वर्णा इत्यस्याध्याहारत्वात् सर्वनामत्वाद् वा पूर्वलिङ्गाभिधानं परलिङ्गाभिधानं च दृश्यते। यथा **"स नपुंसकलिङ्गं स्यात्"** (२।५।१५), **"य आधारस्तदधिकरणम्"** (२।४।११) इति। वर्गशब्दः समुदायवाची सजात्यपेक्षयेति। **"चवर्गस्य किरसवर्णे"** (३।६।५५) इति सवर्णापेक्षया असवर्ण उपपद्यते। पञ्च पञ्च इति वीप्सायां द्विर्वचनम्। वीप्सा चात्र वर्गगुणेनैव तृतीयपञ्चग्रहणं मान्तनियमार्थम्। तेन 'त्वं यासि, त्वं रमसे' इति **"वर्गे तद्वर्गपञ्चमं वा"** (३।६।१६) इति पञ्चमो न भवति। प्रयोगे तु पञ्चानामेकत्रानवस्थानादेकैकश एव वर्गसञ्ज्ञाफलभाजः। तद्ग्रहणं कादिपरामर्शनार्थम्, अन्यथा अप्रस्तुतत्वाद्

वर्णसमाम्नाय एव वर्गसञ्ज्ञेयमिति भ्रान्तिरुत्पद्यते। सत्यप्यनन्तरत्वे मन्दधियामिति, अपरेण सङ्ख्यापरिच्छेदकेन पञ्चग्रहणेन वीप्सार्थो गम्यते चेत्, नैवम्। वीप्सैवेति प्रतिपद्यते श्रोता, तर्हि पञ्च वर्गाः पञ्चेति विधीयतां चेत्, सुखार्थम्॥१०।

**[वि० प०]**

**ते वर्गाः**। तच्छब्दस्य नपुंसकपूर्ववस्तुपरामर्शिनोऽपि वर्णा इत्यध्याहारात् पुंसा निर्देशः। अथवा परस्य वर्गशब्दस्य लिङ्गमनेन गृहीतम्, यथा – **"य आधारस्तदधिकरणम्"** (२।४।११) इत्यत्र तदित्यनेनाधिकरणस्येति। पञ्च पञ्चेति वीप्सायां द्विर्वचनम्, वीप्सा चात्र वर्गगुणेनैव। तृतीयस्तु पञ्चशब्दः पञ्चसंख्या-परिच्छेदं कुर्वाणोऽर्थान्मान्तमवधिमवस्थापयतीत्याह– **"मावसानाः"** इति। लोके वर्गशब्दः सजात्यपेक्षया समुदायवाची। तथा च सति **"चवर्गस्य किरसवर्णे"** (३।६।५५) इत्यादौ सवर्णापेक्षयाऽसवर्णोऽप्युपपद्यते, प्रयोगे तु पञ्चानामेकत्रा-नवस्थानादेकैकश एव वर्गसंज्ञाफलं लभन्ते॥१०।

**[क० च०]**

**ते०**। निरन्वयेयं संज्ञा। ननु निर्दिष्टं विशेष्यलिङ्गमपहाय कथमध्याहार्यलिङ्गस्य परिग्राहितेत्याह– **अथवा** इति। ननु वर्गशब्देन प्रत्येकं पञ्चानामभिधाने कथं कस्य वर्गः कवर्ग इत्यादि व्यवहारः, ककारादेः परस्परसम्बन्धाभावात् कथं वा वर्गाः पञ्चेत्यन्वयः, तेषां (पञ्चविंशतिपरत्वात्) बहुत्वादित्याह– **लोक** इत्यादि। सजातीयसमुदायपर्यायो वर्गशब्दः संज्ञात्वेन निर्दिष्टः, तेन ककारस्य सजातीय-समुदायः कवर्ग उच्यते। सजातीयत्वं तु कण्ठ्यत्वादिना, न तु वर्णत्वेन व्यावृत्तेरभावात्।

ननु भवतु नाम वर्गशब्दः सवर्णसमुदायवाची, तथापि कथं सामानाधिकरण्ये-नान्वयबोधः, पञ्च पञ्चेत्यनेन समूहिनो निर्दिष्टत्वात्? सत्यम्। कवर्गशब्दसन्नि-धानात् पञ्चशब्देन लक्षणया पञ्च पञ्च वर्णघटिताः समुदाया उच्यन्ते, ते पञ्चैवेति युक्तोऽयमन्वयः। ननु तच्छब्देन कादीनां परामर्शात् समूहसम्बन्धे षष्ठी स्यात् ततश्च कथं प्रथमा? सत्यम्, तच्छब्देनापि लक्षणया तत्संबन्धिन उच्यन्ते तेन कादिसम्बन्धिनः पञ्चपञ्चवर्णघटिताः समूहा वर्गा भवन्तीत्यर्थः।

ननु वर्गभवानां वर्णानां स्ववर्गभवेन वर्णेन सह परस्परं सवर्णत्वादवर्णत्वा-भावादसवर्णत्वानुपपत्तौ कथं 'पक्ता-भोक्ता' इत्यत्र **"चवर्गस्य किरसवर्णे"**

(३।६।५५) इति, तस्माद् वर्गः सवर्णेन सवर्ण इत्युच्यताम् इत्याह– **तथा च** इत्यादि। लोकोपचाराद् वर्गशब्दस्य कण्ठ्यत्वाद्यपेक्षया समुदायवाचित्वे सति समानो वर्णः सवर्ण इत्यन्वर्थे परस्परं सवर्णसंज्ञापि सिद्धेत्यर्थः।

ननु वर्गः पञ्चानां समूहः कथमेकस्मिन् वर्णे स्यादित्याह– **प्रयोग** इति। ननु तृतीयपञ्चग्रहणं किमर्थम् ? एकेन पञ्चशब्देन पञ्चवर्णघटितः समुदायो वक्ष्यते, अपरेण पञ्चशब्देन वीप्सार्थो लभ्यते ? सत्यम्। पञ्च पञ्चेत्युक्ते केवलं वीप्सैव प्रतिपाद्यते। यद्येवं पञ्च ते वर्गाः पञ्च इति क्रियताम्, तर्हि पुनः पञ्चग्रहणं सुखार्थम् ॥१०।

**[समीक्षा]**

कातन्त्रकार के अनुसार 'क ख ग घ ङ' वर्णों की कवर्ग, 'च छ ज झ ञ' की चवर्ग, 'ट ठ ड ढ ण' की टवर्ग, 'त थ द ध न' की तवर्ग तथा 'प फ ब भ म' की पवर्ग संज्ञा होती है। पाणिनि ने इन पाँचों वर्गों का व्यवहार **"अणुदित्सवर्णस्य चाप्रत्ययः"** (१।१।६९) सूत्रस्थ 'उदित्' पद से किया है। तदनुसार 'कु' से कवर्ग, 'चु' से चवर्ग, 'टु' से टवर्ग, 'तु' से तवर्ग तथा 'पु' से 'पवर्ग' का ग्रहण होता है। पाणिनि का यह व्यवहार सर्वथा कृत्रिम ही कहा जा सकता है, क्योंकि लोकव्यवहार की दृष्टि से यह अपरिचित ही है।

पूर्वाचार्यों द्वारा भी वर्ग संज्ञा का प्रयोग किया गया है। जैसे–

**ऋक्प्रातिशाख्य–** "पञ्च ते पञ्च वर्गाः" (१।८)।

**तैत्तिरीयप्रातिशाख्य–** "स्पर्शानामानुपूर्व्येण पञ्च पञ्च वर्गाः" (१।१०)।

**वाजसनेयिप्रातिशाख्य** में यह भी कहा गया है कि वर्ग में ५-५ वर्णों में से प्रथम वर्ण से वर्ग का बोध होता है, अन्य वर्णों से नहीं। जैसे– 'क ख ग घ ङ' इन पाँच वर्णों का बोध 'क' के ही साथ वर्ग लगाने से होता है, ख-ग-घ-ङ में से किसी वर्ण के साथ वर्ग शब्द का व्यवहार नहीं होता है– **"प्रथमग्रहणे वर्गम्"** (१।६४)।

**ऋक्तन्त्र** में वर्ग के लिए उसके एकदेश **'र्ग'** का प्रयोग हुआ है– **"स्पर्शे र्गस्य"** (२।२।३)।

**काशकृत्स्नधातुव्याख्यान–** "सतवर्गयोः शचवर्गयोगे, षटवर्गयोगे षटवर्गौ, ह्रस्वपूर्वयोर्हकारचवर्गयोः कवर्गः, कवर्गहकारयोश्चवर्गः" (सू० १९, २०, ७२, ७६)।

नाट्यशास्त्र –

**वर्गे वर्गे समाख्यातौ द्वौ वर्णौ प्रागवस्थितौ।**

**अघोषा इति ये त्वन्ये सघोषाः सम्प्रकीर्तिताः॥** (१४।९)॥१०।

## ११. वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः (१।१।११)

### [सूत्रार्थ]

उक्त पाँच वर्गों के प्रथम-द्वितीय वर्ण तथा श-ष-स इन तीन वर्णों की भी अघोष संज्ञा होती है॥११।

### [दु० वृ०]

वर्गाणां प्रथमद्वितीया वर्णाः शषसाश्चाघोषसंज्ञा भवन्ति। क ख, च छ, ट ठ, त थ, प फ, श ष स। अघोषप्रदेशाः– **"अघोषे प्रथमः"** (२।३।६१) इत्येवमादयः॥११।

### [दु० टी०]

**वर्गाणाम्**। वर्गाणामिति सम्बन्धे षष्ठी, न तु वर्गाणां मध्ये प्रथमद्वितीया एव वर्णा इति निर्धारणे। चवर्गकवर्गयोर्द्वित्वाद् द्विवचनमेव भवितुमर्हति। घोषणं **घोषो** ध्वनिरुच्यते। अघोषा इति। न विद्यते घोषो येषां **तेऽघोषाः**। ईषदर्थेऽत्र नञ्, यथा अनुदरा कन्येति। एतेऽघोषा विवृतकण्ठाः श्वासानुप्रदानाश्च। विसर्जनीय-जिह्वामूलीयोपध्मानीयाश्च विवृतकण्ठाः श्वासानुप्रदाना अघोषाश्च।

यद्यपि सञ्ज्ञान्तरद्वारेण प्रयोजनाभावान्न निगद्यन्ते ते वर्गाः पञ्च पञ्च इत्यनेनान्तःस्थोष्मणाम् अवर्गत्वमवस्थापितम्। वर्गः समुदायो न ह्यवर्गस्य प्रथमादयोऽवयवा भवन्तीति किं वर्गाणामिति ग्रहणेन ? तथा च **"अघोषे प्रथमः"** (२।३।६१) इत्यादिषु वर्गमन्तरेणापि वर्गाणामिति प्रतिपद्यते। षट्सु, गच्छन्तीति डकारस्य टकारः, छकारस्य चकार इति ? सत्यम्। तदेतत् सुखप्रतिपत्त्यर्थमेव॥११।

### [वि० प०]

**वर्गाणाम्**। न विद्यते घोषो ध्वनिर्येषाम्। ईषदर्थेऽत्र नञ्, यथा 'अनुदरा कन्या' इति॥११।

### [क० च०]

**वर्गाणाम्**। ईषदर्थे नञ् इति। ननु प्रतिषेध एव नञर्थस्तत् कथमीषदर्थ इत्युपपद्यते ? सत्यम्। अत्रापि प्रतिषेध एव नञोऽर्थस्तथापि ईषदर्थे विषयभूते नञ्।

महतो घोषस्य प्रतिषेधमाह – **इत्यन्ये** । **वस्तुतस्तु** ईषदर्थे प्रतीत्यन्यथानुपपत्त्या लक्षणया नञो वृत्तिरीषदर्थे मन्तव्या । तथा च–

**[1]अभावश्च निषेधश्च तद्विरोधस्तदन्यथा।**

**ईषदर्थश्च कुत्सा च नञर्थाः षट् प्रकीर्तिताः**॥इति ।

इह 'भूतले घटो नास्ति' इत्यभावः प्रतीयते । 'ब्राह्मणो न हन्तव्यः' इत्यत्र ब्राह्मणहनननिषेधः प्रतीयते । 'अधर्मः' इत्यत्र धर्मविरोधः पापं प्रतीयते । 'तक्रं कौण्डिन्यभिन्नाय दीयताम्' इत्यत्र कौण्डिन्याय दधिदानं प्रतीयते । (अनुदरा कन्या) 'अब्राह्मणोऽयम्' इत्यत्र कुत्सितब्राह्मणः प्रतीयते ॥११।

**[समीक्षा]**

जिनके उच्चारण में अल्प ध्वनि होती है, उन्हें अघोष कहते हैं– "न विद्यते घोषो ध्वनिर्येषां ते अघोषाः। ईषदर्थेऽत्र नञ्"। कलापव्याकरण में अनुशासनसूत्र द्वारा इसे स्वीकार किया गया है, जब कि पाणिनीय व्याकरण में शिक्षा के अनुसार । शिक्षाग्रन्थों में बाह्य प्रयत्न के ११ भेदों में से एक अघोष भी बताया गया है । जिन वर्णों की अघोषसंज्ञा कलापव्याकरण में कही गई है, पाणिनि ने उनके लिए 'खर्' प्रत्याहार का प्रयोग किया है । अघोष– संज्ञक वर्ण १३ हैं– 'क ख च छ ट ठ त थ प फ श ष स'।

शिक्षाग्रन्थों में प्रयुक्त होने से उक्त १३ वर्णों की यह अघोष संज्ञा प्राचीन है तथा श्वास– उच्छ्वास मात्र के सुनाई पड़ने से किं च नाद– ईषन्नाद के सुनाई न पड़ने से (उच्चारण में वायु के अल्प होने के कारण) यह अन्वर्थ भी है–

"त्रयोदशाघोषास्ते क-च-ट-त-पाः, ख-छ-ठ-थ-फाः, शषसाश्चेति" (या० शि० ५।९३)।

---

१. पाणिनीयसम्प्रदाये नञर्थाः षड् एवं पठ्यन्ते–

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ (वै० भू० सा० – नञर्थनिर्णयः)

[ उच्चारणे वायोरल्पतया नादेषन्नादौ न श्रूयेते किन्तु श्वासोच्छ्वासौ श्रूयेते, अतस्ते अघोषा भवन्ति इति शेषः– शिक्षावल्लीविवृतिः] ।।११।

## १२. घोषवन्तोऽन्ये (१।१।१२)

### [सूत्रार्थ]

अघोषसंज्ञक वर्णों से अतिरिक्त २० व्यञ्जनों की घोषवान् संज्ञा होती है। जैसे– ग घ ङ, ज झ ञ, ड ढ ण, द ध न, ब भ म, य र ल व, ह ।।१२।

### [दु० वृ०]

अघोषेभ्यो येऽन्येऽवशिष्टा गादयस्ते घोषवत्संज्ञा भवन्ति। ग घ ङ, ज झ ञ, ड ढ ण, द ध न, ब भ म, य र ल व, ह। घोषवत्प्रदेशाः– **"घोषवति लोपम्"** (१।५।११) इत्येवमादयः ।।१२।

### [दु० टी०]

**घोष०**। घोषो विद्यते येषां ते **घोषवन्तः**, वन्तुरिहातिशायने, यथा 'उदरवती कन्या' इति। उक्तापेक्षोऽयमन्यशब्दः इह सञ्ज्ञी। ननु सतः कार्यिणः कार्येण सम्बन्धात् पूर्वमुच्चार्यते संज्ञी, पश्चात् संज्ञेति। तथा च **"तत्र चतुर्दशादौ स्वराः"** (१।१।२) इत्यादिषु परा एव निर्दिश्यन्ते सञ्ज्ञा इति नैव दोषः। अभिधानाभिधेययोः प्रतिपत्त्यवस्थानिबन्धनात्। यथा अयं गौः, गौरयमिति। तथा च वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषा इत्युक्ते सतीतरे तृतीयचतुर्थ-पञ्चमा य-र-ल-व-हाश्चानपेक्षया घोषवन्त इति वक्तुं शक्या एव **"स्वरघोषवत्सु तृतीयान्"** (१।४।१) इति च निर्देशात् सूत्रमिदं तु मन्दधियां सुखप्रतिपत्त्यर्थम्। कोऽत्रान्यशब्दस्य परत्वे दोष इति तथा वक्ष्यमाणेषु त्रिषु योगेष्वपि प्रतिपत्तव्यमेव। सूत्रार्थे संज्ञैव पराविर्भाव्यते सुखार्थमिति। एते घोषवन्तः संवृतकण्ठाः नादानुप्रदानाः। अनुस्वारोऽप्येवम्। किन्तु घोषवत्संज्ञायाः प्रयोजनं नास्तीति न निगद्यते ।।१२।

### [वि० प०]

**घोषः०**। घोषो ध्वनिर्विद्यते येषामित्यतिशायने वन्तुः। यथा 'उदरवती कन्या' इति ।।१२।

[क० च०]

**घोषः**। अन्य इत्यस्य विवरणं वृत्तावविशिष्टा गादय इति। यदि कादय इति पाठस्तदा समुदायापेक्षया। तथाहि ते कादयो व्यञ्जनभूता घोषवन्त इत्यर्थः ॥१२।

[समीक्षा]

'वर्गीय तृतीय – चतुर्थ– पञ्चम, य र ल व ह' इन २० वर्णों की कलापकार ने घोष संज्ञा की है। जिन वर्णों के उच्चारण में वायु की अधिकता से नाद-ईषन्नाद दोनों ही सुनाई पड़ते हैं, अर्थात् घोष = ध्वनि वाले वर्णों को घोषवान् कहते हैं। इस प्रकार यह संज्ञा अन्वर्थ है। इसी अर्थ में शिक्षा-ग्रन्थों में इसका प्रयोग हुआ है–

**"विंशतिर्घोषास्ते गजडदबाः, घझढधभाः, ङञणनमाः, यरलवाः, हकारश्चेति"**।
(या० शि०, ५।९३)।

(येषां वर्णानामुच्चारणे वायोराधिक्याद् नादेषन्नादौ श्रूयेते ते गजडदबादयो विंशतिसंख्याका घोषा भवन्तीति शेषः– शिक्षावल्लीविवृतिः)।

पाणिनि ने इन २० वर्णों के बोधार्थ 'हश्' प्रत्याहार का प्रयोग किया है, जो यादृच्छिक या कृत्रिम है ॥१२।

## १३. अनुनासिका ङ-ञ-ण-न-माः (१।१।१३)

[सूत्रार्थ]

वर्गीय पञ्चम वर्ण, अर्थात् 'ङ-ञ-ण-न-म' इन ५ वर्णों की अनुनासिक संज्ञा होती है ॥१३।

[दु० वृ०]

'ङ-ञ-ण-न-म' इत्येते वर्णा अनुनासिकसंज्ञा भवन्ति। अनुनासिकप्रदेशाः – **"धुड् व्यञ्जनमनन्तस्थानुनासिकम्"** (२।१।१३) इत्येवमादयः ॥१३।

[दु० टी०]

**अनुना०**। अनु पश्चाद् नासिकास्थानमुच्चारणमेषामित्य**नुनासिकाः**, अनु पश्चाद् नासिकायोगाद् वा **अनुनासिकाः**। अनुग्रहणमुभयवचनप्रतिपत्त्यर्थं मुखवचना

नासिकावचनाश्चेति। ननु नासिकायोगान्नासिका इत्युक्तेऽप्युभयवचनत्वं गम्यते स्वभावात्। ङ-ञ-ण-न-मा हि निर्दिष्टा इति न नासिकोऽनुस्वारोऽत्र संज्ञी भवितुमर्हति, प्रयोजनाभावाच्च नित्येयं सञ्ज्ञेत्याविर्भावार्थमनुग्रहणम्। जङ्घन्यते, बंभण्यते, जंगम्यते इति चेक्रीयिते योऽभ्यासस्तस्य "अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य" (३।३।३१) इत्यनुस्वारागम इति। ङकारञकारयोः संज्ञया किं प्रयोजनमिति चेद्, **"धुड् व्यञ्जनमनन्तस्थानुनासिकम्"** (२।१।१३) इति वचनात् 'क्रुङ्भ्याम्' इत्यत्र धुटां तृतीयो न भवति। 'सुक्रुञ्चि कुलानि' इति ञकारस्य धुड्जातित्वं नास्तीति व्यवधानतया स्वरात् परः **"घुटि नुः"** (धुट्स्वराद् घुटि नुः – कात० २।२।११) न भवति। नकारस्याप्यन्तरङ्गत्वात् प्रागेवानुस्वारो **"वर्गे वर्गान्तश्च ञकारः"** (२।४।४५) इति। ननु संज्ञा नाम लाघवाय क्रियते, संज्ञया विनापि व्यवहारो दृश्यते। **"पञ्चमे पञ्चमांस्तृतीयान्न वा"** (१।४।२) इति वचनमिदम् अन्वर्थसंज्ञार्थमेव ॥१३।

## [वि० प०]

**अनु०।** अनुशब्दः पश्चादर्थे। अनु पश्चान्नासिकास्थानमुच्चारणम् एषामित्य**नुनासिकाः**। पूर्वं मुखस्थानमुच्चारणं पश्चान्नासिकास्थानमित्यर्थः। अनुग्रहणात् केवलनासिकास्थानोच्चारणस्यानुस्वारस्य नेयं सञ्ज्ञा। ननु ङ-ञ-ण-न-मा एव सूत्रे निर्दिष्टास्तत्कथमनुस्वारस्य प्रसङ्गः ? येनानुग्रहणं तेन च सामर्थ्यान्मुखनासिकावचना एव। नहि ते केवलेन मुखेन नासिकया वा उच्चारयितुं शक्यन्ते एवेति ? सत्यम्, पूर्वाचार्यप्रसिद्धा सञ्ज्ञेयमन्वर्थेति ॥१३।

## [क० च०]

**अनु०।** ननु ङ-ञ-ण-न-मा इति कथं विसन्धिः ? अत्र **कुलचन्द्रः**– इतिशब्दस्य वर्ण (वन्तु) स्वरूपग्राहकत्वाद् उच्चारणार्थेनाकारेण सह सम्बन्धो नास्तीति सन्धिर्न कृतस्तत्सान्निध्यस्यानिवार्यत्वादिति। नहि अर्थद्वारक एव सम्बन्धे सन्धिरिति नियमोऽस्ति। तस्माच्छब्दस्य यथाश्रुतवर्णप्रतिपादकत्वान्न सन्धिरिति। संहिताविरहादेवात्र न सन्धिरिति। न च वक्तव्यं विभक्त्युत्पत्त्यभावेन पदत्वाभावात् पदयोरवृत्तौ वेत्यस्याविषयत्वेन नित्यैवात्र संहितेति। यतः –

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया॥**इति।

सकलपाणिनीयोपदर्शितन्यायेन ऐकपद्यमेव नित्यत्वविधानात्। न चेह एकपदत्वमस्तीति अपदपदयोः समुदायत्वात् तस्माद् विकल्पः स्यादेव, तथा गवित्ययमाह इत्यादावपि पक्षे सन्धिरिति दृश्यते। **न्यासादौ** 'गो' इत्युक्तः प्रयोगः पदयोरवृत्तौ वेति। **श्रीपतिदत्तेन** पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोरिति परिभाषार्थमाकलय्य एव प्रणीतमित्युपेक्षणीयम् इति। तथाहि– अनेन संहिता न विकल्प्यते किन्तर्हि सत्यामपि संहितायां तदाश्रितं सन्धिकार्यमेव। यथा **'नदी ऋच्छति'**। एतच्च **"ऋवर्णेऽर्"** (१।२।४) इत्यत्र स्फुटीभविष्यति। सन्धिपदस्य संहितापरत्वे पदयोरित्युपलक्षणमेव मन्तव्यम्, तेन पदयोरपि भवति, 'सैवान्यत्र विभाषया' इति सामान्यदर्शनात्। अनु पश्चान्नासिकास्थानमुच्चारणमेषामिति तत्रोभयसापेक्षत्वान्न समास इति **कुलचन्द्रः**। तन्न, अनुशब्दस्य सम्बन्धिसाकाङ्क्षतया समासे बाधकाभावात्। स्थीयतेऽस्मिन्निति **स्थानम्**। **तदेवोच्चारणम्**। उच्चार्यतेऽनेनेति कृत्वा, न तु अन्यस्थानशब्दपर्यायशब्देनार्थकथनमिदमिति। नासिकास्थानोच्चारणस्यानुस्वारस्य इत्यस्य पर्यायशब्दत्वात् समासानुपपत्तेः।

नहि घटशब्देन कलशशब्दस्य समासः क्वाप्युपलभ्यते। पूर्वं मुखस्थानमित्यादि कण्ठ्यवायोरादौ मुखेन संयोगः पश्चान्नासिकया इत्यर्थः। ते च इत्यादि मुखेनोपलक्षिता नासिका शाकपार्थिवादिदर्शनान्मध्यपदलोपिसमासः, तया उच्चारणं येषां ते तथोक्ताः, तथा वा उच्चार्यन्ते इति कर्मणि युट्। यद् वा मुखं च नासिका चेति। नच वक्तव्यं प्राण्यङ्गत्वात् समाहारे नपुंसकत्वाद् ह्रस्वे सति वचनशब्देन बहुव्रीहौ मुखनासिकवचनमिति स्याद् इति प्रायोऽधिकारेण तत्र व्यभिचारस्य **श्रीपतिना** दर्शितत्वात्। तथा च– 'छिन्नेषु पाणिचरणेषु' **इत्याचार्याः**। ननु ङकारञकारयोरनुनासिकसंज्ञायां किं प्रयोजनम्, **'क्रुङ्भ्याम्'** इत्यत्र धुट्त्वाभावाद् ङकारस्य **"धुटां तृतीयः"** (३।८।८) इत्यनेन तृतीयाभाव एव फलम्, न च तृतीयसंयोगान्तलोपयोः प्राप्तौ **'सर्वविधिभ्यो लोपविधिर्बलवान्'** (कात० प० सू० ३६) इत्यादौ संयोगान्तलोपे **'सकृद्गत०'** (कात० प० ३८) इति न्यायादेव न पुनस्तृतीय इति वाच्यम्, तस्य प्रायिकत्वात्। किं च परत्वान्नित्यत्वादन्तरङ्गत्वाच्चादौ तृतीय एव भवितुमर्हति। यद् वा उच्यते 'क्रुङ्' इत्यत्र **"संयोगान्तलोपे वा विरामे"** (२।३।६२) इत्यनेन प्रथमतृतीयौ स्यातामिति प्रयोजनम्।

**'सुक्रुञ्चि कुलानि'** इत्यत्र ञकारस्य धुट्त्वाभावान्नकारः पूर्वस्वरात् परो न भवतीति प्रयोजनम्। ननु तथापि संज्ञाया नास्ति प्रयोजनं नकारस्यानुस्वारे ञकारे

कृतेऽपि अन्तरङ्गत्वेऽपि न्वागमे कृतेऽपि बहिरङ्गो ञकारोऽसिद्धः स्यात्। अतो नुरागमो न भविष्यति ? सत्यम्। नायं ञकारो बहिरङ्गः, किन्तु तस्याप्यन्तरङ्गत्वान्नकारस्यानुस्वारे भवति ञकार इति ॥१३।

## [समीक्षा]

**'अनुनासिक' शब्द के अनेक अर्थ किए गए हैं। जैसे– जिन वर्णों के उच्चारण में नासिका के साथ बाद में संयोग होता है, उनकी अनुनासिक संज्ञा होती है। मुख के साथ नासिका से अथवा मुख और नासिका से उच्चरित होने वाले वर्ण अनुनासिक कहे जाते हैं।** कलापकार ने केवल वर्गीय पञ्चम वर्णों की ही यह संज्ञा मानी है जब कि पाणिनि के अनुसार (**मुखनासिकावचनोऽनुनासिकः** १।१।८) यह संज्ञा वर्गीय पञ्चम वर्णों के अतिरिक्त उन सभी अज्वर्णों की भी होती है, जिनके उच्चारण में नासिका का भी संयोग होता है। 'अनु' ग्रहण से केवल नासिकास्थान वाले अनुस्वार की अनुनासिक संज्ञा नहीं होती है।

पूर्वाचार्यों ने भी इस संज्ञा का प्रयोग किया है। जैसे–

**ऋग्वेदप्रातिशाख्य** – "अनुनासिकोऽन्त्यः" (१।१४) । "अष्टावाद्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान् स्वरान्" (१।६३)। उव्वट ने अपने भाष्य में अनुनासिक को अन्वर्थ बताते हुए उसे दो स्थानों वाला कहा है– "इयमन्वर्था संज्ञा। नासिकामनु यो वर्णो निष्पद्यते स्वकीयस्थानमुपादाय स द्विस्थानोऽनुनासिक इत्युच्यते" (१।१४)।

**तैत्तिरीयप्रातिशाख्य** – "अनुस्वारोत्तमा अनुनासिकाः" (२।३०)।

**वाजसनेयिप्रातिशाख्य** – "मुखनासिकाकरणोऽनुनासिकः" (१।७५)।

**ऋक्तन्त्र** – "हुमित्यनुनासिकः, अन्त्योऽनुनासिकः, साक्षरं पदान्तोऽवसितः" (१।२;२।२।७, ८)।

**काशकृत्स्नधातुव्याख्यान** – "अनुनासिकोऽनुषङ्गः" (सूत्र ७)। यहाँ 'अनुषङ्ग' शब्द से वर्गीय पञ्चम वर्णों का ग्रहण होता है।

अर्वाचीन व्याकरणों में भी इसे स्वीकार किया गया है। आचार्य देवनन्दी ने 'ङ' वर्ण को नासिक्य कहा है– "नासिक्यो ङः" (जै० १।१।७)।

**अग्निपुराण** – "उपदेश इद्धलन्त्यं भवेदजनुनासिकः" (३४८।२)।

**नारदपुराण** – "पाठोऽनुनासिकानां च पारायणमिहोच्यते" (५३।८५)।।१३।

## १४. अन्तस्था य-र-ल-वाः (१।१।१४)

### [सूत्रार्थ]

'य-र-ल-व' इन चार वर्णों की अन्तस्था संज्ञा होती है।।१४।

### [दु० वृ०]

'य-र-ल-व' इत्येते वर्णा अन्तस्थासंज्ञा भवन्ति। अन्तस्थाप्रदेशाः – **"उवर्णस्य जान्तस्था - पवर्ग - परस्यावर्णे"** (३।३।२७) इत्येवमादयः।।१४।

### [दु० टी०]

**अन्तस्थाः।** स्वस्य स्वस्य स्थानस्यान्ते **तिष्ठन्तीत्यन्तस्था** उच्यन्ते। यकारस्तालव्यः, रेफो मूर्धन्यः, लकारो दन्त्यः, वकारो दन्त्योष्ठ्यः। तथा च ईषत्स्पृष्टा अन्तस्था इति लिङ्गमवशेष्यं लोकाश्रयत्वात्। वर्णविशेषणमप्यन्तस्थाशब्दः स्त्रियां वर्तते। यथा – कलत्रं स्त्रियामपि नपुंसकमिति। लकारस्यान्तस्थासंज्ञया किं प्रयोजनमिति वितर्क्याह – **"उवर्णस्य जान्तस्था०"** (३।३।२७) इत्यादि। 'ग्लानः' इति **"आतोऽन्तस्थासंयुक्तात्"** (४।६।१०३) इति निष्ठातकारस्य नत्वम्।।१४।

### [वि० प०]

**अन्तस्थाः।** स्वस्य स्वस्य स्थानस्यान्ते तिष्ठन्तीति **अन्तस्थाः।** **"नाम्नि स्थश्च"** (४।३।५) इति कप्रत्ययः, पश्चात् **"स्त्रियामादा"** (२।४।४९)। स्वभावाद् वर्णविषयेऽपि अन्तस्थाशब्दः स्त्रीलिङ्ग एव। तथा च **"सपरस्वरायाः सम्प्रसारणमन्तस्थायाः"** (३।४।१) इति सूत्रम्।।१४।

### [क० च०]

**अन्तस्थाः।** यकारादीनां स्वस्थानानि ताल्वादीनि, तदन्तेऽवसाने शेषावयवे तिष्ठन्तीति। एतदेवाह – **स्वस्य** इत्यादि। अन्तस्थो वर्ण इति **जिनेन्द्र**स्तदसम्मतमित्याह – **स्वभावाद्** इति।।१४।

### [समीक्षा]

'अन्तस्था' शब्द के २ अर्थ किए जाते हैं – १. मध्य में स्थित। तदनुसार वर्णसमाम्नाय में स्पर्शसंज्ञक (क से म तक) तथा ऊष्मसंज्ञक (श ष स ह) वर्णों के मध्य में पठित होने के कारण 'य-र-ल-व' की 'अन्तःस्था' संज्ञा होती है।

२. अपने अपने स्थानों के अन्त में स्थित। तदनुसार ताल्वादि स्थानों के अन्त में स्थित होने के कारण उक्त ४ वर्णों को अन्तस्था कहते हैं।

पाणिनि ने इन वर्णों का बोध 'यण्' प्रत्याहार से कराया है। शर्ववर्मा की अन्तस्था संज्ञा अन्वर्थ है और पाणिनि का यण् प्रत्याहार कृत्रिम।

पूर्वाचार्यों द्वारा भी इसका व्यवहार किया गया है। यथा– **शतपथब्राह्मण** में प्राणों के मध्य में स्थित वाणी को अन्तःस्था वाणी कहा गया है– "प्राणानां मध्ये या तिष्ठति सैवान्तःस्था वागुच्यते" इति। (१।४।३।८)।

**ऋक्प्रातिशाख्य** "चतस्रोऽन्तस्थास्ततः" (१।९)। भाष्यकार उव्वट ने इसकी अन्वर्थता दिखाते हुए कहा है– **"स्पर्शोष्मणामन्तर्मध्ये तिष्ठन्तीत्यन्तस्थाः"** (१।९)॥१४।

**तैत्तिरीयप्रातिशाख्य**– "पराश्चतस्रोऽन्तस्थाः" (१।८)।

**वाजसनेयिप्रातिशाख्य**– "य् र् ल् व् अन्तस्थाः" (८।१४; १५)।

**ऋक्तन्त्र** – "यिति रिति लिति विति अन्तस्थाः" (१।२)। ऋक्तन्त्रकार ने एकदेश 'स्था' शब्द का भी व्यवहार किया है– "रात् स्था जरे, रणमपि स्थायाम्" (४।३।९,११)।

**नाट्यशास्त्र**– "यरलववर्णास्तथैव चान्तस्थाः" (१४।१९)।

## १५. ऊष्माणः श-ष-स-हाः (१।१।१५)

### [सूत्रार्थ]

व्यञ्जनसंज्ञक 'श-ष-स-ह' इन चार वर्णों की ऊष्म संज्ञा होती है॥१५।

### [दु० वृ०]

'श-ष-स-ह' इत्येते वर्णा ऊष्मसंज्ञा भवन्ति। 'शिडिति शादयः" (३।८।३२) इति पुनर्लघुसंज्ञा। एताः पूर्वाचार्यप्रसिद्धा अन्वर्था इह ज्ञाप्यन्ते॥१५।

### [दु० टी०]

**"ऊष्माणः।** ननु चैषामाख्याते शिट्संज्ञा वक्ष्यते, तयैव व्यवहारो दृश्यते, **"शिट्परोऽघोषः"** (३।३।१०) इति, तस्थौ। **"अघोषेष्वशिटां प्रथमः"** (३।८।९) इति, भित्सीष्ट। तत् किमनया संज्ञया इत्याह– **"शिडिति शादयः"** (३।८।३२)

इत्यादि । शिडिति पूर्वं सञ्ज्ञापदं निक्षिप्येतिशब्देन संताड्य यत् शादय इति संज्ञित्वेन निर्दिश्यन्ते तदेवंप्रकारा लघुसंज्ञाः कर्तुं शक्यन्त एव । स्वरादयो ह्यन्वर्था नित्या इत्यन्वाख्यातव्याः । वृक्षशब्दस्य वृसंकेतं क्षसंकेतं वा कृत्वा व्यवहरतो लोके किं नाम वैदग्ध्यमस्तीत्यभिप्रायः । तेन ऊष्मधर्मयोगाद् **ऊष्माण** इहोच्यन्ते ।।१५।

## [वि० प०]

**ऊष्माणः।** ननु किमर्थमूष्मसंज्ञा विधीयते । न ह्यस्याः शास्त्रे फलमस्ति । तथा चामीषामाख्याते शिट्संज्ञा व्याख्यास्यते, तस्या एव फलमस्ति **"शिट्परोऽघोषः"** (३।३।१०) इत्यादिषु, तेन सैव विधातव्या, नेयमित्याह – **शिट इत्यादि** । इतिशब्दः एवं प्रकारे द्रष्टव्यः । एतदुक्तं भवति शादीनां कार्यित्वात् पूर्वनिर्देशे प्राप्ते यत् सञ्ज्ञामादौ निर्दिशति तदेवंप्रकारा लघुसंज्ञाः कर्तुं शक्यन्त एवेति एतदिहाकूतम् । न वयं सञ्ज्ञान्तरं विधातुमुद्यताः, अपि तु पूर्वाचार्यप्रसिद्धसंज्ञा-व्याख्याने कृतारम्भाः ।

ननु पूर्वाचार्या अपि वैयाकरणत्वाद् लाघवम् अभिलषन्तः किमिति गरीयसीः स्वरादिसंज्ञाः प्रणीतवन्तः इति ? सत्यम्, अन्वर्थत्वात् तासामित्ययमर्थः । **द्विविधं हि लाघवं भवति – शब्दकृतमर्थकृतं चेति ।** तत्रार्थकृतमेव लाघवं परार्थप्रवृत्तत्वात्तेषाम-भीष्टम् । अतः **शर्ववर्माऽपि** तथा प्रतिपादयति । न हि वृक्षशब्दस्य वृसंकेतं क्षसंकेतं वा कृत्वा व्यवहरतो वैदग्धी काचिदस्ति । तथाहि ऊष्मधर्मयोगाद् ऊष्माण इति । एवम् अन्यासामपि संज्ञानामन्वर्था ऊहनीयाः । **एता इति ।** स्वरादिसंज्ञा अन्वर्था इति, अनुगतोऽर्थो यासामिति विग्रहः ।।१५।

## [क० च०]

**ऊष्माणः।** उष दाहे इत्यस्य निपातः । वररुचिना त्विदं सूत्रं न पठितम्, निष्फलत्वात् । ननु ऊष्मसंज्ञापि विपरीतनिर्देशात् कथं संज्ञापिका न भवति, नैवं ज्ञाप्येतिशब्दयोरभावात् । ननु ऊष्मसंज्ञामपनयन्ती शर्ववर्मसामर्थ्यं प्रतिपादयन्ती शिट्संज्ञा कथं न क्रियते ? ऊष्मसंज्ञैव व्यवह्रियतामिति चेत्, न । आचार्यसामर्थ्य-प्रकाशनार्थमवश्यं शिट्संज्ञाया वक्ष्यमाणत्वात्, तर्हि एतदर्थमेव आचार्येण सर्वा एव लघुसंज्ञाः कथन्न कृता इत्याशङ्क्याह – **एतदिहाकूतमिति ।** अयमभिप्राय इत्यर्थः । ऊष्मधर्मयोगादिति उच्चारणे यो मुखं तपति स एव ऊष्मधर्म इति । **अन्वर्था इत्यादि ।** उच्चारणादेवार्थः प्रतीयत इत्यर्थः ।।१५।

[समीक्षा]

जिन वर्णों के उच्चारण में वायु की अधिकता = महाप्राणता रहती है, उन वर्णों की ऊष्मसंज्ञा की गई है। आख्यात प्रकरण में इन्हीं वर्णों की 'शिट्' संज्ञा भी शर्ववर्मा ने की है– **"शिडिति शादयः"** (३।८।३२)। पाणिनि ने इन वर्णों का बोध 'शल्' प्रत्याहार से कराया है। कातन्त्र व्याकरण में ऊष्मसंज्ञा का कहीं भी उपयोग नहीं किया गया है। केवल पूर्वाचार्यकृत संज्ञा के स्मरणार्थ ही इसे शर्ववर्मा ने प्रस्तुत किया है।

प्राचीन ग्रन्थों में कहीं कहीं पर ८ तथा ६ वर्णों की भी ऊष्मसंज्ञा की गई है। जैसे–

**ऋक्प्रातिशाख्य** – "उत्तरे अष्टावूष्माणः" (१।१०)। इसके अनुसार शकारादि ४ वर्णों के अतिरिक्त अनुस्वार, विसर्ग, जिह्वामूलीय तथा उपध्मानीय वर्णों की भी यह संज्ञा अभीष्ट है। इन वर्णों को ऊष्म क्यों कहते हैं– इसका समाधान उव्वट ने अपने भाष्य में इस प्रकार किया है– "ऊष्मा वायुस्तत्प्रधाना वर्णा ऊष्माणः" (१।१०)।

**तैत्तिरीयप्रातिशाख्य** – "परे षडूष्माणः" (१।९)।

**वाजसनेयिप्रातिशाख्य** – "अथोष्माणः, शिति षिति सिति हिति" (८।१६, १७)।

**अथर्ववेदप्रातिशाख्य** – "स्त्रीबहुवचनान्यूष्मान्तानि, स्वरान्तान्यूष्मान्ताबाधानि" (२।२।१७,१०)।

**ऋक्तन्त्र**– "अथोष्माणः हिति शिति षिति सिति योगवाहाः" (१।२)।

**नाट्यशास्त्र** – "ऊष्माणश्च शषसहाः" (१४।१९)।

**आपिशलिशिक्षा** – "शादय ऊष्माणः; महति वायौ महाप्राणः, अल्पे वायावल्पप्राणः, सात्पप्राणमहाप्राणता। महाप्राणत्वादूष्मत्वम्" (४।७, ८।१६-१९)। इस प्रकार यह संज्ञा अन्वर्थ तथा प्राचीन है॥१५।

## १६. अः इति विसर्जनीयः (१।१।१६)

[सूत्रार्थ]

स्वरवर्णों के बाद आने वाले कुमारीस्तनयुगाकृति वर्ण की विसर्जनीय संज्ञा होती है॥१६।

[दु० वृ०]

अकार इहोच्चारणार्थः । अः इति कुमारीस्तनयुगाकृतिर्वर्णो विसर्जनीयसंज्ञो भवति ।विसर्जनीयप्रदेशाः– **"विसर्जनीयश्चे छे वा शम्"**(१।५।१)इत्येवमादयः ॥१६॥

[दु० टी०]

**अः ।** विसृज्यते विरम्यते इति **विसर्जनीयः** । अनीय इति कर्मप्रत्ययोपलक्षणम्, तेन विसृष्टो विसर्ग इति च संज्ञा सिद्धेति ॥१६।

[वि० प०]

**अः ।** येन विना यदुच्चारयितुं न शक्यते, तत्तस्योच्चारणार्थमिति । अकारमन्तरेण विसर्जनीयस्योच्चारयितुमशक्यत्वाद् अकार उच्चारणार्थो भवति । यथा कादिष्वकार उच्चारणार्थः । अन्यथा **"व्यञ्जनमस्वरं परम्"** (१।१।२१) इत्यनेन परगमने सत्युच्चारयितुमशक्यत्वादिति । विसृज्यते विरम्यते इति **विसर्जनीयः,** कर्मण्यनीयप्रत्ययः । स चोपलक्षणम्, तेनेतरकर्मप्रत्ययान्तेनापि विसृजतिना संज्ञा सिद्धा, विसृष्टो विसर्ग इति ॥१६।

[क० च०]

**अः ।** अ इत्यन्तं पदमिति **कुलचन्द्रः ।** तन्न । इतिभागस्यैव पदत्वात् । तत् पूर्वभागस्य तु अनेनैवोक्तार्थत्वाद् विभक्त्यनुपपत्तेरपदत्वमेव । नहि पदापदसमुदायस्य पदत्वमस्ति । तस्माद् 'अः' इति न पदमिति लुप्तप्रथमैकवचनं पदमितिशब्दः स्वरूपाविर्भावार्थः । स्तनयुगाकृतिरिति यद् **वृत्तौ** बोध्यम्, तन्न । नियमस्य वर्णस्याकृत्यसम्भवाद् आकृतिपदं लिपिकृतं बोद्धव्यम्, एवमुत्तरेष्वपि । विरम्यते इति विपूर्वः सृजिरुपरमे वर्तते, परवर्णैः सह संयुज्यते इत्यर्थः । तथा चोक्तम्– **"अनुस्वारो विसर्गश्च द्वावेतौ पूर्वसङ्गतौ"** इति । **स चोपेत्यादि** । लोकव्यवहारात् क्तघञोरेव उपलक्षणं बोद्धव्यं तव्यादियोगे संज्ञाया अप्रतीतेरिति भावः ॥१६।

[समीक्षा]

जो 'जिह्वामूलीय - उपध्मानीय - सत्व - षत्व' आदि विविध रूप प्राप्त करता है, उसे विसर्ग या विसर्जनीय कहते हैं– विविधरूपेण सृज्यते संसृज्यते जिह्वामूलीयादिरूपैरिति विसर्जनीयः । यतः स्वरवर्णों के ही अनन्तर विसर्ग रहता है । अतः उसके उपलक्षणार्थ कलापसूत्रकार ने 'अ' स्वर का पाठ सूत्र में किया है ।

पाणिनि ने **"विसर्जनीयस्य सः"** (अ० ८।३।३४) आदि सूत्रों में विसर्जनीय का प्रयोग तो किया है, परन्तु उसकी कोई परिभाषा नहीं की है और न उनके द्वारा समादृत वर्णसमाम्नाय में विसर्ग का पाठ ही किया है। इससे कहा जा सकता है कि पाणिनि पूर्वाचार्यों के सिद्धान्त से सहमत हैं, इसीलिए उन्होंने कोई संज्ञासूत्र नहीं बनाया।

कलापव्याकरण के वर्णसमाम्नाय में विसर्ग का पाठ होने तथा उसके लिए संज्ञासूत्र किए जाने से यह सिद्ध है कि कलाप व्याकरण में विसर्ग को अयोगवाह के रूप में नहीं, अथ च योगवाह के रूप में ही माना गया है। ज्ञातव्य है कि पाणिनीय व्याकरण के वर्णसमाम्नाय में विसर्ग का पाठ नहीं है और न उसके लिए संज्ञासूत्र ही है, परन्तु सूत्रों में उसका उल्लेख हुआ है। फलतः उसे अयोगवाह के रूप में स्वीकार किया जाता है।

इसकी लिपि का स्वरूप बताते हुए कहा गया है कि ऊपर-नीचे स्थित दो बिन्दुओं को विसर्ग कहते हैं– "ऊर्ध्वाधःस्थं बिन्दुयुग्मं विसर्ग इति गीयते" (प्र० र० मा० १।२९)। लिपिस्वरूप का सादृश्य कुछ अन्य वस्तुओं के साथ भी बताया गया है। तदनुसार छोटे बछड़े के दो सींगों, कुमारी के दो स्तनों तथा काले सर्प के दो नेत्रों की तरह विसर्ग होता है।

**शृङ्गवद् बालवत्सस्य कुमार्याः स्तनयुग्मवत्।**
**नेत्रवत् कृष्णसर्पस्य स विसर्ग इति स्मृतः॥**

(विसर्गस्त्रिविधः स्मृतः - पाठा०) (टे० ट० टे०, भा० १, पृ० २२५)।

विसर्ग तथा विसर्जनीय पर्याय शब्द हैं और पर्यायवाची शब्दों के प्रयोग में गौरव - लाघव का विचार नहीं होता। पूर्वाचार्यों द्वारा भी इसका व्यवहार किया गया है। जैसे–

**ऋक्प्रातिशाख्य –** "सहोपधो रिफित एकवर्णवद् विसर्जनीयः स्वरघोषवत्परः" (१।६७)।

**वाजसनेयिप्रातिशाख्य –** "अः इति विसर्जनीयः" (८।२२)।

**अथर्ववेदप्रातिशाख्य –** "विश्वा विसर्जनीयान्ताः; नकारस्य विसर्जनीयः" (२।२।९; ३।३।१)।

**ऋक्तन्त्र –** "अः इति विसर्जनीयः" (१।२) ॥१६।

# १७. × क इति जिह्वामूलीयः (१।१।१७)

## [सूत्रार्थ]

क - ख वर्णों से पूर्ववर्ती विसर्ग के स्थान में होने वाले वज्राकृति वर्ण की जिह्वामूलीय संज्ञा होती है ॥१७।

## [दु० वृ०]

ककार इहोच्चारणार्थः। × इति वज्राकृतिर्वर्णो जिह्वामूलीयसंज्ञो भवति। जिह्वामूलीयप्रदेशाः – कखयोर्जिह्वामूलीयं न वा" (१।५।४) इत्येवमादयः ॥१७।

## [दु० टी०]

**× क इति**। जिह्वाया मूलं **जिह्वामूलम्,** तत्र भवः इति जिह्वामूलाङ्गुलाभ्याम् **"यस्तु हिते"** (२।६।१०) इत्यत्र योगविभागाद् अप्यधिकाराद् वा ईयप्रत्ययो वक्ष्यते। संज्ञायां सत्यां विसर्जनीयादेशेन भाव्यम्। आदेशस्य च संज्ञेतरेतराश्रयत्वात् संज्ञा न सिध्यतीति। नैष दोषः, **नित्यत्वाच्छब्दानामिति**। 'क+करोति, क+खनति' इति स्थितानामन्वाख्यानमात्रमेतदिति ॥१७।

## [वि० प०]

**× क इति।** जिह्वामूले भवो **जिह्वामूलीयः।** जिह्वामूलाङ्गुलाभ्याम् **"ईयस्तु हिते"** (२।६।१०) इति योगविभागादप्यधिकाराद् वा ईय्रप्रत्ययः ॥१७।

## [क० च०]

**× क इति।** अत्र इतिशब्देन सह सम्बन्धेऽपि स्वरूपाविर्भावसम्भवा-दुच्चारणानुलाघवार्थमेव सन्ध्यभावः स्वीकृत इत्येके। **अन्ये तु "अवर्ण इवर्णे ए"** (१।२।२) इत्यादिवदिदमपि विसन्धिज्ञापनार्थमित्याहुः। एवमुत्तरत्रापि। यद्यप्येतत् जिह्वामूलीयसंज्ञाप्रयोजनप्रतिपादकमेकमेव सूत्रम्, तथापि इत्येवमादयः इति यद् वृत्तावुक्तं तत् प्रवाहवशादिति **कुलचन्द्रः। वस्तुतस्तु** 'व्यक्तौ प्रतिलक्ष्यं लक्षणानि भिद्यन्ते' इति न्यायादादय इत्युक्तम्। ननु तत्र योगविभागफलं यथास्थानं दर्शितमेव, तदत्र कथं स्याद् इत्याह – **अप्यधिकाराद् वेति** ॥१७।

## [समीक्षा]

आचार्य शर्ववर्मा ने वज्र (×, +) की आकृति वाले वर्ण की जिह्वामूलीय संज्ञा की है। पाणिनीय व्याख्याकार उसे जिह्वामूलीय कहते हैं, जो विसर्ग के

स्थान में क-ख वर्णों के परवर्ती होने पर आदेश होता है और जो अर्ध विसर्ग-सदृश ᳵ माना जाता है। पाणिनि ने इसका साक्षात् उल्लेख सूत्रों में नहीं किया है। इससे यह सिद्ध होता है कि कलापकार के मत में जिह्वामूलीय एक अर्धमात्रिक व्यञ्जन है, जबकि पाणिनीय व्याख्याकार उसे अर्धविसर्गसदृश कहकर उसकी अर्धार्ध (१/४) मात्रा ही मानते हैं।

इस संज्ञासूत्र का कातन्त्रव्याकरण में केवल एक ही विधिसूत्र है १।५।४; फिर 'इत्येवमादयः' यह वचन प्रवाहवश ही कहा गया मानना चाहिए। याज्ञवल्क्य-शिक्षा में कवर्ग से पूर्ववर्ती ऊष्म वर्णों को जिह्वामूलीय कहा गया है। वे वज्री माने गए हैं। अर्थात् जैसे प्रहार किया गया वज्र शत्रु से आश्लिष्ट होकर रहता है, वैसे ही 'इष्क्कृतिः इत्यादि में षकार अग्रिम ककार के साथ अत्यन्त संश्लिष्ट होकर रहता है। **"जिह्वामूले तु वज्रिणः"** (या० शि० ५।९३)। इसमें ७ (९) वर्णों को जिह्वामूलीय स्वीकार किया गया है – **"सप्त जिह्वामूलीयाः –** ऋ ॠ ऋृ ३ इत्यृवर्णः, ᳵ क क ख ग घ ङ इति" (या० शि० ५।९३)।

इस प्रकार कलापव्याकरण में यह योगवाह है, जब कि पाणिनीय वैयाकरण इसे अयोगवाह मानते हैं। जिह्वा के मूल में उच्चरित होने वाले वर्ण को जिह्वामूलीय कहते हैं। यदि जिह्वा का मूल वज्र की आकृति वाला हो तो इसे अन्वर्थ कहा जा सकता है ॥१७।

## १८. ᳶ प इत्युपध्मानीयः [१।१।१८]

**[सूत्रार्थ]**

प-फ वर्णों से पूर्ववर्ती विसर्ग के स्थान में होने वाले गजकुम्भ की आकृति वाले वर्ण की उपध्मानीय संज्ञा होती है ॥१८।

**[दु० वृ०]**

पकार इहोच्चारणार्थः। ᳶ इति गजकुम्भाकृतिर्वर्ण उपध्मानीयसंज्ञो भवति। उपध्मानीयप्रदेशाः– **"पफयोरुपध्मानीयं न वा"** (१।५।५) इत्येवमादयः ॥१८।

**[दु० टी०]**

ᳶ **प इति।** उपध्मायते उपशब्द्यते **इत्युपध्मानीयः** ॥१८।

**[वि० प०]**

ꝏ **प इति।** उपपूर्वाद् 'ध्मा शब्दाग्निसंयोगयोः' (१।२६६) इति, उप समीपे ध्मायते शब्द्यते इति कर्मण्यनीयप्रत्ययः ॥१८।

**[क० च०]**

**प इति।** अत्रापि पूर्ववद् व्याख्यानम्। यद्यपि अन्योऽपि उप समीपे ध्मायते, तथापि रूढिवशादस्यैव प्रतीतिरिति। समीप इति पफयोरिति विशेषः ॥१८।

**[समीक्षा]**

प-फ वर्णों से पूर्व ध्वनित होने वाले वर्ण को उपध्मानीय कहते हैं। पाणिनि ने इसके लिए कोई संज्ञासूत्र नहीं बनाया, और न ही विधिसूत्र में ही उसका स्पष्ट उल्लेख किया। केवल "कुप्वो ≍ क ≍ पौ च" (अ० ८।३।३७) सूत्र की व्याख्या में व्याख्याकार उपध्मानीय शब्द को स्वीकार करते हैं– "कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः" (सि० कौ०)। कलाप के इस संज्ञासूत्र में व्याख्याकारों ने 'प' से पूर्ववर्ती विसर्ग के स्थान में होने वाले गजकुम्भ-सदृश वर्ण को उपध्मानीय कहा है। सम्भवतः उपध्मानीय के उच्चारण में ओष्ठ्य की आकृति गजकुम्भसदृश प्रतीत होने के कारण व्याख्याकारों ने उसे गजकुम्भाकृति माना है। लिपि में इसके पाँच चिह्न मिलते हैं। जैसे– ও, ω, ᳶ, ᳵ, ꝏ।

याज्ञवल्क्यशिक्षा में प्रकार के ओष्ठ्य वर्णों के अन्तर्गत उपध्मानीय वर्णों को भी गिनाया गया है– **"नव ओष्ठ्याः– उ ऊ ऊ ३ इत्युवर्णः, प-फ-ब-भ-म-वकारोपध्मानीया ओकारश्चेति"** (या० शि० ५।९३) ॥१८।

## १९. अं इत्यनुस्वारः (१।१।१९)

**[सूत्रार्थ]**

एक बिन्दुरूप वर्ण की अनुस्वार संज्ञा होती है ॥१९।

**[दु० वृ०]**

अकार इहोच्चारणार्थः। ं इति बिन्दुमात्रवर्णोऽनुस्वारसंज्ञो भवति। अनुस्वारप्रदेशाः– **"मोऽनुस्वारं व्यञ्जने"** (१।४।१५) इत्येवमादयः ॥१९।

## [ दु० टी०]

**अं**। अनुस्वर्यते संलीनं शब्द्यते **इत्यनुस्वारः। "अकर्तरि च कारके संज्ञायाम्"** (४।५।४) इति कर्मणि घञ्। एवमर्थे इतिशब्दः आविर्भावार्थः। ननु विसर्जनीयादिसंज्ञाः क्रमेणैव कर्तुं युक्ता इति स्वातन्त्र्येणानवस्थानादप्रधानतेति पश्चात् क्रियन्ते। तथा च **"रेफसोर्विसर्जनीयः, मनोरनुस्वारो घुटि"** (२।३।६३; २।३।४४) तथा "अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य" (३।३।३१) इति स्वतन्त्रश्चेत्, न। तस्याप्यभ्यासापेक्षत्वात्। पाठस्तु "स्वरव्यञ्जनयोर्मध्ये उभयसमीपत्वाद् उभयव्यपदेशार्थो भवति हि तत्समीपत्वात् तद्व्यपदेशः। यथा गङ्गासमीपो देशो गङ्गेति। तेनाग्निः, पटुः, कृतेः, पशोरिति इवर्णादिर्यत्वादिकमसवर्णे विसर्जनीये व्यञ्जने सति न भवति। उर+केण, उर ‿ पेणेति स्वरान्तरत्वाज्जिह्वामूलीयोपध्मानीयाभ्यामपि णत्वं व्यञ्जनत्वात् परगमनं चानयोरिति। विसर्जनीयानुस्वारयोस्तु नैवम्, परगमनमन्वर्थसंज्ञाविधानात्।

अथ पन्था इति निलेपः कथं न स्यात्, नैवम् **"अघुट्स्वरे"** (२।२।३७) इति विशेषवचनात् (विशेषणबलात्) णत्वे तु नुविसर्जनीयग्रहणमनर्थकं स्वरान्तरत्वात् सिद्धं बृंहणमिति। तत्र हि नुरित्यनेन नुसम्भवोऽनुस्वारः प्रतिपत्तव्यस्तेन पुंस्विति षत्वं न भवति। वर्णसमाम्नाये क्रमपरिपठितयोरनुस्वारविसर्जनीययोर्व्यस्तसंज्ञाविधानम्, आभ्यां सह स्वरव्यञ्जनयोरभिन्नसन्निकृष्टत्वाविर्भावार्थम्। एवं सत्यमी इह योगवाहाः एवोच्यन्ते। प्रत्याहारवादिनः पुनराहुः– **'अयोगवाहाः'** इति। कथं **पुनरयोगवाहाः,** 'अयुक्ता वहन्त्यनुपदिष्टा अपि श्रूयन्ते' इति ॥१९।

## [वि० प०]

**अं** इति। अनुस्वर्यते संलीनं शब्द्यते **इत्यनुस्वारः**। कर्मणि घञ्। ननु वर्णसमाम्नायस्य क्रमसिद्धत्वात् सन्ध्यक्षरसंज्ञानन्तरमेवानुस्वारविसर्जनीययोः संज्ञानिर्देशो युज्यते, तत् कथं व्यतिक्रमनिर्देशः? सत्यम्, अनयोरप्रधानत्वात् पश्चात् संज्ञानिर्देशः। तथाहि **"मनोरनुस्वारो घुटि, रेफसोर्विसर्जनीयः"** (२।४।४४; ३।६३) इत्यत्र न क्वचित् स्वातन्त्र्येणानुस्वारविसर्जनीयौ स्तः। अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्येत्यस्याप्यभ्यासापेक्षत्वात्।

यद्येवं वर्णसमाम्नायेऽपि पश्चात् पाठो युज्यते ? सत्यम् । स्वरव्यञ्जनयोर्मध्ये पाठ उभयसमीपत्वादुभयव्यपदेशार्थो भवति हि तत्समीपत्वात् तद्व्यपदेशः । यथा गङ्गासमीपो देशो गङ्गेति, उपचारात् । अनुस्वारविसर्जनीययोरपि क्रमपरिपठितयोर्व्य-तिक्रमेण संज्ञाविधानं स्वरव्यञ्जनाभ्यामनयोरप्यभिन्नसन्निकृष्टत्वप्रतिपादनार्थं तेनोभयोः प्रत्येकमुभयसंज्ञा सिद्धेति भावः । अन्यथा अनुस्वारस्य स्वरसन्निधानात् स्वरसंज्ञैव स्यान्न व्यञ्जनसंज्ञा, विसर्जनीयस्य व्यञ्जनसन्निधानाद् व्यञ्जनसञ्ज्ञैव स्यात् न स्वरसंज्ञा, तेन स्वरत्वात् स्वरकार्यम्, विंसर्जनीयस्य व्यञ्जनत्वाद् व्यञ्जनकार्यम् अनयोस्तत्र तत्र वक्ष्यति, तथा विसर्जनीयादेशयोरपि जिह्वामूलीयोपध्मानीययोः प्रतिपत्तव्यम् । अत एव विसर्जनीयादयो योगवाहा इहोच्यन्ते, युक्ताः सम्बद्धा वहन्तीति **योगवाहाः** ।।१९।

## [क० च०]

**अं** । बिन्दुमात्र इति, स चार्द्धचन्द्राकृतिः तिलकाकृतिश्चेति **वररुचिः।** ॐकारादौ अर्द्धचन्द्राकृतिः पयांसीत्यादौ तिलकाकृतिरिति । अनुस्वर्यते इत्यनुशब्दः संश्लेषे पूर्ववर्णेन संश्लिष्टिर्यथा स्यात् तथोच्चार्यते इत्यर्थः । तथा चोक्तम् – व्यञ्जनता स्वरसन्धौ स्वरता णत्वविधौ योगवाहानां × क ~~ पोः परगम्नार्थं व्यञ्जनतेष्टानु-शिष्टिकृता । × क ~~ पोरिति जिह्वामूलीयोपध्मानीययोरित्यर्थः । अनुशिष्टिकृता शब्दशासनकृता इत्यर्थः । तथा च 'अग्निः' इति, अत्र विसर्गस्य व्यञ्जनत्वाद् इवर्णस्य न यत्वम् । 'उर×केण, उर~~पेण' इत्यत्र जिह्वामूलीयोपध्मानीययोः स्वरत्वात् तदन्तरितेनापि णत्वं सिद्धम्, अनयोर्व्यञ्जनत्वात् परगमनमपि सिद्धम् । प्रयोगानुसारेणान्यदप्यूह्यम् । अत एवेत्यादि इत्यस्मिन् व्याकरणे इत्यर्थः । स्वरव्यञ्जन-त्वाभ्यां युक्ताः सम्बद्धा वहन्तीत्यर्थः । अस्मिन् पक्षे युज्यते इति **योगः,** कर्मणि घञ् । **वहन्तीति वाहाः,** ज्वलादित्वाण्णः । **श्रीपतिस्तु** केवलानामुच्चारणाद् वर्णान्तरयोगं वहन्तीति **योगवाहाः। कुलचन्द्रस्तु** संज्ञात्वेन स्वरव्यञ्जनयोर्योगं संबन्धं वहन्तीति ।।१९।

## [समीक्षा]

कलापकार ने स्वर वर्णों के बाद आने वाले एक बिन्दुमात्र की अनुस्वार संज्ञा की है। यह बिन्दु भी दो प्रकार का माना जाता है– १. तिलक (तिल) की तरह तथा २. अर्धचन्द्राकार। पाणिनि ने अनुस्वार का व्यवहार **"मोऽनुस्वारः"** (पा० ८।३।२३) आदि सूत्रों में विधि के रूप में किया है, परन्तु संज्ञासूत्र नहीं

बनाया है। अनुस्वार सर्वत्र स्वरवर्ण के ही बाद में आता है। अतः शर्ववर्मा ने सूत्र में 'अ' स्वर के साथ लगाकर इसे दिखाया है, जबकि पाणिनीय व्याख्याकार शिक्षावचन के अनुसार ऐसी व्याख्या करते हैं–

जिसका स्वतन्त्र उच्चारण न होकर स्वर के साथ मिलकर होता है उसे अनुस्वार कहते हैं। वर्णसमाम्नाय के क्रमानुसार सन्ध्यक्षर संज्ञा के ही पश्चात् इसे कहना चाहिए था, क्योंकि स्वरवर्णों के ही अनन्तर विसर्ग-अनुस्वार पढ़े गए हैं, तथापि व्यञ्जनादि संज्ञाओं के अनन्तर इसे रखकर यह ज्ञापित किया गया है कि अनुस्वार स्वरात्मक तथा व्यञ्जनात्मक उभयविध होता है ॥१९।

## २०. पूर्वपरयोरर्थोपलब्धौ पदम् (१।१।२०)

### [सूत्रार्थ]

प्रकृति और विभक्ति से प्राप्त समुदाय रूप अर्थ की पदसंज्ञा होती है ॥२०।

### [दु० वृ०]

पूर्वपरयोः प्रकृतिविभक्त्योरर्थोपलब्धौ सत्यां समुदायः पदसंज्ञो भवति। **तेऽत्र, यजन्तेऽत्र।** उपलब्धिग्रहणं विभक्त्यर्थम्। पदप्रदेशाः– **"एदोत्परः पदान्ते लोपमकारः"** (१।२।१७) इत्येवमादयः ॥२०।

### [दु० टी०]

**पूर्व०। उपलम्भनमुपलब्धिः।** षानुबन्धत्वादङि प्राप्तेऽपि लभेः क्तिरपि दृश्यते। पद्यते गम्यतेऽर्थोऽनेनेति **पदम्,** अभिधानादल् नपुंसकत्वं च। पूर्वपरयोः समुदायोऽर्थप्रतिपत्तिहेतुः पदं समुदायश्च वर्णित एव। पूर्वाः प्रकृतयः परा विभक्तयश्च तत्रेतरेतरप्रत्ययव्यावृत्तावपि अनुवर्तमानाः प्रकृतयोऽनुवृत्त एवार्थे गृहीतसम्बन्धास्तमर्थं प्रतिपाद्य प्रत्ययैः सह सङ्गच्छन्ते, नहि प्रतीयमानाः शब्दा अर्थं (स्वार्थम्) प्रतिपादयन्ति। प्रत्ययाः पुनरितरेतरप्रकृतिव्यावृत्तावपि अनुवर्तमानाः सन्तः अनुवृत्त एवार्थे गृहीतसम्बन्धा अपि प्रकृतिसङ्गताः पदभावमापन्नाः प्रकृत्यर्थविशिष्टमेव स्वार्थं प्रतिपादयन्ति, न पृथगनुवर्तनेन अर्थम्।

यदि पुनः (प्रतिपादयेयुस्तदा) स्वार्थप्रतिपत्तिकाल एव स्वश्रुतेरुपरमः कुत इदानीं प्रकृतिस्मृत्यानुसन्दधीरन्निति, न खलूच्चारणमन्तरेण उपरतश्रुतयोऽनुसन्धीयन्ते। किमर्थं पुनः प्रत्ययानामनुवृत्तेऽर्थे सम्बन्धग्रहणं यदि न तं प्रतिपादयन्तीति क

एवमाह न तं प्रतिपादयन्ति। तत्र हि पदानां व्युत्पत्तिः। न हि पदानीतरेतर-विलक्षणार्थप्रतिपत्तौ सम्बन्धानपेक्ष्याणि भवितुमर्हन्ति। न खलु प्रथमोपलब्धानि तानि तादृशमर्थं गमयन्ति। यदाह – **"प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः"** (का० वृ० १।२।५६) इति। तत्र प्रकृतीनां स्वार्थविशिष्टं द्रव्यमर्थः, स्वार्थपरिच्छेदेन हि द्रव्येषु प्रकृतीनां नियमः स्वार्थो हि नियामकः प्रकृतीनां नाभिधेयः।

यदि पुनः क्रमेणोभयमप्यभिदधीरन्नाभिधातुमर्हन्ति। स्वार्थप्रतिपत्तिकाल एव स्वश्रुतेरुपरमः कुत इदानीं द्रव्यप्रतिपत्तिः प्रत्ययानां पुनः प्रकृत्यर्थविशिष्टः स्वगतसंख्याविशिष्टश्च कारकविशेषः प्रकृत्यर्थो वार्थः। एतेन समुदायार्थो व्याख्यातः। उपसर्गाणां न पृथगर्थाभिधानं प्रयोगो वा (ते) प्रकृतिप्रत्ययसङ्गताः पुनरर्थविशेषं द्योतयन्तोऽर्थप्रतिपत्तिहेतवोऽभिधीयन्ते। नहि तानन्तरेण तादृशमर्थं गमयन्ति। निपातानामपि येषां स्वार्थो न सम्भवति तेऽप्येवं प्रतिपत्तव्याः॥२०।

**[वि० प०]**

**पूर्व०।** अर्थोपलब्धौ सत्यामिति **"कालभावयोः सप्तमी"** (२।४।३४) इत्यनेन भावे सप्तमी। तेऽत्रेति तच्छब्दात् प्रथमाबहुवचनं जस्, त्यदाद्यत्वम्, **"अकारे लोपम्"** (२।१।१७), जस् सर्व इः (२।१।३०), अवर्ण इवर्णे ए" (१।२।२) इत्येत्त्वे प्रकृतिविभक्त्योः समुदायत्वात् 'ते' इति पदं सिद्धम्। ततः परस्य अत्रशब्दस्य **"एदोत्परः"** (१।२।१७) इत्यादिना अकारलोपः पदकार्यम्, एवमन्यत्रापीति। अथोपलब्धिग्रहणं किमर्थं पूर्वपरयोरर्थे पदमित्युच्यताम्, अर्थे सति पदं भविष्यति ? सत्यम्। उपलब्धिग्रहणं विशिष्टार्थप्रतिपादनार्थम्। अन्यथा अर्थमात्रे पदसंज्ञा स्यात्। ततश्च युवतिशब्दस्य केवलस्यापि पदत्वप्रसङ्गः।

तथाहि **"यूनस्तिः"** (२।७।३) इति युवन्शब्दात् लोकोपचारात् स्त्रियां तिप्रत्ययोऽस्ति पूर्वपरयोः समुदायोऽर्थमात्रं च विभक्तिमन्तरेणाप्यनुगतमस्त्येव। सत्यां च पदसंज्ञायां जसि परतः **"इरेदुरोज्जसि"** (२।१।५५) एकारे भूते **"एदोत्परः"** (१।२।१७) इत्यादिना जसोऽकारलोपः स्यात्। ततो 'युवतयः' इत्यादयो न सिध्येयुरिति। उपलब्धिग्रहणे तु विशिष्टार्थः प्रतिपादितो भवति। विशिष्टश्च स एव, यः कारकसंसृष्टः। कारकसंसर्गश्च तत्रैव, यत्र विभक्तिरित्याह-**उपलब्धिग्रहणम्** इत्यादि।

यद्येवं विभक्त्यन्तं पदमिति कथं न कृतम् ? सत्यमेतत्, किन्तु पूर्वा प्रकृतिः, परा विभक्तिः, तयोः पूर्वपरयोः प्रकृतिविभक्त्योः प्रत्येकमयमर्थः समुदायेन चायम्। एवं च सति प्रकृतिप्रत्ययौ सम्बद्धौ भवतः इति व्युत्पादनार्थं गुरुकरणम्। तच्च टीकायां विस्तरेणोक्तम्, इह तु नोक्तं ग्रन्थगौरवभयात्। किं च विभक्तिरन्त्योऽवयवो यस्य तद् **विभक्त्यन्तम्** इत्युक्ते साक्षाद् विभक्त्यन्तानामेव पदसंज्ञा स्यात्, न तु लुप्तविभक्तिकानामिति शङ्क्येत। यथा राजेति नित्यत्वाद् "**व्यञ्जनाच्च**" (२।१।४९) इति सेर्लोपे कृते विभक्त्यन्तत्वानुपपत्तौ पुनर्लिङ्गसंज्ञायां सत्यां विराममाश्रित्य "**लिङ्गान्तनकारस्य**" (२।३।५६) इति नलोपो भवति। तथा अत्रापि विभक्तिलोपे विभक्त्यन्तत्वाभावात् पदसंज्ञा न स्यात्। **सिद्धान्ते** तु लुप्तायामपि विभक्तौ अर्थोपलब्धेः सम्भवात् पदसंज्ञा न विहन्यते इति ॥२०।

**[क० च०]**

**पूर्व०।** नन्वत्र कः समासः, किं पूर्वश्च परश्च, पूर्वा च परा चेति वा। नाद्यः, प्रकृतिविभक्त्योः पुंस्त्वाभावात्। नापि द्वितीयः– अस्मन्मते "**नान्यत् सार्वनामिकम्**" (२।१।३३) इत्यनेनैव "**सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः**" तद्धितार्थोत्तरपदसमाहारे च" (सि० कौ० २।१।५१ - तत्पुरुषसमास०, पृ० २२० ) इति सूत्रस्याभावात्। अतः पूर्वं च परं चेति सामान्येन समासः। तथा च "**नान्यत् सार्वनामिकम्**" (२।१।३३) इत्यत्र **पञ्जिकायां** दक्षिणोत्तरपूर्वाणामित्यत्र सामान्येन नपुंसके समस्य पश्चात् स्त्रीत्वविवक्षेति, अर्थे पदवर्णानां विभक्त्यन्तं पदमाहुरापिशलीयाः। "**सुप्तिङन्तं पदम्**" (१।४।१४) **पाणिनीयाः**। इह "**अर्थोपलब्धौ पदम्**" इति **वररुचिः**।

ननु प्रकृतेः प्रत्ययस्य च न कथं प्रत्येकं संज्ञा। संज्ञयैव किं प्रयोजनमिति चेत्, '**अग्नयः**' इत्यत्र "**इरेदुरोज्जसि**" (२।१।५५) इत्यनेन एकारे कृते "**एदोत्परः**" (१।२।१७) इत्यनेन जसोऽकारलोपः स्यात्, नैवम्। "**ङसिङसोरलोपश्च**" (२।१।५८) इति अलोपग्रहणात्, अन्यथा "**एदोत्परः**" (१।२।१७) इत्यनेनालोपः सिद्धः, तदयुक्तम्। स्यादीनां मध्ये ङसिङसोरलोप एव भविष्यति, नान्येषामिति नियमार्थः कथं न स्यात्, यदि नियमव्यावृत्त्या '**अग्नयः**' इत्यत्र संज्ञाफलं नास्ति तदा नयतीत्यादौ वक्तव्यम्, नैवमत्र प्रत्येकं संज्ञाकल्पने तस्य नियमत्वं स्यात्, समुदायसंज्ञाकल्पने तस्य विधित्वं स्यात्। तस्माद् '**विधिनियमसम्भवे विधिरेव ज्यायान्**' (का० बला० ८४) इति तदेतत् सूत्रे समुदायस्यैव संज्ञा कल्प्यते। किं च यदि प्रत्येकमेव संज्ञा भविष्यति, तदा पदे इति द्विवचनान्तमेव विदध्यात्।

**वस्तुतस्तु** अर्थोपलब्धिरिति, अनेन विशिष्टार्थोपलब्धिरित्युच्यते। विशिष्टस्तु उभयथा मिलितार्थत्वेन। अतः श्रुतत्वान्मिलितस्यैवेयं संज्ञेति। यद् वा **'अवयवसिद्धेः समुदायसिद्धिर्बलीयसी'** (व्या० परि० पा० १०८) इति न्यायात् समुदायस्यैव, न प्रत्येकम्। **परमार्थतस्तु** पूर्वपरयोरिति समुदायसमुदायिसम्बन्धे षष्ठीत्याह– **समुदाय** इति वृत्तिः। अथ कथं पूर्वपरशब्दसमुदायस्य न संज्ञा, नैवम्। व्याप्तिन्यायाद् युष्मदस्मदोः पदमिति दर्शनाच्च। **पदं च द्विविधम्-स्याद्यन्तम्, त्याद्यन्तं च।** अत एवोदाहरणद्वयं वृत्तौ दर्शितम्। यद्यप्यत्र सञ्ज्ञामात्रं दर्शयितुमुचितं तथापि तत्प्रयोजनमुक्त्वा सौष्ठवं सूचितम्। अथ अर्थानुपलब्धौ पूर्वपरयोः प्रयोग एव नास्तीत्याह – **अथवा** इति।

अन्यथा इत्यादि। विशिष्टार्थप्रतिपादनं विना यदि पदसंज्ञा स्यात् तदा दूषणमेतत्। किं दूषणमित्याह– **तदित्यादि**। अर्थो हि द्विविधः– प्रतिपत्तिहेतुः प्रयोगहेतुश्चेति। तत् कस्येह ग्रहणम्? अविशेषाद् द्वयोरपि ग्रहणमिति **केचित्**। चेत् तर्हि 'युवतयः' इत्यादयो न सिध्येयुरिति। एतदेवाह – तत इत्यादि। आदिग्रहणाद् **'भृगवः, अत्रयः, जिष्णवः'** इत्यादीनामपि ग्रहणम्। **उपलब्धिग्रहणेत्यादि**। अथ युवतिशब्दस्यापि घटाद्यर्थस्यावाचकत्वाद् विशिष्टार्थत्वमस्तीत्याह– **विशिष्टश्चेति**। सत्युपलब्धिग्रहणे प्रयोगहेतुरर्थो गृह्यते, अस्यैवोपलब्धियोग्यत्वात् प्रयोगहेतुश्च स एव, यः कारकसम्बन्धो व्यक्तिमन्तरेण प्रयोगाभावात्।

ननु तथापि 'युवतयो युवानमभिलषन्ति' इत्यत्रापि युवतिशब्दस्य भिन्नपद-सम्बन्धिकर्मकारकसम्बद्धत्वात् कथं पदसंज्ञा न स्यात्। न च स्वविभक्त्युपस्थाप्यं यत् कारकं तेन संसृष्टोऽर्थो यत्र प्रतीयते तत्र संज्ञेयमिति वाच्यम्, षष्ठ्यन्तस्य स्वविभक्त्युपस्थाप्यकारकसंसृष्टत्वाभावात्। अन्यच्च 'तेऽत्र' इति उदाहरणम् इति न सिध्यति, प्रथमाया लिङ्गार्थमात्रे विधानात्। अथेतरापेक्षया अर्थं प्रतिपादयन् यः प्रयोगार्हो भवति स इह कारकसंसृष्टत्वेन विवक्षितः। विभक्तिमनपेक्ष्य तु प्रकृतिर्न प्रयोगार्हा भवतीति चेत्, किमितरपदानपेक्षया प्रयोगार्हत्वमुक्तम्, उत अर्थान्तरा-पेक्षयाऽर्थप्रतिपादकत्वम्? आद्ये 'ते-मे' प्रकृतीनां पदत्वं न स्यात्, पदान्तरापेक्षयैव तेषां प्रयोगात्। द्वितीये तु द्वितीयान्तानामपि क्रियापदापेक्षित्वाद् दोषः।

**अन्ये** तु 'सप्तर्षयः' इत्यादौ प्रकृत्यर्थातिरिक्तानुपलम्भात् (अर्थान्तरान-पेक्षया अर्थप्रतिपादकत्वात्) सप्तर्षिभागस्यापि पदत्वप्रसङ्ग इत्याह– **कारकसंसर्गश्च**

**तत्रैवेति**। एतेन **विभक्त्यर्थसंवलितार्थप्रतिपादकः समुदायः पदमिति स्थितम्**। (तत्राह उपलब्धिग्रहणं विशिष्टार्थप्रतिपादनार्थं विशिष्टश्च विभक्त्यन्तप्रतिपाद्यत्वमेवात्र-विवक्षितम्। तेन पूर्वपरयोरर्थस्य विभक्त्यन्तप्रतिपादितस्योपलब्धौ पदसंज्ञा विधीय-माना श्रुतत्वाद् विभक्त्यन्तस्यैव उपजायते इति न काचिदनुपपत्तिः। प्रयोगे त्वर्थो विवक्षित इति वदतः **कुलचन्द्रस्यापीदमेव** हृदयम्। कारकसंसृष्टोऽर्थ इति **पञ्जिकायां** तत्रैव तात्पर्यमनुमीयते)।

ननु **'विभक्त्यन्तं पदम्'** इत्युक्ते का विभक्तिः कुतो जायते, तदेव वा किमिति व्याख्यातुं शक्यते इत्याह– **किञ्च** इति। शङ्क्येतेति शङ्कामात्रं न परमार्थतः **"वर्गप्रथमः"** (१।४।१) इत्यादिविधानात्। अन्यथा यदि लुप्तविभक्तिकानां पदत्वं नास्ति, तदा **'वागत्र'** इत्यादौ विभक्तिलोपे सति पदान्तत्वाभावात् कथं तृतीयप्रसङ्ग इति चेत्, **'आसीत्, भूयात्'** इत्यादौ सूत्रं चरितार्थं भविष्यति तर्हि तकारमेव निर्दिशेत्। नहि तमन्तरेणान्योऽस्ति, नैवम्। पदान्ता इत्यन्तशब्दस्य समीपार्थत्वे सति 'वागत्र' इत्यत्रापि सूत्रप्रवृत्तिर्भविष्यति चेत्, तर्हि **"अव्ययाच्च"** (२।४।४) इति ज्ञापकं ज्ञेयम्। तत्र च पदसंज्ञार्थमिदमिति वक्ष्यति।

अथ एकवाक्यतापक्ष एव तत्सूत्रं ज्ञापकमिति तत्रैव सूत्रे **पञ्जीकृतोक्तम्**। भिन्नवाक्यतापक्षे कथमयं सिद्धान्तो ज्ञापकत्वाभावात्। भिन्नवाक्यतापक्ष एव **दुर्गसिंहस्याभिमतः**। यदाह **टीकायाम्** अव्ययेभ्यः सामान्यविहिताः स्यादयो विद्यन्त एव। तत्रैव पञ्जीकृताऽप्युक्तम्। अत एकस्मिन्नपि पक्षे ज्ञापके दत्ते शङ्कानिरासो भवत्येव। किञ्च एकवाक्यतापक्ष एव **दुर्गसिंहस्याभिमतः**। कथमन्यथा पदसंज्ञार्थमिदमित्युक्तम्, भिन्नवाक्यतायां **गौरवाच्चेत्येके**।

**राजेति नित्यत्वादिति**। अथ यावता नकारोऽस्ति तावतैव व्यञ्जनात् सिलोपो भवति, यदा तु लिङ्गान्तनकारस्यैवाग्रत एव लोपस्तदा व्यञ्जनान्तत्वाभावात् कथं सिलोपः स्यात्, येन नित्यत्वम्? सत्यम्– **"न संयोगान्तावलुप्तवद्"** (२।३।५८) इत्यादिना नकारस्यालुप्तवद्भावान्न दुष्यति। तर्हि नलोपस्यापि कृताकृत-प्रसङ्गित्वान्नित्यत्वम्। (का० परि० पा० ८२) नैवम्। 'शब्दान्तरस्य विधिः प्राप्नुवन्न-नित्यो भवितुमर्हति' (सं० बौ० वै०, पृ० २२२) इत्यत्र शब्दग्रहणस्योपलक्षण-त्वान्निमित्तान्तरविधेरनित्यत्वम्।

तथाहि सौ स्थिते व्यञ्जनाश्रिते लोपः, लुप्ते तु विरामाश्रितः इति नैवम्। सेर्लोपेऽपि प्रत्ययलोपलक्षणमिति न्यायाद् व्यञ्जनाश्रित एव लोप इति, तदयुक्तम्। **"न वर्णाश्रये प्रत्ययलोपलक्षणम्"** (सं० बौ० वै०, पृ० २२१) इति न्यायात्। ननु तथाप्यन्तरङ्गत्वात् प्रथमतो नलोपेनैव परिभाषेति **प्राञ्चः।**

**नव्यास्तु** सेर्लोपस्य नित्यत्वादावश्यकत्वादित्यर्थः। ननु परिभाषानित्यत्वम्, तर्हि नलोपस्यावश्यकत्वमिति चेत्, न। प्रथमं नकारलोपेऽपि कृतेऽलुप्तवद्भावाद् व्यञ्जनाच्चेति सिलोपे सति निमित्तस्य सेरभावे पुनर्नकारः समायातः। यदि विराममाश्रित्य पुनर्लोपो नकारस्येत्युच्यते भवतु तथापि नकारलोपात् प्रागेव सेर्लोपः संवृत्तः, अत एवावश्यकत्वम्।

**केचित्तु** पदसंज्ञामपेक्ष्य सिलोपस्य नित्यत्वं व्याख्येयमित्याहुः। विभक्त्यन्ततानुपपत्तेरिति। ननु कथमेतदुच्यते प्रत्ययलोपलक्षणन्यायेन विभक्त्यन्तत्वात्, नैवम्। **न सम्बुद्धौ** (२।३।५७) इति ज्ञापकात् लुप्तविभक्तिकानां विभक्त्यन्तता नास्ति। तथाहि **'हे राजन्!'** इत्यत्र पदान्तत्वेन लिङ्गान्तत्वाभावात् नलोपो न भविष्यति किं पुनर्न सम्बुद्धाविति निषेधेन तस्माद् बोधयति लुप्तविभक्तिकानां विभक्त्यन्तता नास्ति। ननु केनोच्यते पुनर्लिङ्गसंज्ञावश्यं कार्येति। पूर्वकृतलिङ्गसंज्ञयैव नकारलोपः स्यात्। नैवं विभक्त्यन्तभिन्नस्यैव लिङ्गसंज्ञेति निश्चितम्। अतो विभक्त्यन्ततैव विरोधिनी, तस्माद् विरोधिन्या सहैकत्रानवस्थानान्नकारलोपार्थं पुनर्लिङ्गसंज्ञा अवश्यमेव कार्येति।

**वस्तुतस्तु** 'यथोद्देशं संज्ञापरिभाषे कार्यकालं वा" (सं० बौ० वै०, पृ० २२१) इति न्यायात् पुनर्लिङ्गसंज्ञाविधानं नलोपार्थमिति। **हेमकरस्तु** लिङ्गसंज्ञां प्रति विभक्त्यन्तत्वाभावस्य न संबुद्धाविति ज्ञापकम् उन्नेष्यते, पदसंज्ञां प्रति विभक्त्यन्तत्वमस्त्येव। **कुलचन्द्रस्तु** भूतपूर्वस्तदुपचार इति प्रलपति, तन्न। विभक्तिरेवान्तोऽवयवो यस्य समुदायस्यासीत् स इह पदसंज्ञकः। स पुनः प्रकृतिप्रत्ययस्वरूप एव। वारीत्यादौ तु केवलायाः प्रकृतेः समुदायत्वाभावादुपचारेणापि किं कृतम्।

यच्च तेनैवोक्तम् – प्रतीतावयवानां वृक्षाणां मध्ये क्षत्वावयवोऽपि वृक्ष एवोच्यते, तद्वदत्रापीति। तदप्यसङ्गतम्, प्रकृतेरवयवावयविभागस्यासम्भवाद् वृक्षदृष्टान्तानुपपत्तेः कथमपि दृष्टान्त (सम्भवेऽपि) - मन्तरेणापि एकदेशविकृतस्यानन्यवद्भावादित्यत्रैव पर्यवसानं तत्रैव छिन्नकर्णस्य शुनः श्वापदेशनिदर्शनं **परिभाषावृत्तावुक्तत्वात्।** न चात्रा-

न्यवद्भावः सम्भवति, अस्वशब्दोक्तत्वात् (स्वशब्दोक्तस्याविषयत्वात्)। तथाहि, स्वशब्देनोक्तयोर्युष्मदस्मदोरन्तलोपेऽनन्यवद्भावाद् युष्मदस्मद्व्यवहारः क्रियते एवेति।

**वस्तुतस्तु – जयादित्य**सिद्धान्त एव युक्तः विभक्तिलोपेऽपि प्रत्ययलोपलक्षणन्यायात् पदत्वमिति **"सप्तम्युक्तमुपपदम्"** (४।२।२) इत्यत्र **टीकायां** यदेव साक्षात् सप्तम्यन्तं प्रत्ययलोपलक्षणन्यायाद् वा सप्तम्यन्तमुक्तम्। कथमेतत् सङ्गच्छते, प्रत्यये परे यल्लक्षणं सूत्रं प्राप्नोति प्रकृतेः प्रत्ययलोपेऽपि तद् भवतीत्याह – **परिभाषावृत्तावुक्तोऽर्थः।** न च संज्ञा प्रत्यये परे विधीयते अपि तु समुदायस्य। न तु पदश्रिता पदसंज्ञाऽवयवाश्रितैवेति वाच्यम्, समुदायादवयवभिन्नत्वाद् इति चेत्, भ्रान्तोऽसि। समुदायस्यापि विधीयमाना सम्प्रति प्रकृतिप्रत्ययावेवाश्रयति, तदतिरिक्तस्य पदत्वेनानुपलभ्यमानत्वात्। अतः प्रत्यये परभूते सति यल्लक्षणं पदसंज्ञाविधिर्वर्तते प्रत्ययसाहित्येन प्रकृतेः प्राप्नोति प्रत्ययलोपे तद्भवतीति घटत एव परिभाषावृत्तावुक्तोऽर्थः, तत्र प्रकृतेरुपलक्षणं समुदायस्यापि भवतीति दिक् ॥२०॥

**[समीक्षा]**

आचार्य शर्ववर्मा ने प्रकृति-प्रत्यय के अर्थवान् समुदाय की पदसंज्ञा की है। यहाँ यद्यपि 'विभक्त्यन्तं पदम्' इतना ही सूत्र बनाने से ईप्सित अर्थ की सिद्धि हो सकती है, तथापि आचार्य ने "पूर्वपरयोरर्थोपलब्धौ पदम्" यह कहकर जो शब्द-गौरव किया है, उससे उनका यह अभिप्राय व्यक्त होता है कि प्रकृति और प्रत्यय परस्पर सम्बद्ध होकर ही किसी विशिष्ट अर्थ का निष्पादन करते हैं। कलाप की यह पदसंज्ञा ऐन्द्रव्याकरण तथा वाजसनेयिप्रातिशाख्य के आधार पर की गई है, क्योंकि उन दोनों में पदसंज्ञक सूत्र थे – "अर्थः पदम्"।

पाणिनि ने नाम और आख्यात पदों के अनुसार, सुबन्त और तिङन्त शब्दों की पदसंज्ञा की है – "सुप्तिङन्तं पदम्" (१।४।१४; द्र० १।४।१५-१७)। इस प्रकार कलाप की संज्ञा में पूर्वाचार्यों का अनुसरण स्पष्ट रूप में दृष्ट है, जबकि पाणिनि ने सुबन्त-तिङन्त शब्दरूपों की यादृच्छिक कल्पना की है।

गणरत्नमहोदधिकार वर्धमान के अनुसार सुप्-तिङ्रूप दो प्रकार के पद मानने वाले आचार्य हैं – पाणिनि, शाकटायन, चन्द्रगोमी, देवनन्दी, भर्तृहरि, वामन, भोज, शिवस्वामि, कात्यायन, पतञ्जलि, भद्रेश्वरसूरि तथा दीपकव्याकरणकर्ता। पाणिनिपूर्व सुप्-तिङ् प्रत्याहारों का प्रयोग दृष्ट न होने से पाणिनि ही इसके प्रथम उद्भावक

कहे जा सकते हैं– "सुप्तिङन्तं पदम्" (अ० १।४।१४)। वर्धमान का वचन इस प्रकार है–

**शालातुरीयशकटाङ्गजचन्द्रगोमिदिग्वस्त्रभर्तृहरिवामनभोजमुख्याः ।**

**मेधाविनः प्रवरदीपककर्तृयुक्ताः प्राज्ञैर्निषेवितपदद्वितया जयन्ति ॥**

(गण०, अ० १ श्लो० २)।

जिससे अर्थ का ज्ञान होता है, उसे पद कहते हैं – **'पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम्'।** अतः अर्थवान् शब्द की की जाने वाली पदसंज्ञा अन्वर्थ है। लोक में देखा जाता है कि प्रामाणिकता या विश्वसनीयता के लिए सम्बद्ध विषयक पद पर आसीन व्यक्ति का ही ग्रहण होता है। संस्कृतभाषा में भी पदों का ही व्यवहार होता है, केवल प्रकृति या केवल प्रत्ययों का नहीं– "अपदं न प्रयुञ्जीत"। प्राचीन ग्रन्थों में भी इसका उल्लेख हुआ है। जैसे–

**ऋग्वेद –** "चत्वारि वाक्परिमिता पदानि" (१।१६४।४५)।

**गोपथब्राह्मण –** (ओङ्कारः)"कतिपदः।उदात्तोदात्तद्विपदः"(१।१।२४,२५)।

**निरुक्त –** "चत्वारि पदानि। नामाख्याते चोपसर्गनिपाताश्च" (१३।९)।

**ऋक्प्रातिशाख्य –** "नामाख्यातमुपसर्गो निपातश्चत्वार्याहुः पदजातानि शाब्दाः" (१२।१७)।

**बृहद्देवतायाम् –**

**धातूपसर्गावयवगुणशब्दं द्विधातुजम्।**

**बह्वेकधातुजं वापि पदं निर्वाच्यलक्षणम्॥** (२।१०३)।

**धातुजं धातुजाज्जातं समस्तार्थजमेव वा।**

**वाक्यजं व्यतिकीर्णं च निर्वाच्यं पञ्चधा पदम्॥** (२।१०४)।

**तैत्तिरीयप्रातिशाख्य –** "एकवर्णः पदम्" (१।५४)।

**वाजसनेयिप्रातिशाख्य –** "अर्थः पदम्" (३।२)।

(अर्थ्यन्ते अभिधीयन्तेऽनेनेत्यर्थः शब्दविशेषः इत्यर्थः। अर्थाभिधायकं यच्छब्दरूपं तत्पदं स्यात्– अनन्तभट्टभाष्यम्)।

(अर्थाभिधायि पदम्। पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति **पदम्**। यद्येवं निपातस्यानर्थकस्य पदसंज्ञा न प्राप्नोति– नैष दोषः। उपरिष्टादर्थपदनिबन्धनं पदचतुष्टयं वक्ष्यति– नामाख्यातोपसर्गनिपाताश्च। अक्षरसमुदायः पदमक्षरं वा– उव्वटभाष्य)।

**अथर्ववेदप्रातिशाख्य–** "पदानां संहितां विद्यात्। समर्थः पदविधिरिति" (१।१।२,३)।

**ऋक्तन्त्र–** "पदमेकोच्चम्। प्रकृतिः" (३।१।२,३) इसमें एकदेश 'द' का भी प्रयोग किया गया है– "दमु" (३।१।९)।

**नाट्यशास्त्र–** निबद्धाक्षरसंयुक्तं पदच्छेदसमन्वितम्।

निबद्धं तु पदं ज्ञेयं प्रमाणनियताक्षरम् (१४।३६)। "विभक्त्यन्तं पदम्" (१४।३९)।

**निरुक्तभाष्य–** "अर्थः पदमित्यैन्द्राणाम्" (१।१)।

**आपिशलीयमत–** "विभक्त्यन्तं पदम्" (द्र०, क० च० १।१।२०)।

**महाभाष्य–** "वर्णसमुदायः पदम्, पदसमुदाय ऋग्, भवति चैतदेकस्मिन्नप्येकवर्णं पदम्। ...... अत्राप्यर्थेन युक्तो व्यपदेशः। पदं नामार्थः" (१।१।२०)।

**महाभाष्यप्रदीप–** "अभेदोपचाराच्चार्थ एव पदादिभिरभिधीयते' (१।१।२०)।

कुछ अर्वाचीन व्याकरणों में पदसंज्ञासूत्र–

**जैनेन्द्रव्याकरण–** "सुम्मिङन्तं पदम्, नः क्ये, सिति, स्यादावधे"(१।२।१०३-६)।

**शाकटायनव्याकरण–** "सुङ् पदम्, सिद्वल्यधातोः" (१।१।६२, ६४)।

**हैमशब्दानुशासन–** "तदन्तं पदम्, नाम सिद् व्यञ्जने, नं क्ये" (१।१।२०-२२)।

**मुग्धबोधव्याकरण–** "क्त्यन्तान्यौ दली" (सू० १४)।

**नारदपुराण–** "सुप्तिङन्तं पदं विप्र !" (५२।२)।

**[विशेष]**

इन्द्र आदि पूर्वाचार्य एक प्रकार का पद मानते थे– 'अर्थवान् शब्दविशेष'। पाणिनि आदि दो प्रकार के– सुबन्त, तिङन्त। तीन प्रकार के सुबन्त, तिङन्त, अव्यय; ४ प्रकार के– सुबन्त, तिङन्त, उपसर्ग, निपात; पाँच प्रकार के– सुबन्त,

तिङन्त, उपसर्ग, निपात, गति तथा ६ प्रकार के – उक्त पाँच तथा कर्मप्रवचनीय नाम वाले पदों का भी उल्लेख प्राप्त होता है। वाक्यपदीय में कहा गया है –

**द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा।**

**अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्**॥(३।१।१)॥२०।

## २१. व्यञ्जनमस्वरं परं वर्णं नयेत् (१।१।२१)

### [सूत्रार्थ]

व्यञ्जन को परवर्ती वर्ण से सम्बद्ध करना चाहिए, परवर्ती वर्ण के साथ मिला देना चाहिए, स्वर को नहीं॥२१।

### [दु० वृ०]

व्यञ्जनं परं वर्णं नयेत्, न तु स्वरम्। व्यञ्जनमन्वक्, स्वरः स्वयं राजते हि। 'तद् गच्छति, षडत्र, क × खनति, क ≍ फलति' इति योगवाहत्वात्। स्वरूपमेतत्॥२१।

### [दु० टी०]

**व्यञ्जनम्०।** नयतेर्द्विकर्मकत्वात् सर्वत्र द्वितीया। व्यञ्जनमस्वरमिति प्रधानं कर्म, परं वर्णमित्यप्रधानम्, कर्ता चात्र शिष्य इति। नयेदिति विधौ सप्तमी। विधिरज्ञातज्ञापनम्। प्रापणञ्चार्धमात्राकाललक्षणम्। ननु व्यञ्जनं परं वर्णं नयेदित्युक्ते स्वरस्य कः प्रसङ्गः, येनास्वरमिति प्रतिषिध्यते। व्यञ्जनमन्वक्। अन्वञ्चतीत्यन्वक्। स्वरः स्वयं राजते हि। हिशब्दो यस्मादर्थे। यस्मात् स्वरः स्वयं राजतेऽसहायोऽप्यर्थं प्रकाशयति, अतोऽनुयायी न भवति इति स्वरूपार्थमस्वरग्रहणम्। अपर आह – न विद्यते स्वरो यस्मात् सोऽस्वर इति जिह्वामूलीयोपध्मानीययोः परगमनं विसर्जनीयानुस्वारयोर्न भवति। भिन्नपदं तु वैचित्र्यार्थमिति अयुक्तमेतत्॥२१।

### [वि० प०]

**व्यञ्जनं न तु स्वरमित्यादि।** हिशब्दो यस्मादर्थे, यस्मात् स्वरः स्वयं राजते। असहायोऽप्यर्थं प्रतिपादयति, तस्मादनुयायी न भवति। व्यञ्जनं पुनरन्वक्। अनुगच्छति अनुयायी भवति। स्वातन्त्र्येणार्थप्रतिपादने सामर्थ्यविरहात्। तथा चोक्तम् –

**व्यञ्जनान्यनुयायीनि स्वरा नैवं यतो मताः।**

**अर्थः खलु निर्वचनं स्वयं राजन्त इति स्वराः॥**

अन्वग् भवति व्यञ्जनमिति, क + खनति, क ꣳ फलति। योगवाहत्वं च प्रतिपादितमनुस्वारसंज्ञाप्रस्तावे। ननु व्यञ्जनं परं वर्णं नयेदित्युक्ते स्वरस्य कः प्रसङ्गः, येनास्वरमिति प्रतिषिध्यते इत्याह - स्वरूपमेतद् इति। स्वरूपाख्यानं कृतमित्यर्थः ॥२१।

**[क० च०]**

व्यञ्जनम्। अस्वरमिति तत्पुरुषस्योत्तरपदप्रधानत्वाद् द्वितीयैकवचनं पदम्। न तु न विद्यते स्वरो यत्र व्यञ्जन इति वररुच्यनुसारान्नपुंसके लुप्तप्रथमान्तं पदमिति वाच्यम्। सस्वरव्यञ्जनस्य परगमनासम्भवात्। तस्मादस्वरमिति क्रियया सह सम्बद्धस्य स्वरशब्देन समासो गमकत्वात्। स्वरा नैवमित्यादि। यस्मात् स्वरा नैवं परगमनभाजः मता न स्युः। खलु यस्मात् स्वरा इत्यस्य स्वयं राजन्ते इत्ययमर्थो निर्वचनं निश्चितमित्यर्थः। ततोऽन्वग् भवति व्यञ्जनमिति अन्वयः। अतः कादीनां परगमनं युक्तिसिद्धम्। सूत्रमिदं सुखार्थमिति भावः। अत एव ककारस्य व्यञ्जनसंज्ञां प्रति **हेमकरेण** पूर्वोऽक्क इति यद् ज्ञापकं दर्शितं तद् दूषितमेव। नहि सञ्ज्ञैव परगमनकारणम्, किन्तु कादीनां स्वभाव एव ॥२१।

**[समीक्षा]**

आचार्य शर्ववर्मा ने वर्णों तथा वर्णसमूह की संज्ञाएँ करने के बाद व्यञ्जन वर्णों की स्वाभाविक स्थिति के लिए एक परिभाषासूत्र बनाकर यह स्पष्ट किया है, कि स्वररहित व्यञ्जन परवर्ती वर्ण के साथ मिलता है। जैसे 'तद् गच्छति, षड् अत्र' आदि उदाहरणों में 'द्' वर्ण 'ग्' के साथ तथा 'ड्' वर्ण 'अ' स्वर के साथ मिलता है - **"व्यञ्जनमस्वरं परं वर्णं नयेत्"** (१।१।२१)।

पाणिनि ने ऐसे विषयों में लोक को प्रमाण मानकर इनके लिए सूत्र नहीं बनाए हैं। वस्तुतः ककारादि व्यञ्जनों का परवर्ती वर्ण से मिलने का स्वभाव ही होता है, क्योंकि व्यञ्जन उसे ही कहते हैं जो पश्चाद्वर्ती हो। अतः तदर्थ सूत्र बनाने की कोई आवश्यकता प्रतीत नहीं होती, तथापि यहाँ सूत्र का बनाया जाना सुखार्थ ही समझना चाहिए या केवल स्वरूपाख्यानपरक ही मानना चाहिए। पश्चाद्वर्ती होने के कारण व्यञ्जन परतन्त्र होते हैं। अर्थात् इनके उच्चारणार्थ स्वरों की सहायता लेनी पड़ती है ॥२१।

## २२. अनतिक्रमयन् विश्लेषयेत् (१।१।२२)

### [सूत्रार्थ]

सम्मिलित वर्णों का विभाग विना ही अतिक्रमण किए करना चाहिए ।।२२।

### [दु० वृ०]

वर्णान् संघटितान् संमिलितान् अनतिक्रमयन् विश्लेषयेद् विघटयेदित्यर्थः। वैयाकरणः, उच्चकैः। असंमोहार्थोऽयं योगः ।।२२।

### [दु० टी०]

**अनति०।** अतिपूर्वात् क्रमेर्हेत्वर्थविवक्षायामिन्। वर्तमाने शन्तृङ्। अन्विकरणे गुणः। पश्चान्नञ्समासः। विपूर्वात् श्लिषेस्तथैवेन्, पूर्ववत् सप्तमी। अन्विकरणे कृते "या- शब्दस्य च सप्तम्या" (३।६।६४) इतीत्वम्। अथवा अतिक्रमम् अकुर्वन् विश्लेषं कुर्यादिति लिङ्गादिन्। वैयाकरण इति "तद् वेत्त्यधीते" (२।६।७) वाऽण्। यकारस्य विश्लिष्टस्य "न य्वोः पदाद्योः" (२।६।५०) इत्यादौ वृद्धिरागमः। उच्चकैरिति विश्लिष्टादैकाराद् "अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक्कः" (२।२।६४) भवति ।।२२।

### [वि० प०]

**अनति०।** अथ किमर्थमिदम्, यावता "न य्वोः पदाद्योर्वृद्धिरागमः" (२।६।५०) इति य्वोरादौ वृद्धिविधानात् तथा "अव्ययसर्वनाम्नः" (२।२।६४) इत्यादिना चान्त्यात् स्वरात् पूर्वम् अग्विधानाद् अर्थाद् विश्लेषो भविष्यतीति। स च क्रमेणैव, व्यतिक्रमेण प्रयोजनाभावादित्याह- 'असंमोहार्थोऽयं योगः' इति ।।२२।

### [क० च०]

**अनति०।** अत्र क्रियाद्वयस्य उपाध्यायः शिष्यो वा कर्ता। ननु व्यतिक्रमेण प्रयोजनाभावादिति किमुक्तम्, अन्यप्रकाररूपसिद्धिरेव प्रयोजनं भवतु। नैवम्, क्रमसम्भवे सति व्यतिक्रमेण विश्लेषे कारणं वाच्यम्, अतः प्रयोजनाभावात् कारणाभावादित्यर्थः। संमोहस्तु संहितोच्चारणेन पूर्वभागस्यावष्टब्धतया वृद्ध्यागमादिकं क्व भविष्यतीति सन्देहरूपः। वैयाकरणः, उच्चकैरिति यद् दर्शितं तद्विश्लेषस्य ज्ञापकसूत्रद्वयस्य विषयदर्शनाज्ज्ञापकेनैव विश्लेषः सिद्धः। सूत्रमिदमसंमोहार्थमिति भावः।

"अवर्ण इवर्णे ए" (१।२।२) इत्यादिकं तु 'अ-इ' इत्यादौ केवलेऽपि चरितार्थम्, अतो न विश्लेषज्ञापकं भवितुमर्हति ॥२२।

### [समीक्षा]

'सम्मिलित वर्णों का विश्लेषण क्रम से ही करना चाहिए, अतिक्रमण करके नहीं'– इस लोकप्रसिद्ध अर्थ का निर्देश कलापकार ने सूत्र द्वारा किया है– "अनतिक्रमयन् विश्लेषयेत्"। जैसे– "वैयाकरण' शब्द में व् और ऐ मिले हुए हैं। यहाँ 'ऐ' वर्ण की उपस्थिति से पूर्व 'व्+याकरण' शब्दरूप था, 'ऐ' का आगम होने पर 'वैयाकरण' शब्दरूप निष्पन्न हुआ। इसी प्रकार 'उच्चकैः' में भी 'उच्च्+ऐस्' इस प्रकार वर्णविश्लेषण करते हैं। इसके अनन्तर 'अक्' आगम होने पर 'उच्चकैः' शब्द सिद्ध होता है।

पाणिनि ने इस लोकप्रसिद्ध अर्थ को बताने के लिए सूत्रनिर्देश नहीं किया है। उन्होंने अपनी सूत्ररचना में यही सिद्ध किया है कि लोकप्रसिद्ध अर्थों के लिए सूत्र बनाने की कोई आवश्यकता नहीं है।

व्याख्याकारों ने कहा है कि "न य्वोः पदाद्योर्वृद्धिरागमः" (२।६।५०) सूत्र में स्पष्ट निर्देश है कि यकार और वकार से पूर्व वृद्धि (ऐ, औ) आगम हो। इसी प्रकार "अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक्कः" (२।२।६४) इस सूत्र में भी अन्त्य स्वर से पूर्व अक्प्रत्यय का स्पष्ट निर्देश है। अतः सूत्र बनाने का कोई मुख्य प्रयोजन तो सिद्ध नहीं किया जा सकता। केवल यही कहा जा सकता है कि मिले हुए वर्णों में वृद्धि आदि कार्य कहाँ हुए हैं– इस सन्देह के निरासार्थ यह सूत्र बनाया गया है ॥२२।

## २३. लोकोपचाराद् ग्रहणसिद्धिः (१।१।२३)

### [सूत्रार्थ]

लोकव्यवहार के अनुसार उन शब्दों की भी सिद्धि इस व्याकरण में कर लेनी चाहिए, जो यहाँ सूत्रों में उक्त नहीं हुए हैं ॥२३।

### [दु० वृ०]

लोकानामुपचारो व्यवहारः, तस्मादनुक्तस्यापि ग्रहणस्य सिद्धिर्वेदितव्येति। निपाताव्ययोपसर्गकारककालसङ्ख्यालोपादयः। तथा **वरणा** इति नगरस्यापि संज्ञा।

**पञ्चाला** इति जनपदस्यापि । पञ्चाला वरणा इति योगो न दृश्यते, सञ्ज्ञाशब्दत्वात् । हरीतक्यः फलानीति फलेष्वपि स्त्रियां वृत्तिः । एवमन्येऽपि । सञ्ज्ञाशब्दा इव तद्धिता लोकतः सिद्धाः । खलतिकं वनानीति, तेषां वनानामेकवचनान्तमेव नाम । शब्दानामेकार्थेऽपि लिङ्गवचनभेदः । यथा आपो जलम्, दाराः कलत्रं भार्येति ।

**वैदिका लौकिकङ्गैश्च ये यथोक्तास्तथैव ते ।**

**निर्णीतार्थास्तु विज्ञेया लोकात् तेषामसंग्रहः ॥ २३ ।**

**॥ इति दौर्गसिंह्यां वृत्तौ प्रथमे सन्धिप्रकरणे प्रथमः सञ्ज्ञापादः समाप्तः ॥**

●

[दु० टी०]

**लोको०** । इहोभये लोकाः – शास्त्रकारा इतरेऽपि । तेषामुपचाराद् "**अवधेः**[1]" इत्यपादाने पञ्चमी । गृह्यते येनेति तद् **ग्रहणम्** अभिधानम् । यथास्थानमेव निपातादि-संज्ञा वर्णयिष्यन्ते । वरणा इति न केवलं वृक्षस्य संज्ञा, नगरस्यापि । वरणाः सन्त्यस्मिन्नगरे इति वरणा उच्यन्ते, किं "वरणादिभ्यश्च" (पा० ४।२।८२) इति तद्धितलुपा । न केवलं क्षत्रियाणां 'पञ्चाल' इति संज्ञा, जनपदस्यापि । पञ्चालानां क्षत्रियाणां निवासोऽदूरभवो वा देशः, पञ्चाला वा सन्त्यस्मिन् देशे, पञ्चालैर्वा निर्वृत्तो जनपदः इति किं चातुरर्थिकेनाणा, यस्य जनपदे विहितस्य लुप् क्रियते । वरणाः नगरम्, पञ्चाला जनपद इति नगरजनपदयोर्लिङ्गसंख्याभ्यां योगो न दृश्यते, संज्ञाशब्दत्वात् । हरीतक्यः फलानीति बहुवचनेन गणः संसूच्यते । हरीतकी-भल्लातकी-कोषातकी-शल्लकी-द्राक्षा-कण्टकारिका-शेफालिका- इत्यादि । किं प्रकृतिविकारावयव-त्वेन विवक्षिते फले विहितस्याणो लुका ।

एवं व्रीहयस्तिलाः, मुद्गाः, माषाः, शालयः, यवाः, गोधूमाः । मुद्गैः शालीन् भुङ्क्ते इति । पुष्पमूलेष्वपि मल्लिका, नवमालिका । बृहती, आमलकम्, कुवलम्, बदरमिति प्रकृत्यन्तरमेव फले वर्तते । आमलक्याः, कुवल्याः, बदर्याः फलमित्येवमादावर्थेऽणपि न भवति, तदन्तात् फलस्याप्रतीतेः । अन्यथा हि फलादपि वृक्षे स्यात् फलप्रतीतौ भवत्येके । अश्वत्थस्य फलम् आश्वत्थम्, वैणवम्, प्लाक्षम्, जाम्बवम् । किञ्च वृक्षस्य विकारोऽवयवो वा फलं कथं भवितुमर्हति । **विकारो द्विविधः –** प्रकृतेरुपमर्दकः, व्यपेदशान्तरकृच्च । यथा खादिरं भस्म, खादिरो यूप इति,

---

१. यतोऽपैति भयमादत्ते वा तदपादानम् (२।४।८) ।

नाप्यवयवोऽनारम्भकत्वात्। वृक्षे हि जाते खलु फलमुत्पद्यते तथा फलितावस्थामुपमर्दम् (उत्पाद्य) शाखाद्यवयवसहायमन्यमेव विशिष्टं वृक्षावयविनमारभमाणं फलं विकारोऽवयवो भवति। यथा पल्लवमिति चेत्, लोकव्यवहारातिरिक्तेयं युक्तिरिति। जम्बूफलमिति प्रकृत्यन्तरमेव, न तु फलेन **"स्वरो ह्रस्वो नपुंसके"** (२।४।५२) इति जम्बूः फलम् इत्यभेदोपचारात् स्त्रीलिङ्गमेव। तथा चाह– **'लिङ्गमशिष्यं लोकाश्रयत्वात्'**।

**एवमन्येऽपी**त्यादि। न खलतिकस्यादूरभवानि वनानि खलतिकमिति। एवं यथैकः तथैकः एकाकी। यथा मृत् तथा मृत्तिका। प्रशस्ता मृत् मृत्स्ना मृत्सा च। तदिह दिङ्मात्रमेव तद्धितनिदर्शनमिति। **वैदिका** इत्यादि। लौकिका वेदेष्वपि प्रयुज्यन्ते। तत्र त एव बहवस्तदनुसारेण प्रकृत्यादिविभागोहनसमर्थैर्लौकिकज्ञैर्वैदिकाः शब्दा ये यथोक्तास्ते तथैव प्रतिपत्तव्या भवन्ति। **लोकादित्यादि**। तर्हि लौकिका अपि शब्दा लोकोपचारादेव सिद्धा इति चेत्, नैवम्। गदितं यदिह लक्षणं बहुप्रक्रियाजालं तद्वृद्धपरम्परया अवधारयितुं न शक्यमिति करणीयमेवेति ॥२३।

**॥ इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां प्रथमे सन्धिप्रकरणे प्रथमः सञ्ज्ञापादः समाप्तः ॥**

●

## [वि० प०]

**लोको०**। इहोभये लोकाः– शास्त्रकारा इतरेऽपि। तेषाम् उपचारो **लोकोपचारः**। गृह्यतेऽनेनार्थ इति **ग्रहणं** शब्दस्तस्य सिद्धिरिति विग्रहः। अथ के ते शब्दा येषां सिद्धिरित्याह– **निपात** इत्यादि। एते च निपातादयो यथास्थानं प्रतिपादयिष्यन्ते, न केवलं निपातादयोऽपि वेदितव्या इत्याह– **तथा** इत्यादि। वरणाः सन्त्यस्मिन्नगरे, वरणानामदूरभवं वा नगरम् इत्यादावर्थे तद्धितमुत्पाद्य **"वरणादिभ्यश्च"** (पा० ४।२।८२) इत्यस्य लोपं पूर्वाचार्याः कुर्वन्ति। ततो हि वरणाशब्दो नगरेऽपि वर्तते। तदयुक्तम्, लोकोपचारादेव वरणाशब्दो नगरस्यापि संज्ञा, न केवलं वृक्षस्येति किमत्र तद्धितलोपेनेति। तथा पञ्चालाः क्षत्रियाः सन्त्यस्मिन् देशे, पञ्चालैर्वा निर्वृत्तः, पञ्चालानां वा निवासः, पञ्चालानामदूरभवो वा देश इति चतुर्ष्वर्थेषु अण्, तस्य **"जनपदे लुप्"** (पा० ४।२।८) इत्यपि न वक्तव्यम् इति। न केवलं पञ्चालशब्दः क्षत्रियाणां सञ्ज्ञा जनपदस्यापि, लोकोपचारात्। तथाहि पृथग्जना अपि पञ्चालशब्दात् जनपदमपि प्रतिपद्यन्ते, न च तेषां प्रकृतिप्रत्ययविभागोहनज्ञानमस्ति। तस्मात् **"तदस्मिन्नस्तीति देशे तन्नाम्नि, तेन निर्वृत्तम्, तस्य निवासः, अदूरभवश्च"** (पा० ४।२।६७-७०) इति न वक्तव्यमेव।

यद्येवं वरणा-पञ्चालशब्दौ समानाधिकरणत्वात् कथं नगरजनपदयोर्लिङ्गसंख्ये न गृह्णीतः इति । तस्मात् तद्धितलोपं कृत्वा **"लुपि युक्तवद्व्यक्तिवचने"** (पा० १।२।५१) इति युक्तवद्भावो वक्तव्यो नेत्याह – **पञ्चालाः, वरणा** इति । नगरजनपदयोर्लिङ्गसंख्याभ्यां योगः सम्बन्धो न दृश्यते, कुत इत्याह – **संज्ञाशब्दत्वादिति ।** ईदृशावेवामू विशिष्टलिङ्ग-संख्यकौ नगरजनपदयोः संज्ञात्वेन प्रसिद्धौ, अतः संज्ञैव प्रमाणमिति । तथा च भगवान् **पाणिनिर्युक्तवद्भावलुकोः** प्रतिषेधमाह – **"तदशिष्यं संज्ञाप्रमाणत्वात्, लुब्योगाप्रख्यानात्"** (पा० १।२।५३, ५४) इति ।

**अन्ये** तु योगो न दृश्यते इति पञ्चालाः क्षत्रियाः सन्त्यस्मिन् देशे इत्यादिरन्वयो न दृश्यते संज्ञाशब्दत्वादिति मन्यन्ते । यदाह **जयादित्यः**– पञ्चाला वरणा इति । नैते योगशब्दाः, अपि तु संज्ञाशब्दत्वादिति । हरीतक्यः फलानीति, हरीतक्याः फलं विकारोऽवयवो वेति **"प्लक्षादिभ्यश्च"** (पा० ४।३।६४) इत्यणि कृते **"हरीतक्यादिभ्यश्च"** (पा० ४।३।१६७) इति **"फले लुक्"** (पा० ४।३।१६३) न वक्तव्यम् । हरीतकीशब्दो हि वृक्षे पुंसि फले नपुंसके लोकत एव प्रवर्तते । स च स्वभावात् स्त्रीलिङ्ग एवेत्याह – फलेष्वपि इति । हरीतक्यः इति बहुवचनेन गणः कथ्यते । हरीतकी, कोषातकी, भल्लातकी, शल्लकी, द्राक्षेत्यादि । एवमन्येऽपीति । **"एकादाकिनिच्चासहाये, मृदस्तिकन्, सस्नौ च प्रशंसायाम्"** (पा० ५।३।५२, ४।३९, ४०) इत्यादयोऽपि न वक्तव्याः– एकः, एककः, एकाकी । मृत्तिका, मृत्सा, मृत्स्ना चेत्यादयो हि तद्धिता वृक्षादिवल्लोकत एव विशिष्टविषयतया प्रसिद्धाः । एतदेवाह – **संज्ञाशब्दा** इवेति ।

खलतिकं वनानीति, खलतिकस्य देशस्यादूरभवानि वनानीति विगृह्य **"अदूरभवश्च"** (पा० ४।२।७०) इत्यण् तल्लोपश्चेति न वक्तव्यः । तथा युक्तवद्भावोऽपीत्याह – **तेषाम्** इत्यादि । नामेति = संज्ञेत्यर्थः ।

ननु लोकोपचाराल्लौकिका नामशब्दा ज्ञायन्ते, वैदिकास्तु कथं ज्ञातव्याः ? किं तैर्ज्ञातैरिति न वक्तव्यम् ? व्याकरणं हि वेदाङ्गमिष्यते अन्यथा तन्न स्यात् । न चान्यद् वैदिकशब्दव्युत्पादने सूत्रमस्ति, येन वेदाङ्गत्वं भविष्यतीत्याह-वैदिका इत्यादि । वैदिकाः शब्दा लौकिकज्ञैः पुरुषैर्ये यथोक्ताः येन प्रकारेण वेदे प्रतिपादितास्तथैव प्रकारेण ते निर्णीतार्थाः प्रकृतिप्रत्ययादिविभागोहनद्वारेण निश्चितार्था मन्तव्याः । एतदुक्तं भवति – वेदे हि लौकिका एव शब्दा बहवः प्रयुज्यन्ते, तेन तेषां व्युत्पत्त्यनुसारेण इतरेषामपि वैदिकानां लौकिकज्ञत्वात् प्रकृतिप्रत्ययादिविभागोहनसामर्थ्यैः शक्यते व्युत्पत्तिः

कर्तुमित्यर्थः। तर्हि लौकिका अपि सर्वे शब्दा लोकत एव विज्ञास्यन्ते किमनेनेत्याह– लोकादिति। लोकादवधेस्तेषां लौकिकानां शब्दानाम् असंग्रहः सम्यग् ग्रहणं न भवतीत्यर्थः। यस्माल्लौकिकानां शब्दानां व्याकरणमेव सम्प्रदायस्तदभावे बहुप्रक्रिया विषयाः शब्दाः कथमवधारयितुं वृद्धपरम्परया शक्यन्ते इति। वैदिकानां पुनः शब्दानां युगमन्वन्तरादिष्वपि अनवच्छिन्नक्रमेण सम्प्रदायत्वाल्लौकिकैरवधारयितुं पार्यन्ते इति स्थितम् ॥२३।

**॥ इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां प्रथमे सन्धिप्रकरणे प्रथमः सञ्ज्ञापादः समाप्तः॥**

●

**[क० च०]**

**लोको०।**

**वाशब्दैश्चापिशब्दैर्वा शब्दानां (सूत्राणाम्) चालकैस्तथा।**
**एभिर्येऽत्र न सिध्यन्ति ते साध्या लोकसम्मताः॥**

इति **वररुचिः। इह उभये लोका इति।** शास्त्रकारा व्याकरणकर्तारः, इतरे यादृच्छिकादयो देशव्यवहारविज्ञत्वात्। ग्रहणमपि द्विविधम्– शास्त्रव्यवहारहेतुः, लोकव्यवहारहेतुश्च। तत्राद्यमाह- **निपात** इत्यादि। चादयोऽसत्त्वेऽर्थे निपाताः। स्वरादिनिपातमव्ययम्। उपसर्गाः प्राक् प्रादयो धातुयोगे।

क्रियानिमित्तं कारकम्, निमेषादयः कालाः, एकादिकाः सङ्ख्याः, अदर्शनं लोपः। अपिशब्दादन्येष्वपि प्रकृतिप्रत्ययविकारागमादेशस्त्रीपुंनपुंसकविभक्ति–प्रथमाद्वितीयादयः। अथ ग्रहणसिद्धिरपि द्विविधा एका निपातादिशब्दानामर्थतो ज्ञानरूपा, अन्या च सकारादिलोपादिना मनीषादिशब्दसिद्धिरूपा इति बोध्यम्।

एतेन लोकोपचारादभिधानाश्रयणस्य को भेदश्चेत्, अथ महानेव भेदः। सिद्धव्यवहारो लोकोपचारः। निपातादिशब्दा एतेष्वर्थेषु प्रसिद्धाः, अतः सूत्राद् वेदितव्या इत्यभिधानाश्रयणं तु शब्दसाधनप्रतीतिः। हेमकरेणोक्तं न प्रमाणम्, **टीकापञ्जिकयोः "अवर्ण इवर्णे ए"** (१।२।२) इत्यत्र मनीषाशब्दसाधने लोकोपचारात् सकारलोपं वक्ष्यति, तस्मादभिधानाश्रयणस्यापि लोकोपचारपर्यवसायित्वमिति वक्ष्यतीति युक्तम्। लोकव्यवहारहेतुमाह– तथेत्यादि।

पञ्चालैर्वा निर्वृत्त इति पञ्चालैः परिपालित इत्यर्थः। **"लुपि युक्तवद् व्यक्तिवचने"** (पा० १।२।५१) इत्यस्यायमर्थः– प्रत्ययार्थेन सहात्मानं युनक्ति स्म इति युक्तशब्देन

प्रकृत्यर्थ उच्यते। **व्यक्तिर्लिङ्गम्, वचनं संख्या।** तद्धितप्रत्ययस्य लुपि सति युक्तस्यैव प्रकृत्यर्थस्यैव लिङ्गसंख्ये भवत इत्यर्थः। षष्ठ्यर्थे वतिः। तदशिष्यमिति तदिति युक्तवद्भावकथनम् अशिष्यम् अकथनीयम्। हेतुमाह– **"संज्ञाप्रमाणत्वात्"** (पा० १।२।५३) इति पाणिनेरेकं सूत्रम्, **"लुब्योगाप्रख्यानात्"** (पा० १।२।५४) इत्यपरं सूत्रम्।

**अस्यायमर्थः–** लुप् अशिष्टः अकथनीयः, योगस्य वरणाः सन्त्यस्मिन् नगरे तद् वरणा नगरमित्यादिस्वरूपस्यावयवार्थस्याप्रख्यानाद् अप्रतीतेरित्यर्थः। हरीतकी-शब्दो हि इत्यादि। पुंसि वृक्षे नपुंसकलिङ्गे लोकोपचारादेव वर्तते इति भावः। अथ लोकाद् ग्रहणे सिद्धिरिति सिद्धे उपचारग्रहणं किमर्थम्? सत्यम्, सुखार्थमिति ॥२३।

**॥ इति कलापचन्द्रे प्रथमे सन्धिप्रकरणे प्रथमः सञ्ज्ञापादः समाप्तः ॥**

●

**[समीक्षा]**

शब्दों के अनन्त होने के कारण और उन सभी अनन्त शब्दों का साधुत्वा-न्वाख्यान किसी एक व्याकरण में सम्भव न हो सकने के कारण सभी शाब्दिक आचार्यों ने अपने-अपने ग्रन्थों में यह निर्देश अवश्य किया है कि जिन शब्दों की सिद्धि इसमें नहीं कही गई है, उनका साधुत्व शिष्टव्यवहार तथा अन्य व्याकरण ग्रन्थों से जान लेना चाहिए। जैसे– पाणिनि– **"पृषोदरादीनि यथोपदिष्टम्"** (अ० ६।३।१०९)। हेमचन्द्र– **"सिद्धिः स्याद्वादात्, लोकात्"** (१।१।२, ३)। अनुभूतिस्वरूप– **"लोकाच्छेषस्य सिद्धिर्यथा मातरादेः"** (सार०-ग्रन्थ के अन्त में)।

आचार्य शर्ववर्मा ने भी यही भाव इस सूत्र में व्यक्त किया है– **"लोकोपचाराद् ग्रहणसिद्धिः"** (१।१।२३)। व्याख्याकारों ने अनेक शब्द लोकव्यवहार के ही आधार पर साधु मानकर सिद्ध किए हैं। कुछ शब्दों की सिद्धि के लिए 'वा-अपि-च' आदि की अनुवृत्ति यहाँ मानी जाती है। वररुचि का मत है कि उक्त प्रकार की अनुवृत्ति से भी जो शब्द सिद्ध न हो सकें, उनकी सिद्धि लोकव्यवहार के अनुसार समझ लेनी चाहिए–

**वाशब्दैश्चापिशब्दैर्वा सूत्राणां (शब्दानाम्) चालनैस्तथा।**
**एभिर्येऽत्र न सिध्यन्ति ते साध्या लोकसम्मताः॥**

यह ज्ञातव्य है कि पाणिनिपूर्ववर्ती व्याकरण लौकिक – वैदिक उभयविध थे और पाणिनि से परवर्ती प्रायः सभी व्याकरण केवल लौकिक शब्दों का ही साधुत्व बताते हैं। कलाप व्याकरण में वैदिक शब्दों का साधुत्व क्यों नहीं दिखाया गया – इस सम्बन्ध में वृत्तिकार दुर्गसिंह ने कहा है –

**वैदिका लौकिकज्ञैश्च ये यथोक्तास्तथैव ते।**

**निर्णीतार्थास्तु विज्ञेया लोकात् तेषामसंग्रहः॥**

अर्थात् जो लौकिक शब्दों के साधुत्वज्ञान में पारङ्गत शिष्टजन हैं, वे वैदिक शब्दों का भी साधुत्व अवश्य जानते हैं। उन वैदिक शब्दों का साधुत्व-बोध उन्हीं शिष्टों से कर लेना चाहिए – यह समझकर ही आचार्य शर्ववर्मा ने वैदिक शब्दों के साधुत्वहेतु सूत्र नहीं बनाए।

यहाँ यह आशङ्का की जाती है कि यदि वैदिक शब्दों का साधुत्व शिष्ट-व्यवहार से जाना जा सकता है तो लौकिक शब्दों का भी साधुत्व शिष्टव्यवहार से जाना ही जा सकता है और इस प्रकार यदि वैदिक शब्दों के साधुत्व के लिए सूत्र बनाने की कोई आवश्यकता नहीं हो सकती है तो लौकिक शब्दों के साधुत्व के लिए भी सूत्र बनाना आवश्यक नहीं है।

इस प्रश्न का समाधान करते हुए व्याख्याकारों ने कहा है कि वैदिक शब्द अल्प हैं, अतः उनका साधुत्वबोध शब्दप्रमाणक शिष्टजनों से किया जा सकता है, परन्तु लौकिक शब्द अनन्त हैं, उनके साधुत्वज्ञान का सरल और लघु उपाय सूत्ररचना (लक्षणशास्त्र) ही हो सकती है। अतः लौकिक शब्दों के साधुत्व के लिए कलापकार ने सूत्र बनाए हैं।

वैदिक शब्दों का साधुत्व न दिखाए जाने के कारण यह वेदाङ्ग नहीं है – ऐसा नहीं कहा जा सकता। क्योंकि वेदों में भी अधिकांश वे ही शब्द प्रयुक्त हैं, जिनका प्रयोग लोक में भी होता है। केवल वेद में ही प्रयुक्त शब्दों की संख्या अपेक्षाकृत अत्यन्त अल्प है। दूसरे यह कि वैदिक – परम्परा युग-मन्वन्तर में भी अविच्छिन्न रूप से चलती रहती है, वह कभी सर्वथा विच्छिन्न नहीं होती। इसलिए वैदिक शब्दों का साधुत्वज्ञान भी वैदिक विद्वानों में सुरक्षित बना रहता है, उसे उनके सान्निध्य से प्राप्त किया जा सकता है। इस प्रकार केवल लौकिक शब्दों का ही साधुत्व दिखाने वाले व्याकरण भी वेदाङ्ग सिद्ध होते हैं।

पाणिनि ने भी अनेक सूत्रों में लोकप्रामाण्य को स्पष्टरूप में स्वीकार किया है, फिर भी उन्होंने कुछ वैदिक शब्दों में भी प्रकृति-प्रत्यय तथा स्वरयोजना के लिए सूत्र बनाए हैं। यह प्रसिद्ध है कि पाणिनि ने कालविषयक परिभाषा नहीं की है। अर्थात् उनका व्याकरण कालपरिभाषारहित है, फलतः उसे अकालक कहा जाता है– **'पाणिन्युपज्ञमकालकं व्याकरणम्'** (का० वृ० २।४।२१)। काल की तरह प्रत्ययार्थप्राधान्य, उपसर्जन आदि विषयों में भी उनका यही मत है– **"प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्, कालोपसर्जने च तुल्यम्"** (अ० १।२।५६-५७)। परन्तु पाणिनि की भी अपेक्षा आचार्य शर्ववर्मा ने लोकव्यवहार की प्रामाणिकता अधिक स्वीकार की है। इनके दो प्रमुख सूत्र इस प्रकार हैं–

**"सिद्धो वर्णसमाम्नायः; लोकोपचाराद् ग्रहणसिद्धिः"** (१।१।१; २३) ॥२३।

**॥ इति प्रथमे सन्धिप्रकरणे समीक्षात्मकः प्रथमः सञ्ज्ञापादः समाप्तः॥**

●

# अथ प्रथमे सन्धिप्रकरणे द्वितीयः समानपादः

## २४. समानः सवर्णे दीर्घीभवति परश्च लोपम् (१।२।१)

**[सूत्रार्थ]**

सवर्णसंज्ञक वर्ण के पर में रहने पर समानसंज्ञक वर्ण को दीर्घ होता है तथा उससे परवर्ती (सवर्णसंज्ञक) वर्ण का लोप हो जाता है ।।२४।

**[दु० वृ०]**

समानसंज्ञको वर्णः सवर्णे परे दीर्घीभवति परश्च लोपमापद्यते । दण्डाग्रम्, सागता । दधीदम्, नदीहते । मधूदकम्, वधूढम् । पितॄषभः, कॄकारः । क्लॄकारेण । होतॄकारः इति वक्तव्यम् । समानग्रहणमश्रुतादपि दीर्घात् समानात् सवर्णस्य लोपार्थम्, तेन वृक्षाः ।।२४।

**[दु० टी०]**

**समानः ।** समान इत्यभेदविवक्षायां प्रथमा । सवर्ण इत्युपश्लेषलक्षणा सप्तमी । दीर्घीभवतीत्यभूततद्भावे कृभ्वस्तिषु विकाराच्च्विरस्य च सर्वापहारी लोपोऽवर्णस्य च्वावीत्वम् (पा० ५।४।५०; ७।४।२६,३२) लोपमित्यापद्यते इति गम्यमानक्रियायाः कर्म । समानसंज्ञको वर्णः सवर्णे परे दीर्घीभवति । अवस्थाभेदेन वर्ण एव निवर्तते तत्प्रत्ययात् । यथा दुग्धं दधीभवति, लौहं सुवर्णीभवति । अवस्थानिवृत्तिश्च । **"स्थानेऽन्तरतमः"** (पा० १।१।५०) इति स्थानशब्दोऽपि निवृत्त्यर्थ एव भविष्यति । अवर्णः कण्ठ्य इत्यकारस्याकारो दीर्घः । इवर्णस्तालव्यः इति इकारस्य ईकारः । उवर्णः ओष्ठ्यः इत्युकारस्य ऊकारः । ऋवर्णो मूर्धन्य इति ऋकारस्य ॠकारः । ऌवर्णो दन्त्यः इति ऌकारस्य ॡकारः । तथा च **आपिशलीय**श्लोकः –

**आगमोऽनुपघातेन विकारश्चोपमर्दनात् ।**

**आदेशश्च प्रसङ्गेन लोपः सर्वापकर्षणात् ।।**

तथा चायं वक्ष्यति – **"प्रत्ययविकारागमस्थः सिः षत्वम्"** (३।८।२६) इति । च्विप्रत्ययश्चेत् कथं सागता, नदीहते इत्याह – **समानग्रहणम्** इत्यादि । च्वेस्तु

प्रयोगाविर्भावमात्रमेव फलमिति ।आदेशवादी पुनराह-अस्त्यर्थे इन्नयमिति समानः सवर्णे दीर्घवान् भवतीत्यर्थः ।

नन्वसमानकालानां वर्णानां कथं मत्वर्थीयो दीर्घो भवितुमर्हति ? नैतदेवम् । नहि निवर्तमानस्य प्रवर्तमानेन सह संबन्धो नास्ति । नहि संबन्धमन्तरेणास्यायमादेशः इति षष्ठी लभ्यते । प्रागेव स्थितो ह्रस्वो दीर्घो वा निवर्तते दीर्घः प्रवर्तते । तस्य हि प्रसङ्गे सत्यसौ प्रयुज्यते, सहानवस्थानं हि विरोधः, यथा भावाभावयोश्च, च्विप्रत्ययानुपपत्तिः प्रकृतिविकारानुपपत्तेः । यत्रावस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिस्तत्रायं प्रकृतिविकारभावः, यथा शुक्लीभवति वस्त्रम् इति । न पुनरिह कश्चिदन्वयी सम्भवति यो निवर्तमानेन प्रवर्तमानेन च संगच्छते विकारकालाननुवृत्तेश्च ।

नहि कार्यकालमनुवर्तमानाः प्रकृतयः करणतां यान्ति । नहि विकृतिस्थाने प्रकृतय उच्चार्यन्ते । अनुच्चारितानां च कुतः सम्भवस्तासां पुनः प्रदेशान्तरदृष्टानामत्रा-प्रयोगोऽन्येषां च प्रयोगो दृश्यते । यदि पुनरयं च्विप्रत्ययो दीर्घस्य कथं दीर्घो भवति ? नहि सोऽन्यथाभूतो दीर्घत्वमासादयति, मा भूत् । किन्नो बाध्यते इति चेत्, परलोपो नहि सन्नियोगशिष्टानामेकापायेऽन्यतरस्य प्रवृत्तिः ।

ननु शास्त्रे तत्र तत्र कथमभिधीयते **"अवर्ण इवर्णे ए, इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।२,८) इति ? नैष दोषः। उक्तत्वात् तेषां प्रयोगविषये प्रयुज्यमानास्त एव ते इत्युपचारितो व्यवहारो न पुनः प्रकृतिविकारभावो विवक्षित इति । **"विकारस्थः सिः"** (३।८।२६) इत्युपचारित एव । समानग्रहणं किमर्थम् ? ह्रस्वमात्रस्य मा भूदिति चेत्, न । दीर्घस्यापि दीर्घः करणीयः परलोपार्थः ।

एवं सति स्थानिप्रतिपत्तिर्गरीयसीति समानग्रहणम् ।'परश्च लोपम्' इति वचनात्, अर्थात् परिशिष्टसवर्ण एव निमित्तभावं प्रतिपद्यते सवर्ण (समान) ग्रहणं किमर्थम्, **अन्वाचय**शिष्टोऽपि चकारो भवितुमर्हति । यथा – **'भो वटो! भिक्षामट गां चानय'** इति । तदा निर्निमित्तेऽपि दीर्घो भवति । किं च श्रुतत्वात् सवर्णमात्रस्यैव लोपो यथा स्यात् । अग्रादेः समस्तस्य लोपो मा भूत् । "समानः सवर्णे दीर्घः" इति कृतेऽपि एक एव दीर्घो भविष्यति । यथा लोके मृत्पिण्डस्य मृत्पिण्डेन सह घटः कर्तव्य इत्युक्ते एक एव घटः क्रियते ।नैवं सागतेत्यादौ बहुमात्रत्वाद् मृतव्यपदेशेऽपि दीर्घोऽन्तरतमः स्यात् । किं चात्र 'वागत्र, त्वगत्र' (त्वामत्र, मामत्र) इति व्यवहितेऽपि दीर्घः प्राप्नोति । उपश्लेषलक्षणा सप्तमी नास्तीत्यतः परश्च लोपमिति वचनात् ।

ऋकारस्य लृकारे दीर्घो वक्तव्य एव सवर्णसंज्ञाभावादिति पोतॄकारः। चकारात् पूर्वलोपश्चेष्यते होतृकारः, पोत्लृकारः। ऋकारेऽप्येवम् – होतृकारः, पोतृकारः। लृति परे लृरपि वक्तव्यः, पक्षे प्रकृतिश्च भवति। होत्लृकारः, होतृलृकारः। ऊर्ध्वरेफोऽयम् ऋकारः समुदाये ऋ इति होतॄकारः। ऋकारेऽप्येवम्, यदि भाषायां दृश्यते। शकानामन्धुः कूपः शकन्धुः। सीम्नोऽन्तः सीमन्तः इति केशविन्यासे। कुलमटतीति कुलटा बहुगोत्र (अन्यत्र)- गमनवती स्त्री भण्यते। सर्वा हि स्त्री कुलमटति, कुलशब्देन विशेषणाद् वीप्सार्थो गम्यते। या कुलात् कुलमटतीत्यर्थः। एते हि रूढित एव सिद्धाः॥२४।

**[वि० प०]**

**समानः।** दीर्घीभवतीति। अदीर्घो दीर्घः सम्पद्यते इति **"अभूततद्भावे कृभ्वस्तिषु विकाराच्च्विः"** (पा० ५।४।५०) इति तमादिनिपातनाच्च्विप्रत्ययः। अस्य च सर्वापहारी लोपः, **"अकारस्य च्वौ च"** (पा० ७।४।३२) इतीत्वम्। ननु कथमत्र च्विप्रत्ययः प्रकृतिविकारभावानुपपत्तेः? यत्रावस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिस्तत्रायं प्रकृतिविकारभावः। यथा – 'शुक्लीभवति वस्त्रम्' इति।

अत्र तु ह्रस्वदीर्घयोरत्यन्तभेदोपलब्धेः नैको धर्मी कश्चिदिहानुगतोऽस्ति स तयोः प्रतिभासते। तदयुक्तम्, वर्णस्यैवावस्थाभेदेन विवर्तनात्। तथाहि प्राचीनां ह्रस्वावस्थामतिक्रम्य दीर्घावस्थां प्रतिपद्यमानो वर्ण एव धर्मी प्रतीयते। यथा दुग्धं दधीभवति, लौहं सुवर्णीभवति, गोरसत्व – लौहत्वसामान्यानुगमात् च्विप्रत्ययः सिद्धः, तथात्रापीत्यदोषः।

आदेशवादी तु मन्यते – दीर्घोऽस्यास्तीति इनुप्रत्ययः। समानसंज्ञको वर्णः सवर्णे परे दीर्घवान् भवतीत्यर्थः। ननु ह्रस्वकाले दीर्घो नास्ति दीर्घकाले ह्रस्वो नास्ति तत् कथमिनुप्रत्ययः? सत्यम्, तथापि निवर्तमानस्य ह्रस्वस्य प्रवर्तमानेन दीर्घेण सम्बन्धोऽस्त्येव, यथास्यायमादेश इति। नहि संबन्धमन्तरेणास्येति षष्ठी लभ्यते। ननु तथापि कथं मत्वर्थीयप्रत्ययः, न ह्यसौ संबन्धमात्रे विधीयते, किन्तर्हि तदस्यास्तीति साक्षाद् वर्तमानकाले निर्देशात् तद्विवक्षाप्यस्ति। न च ह्रस्वकाले दीर्घस्य वर्तमानता सम्भवतीति।

यद्येवं सम्बन्धोऽपि कथम्? न ह्यसति सम्बन्धिनि सम्बन्धसिद्धिरस्ति, तस्मात् सम्बन्धसिद्धान्यथानुपपत्त्या सम्बन्धिनोऽपि सिद्धिरुपचर्यते। तथा च आदेशी स्थानीत्यादयो बहुलं शास्त्रे प्रयुज्यन्त इति। ननु ऋकारस्य लृकारेण सह सवर्णसंज्ञाभावाद् दीर्घं न प्राप्नोति तत् कथमित्याह – **'होतृकार'** इति। होतुः लृकार इति विग्रहः।

वक्तव्यम् = व्याख्यानं कर्तव्यम्। ऋकारलृकारयोः सवर्णसंज्ञा लोकोपचारात् सिद्धेति भावः।

ननु ह्रस्वस्य दीर्घो भवन् अर्थात् सवर्णस्यैव भविष्यति किं समानग्रहणेन ? न ह्यसमानस्य दीर्घादिव्यवहारोऽस्तीत्यत्राह-**समानग्रहणम्** इत्यादि। अनेन द्वयं विधीयते- दीर्घः परलोपश्च। तत्र श्रुतत्वादनेनैव यत्र दीर्घस्तत्रैव परलोपः स्यात् तेन 'वृक्षाः' इत्यत्र "जसि" (२।१।१५) इत्यनेन दीर्घविधानात्। किञ्च च्विप्रत्ययपक्षे स्वभावदीर्घस्य दीर्घत्वाभावाद् 'नदीहा' इत्यादिष्वपि परलोपो न स्यात् 'संनियोगशिष्टानामेकस्यापायेऽन्यतरस्याप्यपायः' (सं० बौ० वै०, पृ० २२२) इति समानग्रहणम्। आदेशपक्षे तु वचनान्तरप्रणीतस्य स्वभावदीर्घस्य पुनर्दीर्घः परलोपार्थस्तदा समानग्रहणं स्थानिप्रतिपत्तिगौरवनिरासार्थम् ॥२४।

**[क० च०]**

**समानः।** अथ सवर्णग्रहणं किमर्थम् ? 'परश्च लोपम्' इति वचनात् सवर्ण एव निमित्तभावं प्रतिपद्यते ? सत्यम्, अन्वाचयशिष्टोऽपि चकारो भवितुमर्हति। यथा 'भो वटो ! भिक्षामट, यदि पश्यसि गां चानयेति, तदा निर्निमित्तेऽपि दीर्घो भविष्यति। यद् वा श्रुतत्वात् सवर्णस्यैव लोपो यथा स्यात्, अग्रादेः समस्तस्य मा भूत्। ननु "समानः सवर्णे दीर्घः" इत्यप्येकदीर्घो भविष्यति। यथा अनेन मृत्पिण्डेन सहान्यमृत्पिण्डस्य घटः कर्तव्य इत्युक्ते एक एव घटः क्रियते। नैवं त्वगत्र, वागत्रेत्यादौ व्यवहितो दीर्घः प्राप्नोति, उपश्लेषलक्षणा सप्तमी नास्तीति।

ननु 'समानः' इति (समानानामनेकत्वात्) कथमेकवचनम्, अनेकसाधनत्वे बहुवचनप्रसङ्गात्। नहि समानत्वं जातिरस्ति, समत्वेषु जातेरनङ्गीकारात्। न च जातेरेकत्वादेकवचनमिति वाच्यम्। समानेषु जातेरङ्गीकारेण केवलानां संज्ञाविधानात्। अन्यथा सन्ध्यक्षराणां परभागस्येकारोकारस्य समानत्वम्, तर्हि 'अग्ने इन्द्र पटो उत्तिष्ठ' इत्यादाविदुतोः परयोः समानदीर्घप्रसङ्गः स्यात्। न च 'अव्यवपृक्तेषु विधिर्दृष्टो न व्यवपृक्तेषु' इति वाच्यम्, **टीकायां** सन्ध्यक्षरप्रस्तावेऽस्यानङ्गीकरणात्। अत एवैषां जातेरभावात् **टीकाकृता पञ्जीकृता** च धर्मित्वेन कल्प्यते न तु समानत्वमिति अनुगतैकधर्माभावात् ? सत्यम्। (नहि नानार्थस्य हरिशब्दस्य युगपत् सर्वेषामभिधानेऽनुगतैकधर्मोऽस्ति, तद्वदत्रापि)। यथा हरिशब्देन आवृत्त्या नानार्था उच्यन्ते तथा अनेनापि नाना व्यक्तय उच्यन्ते। (यथा समानं मानं येषामिति समासवाच्ये येषामित्यत्र समूह-

समूहिसम्बन्धे षष्ठी। समूहश्चात्र वर्णद्वयात्मक एव, तेन सवर्णसमुदायविषयकान्ता दश प्रकारास्तत्र कुतः षट्प्रकारापन्नत्वमिति अनुगतैकधर्मोऽस्ति।

ननु कथमेतद्, यावता समानसंज्ञाघटिता हि सवर्णसंज्ञा, यथा द्वौ द्वौ समानौ सवर्णौ भवतः इति समानत्वं च सवर्णघटितमुच्यते, अत इतरेतराश्रयदोष इति, सत्यम्; सवर्णत्वं हि समानघटितं न कर्तव्यं किन्तु दशानां मध्ये यौ द्वौ द्वौ तौ सवर्णाविति तत्र व्याख्यातमिति नास्तीतरेतराश्रयदोष इति। ननु समान एव धर्मित्वेन कथं न कल्प्यते इति चेत्, वर्णस्य धर्मित्वकल्पनेऽपि समानत्व एव तात्पर्यमिति बोध्यम्।

ननु सप्तमी निमित्त इति सूत्रमस्मन्मते नास्ति तत् कथमिह निमित्तसप्तमी ? सत्यम्, उपश्लेष – लक्षणा सप्तमी। **उपश्लेषः** संयोगः, यद्यपि शब्दानां गुणत्वात् संयोगो न संभवति, नापि कटे आस्ते इतिवद् आधाराधेयभावः (समानस्य सवर्णस्थाने वृत्त्यभावात्) सम्भवति, नहि आधाराधेयं विना उपश्लेषो घटते, तथापि शास्त्रे वर्णानां द्रव्यवद्व्यवहार इति। यद् वा सवर्णसमीपो देशोऽपि सवर्ण इत्युच्यते। ततो घटत एवोपश्लेषः इति। यथा 'गङ्गायां घोषः' इत्येक उपश्लेषः। तर्हि 'दण्डाग्रम्' इत्यादौ अग्रशब्दस्यापि दीर्घः स्यात् चेत्, न। परश्च लोपग्रहणात् सप्तम्या निर्दिष्टे पूर्वस्येति ज्ञापितमिति कथमग्रशब्दस्याकारस्य दीर्घ इति।

**वस्तुतस्तु** लोकोपचारान्निमित्तसप्तमी द्रष्टव्या। **अन्ये** तु **"कालभावयोः सप्तमी"** (२।४।३४) इत्यनेनैव सप्तमी सिद्धा। यथा सवर्णे परत्र स्थितेऽपीत्याहुः। **अभूततद्भाव इत्यादि।** अयमर्थः– अवस्थावतोऽवस्थान्तरेणाभूतस्य अजातस्य तदात्मना विकारात्मना भावे जन्मनि च्विर्भवति, कृभ्वस्तिषु परेषु तमादिदर्शनादिति। दीर्घीभवतीति ज्ञापकात् तमादौ च्विप्रत्ययविधायकमिदं दृष्टं तस्मादित्यर्थेऽस्य च्वेरिति तदेव ज्ञापकमुन्नेयम्। **प्रकृतीति।** प्रकृतिश्च विकारश्चेति द्वन्द्वः। धर्माभावात् प्रकृतिविकारभावो नास्तीति भावः।

प्रकृतेर्विकार इति तत्पुरुषे प्रकृतित्वमस्त्येव, किन्तु तस्य विकृतिर्नास्तीति सम्भाव्यते। अथ ह्रस्वदीर्घयोरत्यन्तभेदोपलब्धेरित्यत्र कथमेको धर्मीत्यादेर्हेतुर्दत्तस्तस्मात् पूर्वपक्षवादिना ह्रस्वदीर्घयोर्धर्मत्वेन स्वीकारः कृतः। शुक्लीभवति वस्त्रम् इत्यादौ शुक्लकृष्णयोर्भेद एवेति। नैवम्, अभिप्रायापरिज्ञानात् शुक्लीभवति वस्त्रमित्यादौ शुक्लकृष्णशब्दौ धर्मिपरौ एकस्यां वस्त्रव्यक्तौ वर्तेते, तद्वद् ह्रस्वदीर्घाभ्यां वर्तितुं कापि

व्यक्तिरस्ति, अत एवानयोरत्यन्तं भेद इति **केचित्**। एतच्च नातिपेशलम्। एतच्च तैरेवावगम्यते नास्माभिरिति।

**वस्तुतस्तु** ह्रस्व एव धर्मी भविष्यति इति सिद्धान्तवादिनो मतं निरसितुमाह – **ह्रस्वदीर्घयोः** इति। अतो नास्ति पूर्वपक्षावसरः। ननु वर्णः कथं धर्मी स्यात्, यथा ह्रस्वदीर्घयोर्भेदस्तथा वर्णानामपि नानात्वाद् भेद इति ? सत्यम्, वर्णशब्देनात्र वर्णत्वमुच्यते इति न दोषः। ननु तर्हि जातेरिव कारणाभावात् कथमेतत् संगच्छते ? सत्यम्, भेदाभेदस्वीकारः कर्तव्यः। तथाहि भेदस्वीकारे धर्मिकल्पना, अभेदस्वीकारे वर्णत्वं (धर्म) इति नास्ति पूर्वपक्षावसरः इति विकारः सिद्धः। इदानीमादेशवादिनो मतमाह – **आदेश** इति। **अत्रापिशलीय**श्लोकः –

**आगमोऽनुपघातेन विकारश्चोपमर्दनात्।**
**आदेशश्च प्रसङ्गेन लोपः सर्वापकर्षणात्॥**

ननु विकारादेशयोः को भेदः, द्वयोरेव प्रकृतिविनाशप्रवर्तमानत्वात् ? उच्यते – वर्णस्य स्थाने भवन् **विकार** उच्यते, शब्दस्य स्थाने भवन् **आदेश** इति। अत एव 'तिस्रः' इत्यत्र न षत्वम् अविकारित्वादिति। **कुलचन्द्रस्तु** – नन्वस्मिन्नेव सूत्रे अवर्णस्य स्थाने कृतस्यापि दीर्घस्य उभयव्यपदेशात्। किञ्च **"नामिकरपरः"** (२।४।४७) इत्यस्य टीकायां शब्दस्य स्थाने कृतस्यापि आदेशस्य विकारशब्देनोक्तत्वात्। तथाहि – आगमसाहचर्याद् विकारस्यापि सकारस्यैव न पुनरनेकवर्णस्येति, तेनात्र तिसृभिरित्यत्र न षत्वमिति, तस्मादिति भेदेन नामभेद इति युक्तं टीकापञ्जीकृद्भ्यां पुनर्मतद्वयमवलम्ब्य व्याख्यातमिति। **ननु ह्रस्व** इत्यादि। ह्रस्वकाल इति ह्रस्वोच्चारणकाल इत्यर्थः। सम्बन्धोऽस्त्येवेति बाध्यबाधक इत्यर्थः।

वर्तमानविवक्षाप्यस्तीत्ययमभिप्रायः – तदस्यास्तीति सूत्रे यत्र क्रियापदं नास्ति, तत्रास्तिर्भवतिपरः प्रयुज्यते इति न्यायात् प्राप्तमिति यत् पुनरुक्तं भवतीति तद् बोधयति – सूत्रे लिङ्गं संख्या कालश्चातन्त्राणीत्यादिन्यायोऽस्मिन्नस्तीत्याह – तद्विवक्षाप्यस्तीत्यनेन प्रथमान्तस्य वर्तमानताऽवगम्यते, सा पुनरत्र दीर्घस्य वर्तमानता वर्तत एव तत् कथमिदमुक्तम् ? नैवम्। तदस्यास्तीतीदंशब्देन षष्ठ्यन्तस्यापि वर्तमानता सूच्यते तत्सम्बन्धिनो वर्तमानता विकृतेर्नास्तीत्याह – न च ह्रस्वकाले दीर्घस्य वर्तमानता सम्भवतीति। अत्र दीर्घकाले ह्रस्वो नास्तीत्यपि बोध्यम्।

यद्येवमिति सम्बन्धोऽपि कथं सम्भवतीत्यर्थः। **तस्मादित्यादि**। सम्बन्धसिद्ध्यर्थमिति भावः। उपचर्यते भूतपूर्वस्य वर्तमानत्वोपचार इत्यर्थः। उपचारस्यावश्यकत्वमाह– **तथा च** इति। **ननु ऋकारस्येत्यादि**। अत्र कथं स्वरस्यैव दीर्घ इत्यवधार्यते सवर्णवचनात्, न ह्यस्वरस्य सवर्णः कश्चिदस्ति, येन व्यञ्जनस्य दीर्घः स्यादिति। ननु वाक्कल्प इत्यादिषु ककारे ककारस्य दीर्घः कथं न स्यात्, तथाह वर्गसंज्ञाविधौ वर्गान्तरस्यासवर्णत्वं प्रतिपादितम्। अतः सवर्गव्यञ्जनस्य सवर्णत्वमस्त्येव, तदयुक्तम्। अभिप्रायापरिज्ञानाद् यत्र वर्गग्रहणमस्ति तत्र वर्गान्तस्य सवर्णत्वम्, नतु सर्वत्र।

तथा च **"चवर्गस्य किरसवर्णे"** (३।६।५५) इत्यत्र **हेमकरेण** शपथः कृतः, तन्न। अन्यथैव सिद्धेः शपथस्यायुक्तत्वात्। तथा हि सवर्णशब्देन हि शास्त्रे स्वर एव संकेतितः, नहि सम्भवे सति योगार्थमादाय व्यञ्जने प्रतीतिर्भवितुमर्हतीति। नहि 'पङ्कजमानय' इत्युक्ते संकेतितार्थं परित्यज्य केनचित् कुमुदमानीयते। किञ्च 'कृत्रिमाकृत्रिमयोः कृत्रिमो विधिर्न्याय्यः' (व्या० परि० वृ० ६) तस्मात् सवर्ण इति वचनात् स्वरस्यैव दीर्घ इत्यवधारितम्। **अर्थाद् इत्यादि**। सवर्णग्रहणाद् इत्यर्थः समानस्य सवर्णव्यवहारादिति भावः।

अथ समानग्रहणाभावे सवर्णे परतः इत्युक्ते सवर्ण एव लभ्यते, ततः सन्ध्यक्षराणां परभागस्य इकारोकारत्वात् 'अग्ने इन्द्रः' इत्यादौ दीर्घः कथं न स्यादित्याह– **न ह्यसमानस्य** इति। तथाहि सन्ध्यक्षरप्रस्तावे टीकायामुक्तम्– 'अग्ने इन्द्रः, पटो उदकम्' तत्र समानदीर्घः प्राप्तः, किन्तु केवलानां समानसंज्ञाविधानान्न भवति। दीर्घादित्यादि। आदिग्रहणाद् 'अग्ने आह, पटो आगच्छ' इत्यादिषु यत्वादिकमपि न भवतीत्यर्थः। अत्र अयाद्यादेशाः सन्ति बाधका इति चेत्, न। 'अग्ने इन्द्र' इत्यत्र समानस्य दीर्घो नास्तीति निश्चितमेव। अतस्तत्रैवायादेशस्य चरितार्थत्वमिति।

यद् वा आदिशब्देन सन्ध्यक्षराणां सवर्णव्यवहारो नास्तीत्युच्यते अव्यवपृक्तसमानस्यैव सवर्णसंज्ञाविधानाद् इदमेव युक्तमुत्पश्यामः। सूत्रे सवर्णदीर्घयोः स्वरसंज्ञयैव प्रस्तुतत्वात्। **अन्ये** तु आदिशब्देन ह्रस्वव्यवहारोऽपि नास्तीत्याहुः। तन्न। **"सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे"** (कालापपरि०, परि० ९५) इति ह्रस्वव्यवहारदर्शनादिति। अथाकारलोपमजसि इति क्रियतां तदा 'वृक्षाः' इत्यत्रानेन दीर्घः परलोपश्च भविष्यति किं समानग्रहणमित्यत आह– **किं च** इति।

ननु 'दण्डाग्रम्' इत्यकारे लोपमित्यस्य विशेषविधेर्विषयत्वात् कथं दीर्घः ? तथा च तत्र वक्ष्यति अकारे सामान्ये इति चेत्, न। एवं तदर्थापरिज्ञानाद् यत्र विभक्तौ परतो वर्तमानस्य यल्लिङ्गस्याकारो लोपमापद्यमानोऽकारे सामान्य इति श्रुतत्वात् तद्-विभक्तेस्तल्लिङ्गस्याकार इति। यद् वा दण्डस्याग्रं दण्डाग्रम् इति समासे षष्ठीलोपे कृते **"प्रकृतिश्च स्वरान्तस्य"** (२।५।३) इत्यनेन प्रकृतिवद्भावादकारलोपो न भवति। यथा सखा प्रियोऽस्येति **'सखिप्रियः'**। अत्र **"सख्युश्च"** (२।२।२३) इत्यत्र भवति। यत्तु अकारलोपम् इत्यत्र **पञ्जिकायाम्** उक्तम्- इह स्यादिप्रस्तावाद् विभक्तेरेव निमित्तत्वात् 'दण्डाग्रम्' इत्यादौ लोपो न भवतीति। तत्तु 'हे दण्ड अग्रं पश्य' इत्यन्वये युक्तार्थत्वाभावात् प्रकृतिश्चेत्यस्याविषयत्वं बोध्यम्। ननु सागतेत्यत्र दीर्घात् परलोपे सति लोपस्यादेशत्वाद् **"आङ्यादिष्टे"** (कात० परि०, सं० १८) इत्यनेन साशब्दस्या-कारलोपः कथं न स्यात्। तथा च **श्रीपति**नाप्युक्तम्- "आदिष्टग्रहणं लुप्तेऽपि यथा स्यात्। यथा आ+ओणति = ओणति, परा + ओणति = परोणति इति ? सत्यम्, 'परश्च लोपम्' इति कृते यदि आङ्यादिष्ट इति लोपः स्यात् तदा निमित्तस्य दीर्घस्याप्यभावात् पुनरप्याकारः समायाति इत्यनवस्था स्यात्। तन्न। आङ्यादिष्टे इत्यस्य प्रवृत्तौ सत्यां नैमित्तिकाभावं प्रत्येव अनवस्थाया उचितत्वात्।

यद् वा यदि सनिमित्तप्रस्तावाद् यस्मिन्नेव निमित्ते परे आङ्यादिष्टो भवति तदा तस्मिन्नेव निमित्तेऽवर्णो लुप्यत इति न दोषः। **अन्ये** तु सन्निपातलक्षणन्यायात् पूर्वलोपो न भवति। न च वर्णग्रहणे निमित्तत्वादिति वाच्यम्, तस्यानित्यत्वादित्याहुः। तर्हि 'तामुपैहि महाराज' (दु० स० १३।४) इत्यत्राकारलोपः स्यात् ? सत्यम्। **"नामधातोर्वा"** (कात० परि०, सं० १४) इत्यतो वाग्रहणानुवर्तनाद् विकल्पो भविष्यति। यद् वा आङ्यादिष्ट इत्यत्रोपसर्गो वर्तते। अत्रोपसर्गप्रतिरूपकेण सिध्यतीति ॥२४।

**[समीक्षा]**

पाणिनि ने 'दण्डाग्रम्, मधूदकम्' आदि में दीर्घविधान **"एकः पूर्वपरयोः"** (पा० ६।१।७५) के अधिकार में किया है, जिसके कारण पूर्ववर्ती तथा परवर्ती दोनों अवर्णों के स्थान में एक दीर्घ आकारादेश, दो इवर्णों के स्थान में एक दीर्घ ईकारादेश, दो उवर्णों के स्थान में एक दीर्घ ऊकारादेश तथा दो ऋवर्णों के स्थान

में एक दीर्घ ॠकारादेश उपपन्न होता है– **"अकः सवर्णे दीर्घः"** (पा० ६।१।१०१)।

शर्ववर्मा ने पूर्ववर्ती अवर्णादि के स्थान में दीर्घ आकारादि आदेश तथा परवर्ती अवर्णादि का लोप किया है। इस प्रकार पाणिनीय व्याकरण में दो स्वरों के स्थान में तथा कलापव्याकरण में एक ही स्वर के स्थान में दीर्घ आदेश निर्दिष्ट है। इन दो विधियों में कौन सी विधि प्रशस्त है– इसका निर्णय कर पाना यद्यपि अत्यन्त दुष्कर है तथापि इतना तो अवश्य कहा जा सकता है कि स्वर उसे कहते हैं जो उच्चारण में किसी अन्य की अपेक्षा न रखता हो। इससे उसे स्वयं समर्थ माना जाता है– **'स्वयं राजते इति स्वरः'**। स्वयं एकाकी समर्थ होने पर दो स्वरों के स्थान में एक स्वरादेश की अपेक्षा एक ही स्वर के स्थान में एक स्वरादेश-विधान अधिक समीचीन प्रतीत होता है। यदि यह कहा जाए कि कलापव्याकरण में परवर्ती स्वर का लोप अधिक करना पड़ता है तो वह इसलिए समादरणीय नहीं हो सकता कि पाणिनीय व्याकरण में **"एकः पूर्वपरयोः"** (पा० ६।१।७५) यह अधिकारसूत्र अतिरिक्त करना पड़ता है। कलापव्याकरण में परवर्ती स्वर का लोप करने के लिए अतिरिक्त सूत्र नहीं किया जाता, किन्तु एक ही सूत्र-द्वारा दीर्घ तथा लोप-कार्य निर्दिष्ट हुए हैं।

व्याख्याकारों ने इस सवर्णदीर्घविधि को विकार तथा आदेश माने जाने के सम्बन्ध में कुलचन्द्र, हेमकर तथा श्रीपति आदि के मतों को प्रदर्शित किया है। एक वर्ण के स्थान में उपपन्न होने के कारण इसे कुछ विद्वान् विकार भी कहते हैं। एक वर्ण के स्थान में होने वाली विधि को विकार तथा अधिक वर्णों या धातु– पद आदि के स्थान में होने वाली विधिको आदेश माना गया है। आपिशलि का मत है–

**आगमोऽनुपघातेन विकारश्चोपमर्दनात्।**
**आदेशस्तु प्रसङ्गेन लोपः सर्वापकर्षणात्॥**

कातन्त्रकार ने स्थानी को प्रथमान्त तथा आदेश को द्वितीयान्त रखा है, निमित्त का प्रयोग तो सप्तम्यन्त ही है। पाणिनि ने स्थानी का षष्ठ्यन्त तथा आदेश का व्यवहार प्रथमान्त किया है। कातन्त्रकार की शैली पूर्वाचार्यसम्मत है।

[रूपसिद्धि]

**१. दण्डाग्रम्।** दण्ड+अग्रम् (अ + अ)। डकारोत्तरवर्ती एवं समानसञ्ज्ञक 'अ' के स्थान में 'आ' आदेश तथा उत्तरवर्ती अ का लोप।

**२. सागता।** सा + आगता (आ+आ)। सकारोत्तरवर्ती 'आ' के स्थान में 'आ' आदेश तथा परवर्ती आ का लोप।

**३. दधीदम्।** दधि+इदम् (इ+इ)। धकारोत्तरवर्ती तथा समानसंज्ञक 'इ' के स्थान में 'ई' आदेश एवं परवर्ती 'इ' का लोप।

**४. नदीहते।** नदी + ईहते (ई+ई)। दकारोत्तरवर्ती ई के स्थान में 'ई' आदेश और परवर्ती ई का लोप।

**५. मधूदकम्।** मधु+उदकम् (उ+उ)। धकारोत्तरवर्ती 'उ' के स्थान में 'ऊ' आदेश एवं परवर्ती ऊ का लोप।

**६. वधूढम्।** वधू+ऊढम् (ऊ+ऊ)। धकारोत्तरवर्ती ऊ के स्थान में 'ऊ' आदेश, परवर्ती ऊ का लोप।

**७. पितॄषभः।** पितृ+ऋषभः (ऋ+ऋ)। तकारोत्तरवर्ती ऋ को ॠ आदेश तथा परवर्ती ऋ का लोप।

**८. कॄकारः।** कॄ+ॠकारः (ॠ+ॠ)। पूर्वककारोत्तरवर्ती ॠ को ॠ आदेश, अथ च परवर्ती ॠ का लोप।

**९. क्लॄकारेण।** क्लृ+ऌकारेण (ऌ+ऌ)। पूर्वककारोत्तरवर्ती ऌ के स्थान में ॡ आदेश तथा परवर्ती ऌ का लोप।

**१०. होतॄकारः।** होतृ+ऌकारः (ऋ+ऌ)। तकारोत्तरवर्ती ऋ के स्थान में ॠ आदेश तथा परवर्ती ऌ का लोप।

ऋवर्ण – ऌवर्ण की सवर्णसंज्ञा के लिए पाणिनीयादि व्याकरणों में वार्त्तिकादि-वचन पढ़े गए हैं, परन्तु कातन्त्र में यह कार्य लोकव्यवहारानुसार ही स्वीकार कर लिया जाता है।

पाणिनीय व्याकरण में इस विधि के 'दैत्यारिः, श्रीशः, विष्णूदयः' आदि उदाहरण प्रसिद्ध हैं।

# २५. अवर्ण इवर्णे ए (१।२।२)

## [सूत्रार्थ]

इवर्ण के पर में रहने पर अवर्ण के स्थान में 'ए' आदेश होता है तथा इवर्ण का लोप ।।२५।

## [दु० वृ०]

अवर्ण इवर्णे परे एर्भवति परश्च लोपमापद्यते । वर्णग्रहणे सवर्णग्रहणम् । तवेहा, सेयम् । चकाराधिकारोऽनुक्तसमुच्चयार्थस्तेन क्वचित् पूर्वोऽपि लुप्यते । हलीषा, लाङ्गलीषा, मनस ईषा मनीषा ।।२५।

## [दु० टी०]

**अवर्णः ।** लोके गुणाक्षरजातिषु वर्णशब्दो दृश्यते । कथं पुनः समानेभ्यः श्रुतो वर्णशब्दः सवर्णग्राहक इति । सवर्णग्राहकश्चेदाचार्यव्यवहारादित्युक्तमेव । अर्थाश्रितं च यथासङ्ख्यं न भवति, सवर्णाभावे क्रमस्यानादरात् । अत एव व्यस्तमुदाहृतमिह दीर्घस्य ह्रस्वे ह्रस्वस्य दीर्घेऽपीति । मनस ईषा मनीषा इति सलोपोऽपि वक्तव्यः । अथाकारलोपे संयोगान्तलोप इति चेद् अतिपूर्वत्वादकारस्य कथं लोपः। तर्हि लोकोपचाराद् भविष्यति ।।२५।

## [वि० प०]

**अवर्णः ।** वर्णग्रहणे सवर्णग्रहणमिति । वर्णशब्दोऽयं स्वभावात् समानेभ्यः श्रुतो यस्य वर्णस्य येन वर्णेन सह सवर्णसंज्ञा तयोः समुदायमाह– एतेन यथासङ्ख्यमपि निरस्तं भवति । न ह्यवर्णादिशब्दो ह्रस्वदीर्घक्रमेण व्यवस्थितं वर्णमाह। किन्तर्हि सवर्णव्यवहारश्च व्यतिक्रमेणापि निश्चित इति कुतो यथासङ्ख्यम् । अत एव ह्रस्वस्य दीर्घस्य च दीर्घे ह्रस्वे च दर्शितमिति । **चकार** इत्यादि । मनस ईषा मनीषेति षष्ठी-समासो दर्शितः । एवं पूर्वयोरपि शब्दयोः प्रतिपत्तव्यम् । अथ मनसः सकारलोपः कथं स्यात् नकारस्याकारलोपे सति संयोगान्तलक्षण इति चेत्, न । सकारेण व्यवधानाद-कारस्यैव लोपः कथं स्यात् ? सत्यम् । अत एव चकारस्यानुक्तसमुच्चयार्थत्वात् लोकोप-चाराद् वा सकारस्यापि लोप इति ।।२५।

[क० च०]

**अवर्णः। वर्णशब्दोऽय**मित्यादि। एतदाचार्यपारम्पर्याल्लब्धम्। अतः समानत्वात् सवर्णः सजातौ इति सूत्रं न वाच्यम्। **समानेभ्य** इति। समानग्रहणमिह ह्रस्वमात्रपरम्, आवर्णादिव्यवहाराभावात्। यद्यपि वर्णशब्देनात्र समुदायस्योक्तत्वात् सवर्णविवोच्येत, तथापि (प्रयोगे) सवर्णावयवस्यैकस्यापि सवर्णव्यवहारः, कथमन्यथा **"अवर्ण इवर्णे ए"** (१।२।२) इत्यादिषु प्रवर्तते। चकाराधिकारादिति वृत्तिः। हल–लाङ्गलयोः समानोऽर्थः। ईषा लाङ्गलदण्ड। मूर्धन्योपधोऽयमिति **सुभूतिः।** एवं च मूर्धन्योपधत्वे नित्यमेव पूर्वलोपः, यदा तु **"प्रभुशङ्करयोरीशः स्त्रियां लाङ्गलदण्डके"** (उद्०, अ०-रामा० २।९।१४) इति तालव्योपधस्तदा अस्मिन् पक्षे विकल्पः प्रतिपत्तव्यः।

तथा च **श्रीपति**रप्याह– ईशेस्तु तालव्यान्तादप्रत्ययः, 'हलीशा, लाङ्गलीशा' एतौ विभाषयेति मतम्। **मनीषेति**। अत्र मूर्धन्यषकारः 'ईष गतौ' (१।४३३) इत्यस्माद् युविषये अप्रत्यय इष्यते। मनीषा वृत्तिरिति **प्रदीपपारायणा**भ्यामुक्तम्। **अथेत्यादि**। नहि सस्य विसर्गे सति **"अपरोलोप्योऽन्यस्वरे०"** (१।५।९) इति कृते पश्चादकारलोपः कार्यः। विसर्जनीयलोपे पुनः सन्धिनिषेधात् न चकाराधिकाराद् बाधकः कार्यः। चकाराधिकार इत्यस्य 'हलीषा' इत्यादावेव चरितार्थत्वादित्याह– **सकारलोपः कथम् इति।** ननु कथम् उक्तं संयोगान्तलोप इति, अनुषङ्गलोप एव प्राप्नोति ? सत्यम्। सकारेण व्यवधानाद् अकारस्यैव कथं लोपः ? कथमित्यनेनैव सर्वं निराकृतमिति। अथवा अकारलोपे सति **"असिद्धं बहिरङ्गमन्तरङ्गे"** (कात० परि० ३५) इति [1]न्यायादनुषङ्गलोपो न भवति, संयोगान्तलोपस्तु भवत्येव बहिरङ्गत्वात्।

यद् वा अक्रुञ्चेत् इति निषेधात्तज्जातीयनकारस्यैव लोपः। तज्जातीयत्वं तु उपदेशकाले एवानुषङ्गत्वमिति।

**वस्तुतस्तु** यद्यकारलोपः स्यात्तदा लुप्ताकारस्य स्थानिवद्भावादनुषङ्गसञ्ज्ञैव नोपपद्यत इति कुतोऽनुपपत्तिः। **सत्य**मित्यादि। ननु चकारेणाव्यवहितपूर्वस्य लोपस्यैव समुच्चीयमानत्वात् कथं स व्यवहितं समुच्चिनुयादित्याह– **लोकोपचाराद् वा** इति।

---

१. काशकृत्स्नप्रभृतिभिराचार्यैर्नकारस्य संज्ञेयमन्वाख्याता –"अनुनासिकोऽनुषङ्गः" (का० धा० व्या०, सू०७); "पूर्वाचार्यसंज्ञेयं नकारस्य" (म० भा० दी०, पृ० १३४); "नकारस्योपधाया अनुषङ्ग इति पूर्वाचार्यैः संज्ञा कृता" (न्या० १।१।४७)।

ननु किमर्थमवर्णग्रहणम्, पारिशेष्यादवर्ण एव कार्यी स्यादिति, अथ व्यञ्जनमपि कार्यि स्यादिति चेत्, न। समानानुवर्तनात् परत्वात् श्रुतत्वाच्च इवर्णे परे अवर्ण एकारो भवतीति प्रतिपद्यते, इवर्णादौ यत्वादिविधानस्य चरितार्थत्वादेव न भविष्यति ? सत्यम्, तदा सुखार्थम् ॥२५।

**[समीक्षा]**

पाणिनीय व्याकरण के अनुसार **"एकः पूर्वपरयोः"** (पा० ६।१।७५) के अधिकार में **"आद् गुणः"** (पा० ६।१।८७) से गुणादेश प्रवृत्त होता है। जिससे 'रमा + ईशः' या 'सुर + ईशः' इस स्थिति में पूर्ववर्ती अवर्ण तथा परवर्ती इवर्ण इन दोनों के ही स्थान में एक एकारादेश निष्पन्न होता है। शर्ववर्मा ने तो दीर्घविधि की तरह गुणविधि भी एक वर्ण के ही स्थान में निर्दिष्ट की है। तदनुसार 'तव + ईहा' तथा 'सा + इयम्' इस अवस्था में पूर्ववर्ती अवर्ण के ही स्थान में एकारादेश होने के अनन्तर परवर्ती इवर्ण का लोप हो जाता है और इस प्रकार 'तवेहा, सेयम्' शब्दरूप निष्पन्न होते हैं। यहाँ पर भी सूत्र २४ की समीक्षा की तरह यह कहा जा सकता है कि स्वरों के स्वतन्त्र होने के कारण एक ही स्वर का आदेश किया जाना समीचीन है, दो स्वरों के स्थान में एक स्वरादेश करने की अपेक्षा।

**[विशेष]**

सूत्रपठित 'वर्ण' शब्द का अर्थ सवर्ण लिया जाता है। इसके लिए परिभाषा-वचन भी है– **'वर्णग्रहणे सवर्णग्रहणम्'** (सं० बौ० वै०, पृ० २२५)। सूत्र-संख्या २४ में पठित चकार का अधिकार इस सूत्र में भी अनुवृत्त होने के कारण यहाँ अनुक्त का भी समुच्चय अभीष्ट है। इससे कहीं कहीं पर पूर्ववर्ती अवर्ण का भी लोप हो जाता है। जैसे– हल + ईषा = हलीषा, लाङ्गल + ईषा = लाङ्गलीषा, मनस् + ईषा = मनीषा। 'मनीषा' में सलोप भी करना पड़ता है।

**[रूपसिद्धि]**

**१. तवेहा।** 'तव + ईहा' इस अवस्था में वकारोत्तरवर्ती अकार से ईहाशब्दस्थ ईकार पर में उपस्थित है। अतः 'अ' के स्थान में इस सूत्र से 'ए' आदेश तथा परवर्ती 'ई' वर्ण का लोप होकर 'तवेहा' शब्दरूप निष्पन्न होता है।

**२. सेयम्।** 'सा+इयम्' इस दशा में सकारोत्तरवर्ती आ के स्थान में 'ए' आदेश तथा उत्तरवर्ती 'इ' का लोप करना पड़ता है। इस विधि के 'रमेशः, सुरेशः, महेशः' आदि भी उदाहरण प्रसिद्ध हैं ॥२५।

## २६. उवर्णे ओ (१।२।३)

**[सूत्रार्थ]**

उवर्ण के पर में होने पर पूर्ववर्ती अवर्ण के स्थान में 'ओ' आदेश होता है तथा परवर्ती उवर्ण का लोप ॥२६।

**[दु० वृ०]**

अवर्ण उवर्णे परे ओर्भवति परश्च लोपमापद्यते। तवोहनम्, गङ्गोदकम् ॥२६।

[अत्र व्याख्यान्तरं न प्राप्यते। कातन्त्ररूपमालायां 'गन्धोदकम्, मालोढा' इति उदाहरणद्वयं लभ्यते]।

**[समीक्षा]**

इस सूत्र पर दुर्गटीका, विवरणपञ्जिका तथा कलापचन्द्र नामक व्याख्याएँ नहीं हैं। पाणिनि ने 'ओ' रूप गुणविधि की व्यवस्था दो वर्णों के स्थान में की है, जबकि शर्ववर्मा ने केवल अवर्ण के स्थान में। इस विधि में परवर्ती उवर्ण का लोप हो जाता है। स्वरों के स्वतन्त्र होने के कारण दो स्वरों के स्थान में एक स्वरादेश की अपेक्षा एक ही स्वर के स्थान में ओ-आदेश अधिक समीचीन प्रतीत होता है।

**[रूपसिद्धि]**

**१. तवोहनम्।** तव+ऊहनम् (अ+ऊ)। वकारोत्तरवर्ती अ के स्थान में ओ तथा परवर्ती ऊ का लोप।

**२. गङ्गोदकम्।** गङ्गा+उदकम् = (आ+उ)। द्वितीय गकारोत्तरवर्ती आ के स्थान में ओ तथा परवर्ती उ का लोप। 'सहोदरः, मनोरथः' आदि उदाहरण भी द्रष्टव्य हैं ॥२६।

## २७. ऋवर्णे अर् (१।२।४)

### [सूत्रार्थ]

ऋवर्ण के पर में होने पर अवर्ण के स्थान में 'अर्' आदेश तथा परवर्ती ऋवर्ण का लोप होता है ॥२७।

### [दु० वृ०]

अवर्ण ऋवर्णे परे 'अर्' भवति, परश्च लोपमापद्यते । तवर्कारः, सकरिण । ऋण – प्र – वसन – वत्सतर – कम्बल - दशानामृणे क्वचिदरोऽपि दीर्घता । ऋणार्णम्, प्रार्णम् इत्यादयः । ऋते च तृतीयासमासे । शीतेन ऋतः शीतार्तः । ऋति धातोरुपसर्गस्य दीर्घः । प्रार्च्छति । नामधातोर्वा । प्रार्षभीयति । प्रर्षभीयति ॥२७।

### [दु० टी०]

**ऋवर्णे०।** ऋणे ऋणम् ऋणार्णम्, प्रार्णम् इत्यादयः इति । वसनार्णम्, वत्सतरार्णम् । वत्सरे वर्षे वा ऋणम् । वत्सरार्णम् इत्यन्ये । दशार्णम् । दशार्णो देशः, दशार्णा नदी । ऋणं जलदुर्गभूमिरिति । यथायोगं समासे क्वाचिद् बहुलं ह्रस्वस्य दीर्घतेति । **ऋते च तृतीयासमासे इति।** ऋत इति किम् ? दुःखेन ऋच्छको दुःखर्च्छकः । तृतीयासमास इति किम् ? परमर्तः, उत्तमर्तः । **ऋति धातोरुपसर्गस्येत्यादि।** धातोरिति किमर्थम् ? इह मा भूत् – प्रर्षभं वनम् । प्रगता ऋषभा यस्मादिति । प्रर्च्छको देशः । प्रगता ऋच्छका यस्मादिति ।

ननु यां क्रियां प्रति प्रादयो युक्तास्तां प्रत्युपसर्गा इति लोकोपचारादनुगतार्थः । इदं तर्हि प्रयोजनम् – ऋति समानस्य ह्रस्वः प्रकृतिभावश्चेष्यते । खट्वा + ऋष्यः खट्वर्ष्यः । नदी + ऋष्यः नदृष्यः । अस्मादुपसर्गस्यारेव यथा स्यात् । प्रकृतिर्मा भूदिति चेत्, न । एते हि सूत्रनिर्देशा ज्ञापयन्ति – विवक्षितश्च सन्धिर्भवति इति । तथा च वक्ष्यति – क्वचिद् ग्रहणस्येष्टविषयत्वाद् बहुलम्, तत्र ह्रस्वो व्याख्यातव्य एव । तथा समानस्य नामिनोऽसवर्णे स्वरे वा प्रकृतिः ह्रस्वश्चासमास इति न वक्तव्यमेव ।

दधि + अत्र । दध्यत्र । कुमारी + अत्र । कुमारि अत्र, कुमार्यत्र । समासे तु नित्यमेव दध्योदनम्, कुमार्याकारः । तथा अधीते, व्युदस्यतीति उपसर्गाणामपि नित्यम् एव ।

तथा चाह – **'पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोः'** (सं० बौ० वै०, पृ० २२४, २२८, २३२), तस्माद् धातोरिति सुखप्रतिपत्त्यर्थमेव वृत्तौ निगदितमिति ॥२७।

**[वि० प०]**

**ऋवर्णे०।** ऋणेत्यादि। एषाम् ऋणशब्दे परे योऽरादेशस्तस्य दीर्घो न वक्तव्यः, 'ह्रस्वस्य दीर्घता' इत्यनेनैव सिद्धत्वात्। तत्र हि क्वचिदधिकाराल्लक्ष्यानुरोधो दर्शित इति। एतदेव क्वचिद् इत्यनेन सूचितम्। **ऋणार्णम्, प्रार्णम् इत्यादय** इति। ऋणस्य ऋणम् ऋणार्णम्। प्रकृष्टं प्रगतं वा ऋणम् प्रार्णम्। एवं वसनस्य ऋणं वसनार्णम्, वत्सतरस्य ऋणं वत्सतरार्णम् इति भवति। कम्बलस्य ऋणं कम्बलार्णम्, दशानाम् ऋणं दशार्णम्। एवं दश ऋणानि यस्मिन् यस्यां वा दशार्णो देशः, दशार्णा नदी। अत्र ऋणशब्देन जलदुर्गभूमिरुच्यते। यथायोगं समासः सर्वत्र भवति।

**ऋते** चेति। शीतेन ऋतः शीतार्तः इति पूर्ववदिहापि दीर्घ इत्यर्थः। ऋत इति किम्? दुःखेन ऋच्छकः दुःखर्च्छकः। तृतीयासमास इति किम्? परमश्चासौ ऋतश्चेति परमर्तः। ऋति धातोरिति। धातोः ऋकारे उपसर्गस्य योऽरादेशस्तस्य तथैव दीर्घ इत्यर्थः। धातोरिति किम्? प्रगता ऋषभा यस्मात् तत् प्रर्षभं वनम्। ननु **"यत्क्रियायुक्ताः प्रादयस्तमेव शब्दं प्रति उपसर्गाः"** (उपसर्गाः क्रियायोगे-पा० १।४।५९) इति कथमत्र प्राप्तिः। प्रशब्दस्य गतिक्रियासम्बन्धस्यात्र उपसर्गत्वाभावादेव न भविष्यति किं धातुग्रहणेन? सत्यम्। धातोरिति वृत्तौ सुखार्थमेव दर्शितम्। **नामधातोर्वेति**। ऋषभमिच्छतीति **"नाम्न आत्मेच्छायां यिन्"** (३।२।५), "यिन्यवर्णस्य" (३।४।७८) इतीत्त्वम्, **"ते धातवः"** (३।२।१६) इति धातुत्वे पश्चादुपसर्गेण संयोगः ॥२७।

**[क० च०]**

**ऋवर्णे०।** प्रकृष्टं प्रगतं वेति **"गतिप्रादयः"** (पा० २।२।१८) इति समासेऽरादेशे कृतेऽसिद्धवद्भावान्न रेफस्य विसर्गः। अन्ये तु इति। चन्द्रगोमि-काशिका-जिनेन्द्रबुद्धिप्रभृतयः। इदं तु न युक्तम्, पतञ्जलिशाकटायनादिभिर्वत्सतरस्यै-वेष्टत्वात्। तथा च **श्रीपतिः** – तरप्रत्ययोऽत्र भाष्यादावुक्त इति भाष्यचान्द्रयोर्विरोधे उभय एव प्रमाणमिति युक्तमुत्पश्यामः। ननु नदीदेशयोर्ऋणस्याभावात् कथं दशार्णा नदीत्यादि इत्याह – ऋणशब्देन इत्यादि। अधमोत्तमयोरुत्तमर्णाविति **वररुचिः**।

तदप्रमाणम्, [1]तन्त्रान्तरेऽदृष्टत्वात्। ऋते चेति न वक्तव्यम्, आर्तशब्देनैव शीतार्तादयः सिद्धाः किमनेनेति नैवम्, ऋतेऽनिष्टप्रयोगापत्तेः। यत्र चायम् ऋति दीर्घस्तत्र च ऋकारे समानस्य प्रकृतिभावो विभाषयेति प्रकृतिर्नेष्यते इति **श्रीपतिः**।

ननु यदि यत्क्रियायुक्ताः प्रादयस्तमेव शब्दं प्रति उपसर्गा इत्युच्यते, तदा कथं प्रगतोऽध्वानं **प्राध्वो रथः, प्रत्यध्वं शकटमि**त्यादि **"उपसर्गादध्वन्"** (२।६।७३-३२) इत्यप्रत्ययः? नैवम्। अत एव वचनाद् अन्तर्भूतक्रियासम्बन्ध-स्यापि उपसर्गता इत्यदोषः। अन्यथा अप्रत्ययविधायकसूत्रमेव व्यर्थं स्यादिति संक्षेपः ॥२७।

**[समीक्षा]**

पाणिनि के अनुसार अवर्ण और ऋवर्ण दोनों के स्थान में 'अ' गुण होता है। **"उरण् रपरः"** (पा० १।१।२१) से रपर करने के बाद कृष्ण + ऋद्धिः = कृष्णर्द्धिः आदि शब्दरूप सिद्ध होते हैं। शर्ववर्मा के अनुसार पूर्ववर्ती अवर्ण के ही स्थान में 'अर्' आदेश तथा परवर्ती ऋवर्ण का लोप होकर 'तवर्कारः, सर्कारेण' आदि प्रयोग साधु माने जाते हैं। सूत्र-संख्या २५-२६ की ही तरह यहाँ भी दो स्वरों के स्थान में होने की अपेक्षा एक ही स्वर के स्थान में रेफसहित 'अर्' आदेश करना अधिक समीचीन प्रतीत होता है।

**[विशेष]**

१. वृत्तिकार दुर्गसिंह ने 'ऋणार्णम्, प्रार्णम्' आदि की सिद्धि के लिए एक वार्त्तिक पढ़ा है– **"ऋण-प्र-वसन-वत्सतर-कम्बल-दशानामृणे क्वचिदरोऽपि दीर्घता"**। इसके अनुसार पूर्ववर्ती अवर्ण के स्थान में 'आर्' आदेश होता है, जिससे उक्त शब्दरूप निष्पन्न होते हैं।

२. 'शीतार्तः' आदि की सिद्धि के लिए वार्त्तिक पढ़ा गया है– **"ऋते च तृतीयासमासे"**। कुछ व्याख्याकार 'शीतेन ऋतः' यह व्युत्पत्ति न मानकर 'शीतेन आर्तः' मानते हैं। इस प्रकार वार्त्तिक की कोई आवश्यकता नहीं रह जाती।

---

१. तन्त्रान्तर – शब्देन प्रायः पाणिनीयं व्याकरणं स्मर्यते।

३. 'प्राच्छंति' के लिए वार्त्तिक है– "**ऋति धातोरुपसर्गस्य दीर्घः**" तथा 'प्रार्षभीयति – प्रर्षभीयति' आदि की सिद्धि के लिए – "**नामधातोर्वा**" । इनके अनुसार 'अर्' आदेश-घटित 'अ' को दीर्घ होकर आर् रूप हो जाता है।

**[रूपसिद्धि]**

१. **तवर्कारः।** तव + ऋकारः (अ + ऋ) । वकारोत्तरवर्ती अ के स्थान में अर् आदेश तथा परवर्ती ऋ का लोप।

२. **सर्कारेण।** सा + ऋकारेण (आ + ऋ) । पूर्ववर्ती आ के स्थान में अर् आदेश एवं परवर्ती ऋ का लोप। इस विधि के 'कृष्णर्द्धिः' आदि उदाहरण भी द्रष्टव्य हैं ।।२७।

## २८. ऌवर्णे अल् (१।२।५)

**[सूत्रार्थ]**

ऌवर्ण के पर में रहने पर पूर्ववर्ती अवर्ण के स्थान में 'अल्' आदेश तथा परवर्ती ऌवर्ण का लोप होता है ।।२८।

**[दु० वृ०]**

अवर्णः ऌवर्णे परे अल् भवति परश्च लोपमापद्यते । तवल्कारः, सल्कारेण । उपसर्गस्य वा ऌति धातोरलो दीर्घः । उपाल्कारीयति, उपल्कारयति ।।२८।

**[वि० प०]**

**ऌवर्णे०। उपसर्गस्येत्यादि** । अत्रापि पूर्ववद् दीर्घादिकं वेदितव्यम् ।।२८।

**[क० च०]**

**ऌवर्णे०।** असंहिताकरणात् तव-सयोः ऌकारे परे अल् न सम्भवति । 'तवल्तकः, सल्तकः' इति **वररुचिः।** तन्त्रान्तरे[1] अदृष्टमिदमिति ।।२८।

**[समीक्षा]**

पाणिनि के अनुसार अवर्ण तथा ऌवर्ण दोनों के स्थान में 'अ' रूप एक गुण आदेश होता है और "उरण् रपरः" (पा० १।१।५१) में पठित रपर से लपर

---

१. तन्त्रान्तरशब्देन प्रायः पाणिनीयं व्याकरणं स्मर्यते ।

को भी स्वीकार कर 'तवल्कारः' आदि शब्दरूप निष्पन्न किए जाते हैं। आचार्य शर्ववर्मा तो पूर्ववर्ती अवर्ण के ही स्थान में अल् आदेश तथा परवर्ती ऌवर्ण का लोपविधान करते हैं। तदनुसार 'तवल्कारः, सल्कारेण' आदि प्रयोग सिद्ध होते हैं। यहाँ पर भी दो स्वरवर्णों के स्थान में एक स्वरादेश करने की अपेक्षा एक ही स्वर के स्थान में ल्-सहित अ-आदेश करना अधिक समीचीन प्रतीत होता है।

**[विशेष]**

उपसर्ग के बाद में यदि ऌकारादि धातु हो तो उपसर्गस्थ अवर्ण के स्थान में होने वाले 'अल्' आदेश घटित 'अ' को विकल्प से दीर्घ हो जाता है। जैसे– उपाल्कारीयति, उपल्कारीयति ! वार्त्तिकवचन इस प्रकार है– **"उपसर्गस्य वा ऌति धातोरलो दीर्घः"**।

**[रूपसिद्धि]**

१. **तवल्कारः।** तव+ऌकारः (अ+ऌ)। पूर्ववर्ती अवर्ण के स्थान में 'अल्' आदेश तथा परवर्ती ऌवर्ण का लोप।

२. **सल्कारेण।** सा+ऌकारेण (आ+ऌ)। पूर्ववर्ती (सकारोत्तरवर्ती) आकार के स्थान में अल् आदेश तथा परवर्ती ऌवर्ण का लोप ॥२८।

## २९. एकारे ऐ ऐकारे च (१।२।६) ।

**[सूत्रार्थ]**

एकार अथवा ऐकार के परवर्ती होने पर पूर्ववर्ती अवर्ण के स्थान में 'ए' आदेश तथा परवर्ती 'ए' या 'ऐ' का लोप होता है ॥२९।

**[दु० वृ०]**

अवर्णः एकारे ऐकारे च परे ऐर्भवति परश्च लोपमापद्यते। तवैषा, सैन्द्री। चकाराधिकारात् क्वचित् पूर्वोऽपि लुप्यते। एवे चानियोगे। अद्येव, इहेव। नियोगे तु अद्यैव गच्छ, इहैव तिष्ठ। स्वस्यादैत्वमीरेरिणोरपि वक्तव्यम्। स्वैरम्, स्वैरी ॥२९।

**[दु० टी०]**

**एकारे०।** इह भिन्नविभक्तिनिर्देशो यथासङ्ख्यनिवृत्त्यर्थ इति न वक्तव्यमेव, उक्तमत्र कारणमिति। किन्त्वेकारैकारयोर्ऌवर्णे इति षष्ठीं वा प्रतिपद्यते। ऐकारस्यै-

कारोऽप्यायादेशबाधक इति । **एवे चानियोग** इति । अद्येव, इहेवेति तद्व्याख्यानमेतद् नियोगव्यापारकरणं तद्विषये न चेद् एवशब्दवाच्यो नियमः प्रवर्तते इत्यर्थः । **स्वैरमिति** । ईरणम् ईरः इति भावे घञ् । स्व ईरोऽस्य **स्वैरं** कुलम् । क्रियाविशेषणं वा । स्वम् ईरितुं शीलमस्येति स्वैरी । स्त्री चेत् - **स्वैरिणी** । ईरिन्ग्रहणं शक्यमकर्तुं स्वैरोऽस्यास्तीति **स्वैरीति** । न च ताच्छील्यार्थ उपपद्यते, तदेतन्न वक्तव्यम्, लोकोपचारात् सिद्धम् ॥२९।

## [वि० प०]

**एकारे० । एवे चानियोग** इति । नियोजनं नियोगो व्यापारस्तस्मादन्योऽनियोगस्तस्मिन्निति । अद्येव, इहेवेति स्वरूपकथनं न तु नियोगः । **स्वस्यादित्यादि ।** एत्वे प्राप्ते स्वशब्दस्यात ऐत्वमुच्यते । यदा तु स्वस्यादैत्वमिति पुस्तकान्तरे पाठस्तदाप्यत ऐत्वमदैत्वमिति षष्ठीसमासः स्वस्येत्यपेक्षायामपि यथा देवदत्तस्य गुरुकुलम् इति ।

**स्वैरम्, स्वैरीति ।** ईर गतौ, ईरणम् ईरः, भावे घञ्, स्व ईरो यस्येति स्वैरं कुलम्, क्रियाविशेषणं वा । स्वमीरितुं शीलमस्येति **"नाम्न्यजातौ णिनिस्ताच्छील्ये"** (४।३।७६) णिनिः । ननु किमर्थमीरिन्-ग्रहणम्, अत्रापि ईरशब्दस्य विद्यमानत्वाद् ईरग्रहणेनैवास्मिन्नपि भविष्यति । नैवम्, अर्थवद्ग्रहणे नानर्थकस्य (कात० परि० वृ० ४) इति एकदेशस्य निरर्थकत्वान्न प्राप्नोति । तर्हि स्वैरोऽस्यास्तीति पश्चादिन् भविष्यति । न चेह ताच्छील्यार्थः सङ्गच्छते लोके स्वातन्त्र्येण प्रसिद्धत्वात् ? सत्यम्, ईरिन्ग्रहणं सुखार्थम् । तदेतन्न वक्तव्यम्, लोकोपचारादेव सिद्धम् ॥२९।

## [क० च०]

एकारे० । एवे चानियोग इति । ननु यदि नियोगः क्रिया, सा च नैव शब्दवाच्या । एवशब्दार्थो हि सादृश्यम्, नियमोऽसम्भावना, तत्कथमेवशब्दो नियोगे वर्तते, नैवम् । अभिप्रायापरिज्ञानात् । तथाहि – एवशब्देनात्र इवशब्दार्थ उच्यते । ततश्च स यदि क्रियाविषयो न भवति तदा पूर्वलोप इत्यर्थः । यद्येवम् – मालेव तिष्ठ, बालेव गच्छ इति सादृश्ये, तदद्यैवाभूदित्यसम्भावनायां कथं लोपः । अत्र **केचित्** – अमीषां साधनमिवशब्देन प्रतिपादयन्तस्तादृशस्थल एव एवशब्दस्य प्रयोगं न मन्यन्ते । तन्न । स्वोदाहरणस्यापि इवशब्देन सिद्धे वचनस्य वैफल्यप्रसङ्गाद् वाङ्मात्रादेवशब्दस्य सङ्कोचकल्पनाया अशक्यत्वाच्च ।

**साम्प्रदायिकास्तु** क्रियाया अविवक्षायां पूर्वलोपं कृत्वा मालेवेति व्युत्पाद्य पश्चाद् गच्छेत्यादीनां सम्बन्ध इत्याहुः । तदप्यसङ्गतम् – अग्रतो गच्छेति सम्बन्धेऽनिष्ट-

रूपापत्तेः। अत्रोच्यते– नहि वयं क्रियाविषये एवशब्दार्थमात्रस्यैव वर्जनमङ्गीकुर्मः, किन्तु प्रसिद्धत्वादवधारणरूपार्थस्यैवेति। तथा च **टीकायाम्** नियोगो व्यापारस्तद्विषये एवशब्दवाच्यो नियमो न वर्तते तदा पूर्वलोपः। नहीदं **भगवतः पाणिनेः** सूत्रम्, किन्तर्हि वक्तव्यमेव। तच्च लक्षणमनुसरतीति भावः। तथा च **न्यासकारो**ऽप्याह – एवशब्दो नियमे वर्तते। यदा तमेव नियमं क्रियागतं न ब्रूते तदा पूर्वलोपः। यत्तु एवेऽनवधारणे इति **काश्मीरकाः** पठन्ति, तेषामपि मते व्यापारविषय एवावधारणं वर्जनीयमिति बोध्यम्। एवं च काश्मीरकवचनं यथाश्रुतमेव सङ्गच्छते। **श्रीपतेरेवे** इवार्थ इति वचनमुपेक्षणीयम्। अनियोगगतेऽनवधारणेऽपि **न्यासाद्य**भिमतस्य पूर्वलोपस्यासिद्धि-प्रसङ्गात्। किं च यथाद्योङ्कारमाह इत्यादौ अनुकरणेऽपि "ओमि च नित्यम्" (कात०, परि०, सं० १६) इत्यस्य विषयस्तथा काश्मीरकमतेऽपि 'अद्येव' इत्यादौ पूर्वलोपः प्रमाणमिति। **श्रीपति**मतेऽपि स्वरूपप्रतिपादकेऽनुकरणे इवार्थाभावात् कथं पूर्वलोप इत्येतत् सर्वं विरुद्धमिति।

'ममैव धनम्, सैव स्रक्, वपुरतनु तथैव संवर्मितम्, अपदोषतैव विगुणस्य गुणः, मिथ्यैव श्रीः श्रियम्मन्या' इत्यादिषु पूर्वलोपः स्यादिति **श्रीपतिना** यद् दूषणमुक्तम्, तत्र यदि क्रियापदं न श्रूयते तदैव इदं संगच्छते। अत्रावश्यमेव क्रियापदमध्याहार्यम्, नहि क्रियारहितं वाक्यमस्ति। ननु 'अद्येव, इहेव' इत्यत्रापि अध्याहार्यक्रियापदस्य सम्बन्धात् कथं पूर्वलोप इत्याह– **स्वरूपकथनमित्यभिप्रायः**।

यथा अयं दण्डो हरानेन इत्यत्र क्रियापदमन्तरेणापि तदन्वयः, तद्वदत्रापीति भावः। यद् वा 'कदा गन्तव्यम्, कुत्र स्थातव्यम्' इत्यादिप्रश्ने 'अद्येव, इहेव' इत्यादि-प्रयोगो बोध्यः। एतत्तु नातिपेशलम्। यतः क्रियामन्तरेणाद्येहेति अधिकरणं न घटत इति। अत्र ये सुधियस्ते सिद्धान्तयन्तु स्वस्येत्यादि। ननु कथमेतद् दृष्टान्तयोस्तुल्यत्वम्। नहि गुरुशब्दवद् अकारशब्दो नित्यसापेक्षः? सत्यम्। यथा तत्र सापेक्षेऽपि समासस्तद्वदत्रापि सापेक्षत्वमाश्रित्य दृष्टान्तितम्।

**स्वैरं कुलमि**त्यादि। ननु बहुव्रीहेरभिधेयलिङ्गत्वात् 'स्वैरः पुमान्' इत्येव स्यादित्याह – **क्रियाविशेषणमिति कुलचन्द्रः।** तन्न। अभिप्रायापरिज्ञानादभिधेयलिङ्ग-स्याप्यनिवार्यत्वात्। तथा च **श्रीपतिनापि** स्वैरः, स्वैरीत्युदाहृतम्। तस्मात् क्रियाविशेषणं वेति **हेमकरः**। ननु **केचित्तु** स्वैरं देवदत्तो गच्छतीति कथं नपुंसकलिङ्गं बहुव्रीहेरभिधेय-लिङ्गतया दृष्टत्वादित्याह– **क्रियाविशेषणं** वेत्याहुः। ननु ईरणम् ईरः सोऽस्यास्तीति

इनि कृते अत्रापीरशब्दस्य विद्यमानत्वादीरग्रहणेनास्मिन्नपि भविष्यति किमीरिन्-ग्रहणेन, एतदेवाह – **नन्विति।**

ननु ईरग्रहणेन ईरिणो ग्रहणमिति किमुक्तम् ईरिणि ईरशब्दस्याकारान्तत्वाभावात्। अत्र **हेमकरः** – 'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवद्' (काला० परि० १५) इति न्यायाद् लुप्तस्याकारस्य स्थानिवद्भावादकारान्त ईरशब्दो विद्यते एवेति। नच 'योऽनादिष्टात् स्वरात् पूर्वस्तं प्रति स्थानिवद्' (कात० परि० वृ० ५) इति न्यायात्। अत्रोच्यते – एकदेशविकृतस्यानन्यवद्भावान्नोक्तदोषप्रसङ्गः, एकदेशस्य निरर्थकत्वादिति।

ननु कथं निरर्थकस्य ईरशब्दस्य क्रियावाचकत्वम् ? सत्यम्, जहत्स्वार्थवादिनो मतमवलम्ब्योक्तम्। अथ मत्वर्थीये ताच्छील्यं नास्तीति, अतस्ताच्छील्येऽपि स्वैरीति-पदसिद्ध्यर्थमेतदपि वक्तव्यम् इत्याह – **न च** इति। लोके स्वातन्त्र्ये रूढित्वादिति भावः। ननु यदि ईरिन्ग्रहणं स्वैरिणमिति णिन्यन्ते स्वैरीति पदनिषेधार्थमभवत्, कथं सुखार्थमिति परिशिष्ट-कुलचन्द्रयोः पञ्जीं प्रत्याक्षेपः। तन्न। आपूर्वादीर गतौ (५।२६२) इत्यस्माद् धातोर्णिनि कृते "अवर्ण इवर्णे ए" (१।३।२) इत्याकारस्यैकारे स्व+एरीति स्थिते आङ्यादिष्ट इत्यकारलोपे यदि स्वैरीति पदं भविष्यति, तदा केवलणिन्यन्तेऽपि स्यादेव विशेषाभावात्। न च वक्तव्यमाङोऽर्थभेद इति परिशिष्टकारेण प्रौढो भारः, प्रौढो रथानामित्यत्राङोऽर्थस्यातिरिक्तत्वेनानङ्गीकरणात्।

**वस्तुतस्तु** स्वैरीति पदं संज्ञायामेव, असंज्ञायां पुनः स्वैरीति पदं केन निवार्यताम्। यथा असंज्ञायां गोऽक्षीति। ननु एकारैकारयोरेकविभक्तिनिर्देशे सिद्ध्यति, किं भिन्नविभक्तिनिर्देशेन ? न च वक्तव्यम् – यथासङ्ख्यनिवृत्त्यर्थमिति अवर्णव्यवहारस्य व्यतिक्रमसिद्धत्वेन तन्निराससिद्धत्वात् ? सत्यम्। एतादृशे सूत्रे कृते षष्ठीमपि प्रतिपद्यते। अत एकारैकारयोः स्थाने ऐर्भवति ऌवर्णे परे इत्यर्थोऽपि सम्भाव्येत। नच वक्तव्यम् ऐकारस्य ऐकारकरणं व्यर्थमिति आयादेशबाधनेन चरितार्थत्वं स्यादिति (चेत्, न। लोपप्रवर्तनात् ऌकारलोपे आयादेशप्राप्तिरेव नास्ति कथं तस्य बाधक ऐकारो भविष्यति ? सत्यम्। एकारैकारयोः कार्यित्वात् समाससम्बन्धस्य प्रवृत्तिः। एतच्च विप्रतिषेधमात्रं न तु स्वरूपदूषणम्)। एवम् "ओकारे औ औकारे च" (१।२।७) इत्यत्रापि व्याख्येयमिति ॥२९।

[समीक्षा]

पाणिनि के अनुसार 'ऐ' रूप वृद्ध्यादेश अवर्ण तथा ए या ऐ इन दो वर्णों के स्थान में विहित है। जिससे 'महैश्वर्यम्, खट्वैतिकायनः' आदि शब्द साधु होते हैं। कलाप के अनुसार एकार अथवा ऐकार के परवर्ती रहने पर पूर्ववर्ती अवर्ण के स्थान में 'ऐ' आदेश तथा परवर्ती ए-ऐ का लोप हो जाता है। उक्त की तरह यहाँ भी कलाप की प्रक्रिया में समीचीनता कही जा सकती है, क्योंकि यहाँ एक ही स्वर के स्थान में एक स्वरादेश विहित है।

[विशेष]

१. चकाराधिकार के बल से कहीं पर पूर्ववर्ती अवर्ण का ही लोप हो जाता है। जैसे अद्येव, इहेव।

२. 'स्व' शब्द के बाद 'ईर – ईरिन्' शब्दों के रहने पर स्व-घटक वकारोत्तरवर्ती 'अ' के भी स्थान में ऐ आदेश अभीष्ट है – "स्वस्यादैत्वमीरेरिणोरपि वक्तव्यम्"। जैसे – स्वैरम्, स्वैरिणी।

३. व्याख्याकारों द्वारा भगवद्-विशेषणविशिष्ट पाणिनि, चान्द्र-काश्मीरक-श्रीपति - जयादित्य - न्यासकार आदि आचार्यों का उल्लेख द्रष्टव्य है।

[रूपसिद्धि]

१. **तवैषा।** तव + एषा (अ + ए)। वकारोत्तरवर्ती अ के स्थान में ऐ आदेश तथा परवर्ती ए का लोप होता है।

२. **सैन्द्री।** सा + ऐन्द्री (आ + ऐ)। 'ऐ' के पर में रहने पर पूर्ववर्ती आ के स्थान में 'ऐ' आदेश एवं परवर्ती ऐ का लोप ॥२९॥

## ३०. ओकारे औ औकारे च (१।२।७)

[सूत्रार्थ]

ओकार या औकार के पर में रहने पर पूर्ववर्ती अवर्ण के स्थान में 'औ' आदेश तथा परवर्ती ओ-औ का लोप होता है ॥३०॥

[दु० वृ०]

अवर्ण ओकारे औकारे च परे और्भवति परश्च लोपमापद्यते। तवौदनम्, सौपगवी। चकाराधिकारादुपसर्गावर्णलोपो धातोरेदोतोः। प्रेलयति, परोखति।

**इणेधत्योर्न।** उपैति, उपैधते। **नामधातोर्वा।** उपेकीयति, उपैकीयति। प्रोषधीयति, प्रौषधीयति। **ओष्ठोत्वोः समासे वा।** बिम्बोष्ठः, बिम्बौष्ठः। स्थूलोतुः, स्थूलौतुः। समास इति किम्? हे छात्रौष्ठं पश्य, अद्यौतुं पश्य। **ओमि च नित्यम्।** अद्योम्, सोम् इत्यवोचत्। **अक्षस्यौत्वमूहिन्याम्।** अक्षौहिणी सेना। **प्रस्योढोढ्योश्च।** प्रौढः, प्रौढिः। एषैष्ययोरैत्वं लोपस्यापवादः। प्रैषः, प्रैष्यः। ईषेस्तु प्रेषः, प्रेष्यः॥३०।

## [दु० टी०]

**ओकारे०। उपसर्गावर्णलोपो धातोरेदोतोरिति।** यद्यपि धातोः प्रागुपसर्गेण सह सम्बन्धः पश्चात् साधनेनेति। तथापि धातोः प्रधानत्वात् तत्कार्यं बलीय इति गुणे कृते ऐत्वादिकं स्यादिति पूर्वलोपो विधीयते। उभयपदाश्रितोऽपि वार्णो विधिरन्तरङ्ग इति अस्मादेव ज्ञापकाद् बाध्यते इति **अन्ये।** ओष्ठश्च ओतुश्च ओष्ठौतुः, पूर्वनिपातोऽत्र विवक्षया। स्त्रियां तु बडवोष्ठी, बडवौष्ठी। **ओमि च नित्यमिति।** अद्योम्, सोम्। एवं रथोङ्कार इति। ऊहनमूहः सोऽस्या अस्तीति **ऊहिनी,** अक्षाणामूहिनी, अक्षान् ऊहितुं शीलमस्या इति वा **अक्षौहिणी** सेना। समासान्तसमीपयोर्वा णत्वम्। प्रस्योढोढ्योश्चेति ऊहेऽप्यौत्वमित्यन्ये। न वक्तव्यम्, इह लोकोपचारादेव सिद्धिरिति॥३०।

## [वि० प०]

**ओकारे०। प्रेलयतीति।** प्रपूर्वाद् इल प्रेरणे चौरादिकत्वात् स्वार्थे इन्, **"नामिनश्चोपधायाः"** (३।५।२) इत्यनेन गुणः। **परोखतीति।** उख णखेत्यादिदण्डको[1]धातुः। **"अनि च विकरणे"** (३।५।३) इति गुणे कृते ऐत्वम् औत्वं च प्राप्तम्। अतः पूर्वलोपो विधीयते। ननु धातोः प्रागुपसर्गेण सम्बन्धः पश्चात् साधनेनेति गुणात् प्रागुपसर्गावर्णस्यैव एत्वे ओत्वे च कृते प्रेलयति, परोखतीति सिद्धं भवति, किं पूर्वलोपेन? सत्यम्, तथापि क्रियाभावो धातुः। क्रिया च साधनायत्ता, साधनं च प्रत्ययवाच्यम्। अतः प्रत्ययकार्यमेव गुणः पूर्वं स्यात्। किं च पूर्वं धातुः साधनेन सम्बध्यते इति पश्चादुपसर्गेणेत्यस्मिन् दर्शने चोद्यमेव नास्तीति कर्तव्यः पूर्वलोपः। **नामधातोर्वेति।** इहापि पूर्ववद् यिन्नादिकं कार्यम्। अथात्र पूर्वलोपे कृते **"वर्गप्रथमा०"** (१।४।१) इत्यादिना स्वरे तृतीयः कथं न स्यादिति न देश्यम्, **'असिद्धं बहिरङ्गम् अन्तरङ्गे'**

---

१. उख णख वख रख लख लखि इखि ईखि वल्ग रगि लगि अगि वगि मगि ष्वगि इगि रिगि लिगि गत्यर्थाः (कात० धा० पा० १।३८)।

(काला० परि० ४२) इति न्यायात्। हे छात्र! इति **"आमन्त्रणे च"** (२।४।१८) इति सेर्विहितस्य ह्रस्वनदीत्यादिना लोपः। अद्यशब्दाद् **"अव्ययाच्च"** (२।४।४) इति सेर्लोपः। 'अद्योम्, सोम्' इत्योम्शब्दस्याव्ययत्वादसमासे दर्शितम्। **अक्षस्येत्यादि।** ऊहनमूहः, भावे घञ्, सोऽस्या अस्तीति ऊहिनी, अक्षाणामूहिनी **अक्षौहिणी** सेना। अत्रापिशब्दबलात् पूर्वपदस्थेभ्यः संज्ञायां णत्वम्।

**प्रस्येत्यादि।** ऊहेऽप्यौत्वमित्येके-प्रौहः। एषैष्ययोरैत्वमिति उपसर्गावर्णलोपो धातोरेदोतोरित्यनेनावर्णलोपः प्राप्तस्तस्यापवाद इत्यर्थः। **ईषेस्त्वित्यादि।** ईष गतौ[1] इत्यस्य पुनर्धातोर्गुरूपधत्वाद् घञि घ्यणि च गुणाभावे **"अवर्ण इवर्णे ए"** (१।२।२) इत्यर्थः। तेन एषैष्ययोरैत्वं विभाषयेति न वक्तव्यम्, प्रकृत्यन्तरविवक्षया सिद्धत्वादिति भावः॥३०।

**[क० च०]**

ओकारे०। नन्वित्यादि। तथा चाह –

**पूर्वं निपातोपपदोपसर्गैः सम्बन्धमासादयतीह धातुः।**
**पश्चात्तु कर्त्रादिभिरेष कारकैर्वदन्ति केचित्त्वपरे विपश्चितः॥**

अयं चार्थो न्यायसिद्धः। तथाहि उपसर्गस्य धात्वर्थद्योतकत्वादादौ धात्वर्थेन सह उपसर्गस्य संबन्धः, तच्छरीरनिविष्टत्वात्। धातूपसर्गयोस्तदा कः सम्बन्धः, प्रत्ययस्य तु प्रकृत्यर्थान्वितस्वार्थबोकत्वात् प्रकृत्यर्थनिश्चये सति पश्चादर्थेन प्रत्ययार्थसम्बन्ध इति।

अतः प्रत्ययार्थसम्बन्धादुपसर्गसम्बन्धोऽन्तरङ्ग इत्यवश्यमेवाङ्गीकर्तव्यम्। कथमन्यथा खट्वा अधिशय्यते इत्यादावुपसर्गसम्बन्धः पश्चादकर्मकात् शीङ्धातोः कर्मणि प्रत्ययः। अस्य कर्मण उक्तार्थता अत्रादावकर्मकाच्छीङ्धातोः भावे प्रत्यये पश्चादुपसर्गसम्बन्धे सकर्मकत्वस्य सम्भवात्। किं निविशत इत्यात्मनेपदोत्पत्त्यर्थं पूर्वं धातुरुपसर्गेण सम्बध्यते किं पूर्वलोपेनेति। किंशब्दादत्रेत्यध्याहार्यम्, अन्यथा कथं प्रेजते, प्रोर्णतीत्यत्र पूर्वलोप इति। **सत्यमित्यादि।** यद्यपि आदावुपसर्गेण धातोः सम्बन्धो युक्तस्तथापि साध्यसाधनरूपायाः क्रियायाः साधनसम्बन्ध एव प्रथमतो गृह्यत इति

---

१. ईष गतिहिंसादानेषु (कात० धा० पा० १।४३३)।

सिद्धस्यैव विशेषणाकाङ्क्षा भवति । नहि स्वयमसिद्धं कथं परान् साधयति परस्य विशेष्यो भवति ।

यद्येवं धातोः प्रागुपसर्गेण सम्बन्ध इत्यस्य क्व विषय इत्याह – किं च इति। तथापि **प्रकृतेः पूर्वं पूर्वं स्याद् अन्तरङ्गम्** (काला० परि० सू० ९८) इति न्यायाद् भविष्यति । एवं व्याख्यायते – यदि प्राग् धातोरुपसर्गेण सम्बन्धस्तदा "**इणेधत्योर्न**" (कात० परि०, सं० १३) इत्यत्र इण्ग्रहणमनर्थकं स्याद् आदाविण्धातोरुपसर्गेण सम्बन्धे एकारे परे उपसर्गावर्ण एव नास्ति, कथं तल्लोपप्रतिषेधोऽर्थवानिति । अस्मादेतद् वक्तव्यं ज्ञापयति – सन्नपि प्राग् धातूपसर्गयोः सम्बन्धस्तथापि प्रत्ययकार्यात् प्राक् सन्धिर्नास्तीति । एतदेव मनसि कृत्वाह – **तथापी**त्यादि । अस्मिन् पक्षे किञ्चेति पक्षान्तरम् इति । अस्मिन् दर्शने इत्येतदेवाह –

**धातुः सम्बन्धमायाति पूर्वं कर्त्रादिकारकैः ।**

**उपसर्गादिभिः पश्चादिति कैश्चिन्निगद्यते ॥**

इत्यस्मिन् पक्षे इत्यर्थः । नन्वस्मिन् पक्षे कथं "**नेर्विशः**" (३।२।४२-१) इत्यात्मनेपदोत्पत्तिः कथं चाधिशय्यत इत्यत्र कर्मण उक्तार्थता ? सत्यम् , **व्याकरणस्य सर्वपारिषदत्वात्** कुत्रचित् कश्चिदेव पक्ष आद्रियते इति न दोषः । एतेनाधिशय्यते, नेर्विश् इत्यादयोऽपि सिद्धाः । ननु 'उपेकीयति' इत्यत्र तृतीयप्राप्तौ 'असिद्धं बहिरङ्गमन्तरङ्गे' (कात० परि० सू० ३५) इति न्यायेन कथं सिद्धान्तितम्, "**न पदान्त०**" (कात० परि० सू० ११) इत्यादिना स्थानिवद्भावनिषेधादसिद्धवद्भावस्याविषयत्वात् । अन्यथा स्थानिवद्भावनिषेध एव व्यर्थः स्यात् ? सत्यम् । "**न पदान्त०**" (कात० परि० सू० ११) इत्यत्र **नञा निर्दिष्टस्यानित्यत्वात्** (काला० परि० पा० ६७) पदान्तकार्येऽपि क्वचित् स्थानिवद्भावावकाश इति ।

यद्येवम् असिद्धवद्भावादिति वक्तुं युज्यते ? सत्यम्, अस्मिन् वक्तव्ये इदमप्युक्तं निर्विशेषत्वात् । **ओष्ठौत्वोरि**त्यादि वृत्तिः । ननु द्वन्द्वे सति असखिरग्निरित्यनेन ओतुशब्दस्य पूर्वनिपातो भवितुम् अर्हतीति ? सत्यम् । "**हः कालब्रीह्योः**" (४।२।६४) इति ज्ञापकादनित्यमिति सूचितम् । ओम्शब्दस्याव्ययत्वाद् असमासे दर्शितमिति । ननु कथमिदमुच्यते, नहि अव्ययेन सह समासो नास्तीति । यदि च नास्ति तत् कथम् 'परमोम्, उत्तमोम्' इति ? सत्यम् ।

इत्थं योजनीया **पञ्जिका**। ननु अवोचद् इति क्रियापदं तस्याः कर्मपदम् ओमिति, ततो द्वितीया प्राप्नोतीत्याशङ्क्याह – **ओम्शब्दस्याव्ययत्वाद्** इति। समासे परमोम् इत्यादिकं ज्ञातव्यम्। असमासे वृत्तौ दर्शितमिति विशेष इति। ननु एतदपि कथम् **"ओष्ठौत्वोः समासे वा"** (कात० परि० सं० २०) इत्यतः समासाधिकारो वर्तते। नैवम्, **"नामधातोर्वा"** (कात० परि०, सं० ६) इत्यतो वाऽनुवर्तते। यत् पुनरिह वाग्रहणं तत्तु **"ओमि च नित्यम्"** (कात० परि० सं० १६) इत्यत्र समासाधिकारनिवृत्त्यर्थमिति **केचित्**। तन्न। ग्रन्थार्थस्यास्वरसादिति इतिशब्देनैवोक्तार्थत्वाद् द्वितीयाप्रसङ्गाभावाच्च। तस्मान्निपाताव्ययोत्तरपदेन सह समासो नास्तीत्ययमेव ग्रन्थार्थः। परमोम् इत्यादिकं तु अनिष्टमेव। ततश्च **"ओष्ठोत्वोः समासे वा"** इत्यत्र भूयो वाग्रहणाद् विकल्पनिवृत्तिः सिद्धैव, नित्यग्रहणं तु सुखार्थमेव। **'अक्षौहिणी'** इत्यत्र **टीकाकृता** समासान्तसमीपयोर्वेति णत्वमुक्तम्, तत् कथं संगच्छते।

समासान्तस्योदाहरणं देयम्। यथा 'माषवापिनौ, माषवापिणौ' इति। समाससमीपस्य यथा 'माषवापिण्यः, माषवापिन्यः' इति। अत्र स्त्रीप्रत्ययस्य समासान्तत्वादुपदर्शितवाक्ये नास्य सूत्रस्य विषयः। तस्मात् पूर्वपदस्थेभ्यः संज्ञायामिति **त्रिलोचनेन** यदुक्तम्, तदयुक्तमेव ? सत्यम्। एतत्तु णिनिप्रत्यये बोध्यम्। तथाहि – अक्षमूहितुं शीलमस्येति **'गतिकारकोपपदानां कृद्भिः समासवचनं स्याद्युत्पत्तेः प्राक्'** (व्या० परि० वृ० १३८) इति न्यायात् स्त्रीप्रत्ययात् प्राक्समासे सति नकारस्य समासान्तत्वादस्य सूत्रस्य विषयः।

ऊहनम् ऊहः, सोऽस्यास्तीति वाक्ये तु **"पूर्वपदस्थेभ्यः संज्ञायाम्"** (कात० परि०, ण० २) इत्यनेन णत्वमध्याहर्तव्यमिति **हेमकरा**शयः। **वस्तुतस्तु** सामान्यत्वादक्षशब्दस्य नपुंसकेन ऊहिशब्देन समासे सति पश्चात् स्त्रीत्वविवक्षा कृता। तथा च सति समासान्तनकार इति कथं नात्रास्य विषयः। अत एव सोऽस्यास्तीति वाक्ये **टीकाकृता**ऽस्येति सामान्यनिर्देशो दर्शित इति।

यत्तु **टीकायाम्** अक्षाणामूहिनीत्युक्तं तच्च न समासवाक्यम्, किन्तु तात्पर्यार्थविवरणं तादृशविवक्षायां समासान्तसमीपयोर्वेति णत्वमविरुद्धम् एव। अत एव समासान्तसमीपयोर्वेत्यस्य विषयः। वस्त्रक्रीतीति क्रीतात् करणादेरिति ईत्वं नास्तीति, नपुंसकेन समस्य पश्चात् स्त्रीत्वविवक्षा इति मतं नदादिसूत्रे **टीकाकृदेव** वक्ष्यति। पक्षे णकारस्यापि स्थितिरिति **कुलचन्द्रः**।

न चात्रापि संज्ञात्वाण्णत्वम् इति वाच्यम्, विकल्पपरत्वादक्षस्यौत्वमिति संज्ञायामेवेष्यते । नहि पाणिनेरिदं सूत्रम्, किन्तर्हि वक्तव्यमिति, तेन यत्र पदान्तरस्य सन्निधानाद् रूढ्यर्थस्यान्वययोग्यता, तत्र नायं विधिः, यथा **अक्षौहिणी।** अतः सेनासामान्यविषयकं **श्रीपति**सूत्रं दुष्टमिति बोध्यम् । तथा च **भाष्यकृता** – [1]'अक्षौहिणी सेनासमूहस्य संज्ञा, अतः संज्ञैवात्र प्रमाणमिति प्रत्याख्यातमिदम्' इति ॥३०।

**[समीक्षा]**

शर्ववर्मा के निर्देशानुसार 'तवौदनम्, सौपगवी' आदि पयोगों की सिद्धि के लिए पूर्ववर्ती अवर्ण के स्थान में 'औ' आदेश तथा परवर्ती ओ– औ का लोप हो जाता है । पाणिनि ऐसे स्थलों में अवर्ण तथा ओ या औ दोनों के ही स्थान में औकार रूप वृद्ध्यादेश करते हैं । पूर्वोक्त सूत्रों की तरह यहाँ भी दो स्वरों के स्थान में एक स्वरादेश करने की अपेक्षा एक ही स्वर के स्थान में स्वरादेश करना अधिक युक्तियुक्त प्रतीत होता है ।

**[विशेष]**

'परोखति, बिम्बोष्ठः, अद्योम्, सोम्, प्रोषधीयति' आदि शब्दों की सिद्धि के लिए वृत्तिकार ने अनेक वार्त्तिकवचन दिए हैं । जिनसे कहीं अवर्ण का लोप हो जाने के कारण औकारादेश नहीं हो पाता, तो 'अक्षौहिणी' में 'ओ-औ' के परवर्ती न रहने पर भी 'अ' के स्थान में औ आदेश हो जाता है ।

व्याख्याकारों ने अनेक वार्त्तिकवचन दिए हैं – 'इणेधत्योर्न, नामधातोर्वा, ओष्ठोत्वोः समासे वा' इत्यादि ।

**[रूपसिद्धि]**

१. **तवौदनम् ।** तव + ओदनम् (अ + ओ) । वकारोत्तरवर्ती 'अ' के स्थान में औ आदेश तथा परवर्ती ओ का लोप ।

२. **सौपगवी ।** सा + औपगवी (आ + औ) । सकारोत्तरवर्ती आ के स्थान में औ आदेश तथा परवर्ती औ का लोप ।

इसके 'गङ्गौघः, सौत्कण्ठ्यम्' आदि भी उदाहरण प्रसिद्ध हैं ॥३०।

---

१. पतञ्जलिप्रणीते महाभाष्ये वचनमिदं नोपलभ्यते ।

## ३१. इवर्णो यमसवर्णे न च परो लोप्यः (१।२।८)

**[सूत्रार्थ]**

इवर्ण के स्थान में यकारादेश होता है, यदि इवर्ण से परवर्ती स्वर सवर्णसंज्ञक न हो। परन्तु यहाँ परवर्ती वर्ण का लोप नहीं होता है ॥३१।

**[दु० वृ०]**

इवर्णो यमापद्यते असवर्णे, न च परो लोप्यः। दध्यत्र। नद्येषा। इवर्ण इति किम् ? पचति। असवर्ण इति किम् ? दधि ॥३१।

**[दु० टी०]**

**इवर्णो०**। अथ इवर्णग्रहणं किमर्थम् ? अधिकृत इवर्णो यत्वमापद्यते इति चेत्, तन्न। **"अवर्ण इवर्णे ए"** (१।२।२) प्रभृतिभिराघ्रातत्वाद् उवर्णादिश्च स्थानिनो वत्वादिभिरिति। समिदत्रेति परत्वात् तृतीयोऽस्ति बाधक इति। यत्रापदान्तस्तर्हि तत्र दोषः। **पचतीति**। सवर्णे दीर्घ इत्यसवर्णे यत्वादिविधिरवगम्यते। असवर्णग्रहणं **"न च परो लोप्यः"** (१।२।८) इत्यन्वाचयशिष्टाशङ्कानिरासार्थम्। अन्यथा निर्निमित्तमपि यत्वं स्यात्। च्विप्रत्ययपक्षेऽपि परत्वात् स्वभावदीर्घस्य यत्वं स्यादिति न परिहारः। यतः समानग्रहणसामर्थ्यादेव परलोप इति परग्रहणमिवर्णस्यावर्णे लोपार्थम्। मृग्या इदं मांसं **मार्गम्**। तत्रेवर्णग्रहणं सवर्णार्थं यकारार्थं च। खरनर्दिनोऽपत्यमिति बाह्वादित्वाद् इण्, **"नस्तु क्वचित्"** (२।६।४५) इति नलोपः **खारनर्दिः**। कपौ साधु कप्यमिति इकारलोपः। लोप्यग्रहणं च सुखार्थमेव ॥३१।

**[वि० प०]**

**इवर्ण०**। अथ किमर्थमिवर्णग्रहणम् ? प्रस्तुतत्वादिवर्णो यमापद्यते इति चेत्, नैवम्। असवर्णे परे **"अवर्ण इवर्णे ए"** (१।२।२) इत्यादिभिराघ्रातत्वात्। अथोवर्णादेः प्रसङ्गः इति चेत्, तदयुक्तम्। **"वमुवर्णः"** (१।२।९) इत्यादीनां विषयत्वात्। 'समिदत्र' इत्यादावपि तकारादेर्व्यञ्जनस्यासवर्णे परे कुतो यत्वप्रसङ्गः। यस्माद् **"वर्गप्रथमा०"** (१।४।१) इत्यादिना परत्वात् तृतीयोऽस्ति बाधक इति। किञ्च **'स्थानेऽन्तरतमः'** (काला० परि० २४) इति न्यायात् तालव्योऽयं यकार इवर्णस्यैव तालव्यस्य भविष्यति, तर्हि चकारस्यापि स्यादित्याह – **इवर्ण** इत्यादि।

अथ सवर्णे दीर्घस्य विहितत्वादसवर्ण एव यत्वमवगम्यते, किमसवर्णग्रहणेन ? न च निर्निमित्तस्य यत्वं स्यादिति वक्तव्यम्, 'न च परो लोप्यः' इति प्रतिषेधात्। नहि निर्निमित्तस्य यत्वे **"न च परो लोप्यः"** (१।२।८) इति प्रतिषेध उपपद्यते, परस्यैव निमित्तस्याभावात् ? सत्यम् 'न च परो लोप्यः' इति चकारोऽयमन्वाचयशिष्ट इति शङ्केत। ततो निमित्तमन्तरेणापि यत्वं स्यादित्याह – असवर्ण इति किम् ? दधीति ॥३१।

**[क० च०]**

**इवर्णः।** यमित्यस्वरोऽयं निर्देशः **"तद् वेत्त्यधीते वा"** (२।६।८) इति ज्ञापकात्। आदेशिन एकवर्णत्वाद् आदेशोऽपि एकवर्ण एवेति **साम्प्रदायिकाः। वस्तुतस्तु** श्रुतत्वादेवायमस्वर इति अकारलोपे (प्रमाणाभावात्) समानाभावात्। को हि दृष्टपरिकल्पनां विहाय अदृष्टं परिकल्पयतीति। **समिदत्रेत्यादि।** ननु कथमत्र परत्वमुभयोः सावकाशत्वाभावात्। तथाहि यत्वस्य दध्यत्रेत्यादिषु सावकाशता, तृतीयस्य च न कुत्रापि। अत्र **केचित्** परशब्दोऽत्र श्रेष्ठवचनः, श्रेष्ठत्वं चापवादत्वादेव, न तु सूत्रयोः पूर्व-परत्वविवक्षामात्रेण। विप्रतिषेध एव परस्परसावकाशत्वादित्याहुः। **अन्ये** तु दध्येतद् इत्यत्र यत्वस्य चरितार्थता। वाग्गत इत्यत्र तु तृतीयस्य यस्य वर्णस्य यत्वं विधातव्यम्, तद्वर्णापेक्षया गकारस्य समानो वर्ण इति न्यायात् सवर्णत्वाभावादस्य सूत्रस्य विषयो नास्तीति। अतस्तृतीयविधेः सावकाशत्वमस्तीति। नहि यत्र वर्णग्रहणम् अस्ति तत्रैव व्यञ्जनस्य सवर्णव्यवहारः इति **हेमकर**शपथः समादरणीय इत्याहुः।

**वयमि**दमालोचयामः – इवर्णग्रहणाभावे किमपेक्षया असवर्णत्वं प्रतिपत्तव्यमिति विचार्यताम्। यदि यत्किञ्चित्पदापेक्षया असवर्णत्वमित्युच्यते तदा 'दध्यत्र' इत्यादिषु यत्वप्राप्त्यभावः स्यात् प्रयोगान्तरस्थिताकारापेक्षयाऽकारस्य अवर्णस्यापि विद्यमानत्वात्। नच वक्तव्यम् एकस्मिन् प्रयोगे उभयोः सत्त्वे सत्यन्योऽन्यापेक्षयाऽसवर्णव्यवहार इति ह्रस्वसूत्रे तस्य दूषितत्वात्। कथमन्यथा सवर्णस्य पूर्वो ह्रस्व इत्युक्ते अकारादिमात्रस्य ह्रस्वसंज्ञा स्यात्। तस्मात् तत्रावश्यं वक्तव्यं प्रयोगान्तरापेक्षया सवर्णत्वं पूर्वत्वं च इत्थं पचतीति असङ्गतमिति। तस्मात् **"तद्वेत्त्यधीते वा"** (२।६।८) इति ज्ञापकमुन्नेयम्। यत्किञ्चिदपेक्षया स सवर्णव्यवहार इति। नापि यस्य यत्वं विधातव्यं तदपेक्षयाऽसवर्णत्वमिति वाच्यम्। तस्यानियतत्वादिति समिदत्रेत्यस्य सवर्णत्वाभावाद् अभावस्य प्रतियोग्युपस्थापकत्वात्। किन्तु यकारस्य तालव्यत्वेन श्रुतत्वात्तज्जातीयो यावान् वर्णः स सवर्णः, स च इवर्ण एव, तद्भिन्नोऽसवर्णो वेदितव्य इति।

समिदत्रेत्यत्रापि अकारस्य यकारस्थानोच्चार्यमाणवर्णापेक्षयाऽसवर्णत्वमित्यस्ति यत्वप्रसङ्गः। एवं च सति त्वगिह, वाग्गच्छतीत्यत्र तृतीयस्य सावकाशता। 'दध्यत्र' इत्यत्र यत्वस्य चेति, समिदत्रेत्यत्र तृतीय एव। नच वक्तव्यम् **"समानः सवर्णे"** (१।२।१) इत्यत्रापि यत् किञ्चित् समानापेक्षया सवर्णत्वात् 'तवेहा' इत्यत्रापि दीर्घः स्यादिति समानस्य कार्यिणः श्रुतत्वाद् यस्य समानस्य कार्यं विधातव्यम्, तत्कार्यापेक्षया सवर्णव्यवहारात्। ननु तत्र समानग्रहणस्यान्यदेव फलं तत् कथमेवं व्याख्यायते, नैवं समानग्रहणाभावे सवर्णस्य (स्या) नियतत्वाद् यदपेक्षया सवर्णत्वं श्रुतत्वात्तस्यैव दीर्घः।

न च समानो वर्ण इत्यन्वर्थबलात् समानो यो वर्णस्तद्भिन्नत्वमसवर्णत्वमिति वाच्यम्, **'कृत्रिमाकृत्रिमयोः कृत्रिमविधिर्बलवान्'** (सं० बौ० वै०, पृ० २२१) इति न्यायात्। अत एव वाग् गच्छतीत्यादौ तृतीयस्य सावकाशता इति निरस्तम्। स्वरे परे (निरवकाशत्वम्) तृतीयस्य सावकाशताविरहात्। यद्येवम्, यत्र तृतीयस्य न विषयस्तत्र तर्हि स्यात्। यथा भवानत्रेति। अत्रापि यकारस्थानोच्चार्यमाणवर्णापेक्षयाऽकारस्यासवर्णत्वमित्याह – **किञ्चेति**। यदा तु सादृश्यापेक्षयापि यस्य स्थाने यत्वं विधीयते तदपेक्षयैवासवर्णत्वं गृह्यते, तदा इवर्णग्रहणं सुखार्थम्। चकारस्य सवर्णव्यवहार एव नास्ति, कथं तद्भिन्नोऽसवर्णः प्रतिपत्तव्यः ? शङ्केतेति शङ्कामात्रं न तु परमार्थत्वम्, सन्नियोगशिष्टत्वसम्भवेऽन्वाचयशिष्टकल्पनाया अन्याय्यत्वात्, तत् (उभयकार्यस्यैव) कार्यासम्भवादित्यर्थः।

**अन्ये** तु जसीति निर्देशादित्याहुः। दधीति। ननु एतानि कार्याणि संहितायामेव भवन्तीति न विसर्जनीयसूत्रे वक्ष्यते, तत्कथमत्र प्राप्तिः ? असमाने संहिताया अभावात्। नच वक्तव्यम् – पूर्वेण वर्णेन सह संहिताऽस्त्येव कथं संहिताभावे सन्धिप्राप्त्यभाव इति। यतः परेण सह पूर्वस्य निरन्तरोच्चारणेष्वेव संहिताव्यवहार इति। तथा च सति इवर्णस्य संहिताव्यवहारः परवर्णसत्त्व एव सम्भवति ? सत्यम्। एतदेवासवर्णग्रहणं ज्ञापयति – परानपेक्षं कार्यमसंहितायामपि भवति। **"नामिपरो रम्"** (१।५।१२) इत्यत्रास्य फलं वक्ष्यामः। असवर्णग्रहणाभावे च्विप्रत्ययपक्षे दीर्घस्य दीर्घाप्तिः। परत्वात् परलोपं बाधित्वा यत्वं कथं न स्यादिति न परिहारः। यतः समानग्रहणमश्रुतादपि दीर्घात् समानस्य लोपार्थमिति। ननु **"न च परो लोप्यः"** (१।२।८) इत्याशङ्काबीजेन चकारेण किम् ? नैवं चकारं विना वाक्यद्वयार्थप्राप्तेरभावात्।

ननु परग्रहणं किमर्थम् ? सर्वत्र **"परश्च लोपम्"** (१।२।१) इत्यधिकारो वर्तते, तेनायमर्थो भविष्यति– इवर्णो यम् आपद्यते न च लोप्य इत्युक्ते परो न च लोप्यो भवति इत्यर्थो भविष्यति ? सत्यम् । परग्रहणाभावे श्रुतत्वाद् इवर्णेन सह **"नच लोप्यः"** (१।२।८) इत्यस्य सम्बन्धः स्यात् । तथा च सति 'इवर्णो यमापद्यतेऽसवर्णे इवर्णो नच लोप्यः' इति सूत्रार्थे सति मृग्या इदं **मार्गम्** इत्यत्र अणि कृते इवर्णावर्णयोरित्यादिना प्राप्तस्य ईकारलोपस्य बाधा स्यादिति ।

नच वक्तव्यम्, तत्र इवर्णग्रहणमनर्थकमिति सवर्णे परे यकारे च सार्थकत्वात् । यथा खरनर्दिनोऽपत्यम्, बाह्वादित्वाद् इणि कृते **"नस्तु क्वचित्"** (२।६।४५) इति नलोपे **खारनर्दिरिति** ।तथा कपौ साधुः कप्यः इति ।नच वक्तव्यम्, एतत्प्रकरणविहितस्यैव लोपस्य प्रतिषेधो यतः प्रतिषेधस्य प्राप्तिरेव विषय इति । नच इवर्णावर्णयोः प्राप्तस्य तस्य लोपस्य प्रकरणान्तरविहितत्वाद् इति पर एवावशिष्ट इति वाच्यम्, इवर्णस्य श्रौतसम्बन्धस्य बलवत्त्वात् । तर्हि लोप्यग्रहणं किमर्थम् ? पूर्वस्मात् परश्च लोपमित्यधिकारो वर्तते एव । ततश्च परलोप इत्युक्ते **'नच परो लोप्यः'** (१।२।८) इत्यर्थो निर्विवाद एव घटत इति ? सत्यम् । सुखार्थम् । ननु यथा देवदत्तो धनं प्राप्नोतीत्यादौ देवदत्तधनयोः स्थितिस्तद्वदत्रापि यकारेकारयोः स्थितिः स्यात् । नैवं वर्णानां तदादेशेनैव प्राप्तिः प्रतीयत इति ॥३१।

## [समीक्षा]

'दधि + अत्र, नदी + एषा' आदि स्थिति में कलाप तथा पाणिनीय दोनों ही व्याकरणों के अनुसार असवर्ण स्वर के पर में रहने के कारण इवर्ण (इ-ई) के स्थान में यकारादेश उपपन्न होकर 'दध्यत्र, नद्येषा' शब्दरूप निष्पन्न होते हैं। इन दोनों व्याकरणों में अन्तर यह है कि पाणिनि के सूत्र – **"इको यणचि"** (पा० ६।१।७७) द्वारा इक् के स्थान में यण् आदेश विहित है। इक् चार हैं– 'इ-उ-ऋ-ऌ'। यण् भी चार हैं– 'य्-व्-र्-ल्'। इ के स्थान में य्, उ के स्थान में व्, ऋ के स्थान में र् तथा ऌ के स्थान में ल् ही आदेश हो– एतदर्थ **"यथासंख्यमनुदेशः समानाम्"** (पा० १।३।२०; काला० परि० सू० २३) सूत्र बनाया गया है। अन्यथा किसी भी इक् के स्थान में कोई भी यणादेश प्रवृत्त हो सकता था। इवर्ण के १८, उवर्ण के १८, ऋवर्ण के १८ तथा ऌवर्ण के १२ भेद होने के कारण इक् ६६ होते हैं तथा य् के २, र का १, ल् के २ एवं व् के २ भेद होने से यण् ७ ही हैं।

इस प्रकार इक् के स्थान में यण् आदेश का आन्तरतम्य सिद्ध नहीं हो पाता। इसके समाधानार्थ वर्णसमाम्नाय में पठित प्रत्येक वर्ण को ही आधार मानना पड़ता है। 'इको यण्' इस निर्देश में अल्पशब्दप्रयोग की दृष्टि से शब्दलाघव तो कहा जा सकता है, परन्तु उक्त समग्रबोध के लिए जो पर्याप्त आयास करना पड़ता है, उसकी अपेक्षा तो कलाप का ही सूत्रपाठ सरल कहा जा सकता है। जिसमें इवर्ण के स्थान में यकारादेश-हेतु एक स्वतन्त्र सूत्र है। इसी प्रकार उवर्ण के स्थान में वकारादेश-हेतु, ऋवर्ण के स्थान में रकारादेश-हेतु एवं ऌवर्ण के स्थान में लकारादेश-हेतु पृथक्-पृथक् सूत्र हैं।

**[विशेष]**

सूत्र १।२।१ (२४) से सूत्र-सं० १।२।७ (३०) तक परवर्ती वर्ण का लोप भी करना पड़ता है, परन्तु इस सूत्र में उसका शब्दोल्लेखपुरस्सर निषेध किया गया है।

**[रूपसिद्धि]**

१. **दध्यत्र**। दधि+अत्र (इ+अ)। परवर्ती असवर्ण स्वर अ के होने पर पूर्ववर्ती इ के स्थान में य् आदेश तथा परवर्ती अ के लोप का निषेध।

२. **नद्येषा**। नदी+एषा (ई+ए)। असवर्ण स्वर ए के पर में होने से पूर्ववर्ती ई के स्थान में यकारादेश तथा परवर्ती ए के लोप का निषेध।

इस विधि के सुध्युपास्यः आदि कुछ उदाहरण पर्याप्त प्रसिद्ध हैं॥३१।

## ३२. वमुवर्णः (१।२।९)

**[सूत्रार्थ]**

असवर्ण स्वर के पर में रहने पर पूर्ववर्ती उवर्ण के स्थान में वकारादेश होता है, परन्तु परवर्ती वर्ण का लोप नहीं होता॥३२।

**[दु० वृ०]**

उवर्णो वमापद्यते असवर्णे, न च परो लोप्यः। मध्वत्र, वध्वासनम्॥३२।

**[क० च०]**

वमु०। ननु कथं मध्वत्रेति वृत्तावुदाहृतम्? "समानस्य नामिनः" इत्यादिना प्रकृतिभावस्य विषयत्वात्। नैवम्, तस्य विकल्पपक्षे वत्वस्य सम्भवात्।

एतेन 'मधु+अत्र' इति विसन्धिरपि भवति। वध्वासनम् इत्यत्र सन्धिरेव, न समासान्तरङ्गयोरिति समासे विकल्पनिषेधविधानात्। पूर्वोक्तयुक्त्या वकारोऽयमस्वर इति। यवौ पुनरीषत्पृष्टतरौ ॥३२।

**[समीक्षा]**

'मधु+अत्र, वधू+आसनम्' इस स्थिति में कलाप तथा पाणिनीय दोनों ही व्याकरणों के अनुसार असवर्ण स्वर के परवर्ती होने से पूर्ववर्ती उवर्ण के स्थान में वकारादेश होता है। मुख्य अन्तर सूत्ररचना का है, क्योंकि पाणिनि ने एक ही **"इको यणचि"** (पा० ६।१।७७) सूत्र द्वारा चारों इक् के स्थान में यणादेश किया है और कलापकार ने चार सूत्रों द्वारा। एकत्र शब्दलाघव है तो अन्यत्र अर्थलाघव। अधिक विवेचना के लिए सूत्र सं० ३१ की समीक्षा द्रष्टव्य है।

**[रूपसिद्धि]**

१. **मध्वत्र।** मधु+अत्र (उ+अ)। असवर्ण स्वर अ के पर में रहने से पूर्ववर्ती उ के स्थान में व् आदेश तथा परवर्ती वर्ण के लोप का निषेध।

२. **वध्वासनम्।** वधू+आसनम् (ऊ+आ)। असवर्ण स्वर आ के परवर्ती होने पर पूर्ववर्ती ऊ के स्थान में वकारादेश तथा परवर्ती वर्ण के लोप का निषेध ॥३२।

## ३३. रम् ऋवर्णः (१।२।१०)

**[सूत्रार्थ]**

असवर्ण स्वर के परवर्ती होने पर ऋवर्ण के स्थान में रकारादेश हो जाता है और परवर्ती वर्ण का लोप नहीं होता है ॥३३।

**[दु० वृ०]**

ऋवर्णो रम् आपद्यते असवर्णे, न च परो लोप्यः। पित्रर्थः, क्रर्थः ॥३३।

**[समीक्षा]**

पाणिनि तथा शर्ववर्मा दोनों के ही अनुसार 'पितृ+अर्थः' इस स्थिति में ऋकार के स्थान में रकारादेश होता है, परन्तु शर्ववर्मा ने अर्थलाघव का अवलम्बन लिया है – पृथक्-पृथक् सूत्र बनाकर। ऋवर्ण के भी स्थान में रकारादेश-विधायक स्वतन्त्र सूत्र है, जबकि पाणिनि ने ऋकारादि चारों इक् के स्थान में यकारादि चारों

यण् का विधान एक ही सूत्र में किया है। इससे पाणिनीय व्याकरण के निर्देश में शब्दलाघव अवश्य सन्निहित है, परन्तु अर्थबोध के लिए पर्याप्त प्रयत्न की अपेक्षा होती है। अर्थबोध में सौकर्य की दृष्टि से कलाप का निर्देश अधिक उपयोगी कहा जा सकता है।

**[रूपसिद्धि]**

१. **पित्रर्थः**। पितृ+अर्थः (ऋ+अ)। असवर्ण स्वर अ के परवर्ती होने पर ऋ के स्थान में र् आदेश तथा परवर्ती अ के लोप का निषेध।

२. **क्रर्थः**। कॄ+अर्थः (ॠ+अ)। असवर्ण स्वर अ के पर में रहने पर पूर्ववर्ती ॠकार के स्थान में रकारादेश तथा परवर्ती वर्ण के लोप का निषेध।

इसके धात्रंशः आदि प्रसिद्ध उदाहरण द्रष्टव्य हैं ॥३३।

## ३४. लम् लृवर्णः (१।२।११)

**[सूत्रार्थ]**

असवर्ण स्वर के पर में रहने पर लृवर्ण के स्थान में लकारादेश होता है, परन्तु परवर्ती वर्ण का लोप नहीं होता ॥३४।

**[दु० वृ०]**

लृवर्णो लम् आपद्यते असवर्णे, न च परो लोप्यः। लनुबन्धः, लाकृतिः ॥३४।

**[वि० प०]**

**लम् लृ०। लनुबन्धः, लाकृतिः।** लृरनुबन्धो यस्येति, लृकारस्येवाकृतिर्यस्येति विग्रहः ॥३४।

**[क० च०[**

**लम् लृ०। लनुबन्धो लाकृतिरिति।** ननु कथमत्र विसर्गस्योत्वम् **"स्वरादेशः परनिमित्तकः"** (काला० परि० १५) इत्यादिना स्थानिवद्भावादेव घोषवतोऽसम्भवात्। नैवम्। योऽनादिष्टात् स्वरात् पूर्वस्तं प्रति स्थानिवद्भावादिति नियमात्। अस्यार्थः– आदिश्यते **इत्यादिष्टः**, न आदिष्टः **अनादिष्टः**, अनादिष्टश्चासौ स्वरश्चेति **अनादिष्टस्वरः**, यस्मिन् काले स्वरोऽनादिष्ट आसीत्, तस्मिन्नेव तस्मात् स्वरात् यः पूर्वस्तं प्रति स्थानिवद्भाव इति। यद्येवम्– आदौ लनुबन्ध इति पदं निष्पाद्य पश्चाल्लाकृतिरिति

निष्पादिते अनादिष्टस्वरपूर्वत्वमस्तीति चेत्, न ।एवं स्वरादेश इत्यादौ पञ्चम्याः पूर्वयोगेनैवाभिमतं सिद्ध्यति, यत् पुनरत्र पूर्वग्रहणं तन्नियतपूर्वत्वप्रतिपत्त्यर्थम् ।

अत्र च नियतपूर्वत्वं नास्ति, ऌनुबन्धपदमन्तरेणापि ऌकृतिरित्यस्य सिद्धत्वाद् इति । नात्र स्थानिवद्भावस्यावकाशत्वमिति **हेमकरः** । तन्न । नियतपूर्ववर्तित्वाभावेऽपि स्थानिवद्भावस्यानादिष्टस्वरात् पूर्वं प्रति स्थानिवद्भावस्य दृष्टत्वात् । कथमन्यथा **परिभाषावृत्तौ "न पदान्त०"** (काला० परि० १६) इत्यादिसूत्रे 'अग्नयः सन्ति, पटवः सन्ति' इत्यादौ स्थानिवद्भावाद् विसर्गस्य उत्वप्राप्तौ पदान्तनिबन्धनस्थानिवद्भावनिषेधो दर्शितः । तत्र नियतपूर्ववृत्त्यभावात् प्राप्तिरेव नास्तीति । सिद्धान्तश्च पुनरत्र पदान्तनिबन्धनस्थानिवद्भावनिषेध इति ॥३४।

**[समीक्षा]**

पाणिनि तथा शर्ववर्मा के अनुसार 'ॡ+अनुबन्धः, ॡ+आकृतिः' इस दशा में ॡ के स्थान में ऌकारादेश होता है । परन्तु शर्ववर्माचार्य द्वारा इसके विधानार्थ किए गए स्वतन्त्रसूत्रनिर्देश से अर्थावबोध में जो सरलता होती है, वह पाणिनि द्वारा किए गए इकारादि चार इक् के स्थान में यकारादि चार यण्-विधान से नहीं ।उसके सम्यक् अवबोधार्थ अतिरिक्त प्रयत्न करना पड़ता है ।अतः कलापव्याकरण की सूत्ररचना सरलतया अर्थावबोधिका होने के कारण अधिक उपयोगिनी कही जा सकती है ।

**[रूपसिद्धि]**

१. **ऌनुबन्धः।** ॡ+अनुबन्धः (ॡ+अ) असवर्ण अ के पर में होने के कारण पूर्ववर्ती ॡ के स्थान में ऌकारादेश तथा परवर्ती अ–वर्ण के लोप का निषेध।

२. **ऌकृतिः** । ॡ+आकृतिः (ॡ+आ) । आ – वर्ण यहाँ असवर्ण तथा परवर्ती है । अतः पूर्ववर्ती ॡ के स्थान में ऌकारादेश तथा परवर्ती आ– के लोप का निषेध ॥३४।

## ३५. ए अय् (१।२।१२)

**[सूत्रार्थ]**

असवर्ण स्वर के पर में रहने पर पूर्ववर्ती एकार के स्थान में 'अय्' आदेश होता है, परन्तु परवर्ती वर्ण का लोप नहीं होता है ॥३५।

[दु० वृ०]

एकारोऽय् भवति असवर्णे, न च परो लोप्यः। नयति, अग्नये ॥३५।

[दु० टी०]

ए अय्। ए–इत्यस्य षष्ठी लुप्यते, लुप्तप्रथमा वा निःसन्देहाय। उक्तञ्च–

**आदिलोपोऽन्तलोपश्च मध्यलोपस्तथैव च।**
**विभक्तिपदवर्णानां दृश्यते शार्ववर्मिके॥**

'अग्नये' इति द्वौ द्वौ समानौ सवर्णावन्योऽसवर्ण इति व्यावर्तनात् सिद्धम् ॥३५।

[वि० प०]

**ए०**। इह उत्तरत्र च सम्बन्धानामनिमित्तकानामयादेशाभावाद्यर्थम् असवर्ण इति वृत्तौ योज्यम्। अत एव **श्रीपतिनापि** "तौ नामिनोऽसवर्णे स्वरे वा प्रकृतिः' (कात० परि०, सं० २८) इत्यत्र समानानुवृत्त्या समानस्य नामिन इति किम्? श्रिया इन्दुः, पाणावाज्यम् इति प्रत्युदाहृतम्। प्रयोजनाभावान्नानुवृत्तिरिति चेत्, निरपेक्षव्यावर्तनाय सफलत्वादिति ॥३५।

[क० च०]

**ए अय्**। अत्र षष्ठी प्रथमा वा लुप्यते निःसन्देहार्थम्। उक्तं च–

**आदिलोपोऽन्तलोपश्च मध्यलोपस्तथैव च।**
**विभक्तिपदवर्णानां दृश्यते शार्ववर्मिके॥**

आदिलोपो विभक्तेर्यथा– **औरीम्** (२।२।९)। अन्तलोपः पदस्यैवात्र, तथा क्रुञ्चेदित्यादौ। **"से गमः परस्मै, नव पराण्यात्मने"** (३।७।६; १।२) इत्यत्र च पदशब्दोऽपि कैश्चिदनेन लुप्यते। तन्न, संज्ञाया बहुलम् अन्तलोपं वक्ष्यति। यथा– भीमो भीमसेन इति। मध्यलोपो वर्णस्य स्वरूपेण मध्यभूतस्य वर्णस्य लोप इत्यर्थः। यथा **"यदुगवादितः"** (२।६।११) इति **कुलचन्द्रः**। धयतीत्यलाक्षणिकं परित्यज्य 'नयति, अग्नयः' इति लाक्षणिकस्यापि यदुदाहृतं तल्लाक्षणिकस्यापि भवतीति ज्ञापनार्थम्, तच्च विभक्तय इति ज्ञापकवशात्। तन्न। वर्णविधौ लाक्षणिकपरिभाषाया अनादरात्।

इह उत्तरत्र च सन्ध्यक्षराणामनिमित्तकानामयादेशाद्यभावार्थम् असवर्ण इति **वृत्तौ** योज्यम् । **वैद्यस्तु** – सन्ध्यक्षराणां सवर्णत्वाभावात् सनिमित्तप्रस्तावात् **"द्विवचनमनौ"** (१।३।२) इति ज्ञापकाच्च निर्निमित्ते न भविष्यति इति प्रलपति । तन्न । **पूर्ववदिहाप्यनुवृत्तौ** दोषाभावात् । असवर्णानुवृत्तावेव 'अग्नयः' इत्यत्र **टीकाकृतः पूर्वपक्षः** सङ्गच्छते । अत एव सवर्णसंज्ञाविरहेणापि असवर्णव्यवहारो घटत एवेति । अत एव **श्रीपतिनापि "तौ नामिनोऽसवर्णे"** (कात० परि०, सं० २८) इत्यत्र समानानुवृत्त्या समानस्य यदि सन्ध्यक्षरस्यासवर्णव्यवहारो न स्यात्, तदा यथा न समानेन नामी तथा असवर्णव्यवहारोऽपि नास्तीति द्व्यङ्गवैकल्यं स्यादिति ।

नामिन इति किम् ? 'श्रियायिन्दुः, पाणावाज्यम्' इति प्रत्युदाहृतम् । **टीकायां** तु यत्त्वविधौ इवर्णग्रहणाभावे समिदत्रेति व्यञ्जनापेक्षया असवर्णत्वं स्वीकृतमिति । ननु तथापि प्रयोजनाभावाद् निवृत्तिरिति चेत्, न । निरपेक्षया व्यावर्तनाय सफलत्वाद् यदि सनिमित्तप्रस्तावाद् ज्ञापकाच्च, ततश्च निर्निमित्ते न भविष्यतीति कृत्वा एवासवर्ण इति नोपादेयम्, तदा पूर्वसूत्रेऽपि नोपादेयं स्यात् । तत्रापि जसि, अष्टनः सर्वासु इत्यादिज्ञापकदर्शनाद् दोषाभावः ॥३५।

**[समीक्षा]**

'ने + अति, अग्ने + ए' इस स्थिति में कलाप तथा पाणिनीय दोनों ही व्याकरणों के अनुसार 'ए' के स्थान में 'अय्' आदेश होता है, परन्तु दोनों की सूत्ररचनापद्धति में पर्याप्त अन्तर है । पाणिनीय व्याकरण में 'ए-ऐ-ओ-औ' इन चार वर्णों के स्थान में क्रमशः 'अय्-आय्-अव्-आव्' आदेश एक ही सूत्र द्वारा निर्दिष्ट हैं – **"एचोऽयवायावः"** (पा० ६।१।७८) । इस निर्देश में शब्दलाघव होने पर भी ज्ञानगौरव है, क्योंकि 'एच्' प्रत्याहार को तथा उसमें आने वाले 'ए-ओ-ऐ-औ' इन वर्णों के स्थान में क्रमशः अयादि आदेशों की उपपन्नता को समझने में कुछ कठिनाई अवश्य ही होती है । इसकी अपेक्षा कलाप में जो एकारादि चार वर्णों के स्थान में अयादि चार आदेश करने के लिए चार सूत्र बनाए गए हैं, उनमें शब्दलाघव न होने पर भी अर्थलाघव अवश्य है, क्योंकि इससे अर्थावबोध सरलतया उपपन्न हो जाता है ॥३५।

**[रूपसिद्धि]**

१. **नयति** । ने + अति (ए + अ) । असवर्ण अ के परवर्ती होने पर पूर्ववर्ती ए के स्थान में अय् आदेश तथा परवर्ती अ के लोप का निषेध होता है ।

२. **अग्नये**। अग्ने+ए (ए+ए)। यहाँ ए के पर में होने पर भी पूर्ववर्ती ए के स्थान में अय् आदेश होता है तथा परवर्ती ए का लोप नहीं होता है।

**[विशेष]**

यहाँ 'असवर्ण' की अनुवृत्ति करने पर 'अग्नये' में सूत्र प्रवृत्त नहीं होना चाहिए, क्योंकि पर में यहाँ ए ही है और इसीलिए कुछ व्याख्याकार 'असवर्ण' शब्द की अनुवृत्ति नहीं भी मानते हैं। कुछ व्याख्याकार कहते हैं कि 'असवर्ण' की अनुवृत्ति न होने पर यह आदेश अनिमित्तक हो जाएगा। ऐसा न हो सके, अतः असवर्णानुवृत्ति करनी चाहिए। असवर्णानुवृत्ति करने पर 'अग्नये' में जो यह आशङ्का होती है कि यहाँ तो जिस ए को अय् आदेश करना है उससे परवर्ती वर्ण भी 'ए' ही है। इसके समाधानार्थ यह समझना चाहिए कि 'ए' आदि ४ सन्ध्यक्षर वर्णों की सवर्णसंज्ञा ही नहीं होती, क्योंकि सवर्णसंज्ञा तो समानसंज्ञक वर्णों की ही होती है और समानसंज्ञा अ से लेकर ॡ पर्यन्त दश वर्णों की ही निर्दिष्ट है– **"दश समानाः"** (१।१।३)॥३५।

## ३६. ऐ आय् (१।२।१३)

**[सूत्रार्थ]**

असवर्ण वर्ण के परवर्ती रहने पर पूर्ववर्ती 'ऐ' के स्थान में 'आय्' आदेश होता है, परन्तु परवर्ती वर्ण का लोप नहीं होता॥३६।

**[दु० वृ०]**

ऐकार आय् भवति असवर्णे, न च परो लोप्यः। नायकः। रायैन्द्री॥३६।

**[वि० प०]**

**ऐ०**। रायैन्द्रीति राया ऐन्द्रीति विग्रहः॥३६।

**[समीक्षा]**

'नै+अकः, रै+ऐन्द्री' इस अवस्था में ऐ के स्थान में आय् आदेश दोनों ही व्याकरणों के अनुसार होता है, परन्तु सूत्ररचनापद्धति से कलाप में जो सरलता उपपन्न होती है, उसके लिए सूत्र-सं० ३६ की समीक्षा द्रष्टव्य है।

[रूपसिद्धि]

१. **नायकः** । नै+अकः (ऐ+अ)। असवर्ण अ के पर में रहने पर पूर्ववर्ती ऐ के स्थान में आय् आदेश तथा परवर्ती अ के लोप का अभाव।

२. **रायैन्द्री** । रै+ऐन्द्री (ऐ+ऐ)। असवर्ण ऐ के परवर्ती होने पर पूर्ववर्ती ऐ के स्थान में आय् आदेश एवं परवर्ती ऐ के लोप का अभाव ॥३६।

## ३६. ओ अव् (१।२।१४)

[सूत्रार्थ]

असवर्ण स्वर के पर में रहने पर पूर्ववर्ती ओ के स्थान में अव् आदेश होता है, परन्तु परवर्ती वर्ण का लोप नहीं होता ॥३७।

[दु० वृ०]

ओकारोऽव् भवति असवर्णे, न च परो लोप्यः। लवणम्, पटवोतुः ॥३७।

[वि० प०]

ओ०। **पटवोतुरिति** । पटुशब्दाद् "**आमन्त्रणे च**" (२।४।८) इति सिः, "**ह्रस्वनदी०**" (२।१।७१) इत्यादिना सेर्लोपः। "**सम्बुद्धौ च**" (२।१।५६) इत्युकारस्यौकारः ॥३७।

[समीक्षा]

'लो+अनम्, पटो+ओतुः' इस दशा में कलाप तथा पाणिनीय दोनों के ही अनुसार ओ के स्थान में अव् आदेश प्रवृत्त होता है, परन्तु कलापव्याकरण की सूत्ररचनापद्धति में जो सरलता सन्निहित है, तदर्थ सूत्र-सं० ३६ की समीक्षा द्रष्टव्य है ॥३७।

[रूपसिद्धि]

१. **लवणम्** । लो+अनम् (ओ+अ)। परवर्ती अ के असवर्ण स्वर होने पर पूर्ववर्ती ओ के स्थान में अव् आदेश तथा परवर्ती वर्ण के लोप का अभाव।

२. **पटवोतुः** । पटो+ओतुः (ओ+ओ)। असवर्ण स्वर ओ के पर में रहने पर पूर्ववर्ती ओ के स्थान में अव् आदेश, अथ च परवर्ती ओ के लोप का अभाव ॥३७।

# ३८. औ आव् (१।२।१५)

## [सूत्रार्थ]

असवर्ण स्वर के पर में रहने पर औ को आव् आदेश होता है तथा परवर्ती वर्ण का लोप नहीं होता ॥३८।

## [दु० वृ०]

औकार आव् भवति असवर्णे, न च परो लोप्यः। गावौ, गावः। एतेषु विसन्धिः पृथग्योगश्च स्पष्टार्थः। विवक्षितश्च सन्धिर्भवति। गवाजिनम्, गोऽजिनमिति स्वरे विभाषा। गवाक्षः, गवेन्द्र इति नित्यमकारवर्णागमः॥३८।

## [दु० टी०]

औ०। अकारवर्णागम इति लोकोपचारात्–

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**

**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥**

(द्र०, का० वृ० ६।३।१०९)

गवाक्ष इति वातायन एव रूढः। इन्द्रादावपि गवेन्द्रदत्तः। अकारस्य प्रकृतिरपि– गो अग्रम्॥३८।

## [वि० प०]

**औ०।** गावौ, गावः इति। **"गोरौ घुटि"** (२।२।३३) इत्यौकारः। ननु कथं गावावित्यत्रावादेशः समानो वर्णः सवर्ण इत्यन्वर्थसंज्ञायामोकारस्य सवर्णत्वात्? सत्यम्। तत्रानन्तरत्वात् समाना एवानुवर्तिष्यन्ते। ततो द्वौ द्वौ समानौ सवर्णावित्युक्ते व्यावृत्तिबलादसमानस्य सवर्णत्वं नास्तीति। एवं रायैन्द्री, पटवोतुरित्यत्रापि। **एतेष्वित्यादि**– **"अवर्ण इवर्णे ए"** (१।२।२) प्रभृतिषु यथायोगं विसन्धिनिर्देशः पृथग्योगश्च स्पष्टार्थः। किञ्च अत एव सूत्रनिर्देशा ज्ञापयन्ति– **विवक्षितश्च** सन्धिर्भवति, तेन ऋकारे समानस्य प्रकृतिभावो विभाषया भवति– खट्वा ऋष्यः खट्वर्ष्यः। नदी ऋष्यः नदृष्यः। तथा **"याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित्"** (२।५।२७) इति क्वचिद् ग्रहणबलात् पक्षे ह्रस्वत्वम्। 'खट्व ऋष्यः, नदि ऋष्यः' इति रूपत्रयं सिद्धम्। तथा समानस्य नामिनोऽसवर्णे स्वरे वा प्रकृतिर्दीर्घस्य च ह्रस्वोऽसमासे इति।

यथा-दधि अत्र, दध्यत्र । कुमारी अत्र, कुमार्यत्र, कुमारि अत्र इति रूपत्रयम् । समासे तु सन्धिरेव । दध्योदनं कुमार्याकार इति । तथा प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गमपि कार्यं नित्यमेव । यथा – अध्यास्ते, व्युदस्यतीति । तथा चाह जयादित्यः – **"पदयोः सन्धिर्विवक्षितो न समासान्तरङ्गयोः"** (द्र०, काला० परि० सू० ८४) इति ।

**गवाजिनम्** इत्यादि । गवामजिनमिति विग्रहः । **"स्वरे विभाषा"** इत्यकारवर्णागमस्येत्यर्थः । **गवाक्ष** इति । गवाम् अक्षीति विगृह्य **"अचक्षुरक्षि"** (२।६।७३-२४) इति राजादित्वाद् अत्, **"इवर्णावर्णयोः"** (२।६।४४) इत्यादिना इकारलोपः, **पुंस्त्वं** तु संज्ञाशब्दत्वात् । **अक्षशब्देन वा** । गवामक्ष इति विग्रहः । नित्यत्वं पुनर्वर्णागमस्य वातायनविषय एव, प्राण्यङ्गे तु न भवत्येव गोऽक्षीति । तथा गवामिन्द्रो **गवेन्द्र** इति नित्यमकारवर्णागमः । कथमेतत् ? लोकोपचारात् । तथा चोक्तम् –

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।**

**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ इति ।**

(द्र०, का० वृ० ६।३।१०९)

तेन गोः । "अवङ् स्फोटायनस्याक्षे, इन्द्रे च नित्यम्" (पा० ६।१।१२३, १२४) इति गोशब्दस्यौकारस्यावङादेशो न वक्तव्यः । ओकारस्य प्रकृतिभावो दृश्यते । यथा गो अजिनम्, गो अग्रम् इति ॥ ३८ ।

**[क० च०]**

**औ० ।** विसन्धिः स्पष्टार्थोऽपि ज्ञापक इति पूर्वमुक्तम् । एवं रायैन्द्री, पटवोतुरिति । ननु **'अग्नये'** इति कथं नोदाहृतम्, अत्रापि सवर्णत्वात् प्राप्तिर्नास्तीति **कुचोद्य**मेतत्, अस्योपलक्षणत्वात् । एकयोगस्तु – अवर्ण इवर्णादिष्वेदोदरलः, एत्वमैदैतोः, ऐत्वमोदौतोः । सन्ध्यक्षरे ऐदौदिति तु नैकयोगः, समानसङ्ख्यत्वाभावाद् यथासङ्ख्यत्वाभावे ओकारौकारयोरैत्वादिप्रसङ्गात् । इवर्णादिरसवर्णे यवरलाः, न च परो लोप्यः, सन्ध्यक्षराणामयायवावः ? सत्यम् । स्पष्टार्थम् ।

ननु स्पष्टार्थं चेति भिन्नयोग एवास्ताम्, किं विसन्धिनिर्देशेन । नहि विसन्धिनिर्देशे किमिहाविस्पष्टं भवतीत्याह – **किञ्च** इति । समानस्य ऋकार इति प्रकृतिभावस्य ह्रस्वस्य च उभयोरेव विकल्पः । अन्यथा प्रकृतिभावस्य विकल्पे ह्रस्वम् अविकल्पयितुं न पार्यते । ततश्च 'नदी ऋच्छति' प्रयोगो न स्यात् । नच वक्तव्यं प्रकृतिविधानादेव

ह्रस्वो न वर्तिष्यते इति यत्र ह्रस्वो नास्ति तत्र सार्थकत्वादस्येति । यथा – दाम ऋच्छति । रूपद्वयमेव ।

यदि च ह्रस्वो विकल्प्यते तदा प्रकृतिरिति विकल्पयितुं न शक्यते । ततश्च प्रकृतिभावस्य नित्यं प्राप्तौ सत्यां 'नदी ऋष्यः, नदि ऋष्यः' इति रूपद्वयमेव । न 'नद्यृष्यः' इति रूपम् । अन्यथा प्रकृतिभावस्य वैयर्थ्यप्रसङ्गः स्यात् । नच वक्तव्यं ह्रस्वविकल्पबलादेव पक्षे प्रकृतिं बाधित्वा यत्वं स्याद् 'नदी ऋच्छति' इति ह्रस्वाभावेनैव तदर्थस्य सार्थकत्वात् ।

**प्रकृतेः पूर्वम्** इत्यादि । उभयपूर्वग्रहणान्नियतपूर्वमात्रे बोद्धव्यम् । नियतस्वरूपेण यत् प्रकृतेः पूर्वं तदाश्रितमपि कार्यमुपचारात् पूर्वं तदन्तरङ्गमित्यर्थः । तत् पुनर्धातूपसर्गयोरेव नित्यं सन्धिरवगन्तव्यः । तथा चोक्तम् –

**[1]संहितैकपदे नित्या नित्या धातूपसर्गयोः ।**
**सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया ॥**

अत एवाध्यास्ते, व्युदस्यतीति धातूपसर्गयोर्नित्यसन्धिर्दर्शितः । **उमापतिस्तु** अत्र अधीते इति पाठमपास्य अध्यास्ते इति पाठं मन्यते । **तस्यायमभिप्रायः** – समानस्य नामिन इत्यादिनाऽसवर्णे विकल्पविधानात् तद्व्यावृत्त्या सवर्णे सन्धिरस्त्येव, तत्रोदाहरणं फलशून्यम् इति । तन्न, अभिप्रायापरिज्ञानात् । तथाहि 'इदं हि पदयोः सन्धिर्विवक्षितः' इतिभागस्य प्रपञ्च इति मतम् । अतस्तस्य समासान्तरङ्गविषयत्वात् प्रपञ्चस्यापि तद्भिन्नविषय इत्यसवर्णस्य व्यावृत्तिरपि समासान्तरङ्गभिन्नविषय एव कुतोऽत्र देश्यावतारः । **अन्ये** तु दृष्टान्ततयोदाहरन्ति । यथा अधीते इत्यत्र नित्यसन्धिस्तथा व्युदस्यति इत्यत्रापि ।

ननु समासे कथम् – 'उच्चारितरुचिरऋचां चाननानां चतुर्णाम्, हिमऋतावपि ताः स्म भृशस्विद्' इति विसन्धिः ? एतत्तु न बहुसम्मतमित्युपेक्ष्यते । **भाष्यचान्द्राभ्यां** समासमात्रे प्रतिषेधस्योक्तत्वात् । नहि तेषामनित्यसमास इत्यादि । प्रकृतिह्रस्वयोर्नित्यसमासे निषेधः, अनित्यसमासे विकल्प इति **वार्त्तिकम्** । तद् दृष्ट्वा **श्रीपतिनापि** तथैव

---

१. **संहितैकपदे नित्या नित्या धातूपसर्गयोः ।**
**नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥** (सि० कौ०-भ्वा० प्र० ८।४।१८)

निर्णीतमिति किन्तेन **पाणिनि – कात्यायन – भाष्यकारा**णामुत्तरोत्तरप्रामाण्यम् इति स्मृतेः। तदुक्तं **न्यासकृता** मुनिद्वयातिशायिनो भगवतो भाष्यकारस्य वचनं कथमुपेक्षामहे इति। अतो **भाष्यकारविरोधेन** तेषामपप्रयोगाद् इति भावः। ननु कथं 'वारि ईहसे, मधु ऊर्ध्वम्' असवर्ण इत्यस्य व्यावृत्त्या सवर्णे सन्धेर्नित्यं प्राप्तत्वात् ? सत्यम्। विवक्षितश्च सन्धिर्भवतीति सन्धिशब्देनात्र संहिता सन्धिकार्यं च विवक्ष्यते, ततश्च उभयमेव विकल्प्यते। तत्र 'वारि ईहसे' इत्यत्र संहिताभावादेव न सन्धिः। यत्र तु संहिता विकल्प्यते तत्र सन्धिकार्यं च विकल्प्यते। ततो यथायोगं सन्धिरिति।

**वातायनविषय** एवेति। वातायनशब्देनात्र संज्ञोपलक्ष्यते, तेन गवाक्षो नाम राक्षसः कश्चिद् इत्यत्रापि नित्यमकारवर्णागमः। वातायनशब्दस्यात्र संज्ञोपलक्षणत्वात्। वर्णागम इत्यादि। तथा च **"अक्षे नाम्नो वा" इति [1]श्रीपतिसूत्रम्। वर्णागम** इति। यथा कौ जीर्यतीति **कुञ्जरः**। कुशब्दादनुस्वारः। विपर्ययो यथा हिनस्तीति **सिंहः**। वर्णविकारो यथा **पञ्जिका**। षड्भिरधिका दश **षोडश**। दस्य डः, षस्य उः,। वर्णनाशः पृषोदरीति। पृषद् उदरमस्या इति वाक्ये तस्य लोपः। धातोस्तदर्थातिशयेन योगः– तयोर्वर्णविकारनाशयोरतिशयेन द्विस्त्रिः प्रवृत्तिः। अर्थस्यातिशयोऽर्थविशेषस्तेन सह धातोर्योगः। मह्यां रौतीति **मयूरः** डप्रत्ययेऽन्तलोपे हकारस्य यकारः, ईकारस्य ऊकारः इति मयूरः। प्राणिविशेषे रवक्रियासम्बन्ध इति **कुलचन्द्रः**। त्रिः प्रवृत्तिर्यथा **भ्रमरः** उद्भ्रम्य रौति इति वाक्ये डप्रत्ययः। ततो वर्णनाशः ॥३८।

### [समीक्षा]

'गौ + औ' तथा 'गौ + अस्' ऐसी स्थिति में पाणिनि और शर्ववर्मा दोनों ही आचार्य औ के स्थान में 'आव्' आदेश करते हैं, परन्तु कलाप की सूत्ररचना-पद्धति से जो सरलता उपपन्न होती है, उसका विवेचन उक्त सूत्रों की समीक्षा में द्रष्टव्य है।

### [विशेष]

वृत्तिकार दुर्गसिंह ने कहा है कि "अवर्ण इवर्णे ए – ए अय्-औ आव्" आदि सूत्रों को जो पृथक् रूप में पढ़ा गया है तथा उनमें सन्धि नहीं की गई है, वह

---

१. साम्प्रतं कातन्त्रपरिशिष्टे सूत्रं दृश्यते –
**"अक्षे नाम्न्येव"** (कात० परि० – सं० २४)।

केवल स्पष्टावबोध के लिए ही समझना चाहिए। यह भी ज्ञातव्य है कि सन्धि अनेकत्र विवक्षानुसार ही होती है। जैसे – 'गो + अजिनम्' इस स्थिति में 'गोऽजिनम्' तथा 'गवाजिनम्' ये दो रूप देखे जाते हैं। इसी प्रकार 'गो + अक्षः, गो + इन्द्रः' की दशा में गवाक्षः तथा गवेन्द्रः रूप निष्पन्न होते हैं।

व्याख्याकारों के कुछ विचार अवश्यमननीय हैं। जैसे – त्रिमुनि में उत्तरोत्तर की प्रामाणिकता, संहिता की नित्य तथा वैकल्पिक प्रवृत्ति आदि।

**[रूपसिद्धि]**

१. **गावौ**। गौ + औ (औ + औ)। असवर्ण औ के पर में रहने पर पूर्ववर्ती औ के स्थान में आव् आदेश होता है तथा परवर्ती औ का लोप नहीं होता।

२. **गावः**। गौ + अस् (औ + अ)। यहाँ असवर्ण अ के बाद में रहने के कारण पूर्ववर्ती औ के स्थान में आव् आदेश तथा परवर्ती अ के लोप का निषेध ॥३८।

## ३९. अयादीनां यवलोपः पदान्ते नवालोपे तु प्रकृतिः (१।२।१६)

**[सूत्रार्थ]**

पदान्तवर्ती अय्-आय्-अव्-आव् आदेशों में विद्यमान य् तथा व् का विकल्प से लोप होता है। लोप होने पर पुनः उनमें कोई स्वरसन्धि नहीं होती। अर्थात् उनकी प्रकृति सुरक्षित रहती है ॥३९।

**[दु० वृ०]**

अय् इत्येवमादीनां पदान्ते वर्तमानानां यवयोर्लोपो भवति नवा। लोपे तु प्रकृतिः स्वभावो भवति। त आहुः, तयाहुः। तस्मा आसनम्, तस्मायासनम्। पट इह, पटविह। असा इन्दुः, असाविन्दुः। अयादीनामिति किम्? दध्यत्र, मध्वत्र। पदान्त इति किम्? नयनम्, लावकः ॥३९।

**[दु० टी०]**

अयादीनाम्०। अय् आदिर्येषामिति बहुव्रीहिः। न त्वेकार एवादिर्येषाम् आदेशिनामिति। अर्थाद् यवयोरत्र प्रतिपत्तिः, सा च गरीयसीति। अथ यवग्रहणं किमर्थम्, निर्दिष्टानामयादीनां समुदायस्य लोपः स्यादिति, प्रकृतिवचनं च। **योषिते**

आहुरित्यत्र अयोर्लोपे सति तकारस्य तृतीयव्यवच्छेदार्थम् । नानर्थक्ये वर्गान्तरस्य विधिरपि दृश्यते । यवयोर्लोपे तु प्रकृतिरिति वचनादनुमीयमानो लोपोऽप्रधानमिति प्रकृतिशब्देनैव नवाशब्दस्य सम्बन्धः स्यादिति लोपग्रहणम् । **पदान्त** इति । अन्तशब्दोऽत्र अवयवधर्ममात्रवृत्तिर्विषयसप्तमीयम् ।

लोपे त्वितिवचनाद् अलोपे प्रकृतिर्न स्यात् । तयाहुस्तस्मायासनमिति यकारवकारावेतावीषत्स्पृष्टतरावपीह स्वभावसिद्धौ । उनिपाते पुनरीषत्स्पृष्टतरावेव स्वभावादिति रूपद्वयम् । एतउ-एतयु, तस्मायु-तस्माउ, पटउ-पट्वु, असाउ-असावु । पौरामात्येषु योनौ लिङ्गे स्वभावे च प्रकृतिः । इह तु पारिशेष्यादभिधीयते– प्रकृतिः स्वभावो भवतीति । श्रुतानामयादीनां स्वरस्य स्वभाव एवेति । दीर्घात् परलोपे विघातेऽपि भवति । अन्यथा निमित्ताभावेनान्यथाभावः स्यात् । अत एव नञ् न निर्दिश्यते । वाक्यमेदेऽत्र तुशब्द इति ॥ ३९ ।

[वि० प०]

**अयादीनाम्०।** अय् आदिर्येषामादेशानां **तेऽयादयः** इति तद्गुणसंविज्ञानो बहुव्रीहिरयम्, व्याख्यानादित्याह – **अय् इत्येवमादीनामिति।** त आहुरिति यलोपे कृते समानलक्षणो दीर्घः प्राप्तः प्रकृतिभावान्न भवति । तथा तस्मा आसनमिति दीर्घात् परलोपो न भवतीति । ननु कथम् एतद् यावता श्रुतत्वाद् अयादीनामेव स्वरस्य प्रकृत्या भवितव्यम् । न चेह परलोपे सति काचिद् विकृतिरस्ति पूर्वस्य । तदयुक्तम्, यकारलोपे सति परलोपं प्रति निमित्तत्वमेवान्यथाभावः स्यात्, अनिमित्तस्य निमित्तभावो विकृतिरिति । **असा इन्दुरिति** । अदस् सिः, त्यदाद्यत्वम्, सावौ सिलोपश्चेति औकारः । सौ सः । अत्र प्रकृतिभावादेत्वं न भवति । यकारवकारौ ईषत्स्पृष्टौ ईषत्स्पृष्टतरावपि स्वभावादिति रूपत्रयं सिद्धम् । उ-निपाते पुनरीषत्स्पृष्टतराविति रूपद्वयमेवेति । एत उ-एतयु, तस्मा उ-तस्मायु, पट उ-पटवु, असा उ-असावु ॥ ३९ ।

[क० च०]

**अयादीनाम्०।** अय् एवादिर्येषाम् आदेशानाम् इति । एकार आदिर्येषामादेशिनामित्युक्तेऽपि अर्थाद् अयादेशे सति यवयोः प्राप्तेः, सा च गरीयसीत्युपेक्ष्यते । **व्याख्यानादिति** । आयादीनामित्यकरणादित्यर्थः । न चात्रापि सामीप्यार्थः कथं न स्यादिति वाच्यम्, बहुवचनासङ्गतेः य (व)-ग्रहणवैयर्थ्याच्चेति **साम्प्रदायिकाः** । 'आयवावाम्' इत्यकरणादिति **विद्यानन्दः** । **"कूल उद्रुजोद्वहोः"** (४ । ३ । ३७) इति

ज्ञापकादिति **कुलचन्द्रः।** सामीप्यार्थेनादिशब्देन बहुव्रीहिरेव नास्तीति **शिवदेवादयः।** नेयं शङ्काऽपि, सा च शास्त्रे दूषणमिति। तदुक्तम्– व्याख्यानतो विशेषार्थप्रतिपत्तेर्नहि सन्देहादलक्षणम् (कात० परि० वृ० ६५) इति।

**ऋजवस्तु** विशेषणसम्भवे उपलक्षणस्यान्याय्यत्वादिति तद्गुणसंविज्ञानबहुव्रीहिरेव युज्यते, किं तत्र यत्नेन। अतस्तद्गुण एव यत्नस्योचितत्वात्। **मूर्खास्तु** 'अय्' इत्यस्य समुदायावयवत्वात् तद्गुणसंविज्ञानबहुव्रीहिः। नहि समुदायोऽवयवमपहाय तिष्ठति, तस्माद् व्याख्यानमित्यस्यायमेवाशयः इत्याहुः। तदसङ्गतम्, नहि अवयवार्थनिश्चये सति तद्गुणसंविज्ञानसंशयनिरासाय **पञ्जीकृता** व्याख्यानाद् इत्युक्तम्, किन्तु अवयवार्थनिश्चयनिमित्तम्। **कुलचन्द्रो**ऽपि तदर्थम् एव ज्ञापकमाश्रितवानिति। अथ यवग्रहणं किमर्थम्? निर्दिष्टानाम् अयादीनां लोपनिरासार्थम्। न च वक्तव्यं प्रकृतिवचनमनर्थकमिति योषिते आहुरित्यत्र यलोपे सति तकारस्य तृतीयत्वव्यवच्छेदेनैव सार्थकत्वात्।

नच वर्णान्तस्य विधिरिति न्यायादन्तस्यैव लोप इति वाच्यम्, नानर्थक्ये वर्णान्तस्य विधिरिति न्यायात्। नैवम्, (योषिते आहुः) तयाहुरित्यत्र 'असिद्धं बहिरङ्गम्' (कात० परि० वृ० ३३) इति न्यायात् तृतीयो न भवति, किन्तत्र प्रकृतिग्रहणेन। तस्मात् प्रकृतिवचनं दीर्घात् परलोपार्थम्। यदि समुदायस्य लोपस्तदा दीर्घात् परलोपप्रसङ्ग एव नास्ति किमनेन नकारमात्रमेव विदध्यात्। तस्मात् प्रकृतिवचनादेव यवयोरिति गम्यते, किं यवग्रहणेन इति? सत्यम्, एवं सुखार्थम्।

**ननु** प्रकृतिग्रहणमप्यनर्थकम्, असिद्धवद्भावेनैव सिद्धत्वात्? सत्यम्, इदं च सुखार्थम्। तर्हि गौरवनिरासार्थम् इति यवयोर्लोपे तु प्रकृतिरिति वचनाद् अर्थाद् आदौ लोप्ये भविष्यति किं लोपग्रहणेन? सत्यम्। अर्थवशात् प्राप्तस्य लोपस्य शब्दानुपात्तत्वाद् अप्राधान्यम्। तथा च सति प्रकृतिशब्देन प्रधानेन सह नवाशब्दस्य सम्बन्धः स्यादिति लोपग्रहणम्। ननु अन्तशब्दोऽत्रावयववचनः। अवयवश्चात्रायादेशस्वरूपस्तत् कथम् अयादिर्वर्तते? सत्यम्। अन्तशब्दोऽत्र धर्मवृत्तिरिति।

पदान्त इति विषयसप्तमीयम्, तुशब्दोऽत्र वाक्यभेदे, तेन प्रकृतिर्नित्यैव। अत एव उत्तरत्र नवेति न वर्तते। एतेनात्र यवौ लोप्याविति कृते अभिमतं सिध्यति। यदुत्तरत्र लोपग्रहणं तन्नवाधिकारनिवृत्त्यर्थमिति मूर्खप्रलपितम् अपास्तम्। तुशब्दो भिन्नवाक्ये,

सति लोपे तु प्रकृतिरित्यत्रानुवृत्तावुत्तरत्र अत एवानुवृत्तिरिति कथं तर्हि एवं न कृतमिति चेद् आस्तामेवं **सुहृदुपदेशः**। यथा सन्निवेशे तु न वैयर्थ्यमिति।

**अदस् सीत्यादि**। ननु कथमत्र त्यदाद्यत्वम्, विशेषविधित्वेनापवादत्वात् परत्वाच्च त्यदाद्यत्वं बाधित्वा सावौत्वस्य प्रवर्तनात्। तथा च "बाधयित्वा त्यदाद्यत्वं सावौश्चान्ते प्रवर्तते" इति पठति। अन्यथा आदावेव त्यदाद्यत्वे अदसः सिरित्यादि। ननु कथमत्र त्यदाद्यत्वं विशेषविधित्वेनापवादत्वात् परत्वाच्च **"त्यदाद्यत्वम्, स्त्रियाम् आदा"**(२।३।२९; ४।४९) इति कृतेऽदसोऽनवयवत्वात् कथम् अदस औत्वम् इत्यनिष्टरूपं स्यात्। अत्र **कश्चित्** त्यदाद्यत्वमित्यस्यानन्तरं बाधित्वेति पदमध्याहार्य्य पञ्जी युज्यते। तदेतत् सर्वमनुचितम्।

ननु **"सावौ सिलोपश्च"** (२।३।४०) इत्योकार एव विधीयताम्, ततश्च त्यदाद्यत्वेऽन्तस्य ओकारे **"ओकारे औ औकारे च"** (१।२।७) इत्यौकारे कृते सिध्यति, किमौकारकरणेनेति ? तस्माद् औकारकरणं बोधयति स्वरादेशपरिभाषाऽस्तीति परिभाषान्वर्थबलात् कृतं त्यदाद्यत्वम्, अदसः कृतत्यदाद्यत्वस्य सावौ सिलोपश्चेति प्रवर्तते इत्यवश्यं वक्तव्यम्। यत्तु स्त्रीलिङ्गे दूषणमुक्तं तदप्यसङ्गतम्, **"लिङ्गविशिष्टस्यापि ग्रहणम्"** (काला० परि० २५) इति वचनात्। असाविति साधने **"सावौ सिलोपश्च"** (२।३।४०) इत्योत्वे कृते सति **"स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवद्"** (काला० परि० १५) इत्यतः **"अकारे लोपम्"** (२।१।१७) इत्यकारलोप इत्यपि बोद्धव्यम्॥३९।

**[समीक्षा]**

'तय्+आहुः, तस्माय्+आसनम्, असाव्+इन्दुः' इस स्थिति में दोनों ही व्याकरणों के अनुसार विकल्प से पदान्तवर्ती य्-व् वर्णों का लोप होता है। लोपपक्ष में दीर्घ-गुणादि कार्य नहीं होते। इस प्रकार 'तयाहुः– त आहुः, तस्मायासनम्– तस्मा आसनम्, असाविन्दुः– असा इन्दुः' आदि दो-दो रूप सिद्ध होते हैं। इस प्रकार कार्य की दृष्टि से दोनों व्याकरणों में विषमता प्रतीत नहीं होती,. परन्तु जहाँ कलापकार ने लोप का वैकल्पिक निर्देश किया है, वहीं पर पाणिनि ने शाकल्य के मत में लोप दिखाया है। कलापकार ने इस लोपविधायक सूत्र में ही लोपपक्ष में प्राप्त सन्धि के निषेधार्थ प्रकृतिभाव कहा है, परन्तु पाणिनि य्-व् का लोप हो जाने पर दीर्घादि सन्धि के वारणार्थ उन्हें असिद्ध मानते हैं- पूर्वत्रासिद्धम् (८।२।१),

जिससे य्-व् का व्यवधान उपस्थित होता है और फलतः दीर्घादि सन्धि नहीं होती।

**[विशेष]**

सूत्र में य्-व् के लोप का कोई निमित्त नहीं बताया गया है। पाणिनीय व्याकरण में लोपविधायक **"लोपः शाकल्यस्य"** (पा० ८।३।१९) सूत्र में **"भोभगोअघोअपूर्वस्य योऽशि"** (पा० ८।३।१७) इस सूत्र से 'अशि' पद की अनुवृत्ति की जाती है, अतः निमित्त निश्चित हो जाता है। कलाप-सूत्रकार तथा वृत्तिकार आदि ने जो इसकी आवश्यकता नहीं समझी, उससे यह अनुमान किया जा सकता है कि पदान्त में 'य्-व्' आदिष्ट होकर तभी आते हैं जब स्वरवर्ण पर में होता है। किसी स्वर के परवर्ती न होने पर एकारादि के स्थान में अयादि आदेश नहीं होते और इस प्रकार पदान्त में य्-व् वर्ण नहीं मिल पाते। अतः 'स्वरे' यह निमित्तबोधक पद न होने पर भी लोप करने में कोई कठिनाई प्रतीत नहीं होती।

**[रूपसिद्धि]**

१. **त आहुः, तयाहुः**। तय्+आहुः (य्+आ)। पदान्तवर्ती य् का लोप होने पर प्रकृतिभाव हो जाने के कारण 'त आहुः' रूप निष्पन्न होता है। लोपाभावपक्ष में 'तयाहुः'।

२. **तस्मा आसनम्, तस्मायासनम्**। तस्माय्+आसनम् (य्+आ)। पदान्तवर्ती य् का लोप एवं उसका प्रकृतिभाव होने पर तस्मा आसनम् तथा लोपाभाव-पक्ष में तस्मायासनम्।

३. **पट इह, पटविह**। पटव्+इह (व्+इ)। पदान्तवर्ती व् का लोप तथा प्रकृतिभाव हो जाने पर पट इह। लोप न होने पर पटविह।

४. **असा इन्दुः, असाविन्दुः**। असाव्+इन्दुः (व्+इ)। पदान्तवर्ती व् का लोप, एवं प्रकृतिभावपक्ष में असा इन्दुः। लोप न होने पर 'असाविन्दुः' शब्दरूप सिद्ध होता है॥३९।

## ४. एदोत्परः पदान्ते लोपमकारः (१।२।१७)

**[सूत्रार्थ]**

पदान्त ए-ओ से परवर्ती अकार का लोप होता है॥४०।

## [दु० वृ०]

एदोद्भ्यां परोऽकारः [1]पदान्ते वर्तमानो लोपमापद्यते । तेऽत्र, पटोऽत्र । एदोद्भ्यामिति किम् ? तावत्र । पदान्तग्रहणं पदान्ताधिकारनिवृत्त्यर्थम् । तेन चितम्, स्तुतम् ॥४०।

## (दु० टी०)

**एदोत्०** । एच्च ओच्च एदोतौ, ताभ्यां पर इति पञ्चमीलक्षणस्तत्पुरुषोऽयम् । न च एदोतौ परौ यस्मादिति बहुव्रीहिः, एकारे ओकारे च ऐकारस्य औकारस्य च विषयत्वात् । न च पदमध्ये तौ असन्ध्यक्षरयोरस्य तौ तल्लोपश्चेति वचनात् । परग्रहणं वैचित्र्यार्थमेव । पदस्यान्तः पदान्तः इत्यन्तशब्द इह समीपवचन एव । यथा गुरोरन्ते वसतीति । अथवा पदान्ते यावेदोतौ ताभ्यां पर इति । **पदान्तग्रहणम्** इत्यादि । अन्यथा उत्तरत्र पदान्ताधिकारे सति 'चितम्, स्तुतम्' इत्यत्र व्यञ्जने यत्वं वत्वं च स्याद् अपदान्तत्वादिति ।

**ये** तु **"स्वरजौ यकारवकारावनादिस्थौ लोप्यौ व्यञ्जने"** (का०उ० परि०, सं० ३१) इति सूत्रं नाद्रियन्ते तेषामिदं व्याख्यानम् । येषां तु सूत्रमस्तीति दर्शनम्, तैः पदान्तग्रहणमधिकरणीयमेव ।'चितम्, स्तुतम्' इत्यत्र न व्यञ्जने इति पुनर्व्यञ्जनवचनाद् अपदान्तत्वेऽपि न सन्धिः । इदमिह पदान्तग्रहणम् अप्रधानयोरप्येदोतोर्विशेषणार्थम् । अन्यथा अकारस्यैव विशेषणं स्यात् । एकस्मिन्नाद्यन्तवदुपचाराद् 'अग्ने अ आगतः, पटो अ अत्र' इति । स्वरजौ यकारवकारौ पदान्तावनादिस्थौ लोप्यौ व्यञ्जन इति । स्वरे जातौ स्वरजौ – **"सप्तमीपञ्चम्यन्ते जनेर्डः"** (४।३।९१) । न आदौ तिष्ठत इति **अनादिस्थौ, "नाम्नि स्थश्च"** (४।३।५) इति कप्रत्ययः। स्वरजौ यकारवकारौ पदान्तावनादिस्थौ व्यञ्जने परे लोप्यौ भवतः।

अधि + उ + इन्दुः = **अध्विन्दुः** । उमीशमध्यारूढोऽध्युः, अध्युश्चासाविन्दुश्चेति विग्रहः । साधु + ई + उदयः, साधोरी श्रीस्तस्या उदय इति साध्व्युदयः । पटो + उ + आगतः = पट्वागतः । नारि + उ + अर्चा = नार्व्यर्चा । अव्ययमाचक्षाणो वृक्षवृश्चमाचक्षाणो यः स खलु **'अव्यय्, वृक्षव्'** एतावपि यकारवकारौ स्वरे सति जातौ

---

१. 'पदान्ते' इत्यस्य सम्बन्धः 'एदोद्भ्याम्' इति पदेन सह कर्तव्यः, अकारस्य पदान्तत्वानपेक्षितत्वात् । तस्मात् पदान्ते वर्तमानाभ्यामेदोद्भ्यां परोऽकारो लोपमापद्यते' इत्यर्थोऽवगन्तव्यः ।

यस्मादिनि लिङ्गस्येत्यादिना लोपस्य स्वर एव आरम्भकः इत्यनयोरपि लोपो भवति, अव्यगच्छति, वृक्षगच्छति, अव्यआस्ते ।प्रकृत्यधिकारोऽप्यत्र स्मर्तव्यः, तद्बलादनुक्तेऽपि स्वरे गम्यते व्यवस्थितवाधिकारादघोषे न भवति । 'अव्यय् करोति, वृक्षव् करोति' ।

यदि प्रक्रियाशब्दो लोकप्रयुक्तो दृश्यते, इनो लोपस्य परनिमित्तस्य स्वरादेशत्वात् पूर्वविधिं प्रति स्थानिवद्भाव इति ।**"य्वोर्व्यञ्जने"** (४।१।३५) क्विपि लोपो नास्त्येव । स्वरजाविति किम् ? अय्-धातुरयम्, अव्-धातुरयम् । यकारवकाराविति किम् ? पितृ + इ + उदयः = पित्र्युदयः ।अनादिस्थाविति किम् ? इ + उ + आगमः = य्वागमः । उ + इ + आगमः = व्यागमः । व्यञ्जन इति किम् ? दध्यत्र, मध्वत्र । पदान्त इति किम् ? विगणय्य विभाव्य गतः ॥४०।

## [वि० प०]

एदोत्परः । एदोद्भ्यां पर इत्यनेन पञ्चमीलक्षणस्तत्पुरुषोऽयमिति दर्शयति, न पुनरेदोतौ परौ यस्मादिति बहुव्रीहिः । तदा एकारे ऐकारस्य ओकारे औकारस्य च विषयत्वात् । पदान्तग्रहणमनुवर्तते एव पूर्वसूत्रादित्याह— **पदान्तग्रहण**मित्यादि । तेन 'चितम्, स्तुतम्' इत्यत्र **"न व्यञ्जने स्वराः सन्धेयाः"** (१।२।१८) इत्यनेन पदमध्ये सन्धिर्न भवतीति ॥४०।

## [क० च०]

**एदोत्०** । एकारे ऐकारस्य ओकारे च औकारस्य विषयत्वादिति । ननु पदमध्ये ऐत्वौत्वयोश्चरितार्थत्वात् पदान्तेऽनयोर्बाधकं कथन्न स्यात् ? नैवम् । पदमध्ये ओसि च, असन्ध्यक्षरयोरस्येत्यादिभिराघ्रातत्वात् । देवदत्त ए इत्यपदानुकरणस्य पदत्वाभावे एदोद् इत्यादिषु परेऽस्य सूत्रस्याप्रवृत्तौ सत्यामैदौतोश्चरितार्थत्वम् इति न वक्तव्यम् । अत्रापि पाणिनिदृष्टशकन्ध्वादित्वादकारलोपस्यानङ्गीकृतत्वात् । तथाहि— समानदीर्घनिषेधार्थमैत्वौत्वनिषेधार्थं च **"अतो गुणे"** (पा० ६।१।९७) इति **पाणिनि**सूत्रान्तरमुक्तम् ।

**अस्यार्थः** । पूर्वसूत्रादपदादिति वर्तते अकाराद् अपदान्तत्वाद् अति एति ओति, गुणे गुणसंज्ञके परे पूर्वपरयोः स्थाने पररूपं भवति । तेन गतिकारकोपपदानां सुबुत्पत्तेः प्राक्समासः । प्रायणं प्रध्ययनमिति अपदान्तत्वात् सिद्धमिति **शरणदेवः** । एवं च दत्ते इत्यपदानुकरणस्थानेऽपि दत्तापि दधेर्दत्तेति दत्तो दम इत्यादिप्रयोग एव भवतीति ।**अन्ये** तु बहुव्रीहिसमासे पदद्वयस्य लक्षणोपपत्तौ गौरवापत्तेस्तत्पुरुष एव साधीयान् इत्याहुः ।

अथ एदोद्भ्यामिति क्रियतां किमनर्थकमूलेन परग्रहणेन ? सत्यम् । **विचित्रा हि सूत्रस्य कृतिरिति । पदान्तग्रहणमित्यादि ।**

ननु कथम् अकारः पदान्ते वर्तमानः, स एव पदान्त इति ? सत्यम् । अन्तशब्दः सामीप्यधर्मवचनस्तत्र वर्तते इति न दोषः । कथमेतद्, यावता सामीप्यार्थे नियमाभावाद् एदोद्भ्यां पदान्ते वर्तमानो लोपं प्राप्नुवन् 'अहं निनय, अहं लुलव' इत्यादावपि प्राप्नोति । तथा सति अवयवार्थ एव सङ्गच्छते । नैवम्, पूर्वसूत्रात् पदान्तग्रहणमनुवर्तते । एतच्च एदोद्भ्यामित्यनेन संबध्यते । तेनायमर्थः– पदान्ते एदोद्भ्यां पर इति कथम् अपदान्ते प्राप्तिप्रसङ्गः ?

ननु पदान्तग्रहणं पदान्ताधिकारनिवृत्त्यर्थमिति वृत्तिः कथं सङ्गच्छते, यावता पूर्वसूत्रे अवयवार्थः पदान्तशब्द इहापि अवयवार्थ एव युज्यते, तत्कथमिह सामीप्यार्थः स्यात् । न च वक्तव्यम् **"पुरोऽग्रतोऽग्रेषु सर्तेः"** (४।३।२०) इति वचनात् पूर्वसूत्रीयपदान्तग्रहणस्य सामीप्यार्थत्वमिह व्याख्येयम् इत्युभयार्थत्वे प्रमाणाभावात् ।

अत्र **वैद्यः** – एदोद्भ्यामलोप इत्यास्ताम्, ततश्चानुवृत्तेन पदान्तग्रहणेन विशेषितत्वात् पदान्ताभ्यामेदोद्भ्यां पर इत्यर्थेऽभिमतं सिध्यति किमन्तग्रहणेनेति **शिष्यजिज्ञासाया**मन्तग्रहणस्य प्रयोजनं **वृत्तावुक्त**मित्याचष्टे । तन्न, एदोद्भ्यामिति सूत्रेऽकारस्य विशेष्यत्वे (प्राधान्यात्) प्रयोजनत्वात् तेनैव सहान्तशब्दसम्बन्धात् पूर्वोक्तदोषापत्तिरिति ।

**अन्ये** तु अनुवर्तमाने पदान्तग्रहणस्यैव सामीप्यार्थत्वं व्याख्येयम् । अन्यथा तत्रैव पदे इत्येवं विदध्यात् ! पदे परे अयादीनां यवलोपो भविष्यति, किमत्रान्तग्रहणेनेति । तथा च **कुलचन्द्रेणा**प्युक्तम् – अनुवर्तमानेन अन्तग्रहणेन शक्यमीदृशं व्याख्येयम् इत्याह- **पदान्त** इत्यादि । तदप्यसङ्गतम् । पूर्वसूत्रे पद इति निमित्तसप्तमीनिर्दिष्टत्वात् तत्रापि तस्यैव पदेऽकारलोपो भवतीत्यर्थः कथं न स्याद् इत्याशङ्का स्यादिति । ननु देवदत्त इत्यत्रैव वाक्यसंस्कारपक्षः स्यात् ।

किं च 'गवित्ययमाह' इत्यत्र पूर्वेण वलोपः स्यात्, त आहुरित्यत्र पदानुकरणे च अकारे परे यकारस्य लोपो न स्यात् । नन्वेवं पूर्वसूत्रेऽन्तशब्दोऽवयवार्थ एवेति कथं निश्चितमिति चेत्, यस्य पदान्ते वर्तमानौ यवौ श्रुतत्वात् तस्यैव पदस्य तौ ग्राह्यौ पदान्तरकल्पनायां गौरवादवयवार्थ एव निश्चित इति । एवं **"वर्गप्रथमा०"** (१।४।१) इत्यत्रापि अवश्यं पदान्तग्रहणमिति ।

**नव्याः** –पदान्तग्रहणमिति **वृत्तावन्**तग्रहणस्य सामर्थ्यम् उक्तम्, पदादित्यनेनैव साध्यस्य सिद्धिरित्याहुः। **वस्तुतस्तु** एदोतौ लोप्याकारपूर्वाविति कस्तेन पठ्यताम्। तथा च सति पूर्वसूत्रात् पदान्ताधिकाराद् एदोतौ पदान्तौ लोप्याकारस्य पूर्वौ भवत इति सूत्रार्थो भविष्यति लोपश्च। अत एव सूत्रबलादिति पदान्तग्रहणमित्याह-पदान्त इत्यादि वृत्तिः। हे अम्ब! इत्यत्रैव विवक्षितश्च सन्धिर्भवतीति वचनात् सन्धिर्भविष्यतीति **हेमकरः**। तन्न, **तन्त्रान्तरे**ष्वदृष्टत्वात् ॥४०।

**[समीक्षा]**

'ते+अत्र, पटो +अत्र' इस स्थिति में कलाप के निर्देशानुसार पदान्तस्थ ए-ओ से परवर्ती अकार का लोप हो जाता है। वर्तमान लेखनपद्धति के अनुसार उस लुप्त अकार के अवबोधार्थ रोमनलिपि के वर्ण ऽ को वहाँ योजित कर लिखा जाता है – तेऽत्र। इस चिह्न को सम्प्रति पूर्वरूपचिह्न कहते हैं। पाणिनीयव्याकरण के अनुसार **"एङः पदान्तादति"** (पा० ६।१।१०९) सूत्र द्वारा पदान्तवर्ती ए-ओ तथा अग्रिम ह्रस्व अकार के स्थान में पूर्वरूप एकादेश होता है। अर्थात् अकार वर्ण अपने से पूर्ववर्ती एकार अथवा ओकार में समाहित हो जाता है। उसके अवगमार्थ लगाए जाने वाले ऽ चिह्न को पूर्वरूपचिह्न कहा जाता है। इस प्रकार लिपि में समानता होने पर भी साधन-पद्धति में जो अन्तर दृष्ट है, तदनुसार प्रक्रिया-बोध में सरलता की दृष्टि से कलाप-प्रक्रिया को ही सरल कहना होगा, क्योंकि वस्तुतः अकार का वहाँ दर्शनाभाव ही होता है, अतः उसका लोप करना ही अधिक समीचीन है। क्योंकि यहाँ अन्तादिवद्भाव करने की कोई आवश्यकता उपस्थित नहीं होती है– "अन्तादिवच्च" (६।१।८५)।

**[रूपसिद्धि]**

१. **तेऽत्र**। ते+अत्र (ए+अ)। पदान्तवर्ती ए के बाद आने वाले अकार का लोप।

२. **पटोऽत्र**। पटो+अत्र (ओ+अ)। पदान्तवर्ती ओ के पश्चात् पठित अकार का लोप ॥४०।

## ४१. न व्यञ्जने स्वराः सन्धेयाः (१।२।१८)

**[सूत्रार्थ]**

व्यञ्जनवर्ण के पर में रहने पर स्वरवर्णों में कोई सन्धि नहीं होती है ॥४१।

## [दु० वृ०]

न खलु व्यञ्जने परे स्वराः सन्धानीया भवन्ति। देवीगृहम्, पटुहस्तम्, मातृमण्डलम्, जले पद्मम्, रैधृतिः, वायो गतिः, नौयानम्। **नञा निर्दिष्टमनित्यम्** (काला० परि० सू० ३७)। तेन पित्र्यम्, गव्यूतिः। अध्वमाने संज्ञेयम् ॥४१।

**॥इति दौर्गसिंह्यां वृत्तौ प्रथमे सन्धिप्रकरणे द्वितीयः समानपादः समाप्तः॥**

●

## [दु० टी०]

न व्यञ्जने०। इह **"तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ"** (१।१।४) इत्युक्तम्. अतोऽन्योऽसवर्ण इत्यसवर्णनिबन्धनानि यत्वादीनि व्यञ्जने प्राप्नुवन्तीति प्रतिषेधोऽयम्। स्वभावादसवर्णशब्दो हि विसदृशवचन इति पर्युदासेन नञा न सिध्यति। ननु तत्रैव स्वर इति किमिति न कृतम् इति चेत्, न। **नञा निर्दिष्टमनित्यमित्यादि।** तेन ऋकारस्य तद्धिते ये सन्धिरेव पित्र्यमिति सिद्धम्। गव्यूतिरिति अध्वमान इति अध्वमानं परिच्छेदः क्रोशद्वयमित्यर्थः। संज्ञेयं लोकोपचारादेव सिद्धा, नञोऽनित्यत्वादिति स्वरग्रहणं किमर्थं व्यञ्जनानां परगमननिषेधः स्यादिति। अथ व्यञ्जने परे पूर्वस्य सन्धाने निषिध्यमाने कथं परगमननिषेधः। तर्हि ज्ञानभुन्नाथो वा दृशन्नयनमिति **"पदान्ते धुटां प्रथमः"** (३।८।१) न स्यात्। प्रकरणबलमपि कष्टमिति। सन्धीयन्ते इति **सन्धेयाः**। **"आत् खनोरिच्च"** (४।२।१२) इति यप्रत्ययः। सन्ध्याश्रयकार्याणि न भवन्तीत्यर्थः। एवं तर्हि नञ्मात्रेणाप्यभिमतसिद्धिरिति चेत्, नैवम्। सुखप्रतिपत्त्यर्थम् ॥४१।

**॥इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां प्रथमे सन्धिप्रकरणे द्वितीयः समानपादः समाप्तः॥**

●

## [वि० प०]

**न व्यञ्जने०।** सन्धीयन्ते इति **सन्धेयाः**। सम्पूर्वो डुधाञ्। **"आत्खनोरिच्च"** (४।२।१२) इति यप्रत्ययः, आकारस्येकारः। **"नाम्यन्तयो०"** (३।५।१) इत्यादिना गुणः। स चायं कर्मसाधन इति पर्यायेण अर्थं दर्शयति– सन्धानीया इति। सन्धिलक्षणकार्यभाजो न भवन्तीत्यर्थः। **देवीगृहम्** इत्यादि। देव्या गृहमिति यथायोगं विग्रहः कार्यः। वायो गतिरिति पटुशब्दवद्वायुशब्दस्य रूपसिद्धिः। एतेषु **"इवर्णो यमसवर्णे"** (१।२।८) इत्यादिभिरिति यत्वादयो न भवन्ति।

ननु सवर्णव्यपदेशः स्वरस्यैव, तदपेक्षया च असवर्णे स्वरे यत्वादिकं भविष्यति न व्यञ्जने। किमनेनेति चेत्, नैवम्। सवर्णाद् अन्योऽसवर्ण इति स्वभावाद्

विसदृशवचनोऽयमसवर्णशब्दः प्रसज्यार्थवृत्तिरिति व्यञ्जनेऽपि यत्वादिकं स्यात्। यद्येवम् "**इवर्णो यमसवर्णे**" (१।२।८) इत्यत्र स्वरग्रहणं क्रियतामित्याह– **नञा निर्दिष्टमनित्यम्** (काला० परि० ३७) इत्यादि। तेन पित्र्यमिति पितृशब्दस्य तद्धितयकारे सन्धिरिति। **गव्यूतिरिति।** गवां यूतिर्गव्यूतिः "**सातिहेतियूतिजूतयश्च**" (४।५।७३) इति यूतिशब्दो निपातितः। अध्वनो मानं परिच्छेदः क्रोशद्वयम्। तस्मिन् संज्ञात्वेन गव्यूतिशब्दः प्रसिद्धः इत्यर्थः। संज्ञेयमिति ब्रुवाणः संज्ञाबलादेव सन्धिकार्यम्, न पुनरनित्यत्वबलाद् इति दर्शयति। यद्येवम्, नञ्मात्रमेव कथं न कृतमिति चेत् ? सत्यम्, सुखार्थमेतदिति ॥४१।

**॥इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां प्रथमे सन्धिप्रकरणे द्वितीयः समानपादः समाप्तः॥**

●

## [क० च०]

**न व्यञ्जने०** ।**नन्वि**त्यादि। ननु असवर्णे स्वरे यत्वादिकं भविष्यतीति अत्र असवर्णे स्वरे इति कथमुक्तम्, यतः सवर्णस्तावत् समानस्तदपेक्षया असवर्णे यत्वादिकं भवत् समान एव निमित्ते स्यात्। एतस्मिंश्च दध्येतदित्यादि न सिध्यतीति, नैवम्। सवर्णादन्योऽसवर्ण इति स्वभावाश्रयणेनैव एतस्यापि निराकृतत्वात्। तत्रैवेति यत्वविधावित्यर्थः। नञा निर्दिष्टम् अनित्यमिति। तेन "**ऋतस्तद्धिते यः**" इति न वक्तव्यम्। पितुरागतम् इत्यर्थे यो दृश्यते। 'पित्र्यम्, सौभ्रात्र्यम्'। "**भावे यण्**" एतेन पित्र्यम् इति निरुक्तलक्षणेनैव सिद्धम्, किमनेन। न ह्येकोदाहरणं प्रति योगारम्भं प्रयोजयतीति पूर्वपक्षो निरस्तः।

**वस्तुतस्तु** मूर्खप्रलपित एवायं पूर्वपक्षः, यद् बहूदाहरणसम्भवे न ह्येकोदाहरणं प्रति योगारम्भः कल्प्यते, व्याप्तिन्यायादिति। तथा च 'षण्णाम्' इत्येकोदाहरणसिद्ध्यर्थं "**षडो णो ने**" (२।४।४३) इति सूत्रम्। ननु यत्वविधौ स्वरग्रहणेनैव सिद्धे नञर्थमेव यद्येतद्वाक्यान्तरमङ्गीक्रियते, तदा तत्र साक्षात् स्वरशब्दमपनीय "**इवर्णो यमव्यञ्जने**" इति कृत्वा नञ्मात्रमेव स्वरपरिग्राहकमुच्यताम्, किमनेन ? एतदेव मनसि कृत्वाह– **नञ्मात्रमेव न कथं कृतमिति**। नच "**नामिपरो रम्**" (१।५।१२) इत्यत्रासवर्णग्रहणस्य प्रयोजनं वक्तव्यम्, तस्य कथं सिद्धिरिति वाच्यम्, नामिपरग्रहणेनापि तस्य व्याख्यातुं शक्यत्वात्। अथवा तत्र 'अव्यञ्जनपरः' इति वक्तव्यम्। तदिह परग्रहणादेतादृशव्याख्यासिद्धिरिति भावः। यदि 'इवर्णो यम् अव्यञ्जने' इति क्रियते, तदा दधीति निरपेक्षं यत्वं स्यादिति **हेमकरः**।

तथाहि – ननु असवर्णग्रहणस्थितौ निरपेक्षं यत्वं कथन्न स्यात् । नैवम्, असवर्णग्रहणाभावे तु ओकारौकारयोर्नानुवृत्तिर्भिन्नयोगात् । 'न व्यञ्जने' इति वचनाद् विशेषविधिभिराघ्रातत्वात् सवर्णे च प्राप्तिर्नास्त्येव, यदसवर्णग्रहणं तदसवर्ण एव निमित्ते भवतीति प्रतिपत्त्यर्थम् । असति च **"न व्यञ्जने स्वराः सन्धेयाः'** (१।२।१८) इति सूत्रे अव्यञ्जनग्रहणाभावे, ओकारौकारयोरनुवृत्तिः प्राप्ता, तन्निरासार्थम् अव्यञ्जनग्रहणं कथं सनिमित्ततां साधयति । ततश्च इवर्णो यमापद्यते अव्यञ्जने । व्यञ्जने न भवतीति सूत्रार्थे स्वरनिमित्ते निर्निमित्ते च स्यात्, निमित्तविशेषानाश्रयणात् । एतत्तु प्रसज्यपक्षे । तदयुक्तम् । एतादृशसूत्रार्थे वाक्यद्वयापत्तौ गौरवापत्तेरिति । पर्युदासपक्षे व्यञ्जनभिन्ने परे इवर्णो यमापद्यते इति सूत्रार्थे एकवाक्येनैवार्थसङ्गतिः ।

तथा च **"सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते"** इति । ननु किमर्थमेतद् उच्यते । नञ्मात्रेऽपि सूत्रे व्यञ्जने प्रतिषेधो विज्ञायते । "ओदन्ताः" इत्यादिना स्वरे प्रकृतिविधानात् । इदमप्यसङ्गतं समानदीर्घनिषेधार्थम् **"ओदन्ताः"** (१।३।१) इति वचनं भविष्यति । इदन्तु वचनम् इवर्ण इत्यतः असवर्ण इत्यधिकाराद् असवर्णे चरितार्थं भवतु, तथापि ओदन्तग्रहणमनर्थकम् । न ह्यत्र समानदीर्घादिप्रसङ्गोऽस्ति, येन प्रकृतिर्विधातव्या, तस्मादेतदेव ज्ञापनार्थं भविष्यति । नैवम्, नो अत्रेत्यादौ अलोपप्रतिषेधेनैव सार्थकत्वाद् वक्ष्यमाणवचनद्वयमपि अर्थायातदीर्घप्रतिषेधार्थमिति । तर्हि "अनौ[1]" इति किमर्थम्, नह्योकारस्य दीर्घप्रसङ्गोऽस्तीति । नैवम् । अनौ द्विवचनं स्वरे प्रकृत्या तिष्ठति, न औकारस्वरूपमिति व्यावृत्त्यभाव एवेत्यनेन सूत्रेण प्राप्तोऽपि प्रतिषेधो न भवतीति, एतदर्थं स्यात् । **वस्तुतस्तु** अनौग्रहणं सादृश्यार्थमेव, अन्यथा सामान्येन प्रतिषेधो भवन् अयजावह्यावाम् इत्यत्रापि स्यादिति ॥४१।

**॥इति कलापचन्द्रे प्रथमे सन्धिप्रकरणे द्वितीयः समानपादः समाप्तः॥**

●

## [समीक्षा]

'देवी + गृहम्, पटु + हस्तम्' इत्यादि स्थलों में पाणिनीय व्याकरण के अनुसार इवर्णादि के स्थान में यकारादि आदेश प्राप्त ही नहीं होते, क्योंकि **"इको यणचि"** (पा० ६।१।१७) सूत्र में स्पष्टतया 'अच्' शब्द का पाठ किया गया है । इसके अतिरिक्त **"तस्मिन्निति निर्दिष्टे पूर्वस्य, तस्मादित्युत्तरस्य"** (पा० १।१।६६, ६७) परिभाषासूत्र भी पठित हैं । कातन्त्रकार का सूत्र है – **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) । यहाँ 'स्वरे' शब्द का पाठ नहीं है । ऐसा होने पर यदि

1. द्विवचनमनौ (१।३।२) ।

सवर्णव्यवहार स्वर के लिए ही मान लिया जाए, क्योंकि सवर्णसंज्ञा स्वरवर्णों की ही होती है तो सवर्णसंज्ञक स्वरों से भिन्न अर्थात् असवर्ण स्वरों के परवर्ती होने पर यकारादि आदेश होंगे और व्यञ्जनवर्णों के पर में रहने पर नहीं। इस स्थिति में तो प्रकृत सूत्र की कोई आवश्यकता प्रतीत नहीं होती, परन्तु कुछ विद्वान् असवर्णशब्द का अर्थ करते हैं – स्वभावतः विसदृश (विषम)। इस अर्थ को स्वीकार कर लेने पर असवर्ण व्यञ्जनवर्ण के भी परवर्ती होने पर यकारादि आदेश प्राप्त हो सकते हैं, उनके वारणार्थ इस सूत्र को बनाना आवश्यक है।

इस सूत्र के कारण 'देवी+गृहम्' में **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) सूत्र से ईकार का यकारादेश, 'पटु+हस्तम्' में **"वमुवर्णः"** (१।२।९) सूत्र से 'उ' को 'व्' आदेश, 'मातृ+मण्डलम्' में **"रम् ऋवर्णः"** (१।२।१०) सूत्र से ऋ को र् आदेश, 'जले+पद्मम्' में **"ए अय्"** (१।२।१२) सूत्र से ए को अय् आदेश, 'रै+धृतिः' में **"ऐ आय्"** (१।२।१३) सूत्र से ऐ को आय् आदेश, 'वायो+गतिः' में **"औ आव्"** (१।२।१५) सूत्र से औ को आव् आदेश नहीं होता है।

व्याख्याकारों के अनुसार आचार्य शर्ववर्मा ने इस सूत्र की रचना केवल मन्दबुद्धि वाले शिष्यों के ही अवबोधार्थ की है। अतः इस पर आक्षेप नहीं किया जा सकता।

यह भी ध्यातव्य है कि 'पित्र्यम्, गव्यम्, गव्यूतिः' आदि ऐसे शब्दो में भी सन्धि होती है, जिनमें व्यञ्जनवर्ण ही परवर्ती हैं। पाणिनीय व्याकरण में 'र्-अव्' आदेशों के विधानार्थ पृथक् सूत्र बनाए गए हैं। कलापव्याकरण में **'नञा निर्दिष्टमनित्यम्'** (काला० परि० ३७) परिभाषा के बल से इस विधि को अनित्य मानकर रकारादि आदेश किए गए हैं।

**[रूपसिद्धि]**

समीक्षा के अन्तर्गत प्रस्तुत विवरण के अनुसार 'देवी+गृहम्' आदि में स्वरसन्धि का निषेध हो जाता है तथा 'पित्र्यम्' (पितृ+यम्), गव्यूतिः (गो+यूतिः) में **"नञा निर्दिष्टमनित्यम्"** (काला० परि० ३७) परिभाषा के अनुसार क्रमशः **'रमृवर्णः'** (१।२।१०) से रकारादेश तथा **"ओ अव्"** (१।२।१४) से अवादेश उपपन्न हो जाता है ॥४१।

**॥इति प्रथमे सन्धिप्रकरणे समीक्षात्मको द्वितीयः समानपादः समाप्तः॥**

# अथ प्रथमे सन्धिप्रकरणे तृतीयः ओदन्तपादः

## ४२. ओदन्ता अ इ उ आ निपाताः स्वरे प्रकृत्या (१।३।१)

**[सूत्रार्थ]**

स्वरवर्ण के परवर्ती होने पर ओकारान्त निपात तथा अ, इ, उ, आ इन चार निपातों का भी प्रकृतिभाव होता है ।।४२।

**[दु० वृ०]**

ओदन्ता निपाता अ-इ-उ-आश्च केवलाः स्वरे परे प्रकृत्या तिष्ठन्ति । नो अत्र, अहो आश्चर्यम्, अथो एवम्, अ अपेहि, इ इन्द्रं पश्य, उ उत्तिष्ठ, आ एवं किं मन्यसे, आ एवं नु तत् । एषामिति किम् ? नवाउ । अन्तग्रहणमकारादीनां केवलार्थम्, तेन चेति, इतीह, नन्विति, वेति । निपाता इति किम् ? पट इह, ईषतुः, ऊषतुः, आटतुः ।।४२।

**[दु० टी०]**

**ओदन्ताः** । ओत् अन्तो येषामिति बहुव्रीहिः, न पुनरोतोऽन्ता ओदन्ता इति तत्पुरुषः, इहाश्रुतत्वात् । अथ समानाधिकरणम् ओदन्ता अ-इ-उ-आ निपाता इति चेत्, तदा 'अहो आश्चर्यम्, अ अपेहि' इत्यादिष्वेव प्रकृतिरनिष्टरूपा स्यात् । तर्हि किमन्तग्रहणेन, येन विधिस्तदन्तस्येति ओदन्ता इति गम्यते । सत्यम् । **अन्तग्रहण**मित्यादि । अथ **"अर्थवद्ग्रहणे नानर्थकस्य"** इत्यकारादीनाम् ओदन्तानां ग्रहणं न भविष्यति, तर्हि केवलोऽप्योकारोऽस्ति प्रकृतिः पुनरिहाद्यन्तवदुपचारात् । यथा ओ इति । तदयुक्तम् । भाषायामेकस्वरा अ-इ-उ-आ एव दृश्यन्ते । अन्यथा निपातेन स्वरं विशेष्य स्वरो निपात इति विदध्यात् । तदन्तग्रहणं ज्ञापयति – **'अर्थवद्ग्रहणे नानर्थकस्य'** (कात० परि० सू० ४) इत्यनित्येयं परिभाषा । तेन 'तेजस्वी, पयस्वी' इत्यादि सिद्धम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्, तेन अतिवोऽस्ति, वोऽभवद् इति विकृतिरिति ।

एवम् अगौर्गौः समपद्यत इति गोऽभवदित्यत्र प्रकृतिः प्राप्नोति । नैवम्, ओदन्तोऽपि च्वौ सति निपातोऽयमिति गौण एव । यथा गौरनुवध्योऽजोऽग्नीषोमीयः

इति न वाहिकोऽनुबध्यत इति किं पुनर्गौणम्, किं वा मुख्यम्। सर्व एव हि शब्दाः प्रवृत्तिनिमित्तव्यवहिता इत्याह नित्यशब्दार्थसम्बन्धवादी –

**श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते।**

**तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम्॥इति।**

तर्हि 'गौर्वाहीकोऽस्ति, गां वाहीकमानय' औत्वम् आत्वं च न स्यात्, अर्थाश्रयो हि शब्दानां गौणमुख्यव्यवहारो वाक्यव्यवस्थायामेव सम्भवति, शब्दमात्राश्रितम् औत्वम् आत्वं च स्यादेव। अ इ उ आ इति।

**ईषदर्थे क्रियायोगे मर्यादाभिविधौ य आ।**

**सानुबन्धः स विज्ञेयो वाक्यस्मरणयोर्न तु॥**

निरनुबन्धैः साहचर्यात् सानुबन्धस्याङो विकृतिरेव। आ=ईषद् उष्णम् ओष्णम्। **क्रियायोगे** तु आ इहि = एहि। **मर्यादायाम्** आ उदकान्ताद् ओदकान्तात्। **अभिविधौ** आ अहिच्छत्रात् आहिच्छत्रात्। आ एवं मन्यसे इति वाक्यम्। इह हि निरनुबन्धो निरर्थकोऽयम् आ-निपातः प्रयुक्तो वाक्यार्थो वा। वाक्यं च पूर्वं प्रक्रान्तस्य वाक्यस्याविपरीतकरणे वर्तते। नैवम्, यत् त्वया प्राङ् मतं साम्प्रतं किं तत् त्वमेव मन्यसे इत्यर्थः। आ एवं नु तदिति स्मृत्यर्थः, एवं नु तदित्यनेन आविर्भाव्यते। निश्चितः पात एषामिति निपाताः। अर्थाभिधानेषु स्वक्रियायामसमर्थाश्चादयोऽव्ययाः सिद्धाः। तथा चाह – नामाख्यातप्रयोगेष्वर्थाद् अभिन्ना निपतन्तीति **निपाताः**।

ओदन्ता निपाता अ-इ-उ-आश्च निपाता इत्युभयं विशेषणम्। विशेषणविशेष्य-भावस्य प्रयोक्तुरायत्तत्वात्। स्वरे परे प्रकृतिरिति वचनात् पूर्वस्मात् स्वराद् विकृतिरेव। दधि इ अस्य दधी अस्य रुजति। जानु उ अस्य जानू अस्य क्षिपति। सा अ आगता सा आगता। 'परनिमित्तादेशः पूर्वस्मिन् स एव (कात० परि० वृ० ४४) इति प्रकृतिर्न विहन्यते। प्रकृत्येति करण एव तृतीया भवतेर्गम्यमानत्वात्॥४२।

**[वि० प०]**

ओदन्ताः। ओद् अन्तो येषामिति बहुव्रीहिः। न पुनः ओतोऽन्ता ओदन्ता अ इ उ आ इति तत्पुरुषः। तदा अहो अ अपेहि, अथो इ इन्द्रं पश्य, अहो उ उत्तिष्ठ, अथो आ एवं किं मन्यसे ? इत्यादिष्वेव प्रकृतिभावः स्यात्। 'अ अपेहि, इ इन्द्रं पश्य' इत्यादिषु न स्यात्। इष्टश्चैवमादीनामपि प्रकृतिभावः। तस्माद् बहुव्रीहिरे-

वायमिति। अ-इ-उ-आश्चेति चकारेण न केवलमोदन्ता निपाता अ-इ-उ-आश्च निपाता इति सूच्यते। एतच्च विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वाल्लभ्यते। आकारो हि द्विविधः सानुबन्धो निरनुबन्धश्च। यथोक्तम्–

**ईषदर्थे क्रियायोगे मर्यादाभिविधौ च आ।**

**सानुबन्धः स विज्ञेयो वाक्यस्मरणयोर्न तु॥**

तत्र निरनुबन्धैरकारादिभिः साहचर्याद् आकारोऽपि निरनुबन्धः प्रतिपत्तव्यः। स च वाक्यस्मरणयोरेव वर्तमानो निरनुबन्धस्तस्यैव प्रकृतिभावं दर्शयति। आ एवं किं मन्यसे इत्येतद् वाक्यम्, एतस्मिन्नाकारो निरनुबन्धो वाक्यालङ्कारमात्रे प्रयुक्तः। अथवा वाक्यस्मरणयोरित्यत्र वाक्यशब्देन वाक्यार्थ उक्तः, ऊभिधेये अभिधानोपचारात्। तेन वाक्यार्थे स्मरणे च वर्तमान आकारो निरनुबन्ध इत्यर्थः। वाक्यं च पूर्ववाक्यार्थाविपरीतकरणे वर्तते। यत् त्वया प्राङ् मतं तत् किमिदानीं मन्यसे इत्यर्थः। अस्मिन् वाक्यार्थे द्योतकत्वेनाकारो वर्तते। 'आ एवं नु तत्' इत्यनेन स्मरणार्थः कथ्यते। नवा उ इति। नवै शब्दोऽयं निपातः ऐकारान्तत्वादेषां मध्ये न भवतीति। सन्धावायादेशे कृते **"अयादीनां यवलोप०"** (१।२।१६) इत्यादिना यलोपः। अथ किमर्थम् अन्तग्रहणं तद् इत्युक्ते **'येन विधिस्तदन्तस्य'** (काला० परि० ५) इति ओदन्ता इति गम्यते। तदयुक्तम्। अकारादीनामपि तदन्तता स्याद् इत्याह– **अन्ते**त्यादि। एतदेवान्तग्रहणं बोधयति– अत्र सूत्रे **'येन विधिस्तदन्तस्य'** (काला० परि० ५) इति नाद्रियते। अत एव सूत्रार्थ – विवरणे अ-इ-उ-आश्च केवला इति केवलग्रहणं युक्तम्।

ननु चार्थवद्ग्रहणे नानर्थकस्य इति न्यायात् तदन्तानामकारादीनां ग्रहणं न भविष्यति, किमन्तग्रहणेनेति। यद्येवम् ओदन्तोऽपि तदन्तः कथमनर्थको गृह्यते। अथ अर्थवान् ओकारः केवलो न संभवति, अतस्तदन्तस्यैवानर्थकस्य ग्रहणं भविष्यति। तदयुक्तम्, तस्यापि केवलस्य संभवात्। यथा ओ इति। सिद्धान्ते तु कथमस्य प्रकृतिभाव इति चेत्, आद्यन्तवद्भावात्। अन्तग्रहणेन विना अस्यैवार्थवत्त्वात् प्रकृतिभावः स्याद् **न तदन्तस्येति।**

नैतदेवम्। भाषायां केवला अ इ उ आ एव दृश्यन्ते, न त्वोकार इति। अन्यथा यद्येषोऽपि केवलो विद्यते, अस्य प्रकृत्या भवितव्यम्। तदा अकारादिग्रहणमपनीय स्वरे-निपाताः स्वरे प्रकृत्येति सूत्रे कृते पञ्चानामेव केवलानां प्रकृतिभावो भविष्यतीति,

तस्मादकारादिग्रहणमाचक्षाणो बोधयति – भाषायाम् अ इ उ आ एव केवला विद्यन्ते, न त्वोकार इति। अतोऽस्य तदन्तस्यैव ग्रहणं भविष्यति, किमन्तग्रहणेनेति ? सत्यमेतत्। अन्तग्रहणम् **'अर्थवद्ग्रहणे नानर्थकस्य'** (काला० परि० ७) इत्यनित्यत्वं ज्ञापयति, तेन 'तेजस्वी – पयस्वी' इत्यादयः सिद्धाः। अन्यथा इनोऽर्थवद्ग्रहणे कथं विन्-प्रत्ययस्यैकदेशस्यानर्थकस्य ग्रहणम्, "इनृहन्पूषार्यम्णां शौ च" (२।२।२१) इत्यनेन दीर्घः स्यात्। एवमन्यत्रापि प्रयोगानुसारेणानित्यत्वम् ऊहनीयम्।

**निपाता** इत्यादि। इषु इच्छायाम् (५।७०), उष दाहे (१।२२९), अट पट (१।१०२) इत्यादि दण्डको धातुः। सर्वत्र परोक्षाया अतुस्। **"चण् परोक्षा०"** (३।३।७) इत्यादिना द्विर्वचनम् अभ्यासलोपश्च। अटोऽभ्यासे **"अस्यादेः सर्वत्र"** (३।३।१८) इति दीर्घत्वम्। एतेषु स्वरादेशसमानलक्षणदीर्घादयो भवन्त्य-निपातत्वात्॥४२।

**[क० च०]**

**ओदन्ताः**। अहो अ अपेहि इति। ननु कथम् एतद्, यावता ओकाराद् **एदोत्पर०** (१।२।१७) इत्यादिना अकारलोपः प्राप्तः। "अहो इ इन्द्रं पश्य' इत्यत्र ओकारस्य चावादेशे कृते ओतोऽन्ता अ इ उ आ एव न सम्भवन्ति, कुतोऽत्र प्रकृतिरिति। नैवम्, ओदन्ता इति विशेषणादकारलोपं प्रत्यपि प्रकृतिभावः। कथमन्यथा ओतोऽन्ता अ इ उ आः स्युरिति **कुलचन्द्रः। अन्ये** तु यस्मिन् समये प्रकृतिर्विधीयते, तस्मिन्नेव ओदन्तानामिति को नियमः। यदा कदाचिद् ओदन्तानामपि भवतीति ओकारस्यावादेशो भवत्येव – 'अहवि इन्द्रं पश्य' इति। इकारस्य प्रकृतिविधानादेव न लोपः। अन्यथा ओकारात् कस्य प्रकृतिर्विधातव्या इति। यत्तु **पञ्जीकृता** 'अहो इ इन्द्रं पश्य' इति प्रकृतिर्दर्शिता, तत्तु सन्धिस्थानोपदर्शनार्थमेव। न त्वस्मिन् पक्षे ओकारस्य प्रकृति-रित्याहुः। तत् तुच्छम्, अनर्थकानुकरणस्य लिङ्गसंज्ञाविरहात् पदत्वाभावे 'गो अ आह' इत्यत्र अवादेशे 'गव आह' इत्यत्रैवाकारस्य प्रकृतिभावस्य उपपत्तौ ओकारेण ज्ञापयितुमशक्यत्वात्। यदि तु अवादेशे सति सम्प्रति नास्त्योकार इति मन्यसे, तदा अहवि इन्द्रं पश्येत्यत्रापि समानतेति दिक्।

ननु विशेषाभावादेतदेव कथं न स्यादित्याह – **इष्टश्चैवमादीनामित्यादि।** चकारोऽत्रावधारणार्थ इष्ट एवेत्यर्थः। नहि इष्टार्थं क्रियमाणं शास्त्रमनिष्टाय परिकल्पत इति भावः। तथा चोक्तम् – **'व्याख्यानतो विशेषार्थप्रतिपत्तिर्नहि**

**सन्देहादलक्षणम्'** (कालापपरि० ८८) इति। व्याख्यानाद् आचार्यपारम्पर्यादिति **शरणदेवः**। व्याप्तिबलान्न तत्पुरुष इति **कुलचन्द्रः**। **नव्यास्तु** ओकारात् परे साक्षाद् अ इ उ आ न सम्भवन्तीति, एतदेव बहुव्रीहौ बीजम्। न तु तत्रापि प्रकृतिर्ज्ञापनीया, अन्यथा सिद्धौ ज्ञापकस्यान्याय्यत्वादित्याहुः। यच्च ओकारादिति सिद्धे यदन्तग्रहणं तद् बहुव्रीह्यर्थमिति तन्नास्मिन् पक्षेऽन्तग्रहणस्य अकारादीनां केवलार्थतया व्याख्यातुं शक्यत्वात्। ओदन्ताः केवला अ इ उ आ, इति अहो चेतीत्यत्रैव व्यावृत्तिः।

ननु बहुव्रीहिपक्षेऽपि ओदन्ता इति अ इ उ आ इत्येषां विशेषणं स्यात्। ओदन्ता येषामकारादीनामिति। ततश्च 'अ ओकारं पश्य' इत्यादावेवास्य विषयः स्यादिति। नैवम्, विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वात्। स्वरग्रहणमपनीय ओतीत्यकरणाच्च। ननु स्वरे प्रकृतिः स्वराद् विकृतिरिति **टीकायां** स्वरग्रहणस्य यत् फलमुक्तं स्वरग्रहणाभावे कथं तन्न स्यात्। नैवम्, ओतीति कृतेऽपि तद्व्याख्यानस्य कर्तुं शक्यत्वादिति। **तथा चोक्तम्** इत्यादि। मर्यादाभिविधाविति समाहारेऽपि न निवृत्तिः श्लोकत्वादिति **कुलचन्द्रः**।

**वस्तुतस्तु** मर्यादासहितोऽभिविधिरिति मध्यपदलोपी समासः। **ईषदर्थे**– आ उष्णम् ओष्णम्। **क्रियायोगे**– आ इहि एहि। **मर्यादायाम्**– आ उदकान्तात् ओदकान्तात्। **अभिविधौ**– आ अहिच्छत्रात् आहिच्छत्रात् (अहिच्छत्रं नाम नगरम्)। निरर्थकस्य प्रयोग एव नास्तीत्याशङ्क्य आकारस्य सार्थकत्वं प्रतिपादयन्नाह– **अथवेति**। यद् वा, ननु पूर्वमुक्तं वाक्ये कथमिदमुच्यते वाक्यालङ्कार इत्याह– **अथवेति**। ननूक्तान्यप्रकारवाचित्वाद् अन्यथाशब्दादेव यद्येषोऽपि केवलो विद्यते इत्यर्थो गम्यते। अत उक्तार्थमिदमिति। नैवम्, अभिप्रायापरिज्ञानात्। अन्यथाशब्देनात्रान्तग्रहणस्यान्यथात्वं बोध्यते, नतु पूर्वोक्तस्य। अन्तग्रहणमन्तरेण इत्यर्थः।

ननु निपातग्रहणस्य व्यावृत्तिरभ्यासे दर्शिता। कथं विष्ण्वादिवाचकानामकारादीनामपि सम्भवात्। नैवम्। अत्र अन्तग्रहणमकारादीनां केवलार्थमित्युक्तम्। ततश्च यत्र व्यपदेशिवद्भावेनापि केवलत्वं व्याहन्यते। तत्रापि नास्य सूत्रस्य विषयः। यत्तु 'अ अपेहि' इत्युदाहृतं तन्निपातग्रहणस्य स्थितौ अन्यत्रासम्भवाद् असति निपातग्रहणेऽभ्यासविषयमेव सूत्रं सम्भवति। अत एव अकारस्य न प्रत्युदाहृतम्, अभ्यासेऽकारस्यासम्भवात्। न च वक्तव्यम् अभ्यासेऽपि व्यपदेशिवद्भावो निवार्यतामिति केवलशब्दस्यासहायार्थत्वादिति **कश्चित्**। तन्न, अभ्यासेऽपि व्यपदेशिवद्भावस्य दृष्टत्वात्।

कथम् अन्यथा 'इयेष' इत्यत्र इवर्णोवर्णान्तस्य विधीयमान इयुवादेश इकारमात्रस्य स्यादिति। किञ्च व्यपदेशिवद्भावे न अकारादीनां केवलत्वं व्याहन्यते, किन्तु व्यपदेशान्तरमारोप्यते। नहि माणवकस्य वह्नित्वारोपो माणवकत्वं व्याहन्तीति। अतस्तदाश्रितमेव कार्यं भवत्येव, कुतोऽत्र बाधकः।

**वस्तुतस्तु** केवलार्थमित्यनेन तदन्तविध्यभावोऽभिप्रेतः। ततश्च व्यपदेशिवद्भावोऽपि सुदूरपराहत एव। ईषतुः, ऊषतुः इत्यभ्यासे कथं दर्शितमिति पूर्वपक्षोऽपि फलशून्य एव विशेषाभावात्। अत्र च अकारं प्रति निपातविशेषणस्य प्रयोजनम्– हे अ आटतुरित्यादौ वेदितव्यम्। कथन्तर्हि वृत्तौ नोक्तमिति चेत्, कतमोऽयं पूर्वपक्षावसरः। कश्चिद् वदति– आटतुरित्यत्रैवाकारस्य प्रश्लेषणं बोध्यमिति। **नव्यास्तु**– आटतुरित्यत्रैव दीर्घ एव प्रयोजनम्, प्रकरणाश्रयणस्य निष्फलत्वात्। तथा च प्रकरणाश्रयणं कष्टमिति पूर्वसूत्रे **टीका**यामुक्तम्॥४२।

**[समीक्षा]**

'नो+अत्र, अहो+आश्चर्यम्, अ+अपेहि, इ+इन्द्रं पश्य' आदि स्थलों में पाणिनीय व्याकरण के अनुसार ओकारान्त तथा एकाच् निपातों की प्रगृह्य संज्ञा होती है (अ० १।१।११-१५), तदनन्तर **"प्लुतप्रगृह्या अचि नित्यम्"** (पा० ६।१।१२५) से प्रगृह्यसंज्ञक का प्रकृतिभाव होता है। कातन्त्रकार विना ही प्रगृह्यसंज्ञा किए निपातों का प्रकृतिभाव करते हैं। इससे स्पष्टतः पाणिनीय-प्रक्रिया में गौरव तथा कलाप की प्रक्रिया में लाघव सन्निहित है।

**[विशेष]**

१. 'आ' निपात को भिन्न-भिन्न अर्थों में सानुबन्ध और निरनुबन्ध दो प्रकार का माना गया है।

**[रूपसिद्धि]**

'नो +अत्र, अहो+आश्चर्यम्, अथो+एवम्, अ+अपेहि, इ+इन्द्रं पश्य, उ+उत्तिष्ठ,+आ+एवम्' इन ७ स्थलों में प्रकृतसूत्र से प्रकृतिभाव होता है। अतः 'नो+अत्र, अहो+आश्चर्यम्, अथो +एवम्' में "ओ अव्" (१।२।१४) सूत्र से अव् आदेश 'अ+अपेहि, इ+इन्द्रं पश्य, उ+उत्तिष्ठ' में **"समानः सवर्णे दीर्घीभवति, परश्च लोपम्"** (१।२।१) से सवर्णदीर्घ– परलोप तथा 'आ+एवम्' में **"एकारे ऐ ऐकारे च"** (१।२।६) से ऐकारादेश– परलोप नहीं होने पाता॥४२॥

# ४३. द्विवचनमनौ (१।३।२)

## [सूत्रार्थ]

स्वर वर्ण के पर में रहने पर उस द्विवचन का प्रकृतिभाव होता है जो औ–रूप से भिन्न हो। अर्थात् द्विवचन 'औ' रूपान्तर को प्राप्त हो गया हो ।।४३।

## [दु० वृ०]

द्विवचनं यदनौभूतं तत् स्वरे परे प्रकृत्या तिष्ठति। औकाररूपं परित्यज्य रूपान्तरं प्राप्तमित्यर्थः। अग्नी एतौ। पटू इमौ। शाले एते। माले इमे। द्विवचनमिति किम् ? चित्रन्वत्र। पर्युदासः किम् ? अयजावह्यावाम्। देवयोरत्र। अनौभूतम् इति किम् ? तावत्र ।।४३।

## [दु० टी०]

**द्विवचनम्।** ननु 'अग्ना एतौ' इत्यादिषु द्विवचनस्य लुप्तत्वात् कथं प्रकृतिभावः, इहैव स्यात्–'पयसी इमे। मधुनी इह' इति। सत्यम्। 'परनिमित्तादेशः पूर्वस्मिन् स एव' (कात० परि० वृ० ४४) इति न विरुध्यते। **अनाविति।** न औ अनौ, पर्युदासोऽयं नञ्। **पर्युदासश्च** सदृशग्राही। सादृश्यं चार्थकृतमत्र, न रूपकृतम्, असम्भवात्। अत आह– **औकाररूपं परित्यज्य** इत्यादि। कथं तर्हि युवामत्रेति प्रकृतिर्न स्यात् **"न व्यञ्जने स्वराः सन्धेयाः"** (१/२/१८) इत्यतः स्वरानुवृत्तेः औरेकाक्षरो नामी तत्सदृशं यदपरम् एकाक्षरं नामीति वा।

चित्रन्वत्रेति। चित्रा नौर्यस्मिञ्जले तच्चित्रनु जलम्–**"स्वरो ह्रस्वो नपुंसके"** (२/४/५२) इति ह्रस्वः। पर्युदासः किमित्यादि। प्रसज्ये नञि स्वीक्रियमाणे अयजावह्यावाम्, देवयोरत्रेति प्रकृतिः स्यादिति पर्युदासाश्रयणम्। अयजावहीति यजेर्ह्यस्तन्यामात्मनेपदोत्तमपुरुषद्विवचनं वहि, मध्ये अन्विकरणः, **"अस्य वमोर्दीर्घः"** (३/८।११)। **अड् धात्वादिरि**त्यादि। 'आते, आथे' इति चेति ज्ञापकं वक्ष्यते, तेन पचेते (पचावहे) इति, करिष्येते इहेति आख्यातिकद्विवचनस्यैकारस्य प्रकृतिर्भवति। मणी वादीनां प्रतिषेधः कैश्चिदिष्यते। **"मणी वोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम"** (मभार.१२/१७१/१२) दम्पतीव, रोदसीव। अदसः साकोऽपि विकृतिर्वक्तव्या। अमुकेऽत्र कथं न तदन्तविधिर्द्विवचनान्तमनौकारान्तमिति। तदा अग्नी आश्रितोऽग्न्याश्रित इति प्रकृतिः प्राप्नोति 'प्रत्ययलोपे प्रत्ययलक्षणम्' (कात.परि.वृ.५२) इति द्विवचनान्तमेवेदम्। एवं सत्यपि श्रुतत्वाद् द्विवचनस्यैवेति ।।४३।

## [वि० प०]

**द्विवचनम्** । **अनौभूतमिति** । न औ **अनौ**, पर्युदासोऽयं व्याख्यानात् । अनावं भूतम् अनौभूतम् इति भवतिरत्र प्राप्तौ सकर्मकः । यथा सर्वं भवति सर्वं प्राप्नोतीति गम्यते । एतदेव स्फुटीकुर्वन्नाह – **औकाररूपम्** इत्यादि । प्राप्तम् इति कर्तरि निष्ठा । यदा द्विवचनम् औकारः औकारं पूर्वम् इत्यादिना लक्षणेनात्मीयमौकाररूपं परित्यज्य रूपान्तरं प्राप्नोति तदा प्रकृतिभावः । कथमेतद् यावता औकारादयम् अन्यद् द्विवचनं तत् स्वरे प्रकृत्या तिष्ठतीति सूत्रार्थः कथं न स्यात् ? नैवम् । अनाविति पर्युदासस्य सदृशग्राहित्वाद् इति चेत् तदा अनुचितम् ।

**सादृश्यं** हि द्विविधं सम्भवति – रूपकृतम् अर्थकृतं चेति । तत्र रूपकृतम् इह न सम्भवत्येव, न ह्यौकारसदृशाकारं द्विवचनमन्यदस्ति । अर्थकृतं तु सम्भवत्येव, द्विवचनान्तरस्यापि द्वित्वार्थप्रतिपादकत्वात् । केवलं युवामत्र, युवयोरत्रेत्यादिष्वपि प्रकृतिभावः स्यात् । तदयुक्तम्, उभयथाप्यदोषात् । यत औकार एको वर्णो नामी तत्सादृश्यग्रहणेन कथमिह रूपकृतं न सादृश्यम् । अर्थकृतेऽपि न दोषः **"न व्यञ्जने स्वराः सन्धेयाः"** (१/२/१८) इत्यतः स्वरानुवृत्तेः । स्वरो हि द्विवचनं स्वरे प्रकृत्या तिष्ठतीत्युक्ते कुतो युवामत्र, युवयोरत्रेति व्यञ्जनसञ्ज्ञा प्रतिपादितैवेति ।

**'अग्नी एतौ'** इत्यादि । अग्नेः परस्य द्विवचनस्य औकारः पूर्वमिति यथाक्रमम् इकारोकारौ, समानलक्षणो दीर्घः, परलोपश्च । तथा श्रद्धायाः परस्यौकारस्य **"औरिम्"** (२/१/४१) इतीकारः । ननु कथम् अत्र प्रकृतिभावः, द्विवचनस्य लुप्तत्वाद् इहैव स्यात् – 'पयसी इह, मधुनी एते' इति ? सत्यम् । 'परनिमित्तादेशः पूर्वस्मिन् स एव' (कात० परि० सू० ४७) इति न विरुध्यते । चित्रन्वत्रेति । चित्रा नावो यस्मिन् जले तत् चित्रनु जलम् । **"स्वरो ह्रस्वो नपुंसके"** (२/४/५२) इति ह्रस्वः । **पर्युदास** इत्यादि । यजेर्ह्यस्तन्यामात्मनेपदोत्तमपुरुषस्य द्विवचनं वहि, **"अन् विकरणः कर्तरि"** (३/२/३२), **"अस्य वमोर्दीर्घः"** (३/८/११), **"अड् धात्वादिः"** (३/८/१६) । **आवाम्** इति । अस्मद् औ, "एषां विभक्तावन्तलोपः, युवावौ द्विवाचिषु, अमौ चाम्" (२/३/६,७,८) । प्रसज्यनञि गृह्यमाणेऽत्रापि प्रकृतिभावः स्यादिति ॥४३ ।

## [क० च०]

**द्विवचनम्** । ननु अनावित्युक्ते न इ **अनि, तस्मिन्ननौ,** ततश्च पूर्वतः स्वरानुवृत्तौ इकारभिन्न एव स्वरे द्विवचनं प्रकृत्या तिष्ठतीति सूत्रार्थः कथन्न स्यात् ? नैवम् । यथाश्रुत औकारवर्णपरिग्राहकः सम्भवति , अन्यकल्पनाया दुर्वारत्वात् ।

सन्निहितबुद्धेर्न्याय्यत्वाच्च । यद्येवं निःसन्देहार्थम् अनौदिति तकार एव निर्दिश्यताम् इति । एवं सति नपुंसकसमानाधिकरणेऽपि न ह्रस्वः, स्थानिप्रतिपत्तिगौरवशङ्का च परिहृता भवति ? सत्यम् । शब्दकृतलाघवमङ्गीकृत्य औकारस्वरूपेणार्थकृतगौरवनिर्देशेन ज्ञाप्यते । यत्र द्विवचने औकारस्वरूपप्रध्वंसाभावस्तद्द्विवचनमिति तेनानाविति औकारप्रध्वंसाभाववतीति । एतच्च तदेव घटते यद्यौकारकृतादेशस्य द्विवचनस्य प्रकृतिर्विधीयते इति । तथा च औकाररूपं परित्यज्य रूपान्तरं प्राप्तमिति **वृत्तिः** । एतदेवाह – **पर्युदासोऽयम्** इति । व्याख्यानाद् एतादृशव्याख्यानादित्यर्थ इति **कश्चित्** । तन्न । व्याख्यानसिद्ध्यर्थं यत् कारणमुक्तं तदसङ्गतम् ।

तथाहि द्विवचनमित्यस्य विशेषणत्वेऽपि अनौशब्दस्य नपुंसकत्वप्रसङ्ग एव नास्ति, नञ्तत्पुरुषस्योत्तरपदप्रधानत्वादिति । यथा अवर्षा हेमन्त इति स्त्रीत्वप्रसङ्गता । तस्मादनाविति लुप्तप्रथमैकवचनं पदम् इति । यच्च निःसन्देहार्थम् अनौदिति तकारो निर्दिश्यताम् इत्युक्तम्, तदतीव शिथिलम्, तद्व्याख्यानेऽपि निःसन्देहार्थं विभक्तावनाविति वक्तुं शक्यत्वात् । एवं च सति लाघवमपि भवति औभिन्नविभक्तौ स्वरः प्रकृत्या तिष्ठतीत्यर्थः । किञ्च नञः प्रध्वंसवाचित्वात् समासासङ्गतिः । अन्योऽन्याभाववाचिना नञा तत्पुरुषविधानात् ।

यदाह **श्रीपतिः** – इदमेतन्न भवतीति प्रतिषेधोऽस्य विषय इति तस्मादिदं ब्रूमः । ननु कतमोऽयं पूर्वपक्षः, नञ् पर्युदासः प्रसज्यो वा । तथा च –

**प्राधान्यं तु विधेर्यत्र निषेधे चाप्रधानता ।**
**पर्युदासः स विज्ञेयो यत्रोत्तरपदे न नञ् ॥**
**अप्राधान्यं विधेर्यत्र निषेधे च प्रधानता ।**
**प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥**

**"अकर्तरि च कारके संज्ञायाम्"** (४/५/४) इत्यत्र कारकग्रहणं प्रसज्यनञ्समासार्थमिति वक्ष्यति । तथा च **पञ्जीकारोऽप्याह** – "प्रसज्यवृत्तिरभावमात्रविषयो नञ्, तस्य क्रियापदेनैव सम्बन्धो नोत्तरपदेनेति" । तत् कथमत्र प्रसज्यनञ् न गृह्यते ? सत्यम् । प्रसज्ये नञि गृह्यमाणे प्रकृत्या तिष्ठति, औकारस्तु न तिष्ठति इति वाक्यभेदः स्यात् । पर्युदासे तु 'अनौ' द्विवचनं प्रकृत्या तिष्ठतीत्येकवाक्येनान्वयः स्यादिति । तथा च – **"सम्भवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते"** इत्याह – पर्युदासोऽयं व्याख्यानादिति । अत एव पर्युदासः सर्वशास्त्रसम्मतः ।

यत्तु असवर्ण इत्यत्र भिन्नमात्रपरत्वेन प्रसज्यप्रतिषेध इति न व्यञ्जनसूत्रे **पञ्ज्यां** प्रोक्तं तद् विसदृशवाची नञ् प्रसज्यप्रतिषेधः। सदृशवाची तु पर्युदासः इत्याधुनिकसङ्केतमादायैव इह **सर्ववादिसम्मत** एव पर्युदासो नञ् गृह्यते। स च द्विविधः – सदृशग्राही विसदृशग्राही च। अत एव **पञ्जिकायां** कथमेतदित्यादिना कृते पूर्वपक्षे पर्युदासस्य सदृशग्राहित्वादिति सिद्धान्तः संगच्छते। अन्यथा पूर्वमेव पर्युदासस्योक्तत्वाद् देश्यमेव नावतरति।

**हेमकरस्तु** पूर्वपक्षवादिना पर्युदासार्थो न ज्ञात इति कृत्वा भ्रान्तेन पूर्वपक्षवादिहृदयं जानता सिद्धान्तवादिना यत् सिद्धान्तयितव्यम्, तदेव स्वयमुक्त्वा दूषयितुमाह – पूर्वपक्षवादी पर्युदासस्य सदृशग्राहित्वादित्यादीति समाचष्टे। तन्न। स्वोक्तयुक्त्यैव पञ्जी संगच्छते, कुव्याख्यानस्यान्याय्यत्वादिति। **अन्ये** तु व्याख्यानादिति औवर्जम् इत्यकरणादित्याहुः। आचार्यपारम्पर्याद् **इत्यपरे। वैद्यस्तु** यदीह पुनः प्रसज्यार्थो गृह्यते तदा अनेनैव 'अयजावहि आवाम्' इत्यादौ प्रकृतिर्भविष्यति किं पुनरेतदर्थम् 'आते-आथे' इति चेति ज्ञापनार्थो विसन्धिनिर्देशः क्रियते, तस्मात् पर्युदासोऽयमित्याह। तन्न, आख्यातैकारान्तं प्रति तस्य नियमस्यार्थवत्त्वादिति। अनावं भूतम् **अनौभूतमिति** औसदृशरूपान्तरं प्राप्तमित्यर्थः।

**यथा** इत्यादि। ननु भूधातोरत्र प्राप्त्यर्थत्वात् 'भू प्राप्तावात्मनेपदी' इति नियमादात्मनेपदं युक्तम्, तत् कथं परस्मैपदनिर्देशः ? नैवम्। प्रथमगणीयभूधातोरेव रूपमिदम्। अयमपि धातूनामनेकार्थत्वात् प्राप्त्यर्थे वर्तते इति **कश्चित्। अन्ये** तु गणकृतस्यानित्यत्वादित्याहुः। **वयं** तु प्रथमगणीयधातुरेव स्वार्थे कारितार्थं चुरादौ पठ्यते। ततश्च यत्र कारितं स्यात् तत्रैव आत्मनेपदम्, परस्मैभाषामध्ये पठितत्वात्। कारिताभावपक्षे परस्मैपदमित्युत्तरमेव साधीय इति ब्रूमः।

**अर्थकृत** इत्यादि। तदा किं दूषणं स्यादित्याह – **केवलम्** इत्यादि। किन्त्वर्थे केवलशब्दः। यद् वा केवलशब्दस्य यथाश्रुतार्थत्वेऽपि न दोषः। तथाहि प्रथमाद्विवचनस्य द्वित्वसंख्याविशिष्टो लिङ्गार्थ उक्तः। द्वितीयादिद्विवचनस्य च द्वित्वसंख्याविशिष्टकर्मस्वरूपोऽर्थः अर्थद्वारा तत्सदृशस्य द्विवचनस्य प्रकृतिभावो भवन् युवामत्र, युवयोरत्र, आदिशब्दाद् देवयोरत्रेत्यादिष्वेव स्यात्। तृतीयाद्विवचनस्य च कारकगतवैसादृश्यस्य विद्यमानत्वाद् इति। यद्येवं तथापि युवयोरत्रेति वक्तुमनुचितम् अव्यतिरिक्तलिङ्गार्थकर्मत्वयोरभावात्। नैवम्। दर्शनादिपदाध्याहारेण **"कर्तृकर्मणोः कृति नित्यम्"** (२।४।४१) इत्यनेन षष्ठ्या अपि कर्मणि विहितत्वाद् इति।

**अपरे** तु द्विवचनान्तरस्यापि केवलं द्वित्वार्थ– प्रतिपादकत्वादिति पूर्वेण सह केवलशब्दस्यान्वय इत्याहुः। व्यञ्जनस्येति व्यञ्जनान्तस्येत्यर्थः। **विसर्जनीयस्येति।** ननु स्वरता णत्वविधौ व्यञ्जनता स्वरसन्धाविति नियमात् कथमत्र विसर्जनीयस्य व्यञ्जनत्वं स्वरसन्धेरभावात् ? सत्यम्। यन्मते सामान्येन स्वरत्वं व्यञ्जनत्वं चोक्तं तन्मतमवलम्ब्योक्तम्। **चित्रन्वत्रेति।** चित्रा नौर्यत्र जले इति पाठोऽपौराणिक एव, नित्यं कप्राप्तिप्रसङ्गात्। तथा च–

**अनडुत्-पुं-पयोलक्ष्मी-नावामेकत्ववाचिनाम् ।**
**नित्यं कः स्याद् बहुव्रीहौ वा स्याद् द्वित्वबहुत्वयोः॥**

तस्मात् चित्रा नाव इति युक्तः पाठः। यदि बहुपुस्तके एकवचनान्त एव पाठस्तदा समासान्तविधेरनित्यत्वाभ्युपगमान्न कप्रत्ययः इति **सिद्धान्तः**। यद् वा न अवतीति ऊः, वकारस्य ऊः न ऊः, अनौः, **"अवर्णादूटो वृद्धिः"** (४।६।११६) इति औकारः। चित्रा नौर्नकारपालयित्री (?) यस्मिञ्जले इति। एवं च सति चित्रा नौर्यस्मिन्नेक-वचनान्तविग्रहवाक्यम् अपि सुतरामेव संगच्छते। अस्मिन् पक्षेऽर्थवत्त्वाच्चौकारस्य सिध्यतीति युक्तम् उत्पश्यामः।

ननु प्रसज्यपक्षेऽपि स्वरग्रहणानुवृत्तौ सत्यां स्वरो द्विवचनं स्वरे प्रकृत्या तिष्ठतीति सूत्रार्थे 'अयजावहि आवाम्' इत्यत्र द्विवचनस्य व्यञ्जनसमुदायस्य सूत्रे व्यञ्जनसमुदायत्वान्न भविष्यतीति किं पर्युदासग्रहणेन ? सत्यम्। प्रसज्यनञौ विसदृश-वचनव्याप्त्या स्वराधिकारो न ग्राह्य इति **कश्चित्। वस्तुतस्तु** स्वराधिकारस्यानिवार्यत्वाद् वर्तत एवेति। ततश्च स्वरः स्वरान्तं द्विवचनमित्यर्थः॥४३।

**[समीक्षा]**

'अग्नी एतौ, पटू इमौ, शाले एते, माले इमे' आदि स्थलो में अग्नि-पटु-शाला और माला शब्दों से प्रथमा-विभक्तिद्विवचन 'औ' प्रत्यय के आने पर 'इ-उ' आदेश तथा सवर्णदीर्घ या गुण प्रवृत्त होता है। उनसे पर में स्वरादि सर्वनामों के रहने पर पाणिनीय व्याकरण के अनुसार पहले इनकी प्रगृह्यसंज्ञा होती है– **"ईदूदेद् द्विवचनं प्रगृह्यम्"** (पा० १।१।११) और तब **"प्लुतप्रगृह्या अचि नित्यम्"** (पा० ६।१।१२५) से प्रकृतिभाव।

कातन्त्र के अनुसार किसी संज्ञा के विना सीधे ही जो प्रकृतिभाव करके उक्त रूपों की सिद्धि की जाती है, उससे लाघवप्रतीति स्पष्ट है। प्रकृतिभाव की व्यवस्था न होने पर 'अग्नी एतौ' में **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से

ई को य् आदेश, 'पटू इमौ' में **"वमुवर्णः"** (१।२।९) से ऊ को व् आदेश एवं 'शाले एते, माले इमे' में **"ए अय्"** (१।२।१२) सूत्र से ए को 'अय्' आदेश हो जाता।

**[विशेष]**

सूत्रस्थ 'अनौ' पद में नञ् को पर्युदास मानने के कारण और पर्युदास के तद्भिन्न-तत्सदृशग्राही होने से 'अयजावह्यावाम्' तथा 'देवयोरत्र' में प्रकृतिभाव नहीं होता है। ज्ञातव्य है कि 'वहि' एवं 'ओस्' प्रत्यय द्विवचन में होते हैं, परन्तु 'औ'-रूप नहीं हैं। अतः इनका औ से भिन्न सिद्ध होने पर भी 'औ' से सादृश्य उपपन्न नहीं होता। फलतः यहाँ प्रकृतिभाव की प्रवृत्ति भी नहीं होती। पर्युदास तथा प्रसज्यप्रतिषेध के क्रमिक लक्षण इस प्रकार हैं–

**प्राधान्यं तु विधेर्यत्र निषेधे चाप्रधानता।**
**पर्युदासः स विज्ञेयो यत्रोत्तरपदे न नञ्॥**
**अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।**
**प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥४३।**

**[रूपसिद्धि]**

१. **अग्नी एतौ**। अग्नि+औ। "औकारः पूर्वम्" (२।१।५१) से औ को इ, "समानः सवर्णे दीर्घीभवति परश्च लोपम्" से इ को दीर्घ ई, परवर्ती औ को लोप। तदनन्तर 'एतौ' के आने पर प्रकृत सूत्र से प्रकृतिभाव।

२. **पटू इमौ**।पटु+औ।"औकारः पूर्वम्"(२।१।५१) से औ को उ, "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) से पूर्ववर्ती उ को ऊ तथा परवर्ती औ का लोप। इमौ से सम्बन्ध किए जाने पर प्रकृतिभाव।

३. **शाले एते**। शाला+औ। "औरीम्" (२।२।९) से औ को ई, "अवर्ण इवर्णे ए" (१।२।२) से आ को ए तथा औ का लोप। 'एते' शब्द के पर में आने पर प्रकृतिभाव।

४. **माले इमे**। माला+औ। "औरीम्" (२।२।९) से औ को ई, "अवर्ण इवर्णे ए" (१।२।२) से आ को ए तथा औ का लोप। 'इमे' शब्द के संबद्ध होने पर प्रकृतिभाव।

प्रकृतिभाव होने के कारण 'अग्नी एतौ' में ई को य्, 'पटू इमौ' में ऊ को व्, 'शाले एते-माले इमे' में ए को अय् आदेश नहीं होता।

## ४४. बहुवचनममी (१।३।३)

### [सूत्रार्थ]

किसी स्वर के परवर्ती होने पर बहुवचन 'अमी' रूप का प्रकृतिभाव होता है ॥४४।

### [दु० वृ०]

बहुवचनं यद् अमीरूपं तत् स्वरे परे प्रकृत्या तिष्ठति। अमी अश्वाः। अमी एडकाः। बहुवचनमिति किम् ? अम्यत्र। अमीरूपमिति किम् ? त आहुः ॥४४।

### [दु० टी०]

**बहुवचनम्।** अम्यत्रेति। अमनम् **अमः**, भावे घञ्। **"न सेटोऽमन्तस्य०"** (४।१।३) इति इज्वद्भावो घञि न भवति। सोऽस्यास्तीति **अमी**। अदसोऽमीति क्रियमाणे अदसः परोऽमी इति वा प्रतिपद्यते ॥४४।

### [वि० प०]

**बहुवचनम्। अमी अश्वा** इति। अदसो जस्, त्यदाद्यत्वम्, **"जस् सर्व इः** (२।१।३०), **अवर्ण इवर्णे ए"** (१।२।२)। **"अदसः पदे मः"** (२।२।४५) इति दस्य मत्वम्। **"एद् बहुत्वे त्वी"** (२।३।४२)। **अम्यत्रेति।** 'अम द्रम' इत्यादि दण्डको धातुः (१।१६०)। अमनम् **अमः,** भावे घञ्। **"न सेटोऽमन्तस्यावमिकमिचमाम्"** (४।१।३) इतीज्वद्भावप्रतिषेधाद् अस्योपधाया दीर्घो न भवति। **"सोऽस्यास्ति"** (२।६।१५) इति इन् ॥४४।

### [समीक्षा]

१. पाणिनि के अनुसार 'अमी ईशाः' आदि स्थलों में **"अदसो मात्"** (१।१।१२) से प्रगृह्यसंज्ञा और उसका **"प्लुतप्रगृह्या अचि नित्यम्"** (६।१।१२५) से प्रकृतिभाव होता है, जबकि कलाप के अनुसार विना ही प्रगृह्यसंज्ञा किए यहाँ प्रकृतिभाव निर्दिष्ट है। अतः प्रक्रिया की दृष्टि से कलापकार ने लाघव दिखाया है।

२. कलाप के सूत्र में बहुवचन का निर्देश स्पष्ट है, अतः प्रकृत सूत्र केवल 'अमी' में ही प्रवृत्त होता है, 'अमू' में नहीं। पाणिनि ने **"ईदूदेद् द्विवचनं प्रगृह्यम्"** (१।१।११) में द्विवचन का उल्लेख किया है। परन्तु **"अदसो मात्"** (१।१।१२) में नहीं। फलतः उससे 'रामकृष्णावमू आसाते' में भी प्रगृह्यसंज्ञा करनी पड़ती है। 'अमुकेऽत्र' में प्रगृह्यसंज्ञा न हो– एतदर्थ 'मात्' पद भी पढ़ना पड़ता है। कलाप में द्विवचन तथा बहुवचन शब्द का स्पष्ट उल्लेख है एवं बहुवचन के साथ 'अमी' रूप भी पठित है। जिससे 'अमुकेऽत्र' में प्रकृतिभाव होने का अवसर ही नहीं है।

प्रकृतिभाव का विधान न होने पर यहाँ **"इवर्णो यमसवर्णे न च परो लोप्यः"** (१।२।८) से ई के स्थान में य् आदेश हो जाता। 'अम्यत्र' में 'अमी' शब्द बहुवचनान्त नहीं है। 'अम' शब्द से 'इन्' प्रत्यय होने पर निष्पन्न 'अमी' शब्द को 'अत्र' के साथ मिलाने पर उक्त सूत्र से यकारादेश हो जाता है ॥

**[रूपसिद्धि]**

१. **अमी अश्वाः**। अदस् + जस्। "त्यदादीनाम विभक्तौ" (२।३।२९) से स् को अ, "जस् सर्व इः" (२।१।३०) से जस् को इ, "अवर्ण इवर्णे' ए" (१।२।४५) से द् को म् तथा "एद् बहुत्वे त्वी" (२।३।४२) से ए को ई। 'अमी + अश्वाः' में प्रकृतिभाव।

२. **अमी एडकाः**। अदस् + जस्। 'पूर्ववत् 'अमी' रूप सिद्ध। 'एडकाः' से सम्बन्ध होने पर प्रकृत सूत्र से प्रकृतिभाव ॥४४।

## ४५. अनुपदिष्टाश्च (१।३।४)

**[सूत्रार्थ]**

वर्णसमाम्नाय में उपदिष्ट न होने वाले प्लुतों का स्वरों के परवर्ती होने पर प्रकृतिभाव होता है ॥४५।

**[दु० वृ०]**

ये चाक्षरसमाम्नायविषये व्यक्त्या नोपदिष्टाः, जात्या तु स्वरसंज्ञिताः प्लुतास्ते स्वरे परे प्रकृत्या तिष्ठन्ति। आगच्छ भो देवदत्त३ अत्र। तिष्ठ भो यज्ञदत्त३ इह। दूराह्वाने, गाने, रोदने च प्लुतास्तु लोकतः सिद्धाः ॥४५।

**॥ इति दौर्गसिंह्यां वृत्तौ प्रथमे सन्धिप्रकरणे तृतीयः ओदन्तपादः समाप्तः॥**

[दु० टी०]

**अनुप०**। ननु ह्यस्तन्यादयोऽप्यनुपदिष्टा एव, तेषामपि प्रकृतिभावः कथन्न स्यात् ? सत्यम् । स्वरसन्धिप्रस्तावादेवानुपदिष्टाः स्वरा वेदितव्या इत्याह – **ये चाक्षर – समाम्नाय** इति । तर्हि प्लुताश्चेति किमिति न कृतम् इति चेत् - नात्र प्लुतसंज्ञादृता। अत एव नोपदिष्टा इत्युक्तमेव, वर्णविचारेणामी प्रचुरतरप्रयोगविषया भाषायामपि। **दूराह्वान** इत्यादि । ते चानियता एव नाटकेष्वपि दृश्यन्ते ।

अत इह प्लुतनियमो न कृत इति संबुद्धिनिमित्तस्य ओकारस्येतौ विसन्धि-विवक्षयापि का वस्तुक्षतिरिति । भानो इति भानविति । उ निपाते समानार्थो वकारो निपात इतावेव दृश्यते –उ इति विति । तथा सानुनासिको दीर्घश्च उ इतावेव निपात उ इति । निपाता हि प्रयोगगम्या एव । यस्तु **"उञः उम्"** (द्र०, उञः, ऊँ-पा० १।१।१७,१८) ऊँ इत्यादिशति, तेनाप्युञ उकारस्यैवैष्टव्यम् इह मा भूत् – 'अह उ अहो इति, **'परनिमित्तादेशः पूर्वस्मिन् स एव'** (काला० परि० १८) इति। अनन्तस्थाशिटो व्यञ्जनादपि वकारो निपातः स्वरे दृश्यते – 'वाग् उ अस्ति' वाग्वस्ति । 'किम् उ आ वपनम्' किम्वावपनम् । नात्र "मोऽनुस्वारम्०" (१।४।१५), संज्ञापूर्वकत्वादिति ।

**॥ इति श्रीदुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां प्रथमे सन्धिप्रकरणे तृतीयः ओदन्तपादः समाप्तः॥**

●

[वि० प०]

**अनु०** । ननु ह्यस्तन्यादयोऽप्यनुपदिष्टास्तेषामपि प्रकृतिभावः कथन्न स्याद् इति न देश्यम् । स्वरा हि वर्णास्तत्सन्धिप्रस्तावाद् वर्णा एवानुपदिष्टा वेदितव्याः । वर्णानां चोपदेशोऽक्षरसमाम्नायविषय एव, अतोऽनुपदेशोऽपि तत्रैव इत्याह – **ये चाक्षर** इत्यादि । ननु ये च वर्णसमाम्नायविषये नोपदिष्टास्तेषां प्रयोग एव । कथम्, येन प्रकृतिभाव-श्चिन्त्यते इत्याह – **व्यक्त्या नोपदिष्टा** इति । व्यक्तिभेदेन नोपदिष्टाः, जात्या तु स्वरसंज्ञिता इति, स्वरसंज्ञा संजाता एषामिति तारकादिदर्शनात् संजातेऽर्थे इतच्-प्रत्ययः, तमादिनिपातनात् । के पुनस्ते इत्याह – **प्लुता** इति ।

ननु किमिति नोपदिष्टाः प्लुताः ? सत्यम् । एवं मन्यते – स्वरा एवानवच्छिन्न-सन्ततयो बहुशोऽभिधीयमानाः प्लुतव्यपदेशं लभन्ते, तत् किं भेदोपदेशेनेति ? ते च

लोकोपचारात् प्रतिनियतप्रयोगविषया इत्याह – **दूराद्धाने** इत्यादि । किं च नाटकेष्वप्युपलभ्यन्ते, अत इह "दूराद्धूतौ च" (कात० परि०, सं० १०१) इत्यादिप्लुतनियमो न कृत इति ॥४५।

**॥ इति त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां प्रथमे सन्धिप्रकरणे**

**तृतीयः ओदन्तपादः समाप्तः॥**

●

[क० च०]

**अनुप०** । अथ किं स्वरूपेणानुपदिष्टाः, उतस्वित् संज्ञया, आहोस्वित् संज्ञितया । तत्र नाद्यः । स्वरूपेणानुपदिष्टानां भाषायां प्रयोग एव नास्ति । नापि द्वितीयः । स्वरादिसंज्ञाभावे विकृतिप्राप्तेरभावात् प्रकृतिविधानस्य वैयर्थ्याच्च । तृतीयस्तु न्याय्यः । किन्तु ह्यस्तन्यद्यतनीक्रियातिपत्तीनामपि प्रकृतिभावः स्यात्, यतस्ता अपि भूतकरणवत्यः संज्ञायामनुपदिष्टा इत्याह – **नन्वित्यादि कुलचन्द्रः** । **अन्ये** तु पूर्वयोर्योगयोरपि विभक्तेः प्रकृतिविधानात् तत्प्रस्तावादिहापि अनुपदिष्टा विभक्तय एव गृह्यन्ते इत्याशङ्क्याह – **ननु** इत्यादि । विभक्तेरनुपदेशः सङ्गत एवेत्याहुः । **हेमकरस्त्वाह** – ह्यस्तनीप्रभृतिशब्दा अपि नोपदिष्टाः । अतो ह्यस्तन्यद्यतनीत्यादिष्वपि, कुतो यत्वादिकमित्याशङ्क्यते ।

**नन्वित्यादि** । वर्णा एवानुपदिष्टा वेदितव्या इति, न च ह्यस्तन्यादयः शब्दा इति भावः । ननु उदात्तादिभेदा अपि व्यक्त्या अनुपदिष्टा इति तेषामपि प्रकृतिभावः ? सत्यम् । ते हि तेषां वर्णानां धर्मा इति । प्लुतस्तु वर्ण एव न तु धर्मः । त्रिमात्रो हि प्लुत इति **हेमकरः** । तन्न । प्लुत एव उदात्तादिविशिष्टानामपि वर्णानां स्वरूपेण उपदेशाभावात् केवलत्वादिनैव तदुपदेशः । न हि वर्णसमाम्नाये या व्यक्तय उपदिष्टास्तासामुदात्तादयो धर्मा युगपत् सम्भवन्ति । एकस्य विरुद्धानेकधर्मासम्भवात् [1]तस्मात् त्रयानुपदिष्टस्यैवात्र ग्रहणमिष्टम् । त्रिमात्रस्तु न क्वचिदपि स्वरूपेणोपदिष्ट इति न दोषः ।

ननु प्लुतानामनुपदिष्टत्वं ज्ञापयति इति चेत्, संज्ञासूत्रे चतुर्दशेति ज्ञापकाद् यदि प्लुतोपदेशः कृतः स्यात् तदा अष्टाविंशतिरित्युक्तं स्यादिति **कुलचन्द्रः** । तन्न । ह्रस्वस्य प्लुतत्वाभावात् । तथा च सिद्धसूत्र**टीकायामुक्तम्** – दीर्घा एव बहुशोऽभिधीयमानाः प्लुतव्यपदेशं लभन्ते दीर्घोपदेशाद् वा इत्युक्तम् । तस्माच्चतुर्दशपदमपहाय एकविंशतिरिति पठितं स्यादिति वरमुत्तरम् । यद्येवं स्वरा एवानवच्छिन्नसन्ततयो

---

१. तन्मात्रया-पाठा० ।

बहुशोऽभिधीयमाना इति **पञ्जिकायां** कथमुक्तम्, दीर्घा इति वक्तुं युज्यते ? सत्यम् । स्वरशब्दोऽत्र दीर्घपरो वेदितव्यः ।

ननु यदि दीर्घा एव प्लुतास्तदा कथं 'देवदत्त' इत्यादौ संबुद्धिलक्षणः सिलोपो ह्रस्वाभावात् । नैवम् । यस्मिन् काले प्लुतत्वं न विहितम् आसीत् तदानीं ह्रस्वमाश्रित्य संबुद्धिलोपे सति पदत्वे प्राप्ते पश्चात् प्लुतविधानात् । तथा च **'वाक्यस्वराणामन्त्यः''** (कात० परि०, सं० १०२) इति प्लुतविधायकं **श्रीपति**सूत्रम् । ननु यदि लोकोपचारात् प्रतिनियतविषया एव प्लुतास्तदा प्रकृतिभावोऽपि लोकोपचारादेव ज्ञातव्यः, किमत्र सूत्रेणेत्याह – किञ्चेति ॥४५।

**॥ इति कलापचन्द्रे प्रथमे सन्धिप्रकरणे तृतीयः ओदन्तपादः समाप्तः॥**

●

## [समीक्षा]

पाणिनीय और कलाप दोनों ही व्याकरणों में प्लुत का प्रकृतिभाव किया गया है, स्वर के पर में रहने पर। यहाँ विशेष ज्ञातव्य यह है कि पाणिनि ने त्रिमात्रिक अच् की प्लुतसंज्ञा मानी है – **"ऊकालोऽज्झ्रस्वदीर्घप्लुतः"** (पा० १।२।२७), परन्तु कलापचन्द्रकार **सुषेण विद्याभूषण** के अनुसार कहीं पर भी प्लुत को त्रिमात्रिक नहीं दिखाया गया है। अतः दीर्घ को ही प्लुत मानना चाहिए।

## [विशेष]

सामान्यतया पाणिनीय व्याकरण के अतिरिक्त भी प्रायः व्याकरणशास्त्र में प्लुत को त्रिमात्रिक ही माना जाता है। [1]एक विवरण के अनुसार तो प्लुत को चतुर्मात्रिक भी मानने के लिए कहा गया है। विशेषतः ए और ओ जब प्लुत होते हैं तो उनके विषय में प्लुत को चतुर्मात्रिक भी मानना उचित हो सकता है, परन्तु वहाँ सिद्धान्त त्रिमात्रिक प्लुत का ही स्थापित किया जाता है।

कलापचन्द्रकार ने प्लुत के स्वरूपत उपदेश की बात कहकर उसे स्वीकार नहीं किया है। वस्तुतः ऐसा होने पर भी यजुःप्रातिशाख्य आदि में उसे जो स्वरूपतः त्रिमात्रिक के रूप में पढ़ा गया है, उसे देखकर तो कलापचन्द्रकार का वचन प्रमादपूर्ण ही कहा जा सकता है॥४५।

**॥ इति प्रथमे सन्धिप्रकरणे समीक्षात्मकस्तृतीयः ओदन्तपादः समाप्तः ॥**

●

---

१. द्र०, म० भा० ८।२।१०६; पा० व्या० शा० ता०, पृ० ५२, ५३, १९९, २००

# अथ प्रथमे सन्धिप्रकरणे चतुर्थो वर्गपादः

## ४६. वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान् (१।४।१)

**[सूत्रार्थ]**

स्वर तथा घोषसंज्ञक वर्णों के परवर्ती होने पर पदान्त में वर्तमान वर्गीय प्रथम वर्णों के स्थान में तृतीय वर्ण हो जाते हैं ।।४६।

**[दु० वृ०]**

वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान् आपद्यन्ते । वागत्र । षड् गच्छन्ति । वर्गप्रथमा इति किम् ? भवानाह । पदान्ता इति किम् ? शकनीयम् । स्वरघोषवत्स्विति किम् ? वाक् पूताः, षट् कुर्वन्ति ।।४६।

**[दु० टी०]**

**वर्ग०** । प्रथमादयो हि वर्गाणामेव धर्माः इति प्रतिपादितमेव । तर्हि वर्गग्रहणमिह लाक्षणिकस्यापि वर्गस्य परिग्रहार्थम् । अन्यथा **"क्विब्वचिप्रच्छि०"** (पा० ३।२।१७४) इत्यादिना क्विपि दीर्घोऽसंप्रसारणं चेति वाच् । ततो **"व्यञ्जनाच्च"** (४।५।९९) इति सिलोपे कृते **"चवर्गदृगादीनां च"** (२।३।४८) इति गत्वे **"वा विरामे"** (२।३।६२) इति प्रथमे सति तृतीयो न स्यात् । तथा षषः **"संख्यायाः ष्णान्तायाः"** (२।१।७५) इति जसो लुकि **"हशषछान्तेजादीनां डः"** (२।३।४६) इति डत्वे, **"वा विरामे"** (२।३।६२) प्रथमे सति तृतीयो न स्यात् । तर्हि कथम् 'अतिरि कुलम्', 'अतिनु उदकम्' इत्यादिषु दीर्घादिविधिरिति । यथैतेषु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति न दृश्यते, तथेहापि । तर्हि सुखप्रतिपत्त्यर्थमेवेदम् ।

यदि वर्गप्रथमेन पदं विशेष्यते, तदान्तग्रहणमपि तथैव । ननु घोषवद्ग्रहणं किमर्थं **"धुटां तृतीयो घोषवति"** (२।३।६८) सामान्ये विद्यते एव, परत्वाद् विरामाश्रितत्वाच्च । 'तेभ्यो गतः, तपोरतः' इति सकारस्य विसर्जनीय एव । एवं तर्हि परत्वात् पदान्ते धुटां प्रथमो भवितुमर्हति, 'मज्जति, भृज्जति' इति सामान्यव्याख्यान-विषयत्वात् तर्हि धुड्ग्रहणमिह कर्तुमुचितम् ? सत्यम् । परिशिष्टं वर्गप्रथमग्रहणं च

स्पष्टार्थम् । ननु तडितां गतिस्तडिद्गतिरिति यथान्तर्वर्तिनीं विभक्तिमाश्रित्य पदसंज्ञास्तीति यथा तृतीयस्तथा तडित इदं ताडितम्, तडिति साधुस्तडित्य इत्यत्र कथं स्यात् ? सत्यम् । अन्तर्वर्तिन्या विभक्तेराश्रयणं नानिष्टसिद्ध्यर्थम्, न च तद्धितस्वरे "ये च" (३।४।३८) तृतीय इष्ट इति । ननु 'होतृकारः, उपेकीयति' इति पूर्वलोपे कथं तृतीयो न स्यात्। नैवम् **"असिद्धं बहिरङ्गमन्तरङ्गे"** (कात० परि० सू० ३५) इति न्यायात् । तृतीयोऽपीह स्थानिन आनन्तर्यादेव ।।४६।

## [वि० प०]

**वर्गप्रथमाः** । **वागत्रेति** । वच भाषणे, [1]**"क्विब् वचिप्रच्छिश्रिद्रुश्रुस्रुप्रुज्वां दीर्घश्च"** इति क्विप्, दीर्घश्च । वाच् इति स्थिते **"व्यञ्जनाच्च"** (४।५।९९) इति सिलोपः । **"चवर्गदृगादीनां च"** (२।३।४८) इति गत्वम्, "वा विरामे" (२।३।६२) इति प्रथमतृतीयौ भवतः । ततश्च स्वरघोषवत्सु "पदान्ते धुटां प्रथमः" (३।८।१) इति कत्वम्, अनेन तृतीयः । षड् गच्छन्तीति । षष्+जस् "कतेश्च जश्शसोर्लुक्" (२।१।७६) "हशषछान्तेजादीनाण्डः" (२।३।४६), "वा विरामे" (२।३।६२) इति कृते पूर्ववत् प्रथमे सति अनेन तृतीयत्वम् । **"लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्"** (काला० परि० १०२) इति नाशङ्कनीयम् । इह वर्गग्रहणस्य लाक्षणिकस्यापि परिग्रहार्थत्वात् ! अन्यथा प्रथमादयो हि वर्गाणामेव धर्माः, किं वर्गग्रहणेनेति ? शकनीयमिति शकेः "तव्यानीयौ" (४।२।९) इति अनीयः ।।४६।

## [क० च०]

**वर्ग०** । ननु किमर्थमत्र घोषवद्ग्रहणं घोषवति पदमध्ये पदान्ते च "धुटां तृतीयः" (२।३।६०) इत्यनेनैव सिद्धत्वात् । अत्र स्थिते हि घोषवद्ग्रहणे "धुटां तृतीयः" (२।३।६०) इत्यस्य पदमध्ये विषयत्वमिति । अथात्र घोषवद्ग्रहणं **"धुटां तृतीयः"** (२।३।६०) इत्यस्य पदान्ते वृत्त्यभावं ज्ञापयिष्यति । अतस्तेभ्यो गतः, तपोरतः इत्यादौ पदान्तत्वात् तृतीयाभावे सति सकारस्य **"रेफसोर्विसर्जनीयः"** (२।३।६३) सिद्धः इति चेत्, न । परत्वे विसर्जनीयस्य विषयत्वात् किं तदर्थं घोषवदग्रहणेनेति, नैवम् अत्र घोषवद्ग्रहणाभावे तद् गच्छतीत्यादौ परत्वात् **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्येव प्राप्नोति ।

---

१. तु० – क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च (पा० ३।२।१७८-वा०)।

अथ परत्वं कथं संगच्छते, उभयोः सावकाशत्वाभावादिति चेत्, न। पदमध्ये घोषवति परे 'मज्जति' इत्यादौ "धुटां तृतीयः" (२।३।६०) इत्यस्य चरितार्थता। अघोषे तु 'षट् कुर्वन्ति' इत्यादौ "पदान्ते धुटां प्रथमः" (३।८।१) इत्यस्य चरितार्थताऽस्त्येवेति। अत उभयोः सावकाशत्वेन परत्वम् इति। न च तद् गच्छतीत्यादौ "पदान्ते धुटां तृतीयः" (२।३।६०) एव भविष्यतीति तस्य सामान्यघोषवद्विषयत्वेन **"पदान्ते धुटां प्रथमः"** (३।८।१) इति कृते पुनर्धुटां तृतीयो भविष्यतीति वाच्यम्, **'सकृद्गतौ०'** (कात० परि० सू० ३८) इति न्यायादनवस्थाप्रसङ्गाच्च। तस्मात् तद् गच्छतीत्यादौ **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्य बाधनार्थमत्र घोषवद्ग्रहणं कर्तव्यमेव।

ननु तथाप्यत्र घोषवद्ग्रहणं न क्रियताम्, तद् गच्छतीत्यादौ धुटां तृतीय एव भविष्यतीति तस्य सामान्यघोषवद्विषयत्वेन **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्य बाधकत्वात्। अथ तस्य सामान्यघोषवद्विषयत्वमेव कुत इति चेद् उच्यते **"इसुसुदोषां घोषवति रः"** (२।३।५९) इत्यत्र घोषवद्ग्रहणमपनीय "भे रः" इति सिद्धे यत् तत्र घोषवद्ग्रहणं तद् धुटां तृतीय इत्यत्र सामान्यघोषवत्प्रतिपत्त्यर्थमिति वक्ष्यति इति चेत्, नैवम्। सामान्यघोषवद्ग्रहणस्यैतदेव फलम् – 'मज्जति-भृज्जति' इत्यादौ तृतीयः। अन्यथा योषिद्भ्यामित्यादावेव तृतीयः प्राप्नोति। तत् कथं **"पदान्ते धुटां प्रथमः"** (३।८।१) इति बाधित्वा तद् गच्छतीत्यादौ धुटां तृतीयो भविष्यति। तस्माद् घोषवद्ग्रहणमत्र कर्तव्यमेव। एवं तर्हि 'पदान्ते धुटां प्रथमः' (३।८।१) इत्यपि न कार्यम्। 'षट् कुर्वन्ति' इत्यादौ तु अघोषे प्रथमो भविष्यति। अथैवं सति ज्ञानभुन्नाथो वेति न सिध्यति, धकारस्य प्रथमाभावात्, पञ्चमे पञ्चमस्याप्राप्तिरिति चेत्, न। **"वर्गप्रथमा०"** (१।४।१) इत्यत्र वर्गग्रहणमपनीय धुट् इति कार्यम्, ततश्च "पञ्चमे पञ्चमान्" (१।४।२) इत्यत्र धुटोऽनुवर्तनाद् धकारस्य पञ्चमे कृते 'ज्ञानभुन्नाथः' इत्यस्य सिद्धत्वात्।

अथ यदि "पदान्ते धुटां प्रथमः" (३।८।१) इति न क्रियते। कथं तर्हि, 'तद्धीनः' इत्यादौ तच्छब्दस्य पदान्तत्वात् तेभ्य एव इत्यादिना हकारस्य धकारः स्यात् ? चेत्, सत्यम्। 'तेभ्य एव' इत्यत्र तेभ्यो – ग्रहणमपनीय वर्गेभ्य इति कर्तव्यम्। तथा **"पररूपं तकारः"** (१।४।५) इत्यत्र च तल्लुनातीति सिद्ध्यर्थं तवर्गग्रहणं कर्तव्यम्। ननु तर्हि 'प्रशान् चरति, प्रशान् टीकते' इत्यत्र च नकारस्य पररूपं स्यात्। नैवम्, अनुवृत्तेन धुटा वर्गविशेषणात्। **"प्रशामष्टठयोर्णः, ञश्चछयोः"** (कात० परि०,

सं० ६०, ६१) इत्येताभ्यां **श्रीपति**सूत्राभ्यां णकार – ञकारयोर्विषयत्वाच्च ।'भवाँल्लुनाति, भवांश्चरति, भवांष्टीकते' इत्यादिषु **"ले लम्, नोऽन्तश्चछयोः शकारम्"** (१।४।११,८) इत्यादयो योगा एव बाधकाः सन्ति । तस्मात् **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यपि न कर्तव्यम् ।

अत्र घोषवद्ग्रहणं च न क्रियताम् ? सत्यम्, द्वयमेव **मन्दधियां हेमकरादीनां** सुखार्थमिति । तथाह **हेमकरः** – "ननु धुटः पदान्ताः स्वरे तृतीयान्" इति क्रियताम्, किमर्थमनेन घोषवद्ग्रहणेन, तर्हि कथं तद्गच्छतीत्यादौ तृतीयः, परत्वात् **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्यैव विषयत्वादिति चेत् तदपि न कर्तव्यम्, तर्हि कथं षट् कुर्वन्तीति चेदघोषे प्रथमो भविष्यति । तद्गच्छतीत्यत्र धुटां तृतीयो भविष्यति । नैवम्, अत्र घोषवद्ग्रहणाभावेऽपि **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्याभावे च "अघोषे प्रथमः, धुटां तृतीयः" इति सूत्रद्वयं बाधित्वा अवयवकृतविराममाश्रित्य परत्वाद् **"वा विरामे"** (२।३।६२) इत्यादिना प्रथमतृतीयौ स्याताम् । ततश्च षड् गच्छन्तीत्यादौ पक्षे टकारश्रुतिरपि स्यात् । तथाघोषे च परे षट् कुर्वन्तीति डकारश्रुतिरपि स्यात्। स्थितिपक्षेऽपि घोषवद्ग्रहणं **"पदान्ते धुटां प्रथमः"** (३।८।१) इति वचनाच्च **"वा विरामे"** (२।३।६२) इत्यस्य महाविरामविषयत्वात् तस्माद् **"वा विरामे"** (२।३।६२) इत्यस्यावयवविरामविषयबाधनार्थं घोषवद्ग्रहणम् **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यपि कर्तव्यमेवेति । तन्न, मन्दधियां प्रलापस्याग्राह्यत्वादिति । तथाहि **"वा विरामे"**(२।३।६२) इत्यनेन कृतयोरपि प्रथमतृतीययोः पुनरपि घोषवदघोषयोस्तृतीयप्रथमौ भविष्यत इति ।

नच पुनरपि प्रथमतृतीयौ स्यातामिति वाच्यम्, प्राक् प्रवृत्त्यैव कृतार्थस्य विधेरनवस्थाभयेन पुनरप्रसङ्गात् । अन्यथा सिद्धे शास्त्रेऽपि प्रथमपक्षेऽपि तृतीयः, तृतीयपक्षेऽपि प्रथम इति वर्षसहस्रेणापि न निवर्तताम् । न च परत्वात् "वा विरामे" (२।३।६२) इति प्रवृत्ते सति नान्यस्य प्रवृत्तिः, सकृद्गतन्यायेनेति वाच्यम्, तस्य प्रायिकत्वात् । प्रायिकत्वं न संगच्छते इति चेत्, अन्यद् उच्यते – विरामोऽवसानं परिसमाप्तिः परस्मिन् वर्णात्यन्ताभाव इति यावद् इति न्यासकारादिभिरुक्तम् । अथैतादृशे सत्यपि विरामेऽवयवविराम आश्रीयते इति चेद् अहो रे पाण्डित्यम् इष्टसाधनार्थं खल्वाश्रीयते न त्वनिष्टसाधनार्थमिति, तस्माद् घोषवद्ग्रहणं सुखार्थमिति दिक् ॥४६॥

**[समीक्षा]**

कलाप व्याकरण के अनुसार पद के अन्त में वर्तमान वर्गीय प्रथम वर्णों (क् च् ट् त् प्) के स्थान में क्रमशः तृतीय वर्ण (ग् ज् ड् द् ब्) हो जाते हैं, यदि स्वरसंज्ञक वर्ण (अ आ, इ ई, ऋ ॠ, ऌ ॡ, ए ऐ, ओ औ) अथवा घोषसंज्ञक वर्ण (ग् घ् ङ्, ज् झ् ञ्, ड् ढ् ण्, द् ध् न्, ब् भ् म्, य् र् ल् व् ह्) पर में रहें तो।

पाणिनीय व्याकरण के अनुसार **"झलां जशोऽन्ते"** (८।२।३९) सूत्र प्रवृत्त होता है। इसके अर्थ को जानने के लिए सर्वप्रथम झल्-जश् [1]प्रत्याहारों का सम्यग् ज्ञान तथा स्थान-प्रयत्न-[2]विवेक अपेक्षित होता है, और इस प्रकार पाणिनीय प्रक्रिया में अधिक कृत्रिमता के कारण दुर्बोधता अधिक प्रतीत होती है, जबकि कलापीय प्रक्रिया में लोकव्यवहार का आश्रय लिए जाने से सरलता हो सकती है।

**[रूपसिद्धि]**

१. **वागत्र**। 'वाक्+अत्र'। यहाँ पदान्तस्थ 'क्' वर्ण कवर्गीय प्रथम वर्ण है, उससे पर में 'अ' स्वर विद्यमान है। अतः प्रकृत सूत्र से क् के स्थान में ग् आदेश तथा ग् का अ-स्वर के साथ सम्मेलन किए जाने पर 'वागत्र' प्रयोग निष्पन्न होता है।

२. **षड् गच्छन्ति**। 'षट्+गच्छन्ति'। यहाँ टवर्गीय प्रथम वर्ण 'ट्' पद के अन्त में स्थित है और घोषसंज्ञक 'ग्' परवर्ती है। अतः उसके निमित्त से 'ट्' के स्थान में ड् आदेश उपपन्न होता है ॥४६।

## ४७. पञ्चमे पञ्चमांस्तृतीयान् नवा (१।४।२)

**[सूत्रार्थ]**

पदान्तस्थ वर्गीय प्रथम वर्णों के स्थान में विकल्प से पञ्चम तथा तृतीय वर्ण होते हैं, वर्गीय पञ्चम वर्णों के परवर्ती होने पर ॥४७।

---

१. वर्णसमाम्नाय सूत्र (१४), प्रत्याहारविधायक तथा इत्-लोप-विधायक सूत्रों के ज्ञान के अनन्तर ही किसी प्रत्याहार का बोध होता है।

२. झल् २४ वर्ण हैं जब कि जश् केवल ५ ही। स्थान किसी भी वर्ग के सभी वर्णों का एक ही होता है। स्पृष्ट प्रयत्न क् से लेकर म् तक के सभी वर्णों का है। अतः बाह्य प्रयत्न अल्पप्राण की समानता से प्रथम के स्थान में तथा संवार-नाद – घोष की समानता से चतुर्थ के स्थान में जश् होता है।

## [दु० वृ०]

वर्गप्रथमाः पदान्ताः पञ्चमे परे पञ्चमानापद्यन्ते तृतीयान् नवा। वाङ्मती, वाग्मती। षण्मुखानि, षड्मुखानि। तन्नयनम्, तद्नयनम्। त्रिष्टुम्मिनोति, त्रिष्टुब्मिनोति। पदान्ते धुटां प्रथमे सति – दृशन्नयनम्, ज्ञानभुन्नाथो वा। व्यवस्थित-विभाषया प्रत्ययपञ्चमे नित्यं पञ्चमो भाषायाम्। वाङ्मयम्, यन्मात्रम्॥४७।

## [दु० टी०]

**पञ्चमे०**। नित्यं तृतीयः प्राप्तः पक्षे पञ्चमो विधीयते। तर्हि तृतीयग्रहणं किमर्थम्? सत्यम्। सन्निहितस्य तृतीयस्यैव व्यवस्थितविभाषार्थं तेन प्रत्ययपञ्चमे पञ्चमो भाषायाम्, तृतीयो न भवति। अथाव्ययत्वाद् व्यवस्थितविभाषा यथाभिधान-मिति चेत् तदा प्रपञ्चार्थमेव वाच्यम्। विकारोऽवयवो वा इत्येकस्वरान्नित्यं मयट्। यत्तदेतद्भ्योऽस्य परिमाणमित्यर्थे मात्रट्प्रत्ययस्तमादिनिपातनात्। "**अनुनासिकेऽनुनासिको वा**[1]" इति केषांचिद् दर्शनम्। स्वरा अपि अन्तस्था अपि रेफवर्जिता अनुनासिका इति। वाँङ् इति, वाँग् इति, तँनु इति, तँदु इति, तन् याता, तन् वाता' तदलम्। न भाषायाम्॥४७।

## [वि० प०]

**पञ्चमे०। वाङ्मतीति**। वाक् च मतिश्चेति विग्रहः। "**व्यञ्जनान्तस्य यत्सुभोः**" (२।५।४) इत्यतिदेशबलात् "**चवर्गदृगादीनां च**" (२।३।४८) इति गत्वम्। "पदान्ते धुटां प्रथमः" (३।८।१) इति कत्वम्। तन्नयनमिति। तदिति नपुंसकलक्षणः सेर्लोपः। "**विरामव्यञ्जनादौ०**" (२।३।६४) इत्यादिना विरामकार्यम्, पूर्ववत् प्रथमः। ननु "**वा विरामे**" (२।३।६२) इत्यादेरविषयत्वात् कथं समासे प्रथमत्वमित्याह – **पदान्त** इत्यादि। दृशदां नयनं **दृशन्नयनम्, दृशद्नयनम्।** ज्ञानं बुध्यते इति क्विप्, तस्य लोपः। ज्ञानबुधां नाथ इति विग्रहे "**हचतुर्थान्तस्य०**" (२।३।५०) इत्यादिना कृतस्यादिचतुर्थस्य "**व्यञ्जनान्तस्य यत्सुभोः**" (२।५।४) इत्यतिदेशबलादिहापि भवति। वाशब्देन विकल्पः सूच्यते-दृशद्नयनम्। ज्ञानभुन्नाथ इति। एतदुपलक्षणम्। वाङ्मतीत्यादावपि अविरामत्वात् "**पदान्ते धुटां प्रथमः**" (३।८।१) इत्यनेनैव प्रथमत्वम्।

---

१. अत्रानुनासिकः पूर्वस्य तु वा (पा० ८।३।२)।

ननु पञ्चम एव पक्षे विधीयताम् । तृतीयस्तु पूर्वेणैव सिद्धः, किं तृतीयग्रहणेन ? सत्यम् । नवेति व्यवस्थितविभाषेयं वेदितव्या । सा च सन्निहितस्यैव तृतीयस्य यथा स्यादित्याह – **व्यवस्थिते**त्यादि । तेन प्रत्ययपञ्चमे तृतीयो न भवत्येव । यदि पुनर्यथाभिधानमेव व्यवस्थितविभाषेत्यभिधीयते तदा सुखार्थमेव तृतीयग्रहणम् । वाङ्मयमिति वाच्यम् । विकारोऽवयवो वा इति "एकस्वरान्नित्यम्" इति तमादिनिपातनाद् मयट् । यथा यत्तदेतद्भ्यः 'अस्य परिमाणम्' इत्यर्थे मात्रट्-वन्तुप्रत्ययौ भवतः । यत्परिमाणमस्येति **यन्मात्रम्** ॥४७।

**[क० च०]**

**पञ्चमे०** । ननु "पञ्चमे तांस्तृतीयान्नवेति" सिद्धे किं 'पञ्चम'-ग्रहणेन, सत्यम् । सुखार्थम् । वाङ्मतीति । ननु किमर्थमिह **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यतिदेशबलाद् गत्वमुच्यते । प्रत्ययलोपलक्षणन्यायेन गत्वं सिद्धमेव । नैवम् । 'न वर्णाश्रये प्रत्ययलोपलक्षणम्'[1] इति । अथ तथापि **"असिद्धं बहिरङ्गमन्तरङ्गे'** (कात० परि० सू० ३५) इति न्यायाद् अन्तरङ्गे नैमित्तिकाभावे कर्तव्ये समासाश्रितो निमित्ताभावोऽसिद्धः स्यात् ततश्च गकारोऽस्त्येव, अलं तदर्थातिदेशाश्रयणेनैव ? नैवम् । **"तत्स्था लोप्या विभक्तयः"** (२।५।२) इत्यत्र बहुवचनबलाद् विभक्तिभिन्नस्य कार्यस्य लोपः कथन्न स्यात् ? **सखेतिवदिति** । नैवम् । अभिधानाद् असिद्धवद्भावस्यापि बाधेति । क्वचिन्निमित्ताभावविषये नासिद्धवद्भाव इति । ननु तथापि मकारे ककारस्य पञ्चमो भवति, श्रुतत्वान्मकार एव स्यात् । नैवम् । **"स्थानेऽन्तरतमः"** (काला० परि० २४) इति न्यायात् ।

**तन्नयनम्** इति । नन्वत्र तकारस्य नकारे कृते **"लिङ्गान्तनकारस्य"** (२।३।५६) इत्यनेन लोपः कथं न स्यात् सखेतिवदिति ? नैवम् । "असिद्धं बहिरङ्गमन्तरङ्गे" (कात० परि० सू० ३५) इति न्यायान्नकारलोपोऽन्तरङ्गः एकपदाश्रितत्वात् सन्निपातन्यायादिति वा । तथाहि – सन्निपातः सन्निकर्षः संनिहितता नकारसंनिकर्षे उत्पन्नो यो नकारः स तेन निमित्तनकारेण सह संनिकर्षविघाताय निमित्तं न भवति, वर्णग्रहणे निमित्तत्वादिति चेत्, अनित्येयं परिभाषेति व्याख्यायते । **"हचतुर्थान्तस्य"** (२।३।५०) इति प्रथमं धकारस्य चतुर्थो भवति । धकारमेव विशेषयति । धकारस्य कीदृशस्य ? आदिचतुर्थस्य ।

---

१. वर्णाश्रये नास्ति प्रत्ययलक्षणम् – व्या० परि० पा० ९६ ।

आदौ चतुर्थो यस्य। पुनः कीदृशस्य ? कृतस्य। ननु केनायमेतादृशः कृतः इत्याह – **"हचतुर्थान्तस्य"** (२।३।५०) इत्यादिना।

ननु कथमत्रास्य विषय इत्याह – **"व्यञ्जनान्तस्य"** (२।५।४) इति। एतादृशस्य धकारस्य पदान्ते धुटां प्रथमे सति इहापि पञ्चमो भविष्यतीति **विद्यानन्दः**। तन्न। यथाश्रुतसम्भवेऽन्यथाकल्पनाया अन्याय्यत्वात्। तथाहि **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यनेन हचतुर्थान्तस्येत्यादिवचनविहितस्यातिदेशादिह समासेऽप्यादि-चतुर्थो भवतीत्यर्थः। यद् वा समीपलक्षणेयं षष्ठी। कृतस्यादिचतुर्थस्य समीपे प्रथमो भवतीत्यर्थः। **व्यवस्थितविभाषयेत्यादि**। ननु कथं व्यवस्थितविभाषेयमुच्यते, तृतीय-ग्रहणबलादुभयोरपि विकल्पः कथन्न स्यात्? सत्यम्। तृतीयानिति भिन्नविभक्तिनिर्देशात्। प्रत्यय इति। प्रत्ययपञ्चमे तृतीयो न व्यवस्थितः इति न वर्तते इति भावः। तेन प्रत्ययपञ्चमे चेति नित्यार्थं न वक्तव्यम्। ननु स्थितेऽपि तृतीयग्रहणे व्यवस्थित-विभाषया वाग्मीति कथं प्रत्ययपञ्चमे नित्यं पञ्चमः। प्रशंसायां **"वाचो ग्मिन्[1]"** इति प्रत्यये गकार उच्चारणार्थ इति तस्मात् तृतीयग्रहणं न क्रियताम्। यथाभिधान-मेवाश्रय इत्याह – **यदीति** ॥४७।

## [समीक्षा]

कलापकार ने 'वाक्+मती' तथा 'तत्+नयनम्' इस अवस्था में क् के स्थान में ग् तथा ङ् आदेश करके 'वाग्मती-वाङ्मती' एवं त् के स्थान में द्-न् आदेश करके 'तद्नयनम्-तन्नयनम्' शब्दरूप सिद्ध किए हैं। पाणिनि ने वैकल्पिक अनुनासिक-विधान से इन रूपों का साधुत्व बताया है – **"यरोऽनुनासिकेऽनुनासिको वा"** (अ० ८।४।४५)। पाणिनि का संज्ञापूर्वक यह निर्देश सुखार्थ माना जाता है। 'अनुनासिक' एक महती संज्ञा है, जिससे उसकी अन्वर्थता सिद्ध होती है। फलतः वर्गीय पञ्चम वर्णों का स्थान कण्ठादि तथा नासिका भी सिद्ध होता है। सूत्रनिर्देश के अनुसार यर्-प्रत्याहार तथा अनुनासिकसंज्ञा के अर्थावगम-हेतु अवश्य ही कुछ अतिरिक्त प्रयत्न करना पड़ता है, जिससे पाणिनीय निर्देश गौरवाधायक कहा जा सकता है।

---

१. वाचो ग्मिनिः (पा० ५।२।१२४)।

**[रूपसिद्धि]**

१-२. **वाङ्मती – वाग्मती** । वाक्+ मती । प्रकृत सूत्र से क् को तृतीय वर्ण ग् तथा पञ्चम वर्ण ङ् आदेश।

३-४. **षण्मुखानि – षड्मुखानि** । षट् + मुखानि । प्रकृत सूत्र -द्वारा ट् को तृतीय वर्ण ड् तथा पञ्चम वर्ण ण् आदेश।

५-६. **तन्नयनम्-तद्नयनम्** । तत् + नयनम् । प्रकृत सूत्र से त् को तृतीय वर्ण द् तथा पञ्चम वर्ण न् आदेश।

७-८. **त्रिष्टुम्मिनोति – त्रिष्टुब्मिनोति** । त्रिष्टुप् + मिनोति । प्रकृत सूत्र – द्वारा प् को तृतीय वर्ण ब् तथा पञ्चम वर्ण म् आदेश ॥४७।

## ४८. वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं नवा (१।४।३)

**[सूत्रार्थ]**

पदान्तस्थ वर्गीय प्रथम वर्णों से परवर्ती शकार के स्थान में छकारादेश विकल्प से होता है, यदि उस शकार के बाद में स्वर-य-व-र में से कोई वर्ण हो तो ॥४८।

**[दु० वृ०]**

वर्गप्रथमेभ्यः पदान्तेभ्यः परः शकारः स्वर-य-व-र-परश्छकारमापद्यते न वा। वाक्छूरः, वाक्शूरः। षट्छ्यामाः, षट् श्यामाः। तच्छ्वेतम्, तच्श्वेतम्। त्रिष्टुप् छ्रुतम्, त्रिष्टुप्श्रुतम्। वर्गप्रथमेभ्यः इति किम् ? प्राङ् शेते। स्वर-य-व-रपर इति किम् ? वाक्श्लक्ष्णः, तच्श्मशानम्। ऌानुनासिकेष्वपीच्छन्त्यन्ये ॥४८।

**[दु० टी०]**

वर्गप्रथमेभ्यः। नन्वर्थवशात् पञ्चमान्त इह वर्गप्रथम इत्येवानुवर्तिष्यते, तत् किमर्थं वर्गप्रथमेभ्य इति चेत्, शकारः पदान्त इति सम्बन्धः स्यात्। चेत् तदा विपाश इदं वैपाशम्, विपाशि भवो मत्स्यो **वैपाश्यः** इति छत्वमापद्यते। नैवम्, रेफवकार-योरसम्भवात् ? सत्यम्। अर्थवशात् प्रतिपत्तिरियं गरीयसीति वचनमिदम्। स्वरयवरा एव परेऽस्मादिति बहुव्रीहिर्नतु स्वरयवरेभ्यः पर इति, अनुपपत्तेः। येषां ऌानुनासिकेष्वपि मतमिति ते प्रत्युदाहरन्ति-तच् श्च्योततीति। सप्तम्यापि सिध्यति। परग्रहणं श्रुतिसुखार्थम्, स्वरूपार्थः कारशब्दो वर्णेभ्यः प्रयुज्यते। वक्ष्यमाणं हि नवाग्रहणम् उत्तरत्र

नवाधिकारनिवृत्त्यर्थमुपादेयम् इहाधिकारक्रियमाणं नवाग्रहणं नवाधिकार एव नास्तीति बोधयितुमर्हतीति ॥४८।

**[वि० प०]**

**वर्गप्रथमेभ्यः।** **स्वरयवरपर** इति। स्वरयवराः परे यस्मादिति बहुव्रीहिः, न तु स्वरयवरेभ्यः पर इति तत्पुरुषः, असम्भवात्। नहि वर्गप्रथमेभ्यः शकारः स्वरयवरेभ्योऽपि परः सम्भवतीति। तर्हि स्वरयवरेष्विति कथं न कृतं चेत्? सत्यम्। परग्रहणं श्रुतिसुखार्थम् एव। तच्छ्वेतमिति छकारे कृते **"पररूपं तकारो लचटवर्गेषु"** (१।४।५) इति तकारस्यापि छकारे **"अघोषे प्रथमः"** (२।३।६१) इति चकारः।

पक्षे तकारस्य **"चं शे"** (१।४।६) इति चकारः। **प्राङ् शेते** इति। प्राञ्चतीति क्विप्। **"अन्चेरलोपः पूर्वस्य च दीर्घः"** (२।२।४९) इति ज्ञापकात्। क्वावनुषङ्गलोपो नास्तीति प्रान्च् इति स्थिते **"चवर्गदृगादीनां च"** (२।३।४८) इति वर्गग्रहणबलान्नित्यमपि संयोगान्तलोपं बाधित्वा अन्चियुजिक्रुञ्चां प्रागेव गत्वमिति वक्ष्यति। ततोऽनुस्वारस्य वर्गे वर्गान्तत्वे कृते पश्चाद् विरामे संयोगान्तलोप इति।

नवाग्रहणमिह पूर्वसूत्रादनुवर्तिष्यते। भूयः किं नवाग्रहणेनेति चेत्? सत्यम्। उत्तरसूत्रे वाधिकारनिवृत्त्यर्थमेव नवाग्रहणमवश्यं कार्यम्। ततश्च **'उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः'** (काला० परि० ७८) इति नित्यप्राप्ते विकल्पार्थं नवाग्रहणमिति ॥४८।

**[क० च०]**

**वर्गप्रथमेभ्यः।** ननु 'वर्गप्रथमाः' इत्यनुवर्तते, तच्च प्रथमान्तमप्यर्थवशात् पञ्चम्यन्ततयाऽनुवर्तिष्यते किं वर्गप्रथमेभ्यः इत्यनेन। नच तदा पदान्तः शकारः इति सम्बन्धे विपाशो नद्या इदं **वैपाशम्**, विपाशि भवा मत्स्या **वैपाश्या** इत्यत्र छत्वं कथं न स्यादिति वाच्यम्, वकाररेफयोरभावात्। यत्तु विपाड्वरः, विपाड्राजः इत्यत्र डत्वमेवास्ति बाधकमिति? सत्यम्। एवं हि सुखार्थम्। तच्छ्वेतम् इति। ननु छकारे परे तकारस्य पररूपे कृते 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (कात० परि० वृ० २७) इति न्यायात् पुनश्छकाराभावः कथन्न स्यात्? नैवम्। न वर्णाश्रये निमित्ताभावप्रतिषेधादिति **कुलचन्द्रः**।

**वस्तुतस्तु** नेदं न्यायान्तरमादरणीयं सन्निपातन्यायेनैवास्य सिद्धेः वर्णग्रहणे निमित्तत्वात्। ननु छकारे परे तकारस्य पररूपमेव न प्राप्नोति **'असिद्धं बहिरङ्गमन्तरङ्गे'**

(काला० परि० ४२) इति न्यायात् । अतः परत्वात् तकारस्य शकारे चकारप्रवृत्तौ सिद्धमिति वक्तुं युक्तम् । न च छकारमपेक्ष्य पररूपस्यान्तरङ्गत्वमेव नास्ति । नहीह एका प्रकृतिः येन **'प्रकृतेः पूर्वं पूर्वं स्यादन्तरङ्गम्'** (बलाबल० ४) इत्यस्य विषयः स्यात् । अतश्छकारस्य कृताकृतप्रसङ्गित्वेन नित्यत्वात् शकारस्याग्रतश्छकारः स्यादिति वाच्यम्, पूर्वत्वे वाक्यार्थस्यान्तरङ्गत्वादग्रतश्छकारस्याप्राप्तेः । (चेन्न, भिन्नप्रकृतावप्यन्तरङ्गत्वेन पूर्वकार्यस्य दृष्टत्वात्) । कथमन्यथा **"सम्प्रसारणं य्वृतोऽन्तस्थानिमित्ताः"** (३।८।३३) इत्यत्र इकारश्चेति द्वन्द्वेऽन्तरङ्गत्वात् प्राग् यत्वे पश्चाद् वत्वमिति । अन्यथा यदि भिन्न-प्रकृतावन्तरङ्गत्वं नोच्यते तदा ऋकारे परे उकारस्य प्रागेव वत्वे यत्वाभावात् कथं 'य्वृतः' इति निर्देशः ? सत्यम् । प्रयोगान्यथानुपपत्त्या असिद्धवद्भावस्यानित्यत्वमभ्युप-गन्तव्यमिति **महान्तः।**

**वयं** तु 'इश्च उश्च ऋश्च' इति पाठक्रमादेव सिद्धिः । नन्वन्तरङ्गचिन्तया कथं 'तच्श्वेतम्' इत्यत्र भिन्नप्रकृतावसिद्धवद्भावस्य विषयः इति ब्रूमः । तथा च सति अच्छत्वपक्षे वचनमिदमिति संगच्छते । अन्यथा छत्वपक्षेऽपि चरितार्थमेतत् सूत्रं भवत् कथमच्छत्वलक्षणं स्यादिति ? सत्यमिति । ननु यदि विकल्पनिवृत्त्यर्थम् उत्तरत्र नवाग्रहणम्, तदा कथम् 'उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः' (काला० परि० ७८) इति नित्यार्थं स्यात् । एतावतैव तस्य कृतार्थत्वादिति चेत्, सत्यम् । किन्तु नियामकाभावात् तत उत्तरत्र विकल्पनिवृत्त्यर्थम्, उतस्विद् **'उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः'** (काला० परि० ७८) इति पूर्वत्र नियमार्थं वेति शङ्कानिरासार्थमिह नवाग्रहणमिति । यद्येवम् उभयत्र नवाग्रहणम् अपास्य परसूत्रे नित्यग्रहणं क्रियतां चेद्, आस्तां तावद् अयं सुहृदुपदेशः । यथा सन्निवेशे तु न वैयर्थ्यमिति नवीनाः । यद् वा **'उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः'** (काला० परि० ७८) इति ज्ञापनार्थं 'नवा'-ग्रहणं देयमिति **सम्प्रदायः** ॥४८।

**[समीक्षा]**

पाणिनि का एतद्विषयक सूत्र है – **"शश्छोऽटि"** (८।४।६३) । इसके अनुसार पदान्तस्थ झय् से परवर्ती शकार के स्थान में छकारादेश होता है यदि अट् प्रत्याहार पर में हो तो । ज्ञातव्य है कि पाणिनि के अनुसार 'झय्' प्रत्याहार में वर्गीय प्रथम-द्वितीय-तृतीय तथा चतुर्थ वर्ण (कुल २० वर्ण) सम्मिलित होते हैं, परन्तु 'तच्छिवः' रूप की सिद्धि के लिए प्रायः 'तद् + शिवः'-स्थिति में श्चुत्व से द् के स्थान में ज्

तथा **"खरि च"** (८।४।५४) से चर्त्वविधि-द्वारा 'च्' आदेश करने के बाद ही **"शश्छोऽटि"** (८।४।६३) से छकारादेश करना पड़ता है। यदि श्चुत्व के बाद ही (चर्त्व से पूर्व) छकारादेश कर लिया जाए, तो भी वर्गीय प्रथम– तृतीय वर्णों से परवर्ती शकार के स्थान में छकारादेश उपपन्न हो जाता है, झय् प्रत्याहारस्थ सभी वर्णों से परवर्ती शकार के स्थान में नहीं।

दूसरे यह कि 'अट्' प्रत्याहार में स्वर-य-व-र से अतिरिक्त 'ह' वर्ण भी पठित है। ह के निमित्त होने पर छकारादेश का कोई उदाहरण नहीं देखा जाता। इस प्रकार पाणिनि के सूत्रनिर्देश में स्पष्टता प्रतीत नहीं होती। उसके सम्यग् ज्ञानार्थ पर्याप्त व्याख्यान की आवश्यकता होती है। इसके विपरीत कलापकार शर्ववर्मा के सूत्रनिर्देश में अधिक स्पष्टता के कारण उसमें अर्थलाघव सन्निहित है, जिससे ज्ञानगौरव नहीं हो पाता।

**[विशेष]**

'वाक्श्लक्ष्णः, तच्श्मशानम्' आदि प्रयोगों में भी कुछ आचार्य शकार के स्थान में छकारादेश करना चाहते हैं। उसे ध्यान में रखकर वृत्तिकार दुर्गसिंह ने कहा है– **"लानुनासिकेष्वपीच्छन्त्यन्ये"**। तदनुसार 'वाक्छ्लक्ष्णः, तच्छ्मशानम्' भी शब्दरूप साधु माने जाएँगे। पाणिनीय व्याकरण में भी कात्यायन का एतादृश वचन है– **'छत्वममीति वाच्यम्'**।

**[रूपसिद्धि]**

१. **वाक्छूरः– वाक्शूरः**। वाक्+शूरः। वर्गीय प्रथम वर्ण क् से परवर्ती तथा स्वर ऊ से पूर्ववर्ती श् को छ् आदेश विकल्प से।

२. **षट् छ्यामाः– षट् श्यामाः**। षट्+श्यामाः। वर्गीय प्रथम वर्ण ट् से परवर्ती तथा य् से पूर्ववर्ती श् को वैकल्पिक छ् आदेश।

३. **तच्छ्वेतम्– तच्श्वेतम्**। तत्+श्वेतम्। वर्गीय प्रथम वर्ण त् से परवर्ती तथा व् से पूर्ववर्ती श् को वैकल्पिक छ् आदेश।

४. **त्रिष्टुप् छ्रुतम्– त्रिष्टुप्श्रुतम्**। त्रिष्टुप्+श्रुतम्। वर्गीय प्रथम वर्ण प् से परवर्ती तथा र् से पूर्ववर्ती श् को वैकल्पिक छ् आदेश।

५. **वाक्श्लक्ष्णः-वाक्छ्लक्ष्णः।** वाक्+श्लक्ष्णः। वर्गीय प्रथम वर्ण क् से परवर्ती तथा ल् से पूर्ववर्ती श् को वैकल्पिक छ् आदेश– 'वाक्छ्लक्ष्णः'। "लानुनासिकेष्वपीच्छन्त्यन्ये"।

६. **तच्छ्मशानम्-तच्श्मशानम्** । तत् + श्मशानम् । वर्गीय प्रथम वर्ण त् से परवर्ती श् को वैकल्पिक छ् आदेश – तच्छ्मशानम् । "लानुनासिकेष्वपीच्छन्त्यन्ये" ।

वस्तुतः कातन्त्र के अनुसार ल्– अनुनासिक के पर में रहने परे श् **को छ्** आदेश नहीं होता है (द्र०, पञ्जी – १।४।६) ॥४८।

## ४९. तेभ्य एव हकारः पूर्वचतुर्थं नवा (१।४।४)

**[सूत्रार्थ]**

उन्हीं पदान्तवर्ती वर्गीय प्रथम वर्णों से परवर्ती हकार के स्थान में पूर्वचतुर्थ वर्ण आदेश विकल्प से होता है ॥४९।

**[दु० वृ०]**

तेभ्य एव वर्गप्रथमेभ्यः पदान्तेभ्यः परो हकारः पूर्वचतुर्थमापद्यते न **वा**। वाग्घीनः, वाग्हीनः । अज्झलौ, अज्हलौ । षड्ढलानि, षड्हलानि । **तद्धितम्**, तद्हितम् । ककुब्भासः, ककुब्हासः । हकार इति किम् ? तत्कृतम् । तेभ्योग्रहणं **स्वर** – य-व-रपरनिवृत्त्यर्थम् । तेन वाग्ह्लादयति । एवेति तृतीयमतव्यवच्छेदार्थम् ॥४९।

**[दु० टी०]**

**तेभ्यः** । **तेभ्योग्रहणमि**त्यादि । यथा वर्गप्रथमेभ्यः इत्यनुवर्तते तथा स्वरयवरपर इत्यपीति, अतस्तेभ्योग्रहणेन 'वर्गप्रथमाः' इत्यनुकृष्यते । इतरस्य तु निवृत्तिरर्थादिति । तेनान्यपरोऽपि हकारः पूर्वचतुर्थम् आपद्यते – वाग् घ्लादयतीति । **सूत्रकारमते** नेदमुपपन्नम् । **मतान्तरे** तु तेभ्योग्रहणमनर्थकमेव। नहि अस्वरयवरलानुनासिकपरः खलु हकारः सम्भवतीति अन्ययोगव्यवच्छेदाभावादेवग्रहणमनर्थकम् ।

अथ स्वयोगव्यवस्थापकं यथा 'शङ्खः पाण्डुर एव' इति । तत् किं तर्हि तृतीयमतव्यवच्छेदार्थमिति तृतीयादपि वक्तव्यमिति कश्चिदाह । तदसत् । वर्गप्रथमेभ्य एव **"पदान्ते धुटां प्रथमः"** (३।८।१) इति वचनात् । पूर्वग्रहणं किमर्थम् ? **'श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्'** (काला० परि० ११६) इति । **य एव** पूर्वश्रुतस्यैव चतुर्थो भविष्यतीति चेत्, प्रतिपत्तिरियं गरीयसीति । **तेभ्योग्रहणेन** प्रागधिकारनिवृत्तिरिति । नवाग्रहणमिहेति न चोद्यम्, निमित्तानुकर्षणेन हि **निमित्तमेव** निवर्तत इति ॥४९।

[वि० प०]

**तेभ्यः**। वागृधीन इति वाचा हीन इति विग्रहः। अनन्तरत्वाद् **"वर्गप्रथमेभ्यः"** (१।४।३) इत्यनुवर्तते, किं तेभ्योग्रहणेन इत्याह – **तेभ्यो ग्रहणमि**त्यादि। अन्यथा एकयोगनिर्दिष्टत्वात् "स्वरयवरपर"-इत्यनुवर्तेत। ततो ऌानुनासिकपरस्य हकारस्य न स्यादित्यर्थः। **ये** तु ऌानुनासिकपरस्यापि शकारस्य छत्वमिच्छन्ति, तेषामनर्थकमेव तेभ्योग्रहणम्, व्यवच्छेद्याभावात्। न हि स्वरयवरपरऌानुनासिकपरव्यतिरेकेणान्यपरो हकारः सम्भवति, किं तेन व्यवच्छिद्येत।

**वाग् घ्लादयती**ति। 'ह्लादी सुखे च' (१।३।१२) **"धातोश्च हेताविन्"** (३।२।१०)। एवशब्दोऽयमव्ययः, अन्ययोगव्यवच्छेदे दृष्टः। यथा – **'पार्थ एव धनुर्धरः'**। दृष्टश्च स्वयोगव्यवस्थापने, यथा – 'शङ्खः पाण्डुर एव'। अत्रान्ययोगप्रसङ्गादेव तद्व्यवच्छेदो न घटते, वर्गप्रथमेभ्यो हि हकारः पूर्वचतुर्थमापद्यमानः कथमन्ययोगविषयः। स्वयोगव्यवस्थापकोऽपि न युज्यते, प्रयोजनाभावात्। तत् किमेवग्रहणेनेत्याह – **एवेत्यादि**। तृतीयादपि भवतीति कस्यचिन्मतम्, तदेवकारेण व्यवच्छिद्यते – 'तेभ्य एव वर्गप्रथमेभ्यो नान्येभ्यः' इत्यर्थः। कथमिति चेत्? **"पदान्ते धुटां प्रथमः"** (३।८।१) इति वचनात् प्रथमस्यैव विद्यमानत्वादिति भावः॥४९।

[क० च०]

**तेभ्यः**। एवशब्दोऽयमिति। विधेयात् श्रुत एवशब्दो विशेष्यस्य तदन्ययोगं व्यवच्छिनत्ति। यथा 'शङ्खः पाण्डुर एव'। अत्र शङ्खे पाण्डुरत्वान्यस्य नीलत्वादेर्योगो नास्तीत्यर्थः। विशेष्यात् श्रुत एवशब्दो विधेयस्यान्येन योगं व्यवच्छिनत्ति। यथा **'पार्थ एव धनुर्धरः'** इति। अत्र विधेयस्य धनुर्धरत्वस्य पार्थभिन्नत्वेन योगो नास्तीति भावः।

यद्येवम्, एवशब्दस्यान्ययोगव्यवच्छेदार्थ एवाङ्गीक्रियताम्, किं स्वयोगव्यवच्छेदकताङ्गीकारेण? स्वयोगव्यवस्थापक्षेऽपि एवशब्देऽन्ययोगव्यवच्छेदस्य विद्यमानत्वात्। तथाहि पाण्डुरभिन्ने वस्तुनि शङ्खत्वयोगस्य व्यवच्छेदे सति शङ्खे पाण्डुरत्वायोगस्यान्याय्यत्वादिति चेन्न। अनुभवबलेनैव एवशब्दार्थस्य व्यवस्थापनात्। नहि 'शङ्खः पाण्डुर एव' इति वाक्ये पाण्डुरभिन्ने वस्तुनि शङ्खत्वायोग इति प्रतीतिः, किन्तर्हि शङ्खः पाण्डुरत्वविशिष्ट एवेति।

क्रियासम्बन्ध एवशब्दोऽत्यन्तायोगमपि व्यवच्छिनत्ति, यथा नीलं सरोजं भवत्येवेति। क्वचित् सरोजे नीलत्वायोगे सत्यपि तत्र नीलत्वस्यात्यन्तायोगो नास्तीति सम्प्रदायविदो वदन्तीत्यस्ति अत्यन्तायोगव्यवच्छेदार्थोऽप्येवशब्दः। यच्चोक्तं **पञ्जिकायां** तत्तु प्रसिद्धार्थापेक्षया। **नव्यास्तु** तत्राप्यन्ययोगव्यवच्छेदार्थस्यैव सम्भवः। तथाहि सरोजपदेन योग्यतया इन्दीवरमेव उच्यते, न पुनः पुण्डरीकादि। अत्र च नीलत्वायोग इति किमर्थान्तरपरिकल्पनयेति स्थितम्। ननु स्वयोगव्यवस्थापक इत्यत्र कथं षष्ठीतत्पुरुषः "**कर्मण्ययाजकादिभिः**" (कात० परि०-स० ८९) इत्यनेन तस्य प्रतिषिद्धत्वात्।

**अस्यार्थः** – याजकादिभिन्नैरकप्रत्ययान्तैः सह कर्मणि विहितायाः षष्ठ्यास्तत्पुरुषो न भवतीति ? सत्यम्। स्वयोगस्य व्यवस्थापक इति प्रशस्तः पाठ इति **विद्यानन्दः**। एतत्तु नातिपेशलम्, शैषिक्याः षष्ठ्याः समासे बाधकाभावात्! तथा च तत्रैवोक्तम्- 'दन्तलेखकः, नखलेखकः' इति शैषिक्याः षष्ठ्याः समास इह भवत्येव। अत एव समासस्यावश्यकत्वाद् **भर्तृहरिणापि** प्रत्याख्यातमिदमिति। दुर्गसिंहस्यापि मतमेतत्। तथा च कर्मणि षष्ठ्याः समासो भवत्येवेति ब्रूमः। अञ्झलाविति। अच्च हल् चेति द्वन्द्वे "**व्यञ्जनान्तस्य यत्सुभोः**" (२।५।४) इत्यतिदेशबलाच्चकारस्य गत्वं कथं न स्यात्, नैवम्। दृगादिकृदन्त-साहचर्याच्चवर्गस्यापि कृदन्तस्यैव गत्वमिति **केचित्**।

**वस्तुतस्तु** "**सिजद्यतन्याम्**" (३।२।२४) इति ज्ञापकात् स्वरूपस्य न भवतीत्यर्थः। **वयं** तु तत्रान्यथा वक्ष्यामः। षड्ढलानीति। ननु कथमत्र कर्मधारयः "**दिक्संख्ये संज्ञायाम्**" (पा०२/१/५०) इति व्यावृत्तेः। तथा पूर्वत्र 'षण्मुखानि' इत्यत्रापि, नैवम् उभयस्योक्तत्वात्। यद् वा षण्णां हलानीति, षण्णां मुखानीति षष्ठीसमास कर्तव्यः। तत्कृतम् इति **वृत्तिः**। ननु हकारग्रहणाभावे पूर्वसूत्रात् शकारानुवृत्तौ कथमिदं प्रत्युदाहृतम्। नैवम्। यैर्लनुनासिकपरस्यापि शकारस्य छत्वमित्युच्यते। तन्मते तेभ्योग्रहणस्य प्रयोजनान्तराभावाद् हकारग्रहणाभावे, शकारनिवृत्तिरेव फलं स्याद्, अतो युक्तं प्रत्युदाहरणम्।

यद्येवं भवन्मते तेभ्योग्रहणस्य स्वरयवरपरनिवृत्तिफलत्वाद् विशेषणनिवृत्तौ विशेष्यस्य शकारस्यानुवृत्तिः फलं स्यात्? सत्यम्। यथा भोक्तुकामेषु बहुषु देवदत्तेनात्र भोक्तव्यमित्युक्ते अन्येषां निवृत्तिरभिधीयते, तथेहापि विशेषणनिवृत्तये उपादीयमानं तेभ्योग्रहणं हकारग्रहणे सति परिशिष्टं विशेषणमेव निवर्तयितुं क्षमते, असति च हकारग्रहणे शकारम् अपि निवर्तयतीति **कुलचन्द्रः**। यद्येवं पदान्ताधिकारस्यापि

निवृत्तिः स्यात् ? सत्यम् । **"वर्गप्रथमाः०"** (१/४/१) इति सूत्रे **'वर्गप्रथमः पदं स्वरघोषवत्सु तृतीयान्'** इति कृते तदन्तपरिभाषया पदान्तार्थोऽर्थाल्लभ्यते, यदन्तग्रहणं तत् पदान्ताधिकाराविच्छेदार्थम् इति **विद्यानन्दः** ।

तन्न । अन्तग्रहणस्य सुखार्थतया **टीकाकृतो**क्तत्वात् । तस्मात् तेभ्योग्रहणं पूर्वसूत्रस्थमनुकर्षदपरमपि पूर्वसूत्रस्थमेव निवर्तयति । अन्ताधिकारस्त्वतदीयत्वादनुवर्तते एवेति **सिद्धान्तो** मन्तव्यः । यद्येवं विकल्पोऽपि निवर्तताम् । तथा च सति अत्र विकल्पार्थमेतन्नवाग्रहणम्, तत्कथमुत्तरत्र विकल्पनिवृत्तये स्यादिति चेत्, न । हकारग्रहणाभावे तेभ्योग्रहणं 'वर्गप्रथमेभ्यः' इति मात्रमनुकर्षत् तेन सह विशेष्यविशेषणभावमापन्नः स्वरयवरपरः शकारः इत्येव निवर्तयतीति क्रियया सह संबद्धं नवाग्रहणमनुवर्तते एव निवर्तकाभावादिति **कुलचन्द्र**स्याशयः ।

**वस्तुतस्तु** योगविभागादेवात्र शकारो नानुवर्तते, अन्यथा वर्गप्रथमेभ्यः शकारः पूर्वचतुर्थं छकारं स्वरयवरपर इत्येकयोग एव क्रियताम् । न च वक्तव्यम्-पूर्वचतुर्थत्वं प्रत्यपि स्वरयवरपर इति विशेषणसंबन्धः स्यादिति सन्निहितं छकारं प्रत्येव तस्य सम्बन्धाद् अन्यथा एकविभक्तिं निर्दिशेद् इति युक्तिः । पूर्वग्रहणं किमर्थं **'श्रुतानुमितयोः श्रौतसम्बन्धो विधिर्बलवान्'** (काला० परि०११६) इति, य एव पूर्वश्रुतस्तस्यैव चतुर्थो भविष्यतीति चेत्, प्रतिपत्तिरियं गरीयसीति ॥४९ ।

**[समीक्षा]**

कलापकार के अनुसार 'वाक्+ हीनः, अच् + हलौ, षट् + हलानि, तत् + हितम्, ककुप् + हासः' इस स्थिति में हकार से पूर्ववर्ती क्, च्, ट्, त् तथा प् वर्ण पठित हैं । इनके चतुर्थ वर्ण क्रमशः घ्, झ्, ढ्, ध् तथा भ् होते हैं । ये ही वर्ण हकार के स्थान में आदेशतः प्रवृत्त हो जाते हैं, जिससे 'वाग्घीनः, अज्झलौ, षड्ढलानि, तद्धितम्, ककुब्भासः' शब्दरूप सिद्ध होते हैं ।

पाणिनि के निर्देशानुसार हकार के स्थान में पूर्वसवर्णादेश प्रवृत्त होता है । सावर्ण्यज्ञान के लिए स्थान तथा प्रयत्नों को मिलाना पड़ता है । आभ्यन्तर प्रयत्नों से कार्यसिद्धि न होने पर बाह्यप्रयत्नों का भी आश्रय लेना पड़ता है । इसीलिए 'वाक्+ हरिः' इस स्थिति में घोषवान्, नादवान्, महाप्राण तथा संवृत प्रयत्न वाले हकार का सवर्ण वर्गीय चतुर्थ वर्ण घ् सिद्ध होता है । फलतः 'वाग्घरिः' प्रयोग निष्पन्न हो पाता है । इसी प्रकार अन्यवर्गीय वर्णों के भी संबन्ध में समझना चाहिए ।

इससे पाणिनीय व्याकरण के अनुसार सावर्ण्यज्ञान का जो विशेष उद्यम करना पड़ता है, उससे शब्दसिद्धि में कुछ कठिनाई ही उपस्थित होती है, सरलता नहीं। पाणिनीय सूत्रनिर्देश में झय् प्रत्याहार का पढ़ा जाना भी असौकर्य का बोधक है– **"झयो होऽन्यतरस्याम्"** (पा० ८/४/६२)॥

**[रूपसिद्धि]**

१. **वाग्घीनः**। (वाक्+हीनः)। प्रकृत सूत्र से ह् के स्थान में घ् आदेश तथा **"वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान्"** (१/४/१) सूत्र से क् के स्थान में वर्गीय तृतीय वर्ण ग् होने पर 'वाग्घीनः' शब्दरूप निष्पन्न होता है।

२-५. **अज्झलौ** (अच्+हलौ), **षड्ढलानि** (षट्+हलानि), **तद्धितम्** (तत्+हितम्), **ककुब्भासः** (ककुप्+हासः)।

इनकी सिद्धि के लिए प्रकृत सूत्र से ह् के स्थान में पूर्ववर्ती वर्गीय वर्णों के चतुर्थ वर्ण (झ्, ढ्, ध्, भ्) तथा (कात० १/४/१) सूत्र से वर्गीय प्रथम वर्णों के स्थान में तद्वर्गीय तृतीय वर्ण आदेश के रूप में करने पड़ते हैं॥

**[विशेष]**

सूत्रकार ने सूत्र में 'एव' शब्द का उपादान किसी तृतीय मत के निरासार्थ किया है। तृतीय मत प्रायः पाणिनीय आदि व्याकरणों में देखा जाता है। कातन्त्रकार उसे स्पष्टरूप में स्वीकार नहीं करना चाहते। अतः 'एव' पद से उसी का निषेध करना उन्हें अभीष्ट है–ऐसा वृत्तिकार के उल्लेख से समझना चाहिए।

कुछ विद्वानों के विचार से 'अज्झलौ' प्रयोग में **"चवर्गदृगादीनां च"** (२/३/४८) से चकार के स्थान में गकारादेश हो जाना चाहिए, क्योंकि उसकी प्राप्ति का कोई निषेधक नहीं है। इस प्रकार यदि गकारादेश हो जाए तो प्रकृत सूत्र (तेभ्य एव हकारः पूर्वचतुर्थं न वा - १/४/४) से 'ह' के स्थान में 'घ' आदेश उपपन्न होगा। ऐसी स्थिति में 'अज्झलौ' शब्दरूप सिद्ध नहीं किया जा सकता, उसका साधुत्व अक्षुण्ण रूप में बनाए रखने के लिए विद्वानों का यह उत्तर द्रष्टव्य है–

**साहचर्याच्चवर्गस्य क्विबन्तेन दृगादिना।**
**अज्झलादौ न गत्वं स्याज् ज्ञापकं च सिजाशिषोः॥**

(द्र०, वं०, भा०)

अर्थात् **"चवर्गदृगादीनां च"** (२/३/४८) सूत्र में 'दृग्' शब्द क्विबन्त है, उसके साहचर्य से ऐसे ही चवर्ग के स्थान में गकारादेश होगा जो क्विबन्त या तादृश अन्य शब्द हो। यहाँ 'अच्' शब्द क्विबन्त नहीं है। अतः गकारादेश भी नहीं होता है। फलतः 'अज्झलौ' का साधुत्व निर्बाध बना रहता है।

इस सूत्र में किए गए 'नवा' शब्दग्रहण के विषय में भी इस प्रकार विचार किया गया है कि पूर्व सूत्र से ही 'नवा' की अनुवृत्ति यहाँ सुलभ है, अतः इस सूत्र में 'नवा' शब्द नहीं पढ़ना चाहिए। यदि यह कहा जाए कि उत्तर सूत्र में 'नवा' की अनुवृत्ति के निषेधार्थ 'नवा' पद पढ़ा गया है तो फिर यह शङ्का होती है कि **"पञ्चमे पञ्चमांस्तृतीयान् नवा"** (१/४/२) इस सूत्र से 'नवा' पद की अनुवृत्ति निर्बाध होने पर भी पुनः अग्रिम सूत्र **"वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा"** (१/४/३) में 'नवा' पद पढ़ने की क्या आवश्यकता है।

इस पर यह निर्णय किया जाता है कि यहाँ दो विभाषाओं के मध्य में पठित विधि को नित्य मानने के लिए ऐसा किया गया है– **"उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः"** (काला० परि० ७८)। फलतः **"वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा"** (१/४/३) यह विधि नित्य मानी जा सकती है ॥४९।

## ५. पररूपं तकारो ल-च-टवर्गेषु (१।४।५)

### [सूत्रार्थ]

पदान्तवर्ती तकार को पररूप होता है यदि उस तकार के बाद ल्, चवर्गीय या टवर्गीय वर्ण विद्यमान हों ॥५०।

### [दु० वृ०]

तकारः पदान्तो ल-च-टवर्गेषु परतः पररूपम् आपद्यते। तल्लुनाति, तच्चरति, तच्छादयति, तज्जयति, तज्झासयति, तञ्ञकारेण, तट्टीकनम्, तट्ठकारेण, तड्डीनम्, तड्ढौकते, तण्णकारेण। पदान्ते धुटां प्रथमे सति तज्जयः, दृशल्लेखा, ज्ञानभुट्टीकनम् इति। ल-च-टवर्गेष्विति किम् ? तत्पचति ॥५०।

### [दु० टी०]

**पररूपम्०**। परस्य रूपम् आकृतिः। श्रुता एव ल-च-टवर्गाः परशब्दवाच्या न लुनात्यादयो रूपग्रहणमन्तरेण परमापद्यते इति प्रतिपद्यते। अथ तमिति कुर्यात् तदा

सुखप्रतिपत्त्यर्थम् इदम् इति। चश्च टश्च चटौ, तयोर्वर्गौ चटवर्गौ, लश्च चटवर्गौ च ल-च-टवर्गाः। द्वन्द्वात् परं श्रूयमाणोऽपि वर्गशब्दो न लकारेण संबध्यते, लकारस्य वर्गत्वाभावात्। पदान्ताधिकारोऽपि न प्रयोजयति, पदमध्ये लकारेऽपि तकारो नास्ति, पदमध्ये चटवर्गादेशं च वक्ष्यति ॥५०।

[वि० प०]

**पररूपम्०**। चश्च टश्च चटौ, तयोर्वर्गौ, लचटवर्गा इति पुनर्द्वन्द्वोऽयं लकारस्य वर्गत्वाभावात्। **"पदान्ते धुटां प्रथमः"** (३।८।१) इति, एतदुपलक्षणम्। 'तल्लुनाति' इत्यादावपि अनेनैव प्रथमत्वम् ॥५०।

[क० च०]

**पर०**। तज्जयतीति परत्वाद् विशेषविहितत्वाच्च **"इज्जहातेः क्त्वि"** (४।१।७५) इति निर्देशाच्च तृतीयं बाधित्वा अग्रतः पररूपम्, ततश्च तस्य जकारस्य स्थाने पदान्ते धुटां प्रथमे कृते **"घोषवति वर्गप्रथमा०"** (३।८।१) इत्यादिना तृतीयः। **"वा विरामे"** (२।३।६२) इत्यस्य तृतीयपक्षे **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्य विषयम् उपजीव्याह– **पदान्त** इति। **एतदुपलक्षणम्** इत्यादि। न च वक्तव्यम्-पदान्तरसंबन्धे महाविरामाभावान्निमित्ताभावे सति **"वा विरामे"** (२।३।६२) इत्यस्यैव प्रवृत्तिर्नास्ति, कथमस्य विकल्पपक्षे **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यस्य प्रवृत्तिरिति वाच्यम्। अन्तरङ्गं प्राक् प्रवृत्तं कार्यम्, बहिरङ्गेण पदान्तरसंबन्धेन नापसार्यते इति न्यायात्।

ननु **"तकारो लचटवर्गेषु"** (१।४।५) तानिति कृते तकारस्तानिति वर्णद्वयमपि प्रतिपद्यते इति **कुलचन्द्रः**। तन्न, शब्दस्य मुख्यार्थसंभवे स्वाभिधेयं प्रति लक्षणाया अन्याय्यत्वात्। मुख्यार्थबाधे सति लक्षणा क्रियते, अन्यथा स्थितिपक्षेऽपि पररूपशब्दमापद्यते इति कथन्न स्यात्। अत्र **विद्यानन्दः**, पररूपग्रहणाद् विकृतिर्न भवतीति। तेन **'सोमसुच्चक्षुः, सोमसुज्जङ्घा'** इत्यत्र पररूपे कृते **"चवर्गदृगादीनां च"** (२।३।४८) इति गत्वं न स्यात्। न च **'असिद्धं बहिरङ्गम् अन्तरङ्गे'** (कात० परि० सू० ३५) इति न्यायादेव गत्वं न स्यादिति वाच्यम्, समासाश्रयत्वेन गत्वस्यैव बहिरङ्गत्वात्। **यद्येवम्**, अत एव पररूपग्रहणात् **'तज्ज्ञासयति'** इत्यत्र पदान्ते धुटां प्रथमोऽपि न स्यात्। **नैवम्**, धुटामिति बहुवचनस्य व्यक्त्यवधारणार्थत्वात्।

तथा च तत्र **टीकायाम्** उक्तम्, धुटामिति व्यक्तिरवशेषग्राहिणीत्याचष्टे। यद् वा लाक्षणिकत्वादेव गत्वाभावः सिद्धः। न च वर्णविधौ लक्षणप्रतिपदोक्तयोरिति

उपतिष्ठते इति वाच्यम्, तस्य प्रायिकत्वात्। तथा च **"हशषछान्तेजादीनां डः"** (२।३।४६) इत्यत्र टीकायामुक्तं प्रायो वर्णविधिष्विति प्रायोग्रहणम् उक्तम्। न च नजिङ्प्रत्ययस्य लाक्षणिकत्वात् तृष्णगिति न सिध्यतीति वाच्यम्, दृगादिसाहचर्याच्चवर्गस्य लिङ्गसंज्ञाकालीनस्य ग्रहणात्, तस्माद् गुरुकरणं स्पष्टार्थमिति वरम् उत्तरम्। ननु तकारम् अपहाय तवर्ग इति कृते **"जझञ०"** (१।४।१२) इत्यत्र ञकारकरणं **"डढणपर०"** (१।४।१४) इत्यत्र णकारग्रहणं **"ले लम्"** (१।४।११) इति च वचनम् अकरणीयं स्यात्। न च 'भवांश्चरति' इत्यादावपि पररूपं स्यादिति वाच्यम्, **"नोऽन्तः"** (१।४।८) इत्यादिभिराघ्रातत्वात्। अथ 'प्रशान् चरति' इत्यत्र पररूपप्रसङ्गः स्यादिति चेत्, न। व्यवस्थितवाधिकारात्। तर्हि सुखार्थम् इति न दोषः। सुखार्थम् इति न तुष्यतीति चेत्, अहो रे पाण्डित्यम्, सुखादन्यः कः पदार्थो गरीयानिति ॥५०।

**[समीक्षा]**

'तत्+लुनाति, तत्+चरति, तत्+छादयति' आदि स्थिति में कलापकार के निर्देशानुसार पदान्तवर्ती तकार को पररूप होता है। अतः यदि पर में ल् वर्ण होगा तो त् को भी ल् आदेश हो जाएगा। फलतः 'तल्लुनाति' आदि प्रयोग निष्पन्न होंगे।

पाणिनीय व्याकरण के अनुसार चवर्ग के परवर्ती होने पर पूर्ववर्ती त् को च् आदेश (स्तोः श्चुना श्चुः ८।४।४०), टवर्ग के परवर्ती होने पर त् को ट् आदेश (ष्टुना ष्टुः ८।४।४१) तथा लकार के परवर्ती होने पर लकारादेश प्रवृत्त होता है (तोर्लि ८।४।६०)।

इस प्रकार पाणिनीय निर्देश में तीन सूत्रों के होने से शब्दगौरव स्पष्ट है। परन्तु इन शब्दों की साधुत्वप्रक्रिया के परिमाण में समानता इसलिए कही जा सकती है कि कलापकार के अनुसार 'तच्छादयति, तज्झासयति' इत्यादि प्रयोगों में तकार के स्थान में छकारादेश (पररूप) करने के बाद **"पदान्ते धुटां प्रथमः"** (३।८।१) सूत्र से छ् के स्थान में च् आदेश भी करना पड़ता है और पाणिनीय प्रक्रिया के अनुसार 'तज्जयति, तड्डीनम्' इत्यादि स्थलों में त् के स्थान में **"झलां जशोऽन्ते"** (८।२।३९) से द् आदेश करने के बाद ही श्चुत्व या ष्टुत्व होगा (स्तोः श्चुना श्चुः ८।४।४०, ष्टुना ष्टुः ८।४।४१)।

**[रूपसिद्धि]**

१. **तल्लुनाति** । 'तत् + लुनाति' इस अवस्था में प्रकृत सूत्र से त् के स्थान में ल् आदेश होता है । इसी प्रकार 'तत् + चरति' में त् के स्थान में च् होने पर तच्चरति, 'तत् + जयति' में त् को ज् आदेश होकर 'तज्जयति', 'तत् + ञकारेण' में त् को ञ् होकर 'तञ्ञकारेण' एवं 'तत् + टीकनम्' में त् के स्थान में ट् आदेश, 'तत् + डीनम्' में त् के स्थान में ड् आदेश, 'तत् + णकारेण' में त् के स्थान में ण् आदेश होने पर क्रमशः 'तट्टीकनम्, तड्डीनम्, तण्णकारेण' शब्दरूप सिद्ध होते हैं । परन्तु 'तत् + छादयति' में त् को छ् आदेश, 'तत् + झासयति' में त् को झ् आदेश 'तत् + ठकारेण' में त् को ठ् आदेश तथा 'तत् + ढौकते' में त् को ढ् आदेश करने के बाद **"पदान्ते धुटां प्रथमः"** (३।८।१) से तत्तद्वर्गीय प्रथम वर्ण एवं वर्गीय चतुर्थ वर्णों के परवर्ती रहने पर "वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान्" (१।४।१) से प्रथम वर्ण के स्थान में तृतीय वर्ण आदेश हो जाता है ।

**[विशेष]**

'तद् + जयः, दृशद् + लेखा, ज्ञानबुध् + टीकनम्' में द् तथा ध् वर्णों के होने से यह आशङ्का हो सकती है कि यहाँ प्रथम वर्ण तकार की अनुपस्थिति होने पर पररूप कैसे हो सकता है । पररूप न होने पर अभीष्ट शब्दों की सिद्धि नहीं होगी । इसके समाधान में वृत्तिकार दुर्गसिंह ने कहा है कि ऐसे सभी स्थलों में सर्वप्रथम **"पदान्ते धुटां प्रथमः"** (३।८।१) से तकारादेश होगा और तब प्रकृत सूत्र से पररूप करने पर 'तज्जयः, दृशल्लेखा, ज्ञानभुट्टीकनम्' रूप निष्पन्न होंगे ॥५०।

## ५१. चं शे (१।४।६)

**[सूत्रार्थ]**

पदान्तवर्ती तकार के स्थान में चकारादेश होता है शकार के परवर्ती होने पर ॥५१।

**[दु० वृ०]**

तकारः पदान्तः शे परे चमापद्यते । तच्श्लक्ष्णः, तच्श्मशानम् । अच्छत्वपक्षे वचनमिदम् ॥५१।

[दु० टी०]

**चं शे ।** छत्वपक्षे तु पररूपस्य छकारस्याघोषे प्रथम इति सिद्धत्वात् । स्वरयवरपरो हि शकारो विकल्पेन छत्वम् आपद्यते । मतान्तरेण 'तच्श्च्योतति' इति शकारे अकार उच्चारणार्थ एव ॥५१।

[वि० प०]

**चं शे ।** ननु किमर्थम् इदं **"वर्गप्रथमेभ्यः०"** (१।४।३) इत्यादिना शकारस्य छत्वे तकारस्य पररूपत्वे **"अघोषे प्रथमः"** (२।३।६१) इति सिद्धश्चकारः । एतदेव बालैरुद्घुष्यते –

**चं शे सूत्रमिदं व्यर्थं यत् कृतं शर्ववर्मणा ।**

**तस्योत्तरपदं ब्रूहि यदि वेत्सि कलापकम् ॥ इति ।**

**अच्छत्वपक्षे वचनम् इदमिति ।** शकारस्य छत्वं विभाषितम् । ततो यस्मिन् पक्षे छत्वं नास्ति तदर्थं वचनमिदम् । किञ्च **लानुनासिकपरस्य शकारस्य छत्वमिह सर्वथा नास्ति ।** अत एव 'तच्श्लक्ष्णः' इत्युदाहृतम् ॥५१।

[क० च०]

कार्यिणस्तकारस्यास्वरस्य साहचर्याच्चकारमस्वरमिति **विद्यानन्दः ।** ननु पूर्वस्मिन्नेव शकारो विधीयताम्, ततस्तकारस्य पररूपत्वे कृते आन्तरतम्यात् शकारस्य **"पदान्ते धुटां प्रथमः"** (३।८।१) इति कृते 'तच्छ्वेतम्' इत्यादयः सिद्धाः, अतश्चकारार्थमिदं सूत्रम् । किमर्थं पुनरिदं वचनमिति ? अत्र कुलचन्द्रः – **'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते'** (काला० परि० ६३) इति । स्वरूपेणाप्रयोजकः स विधिर्बाध्यते इति ।

**अस्यार्थः ।** उपदिश्यते **इत्युपदेशः ।** यं विधिम् = यत् कार्यं प्रति उपदेशोऽनर्थकः = स्वरूपेणाप्रयोजकः, स विधिर्बाध्यते उपदेशेनैवेत्यर्थः । अतः पदान्ते धुटां प्रथमो न स्यात् । तस्माच्चकारार्थमिदं सूत्रं कर्तव्यम् । तच्च नातिपेशलम् – **'यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते'** (कात० परि० सू० ५०) इति न्यायात् । तथा च शकारोपदेशस्य चकारविधानेनापि अनर्थकत्वाभावात् । कथमन्यथा 'सुपीः, सुतूः' इत्यत्र विसर्गः, 'चिकीर्षति' इत्यादौ इरादेश इति **विद्यानन्दः ।**

**हेमकर**प्रभृतयस्तु – 'यदि तकारस्य पररूपशकारो विधीयते, तदा 'तच्श्लक्ष्णः' इत्यत्र समासे **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यतिदेशात् **'हशषछान्त०'**

(२।३।४६) इत्यादिना डकारः स्यात्, न च लाक्षणिकत्वाद् डत्वं न भविष्यतीति वाच्यम्, 'शब्दप्राड्' इति दर्शनात्। अथ धात्ववयवस्यैव डत्वम् इति चेत् तथापि तदित्याचष्ट इतीनन्तात् क्विपि कृते कारितलोपे धातुत्वाद् डत्वं स्यात्, तस्मात् कर्तव्यं चकारार्थं सूत्रम् इत्याहुः।

**तन्न।** साहचर्येण लिङ्गसंज्ञाकालीनशास्त्रस्य तत्राभ्युपगमात् कथमन्यथा 'प्रभाश्छन्दोविदः' इति। अत्र तु लिङ्गसंज्ञानन्तरमेव समासे सति शकारोऽयमिति। **अन्ये** तु चटतानित्यकरणाद् विसर्जनीयादेशस्याघोषे प्रथमो न स्यादिति वक्ष्यति। तस्य ज्ञापकस्य यदि सर्वोद्दिष्टत्वं स्यात् तदादिष्टस्य शिटः प्रथमो न स्यादित्यवश्यं चकारार्थं सूत्रं विधातव्यमित्याहुः।

**वस्तुतस्तु** पृथग्योगविधानात्, व्यतिक्रमनिर्देशाच्चास्मिन् सूत्रे पदान्ताधिकारो नास्ति। तेन **'अग्निचिद्'** इत्यपदानुकरणस्यापि तकारस्य शकारे चकार इति। **"अघोषे प्रथमः"** (२।३।६१) इति अघोषे परे **"पदान्ते धुटां प्रथमः"** (३।८।१) इत्यर्थः। ननु अच्छत्वपक्षे वचनमित्युक्ते कथं 'तच्श्लक्ष्णः' इति प्रत्युदाहृतम्, स्वरयवरपरत्वाभावादित्याह– **किञ्चेति** ॥५१।

**[समीक्षा]**

कातन्त्रव्याकरण तथा पाणिनीय व्याकरण के भी अनुसार 'तत्+श्लक्ष्णः' तथा 'तत्+श्मशानम्' इस स्थिति में 'त्' के स्थान में 'च्' आदेश होकर 'तच्श्लक्ष्णः' एवं 'तच्श्मशानम्' रूप निष्पन्न होते हैं। अन्तर यह है कि कलापव्याकरण में 'त्' के स्थान में 'च्' आदेश करने का निर्देश है, जब कि पाणिनीय व्याकरण में तवर्ग के स्थान में चवर्गादेश का विधान किया गया है (स्तोः श्चुना श्चुः ८।४।४०)। ज्ञातव्य है कि शकार के परवर्ती होने पर पूर्व में तवर्ग के सभी वर्ण किन्हीं उदाहरणों में यदि देखे जाएँ, तब तो तवर्ग के स्थान में चवर्गादेश का विधान समीचीन कहा जा सकता है, परन्तु व्याख्याकारों ने इस प्रकार के उदाहरण प्रस्तुत नहीं किए हैं। अतः ऐसे स्थलों में तो त् के स्थान में च् आदेश का ही विधान उचित कहा जाएगा, जैसा कि कलापकार का प्रकृत सूत्र है– **"चं शे"**।

**[विशेष]**

'तत्+श्लक्ष्णः, तत्+श्मशानम्' आदि स्थलों में **"वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा"** (१।४।३) सूत्र से शकार को छकारादेश, **"पररूपं तकारो**

**लचटवर्गेषु"** (१।४।५) से त् को छ् आदेश तथा **"अघोषे प्रथमः"** (२।३।६१) से पदान्तवर्ती छ् को च् आदेश करके भी 'तच्छ्लक्षणः, तच्छ्मशानम्' रूपों का साधुत्व दिखाया जा सकता है तो फिर पदान्तवर्ती तकार के स्थान में चकारादेश-विधायक प्रकृत सूत्र को बनाने की क्या आवश्यकता है ? इसका समाधान इस प्रकार किया जाता है– शकार को छकारादेश विकल्प से होता है (१।४।३)। अतः छकारादेश न होने पर उक्त प्रक्रिया भी नहीं दिखाई जा सकती।

इसी पक्ष को ध्यान में रखकर आचार्य शर्ववर्मा ने यह सूत्र बनाया है। प्रश्नोत्तर के रूप में यह चर्चा इस प्रकार निबद्ध हुई है–

**चं शे सूत्रमिदं व्यर्थं यत् कृतं शर्ववर्मणा।**
**तस्योत्तरपदं ब्रूहि यदि वेत्सि कलापकम्॥१।**
**मूढधीस्त्वं न जानासि छत्वं किल विभाषया।**
**यत्र पक्षे न च छत्वं तत्र पक्षे त्विदं वचः॥२।**

कुछ विद्वानों का यह भी विचार है कि यदि **"पररूपं तकारो ल-च-टवर्गेषु"** (१।४।५) में 'श' को भी पढ़ दिया जाए तो त् को पररूप श् होगा और उस शकार के स्थान में **"स्थानेऽन्तरतमः"** (कात० परि० सू० १७; का० परि० सू० २४) न्यायवचन के अनुसार **"पदान्ते धुटां प्रथमः"** (३।८।१) से चकारादेश करके भी 'तच्श्लक्ष्णः, तच्श्मशानम्' रूप सिद्ध किए जा सकते हैं (द्र०, वं० भा०)।

**[रूपसिद्धि]**

१. **तच्श्लक्ष्णः**। तत्+श्लक्ष्णः। शकार को छकार आदेश न किए जाने पर प्रकृत सूत्र से त् को च् आदेश।

२. **तच्श्मशानम्**। तत्+श्मशानम्। छकारादेश के अभाव पक्ष में प्रकृत सूत्र से त् को च् आदेश॥५१।

## ५२. ङणना ह्रस्वोपधाः स्वरे द्विः (१।४।७)

**[सूत्रार्थ]**

ङ्, ण् तथा न् वर्णों का द्वित्व होता है, यदि वे पदान्तवर्ती हों। उनसे पूर्ववर्ती वर्ण ह्रस्व स्वर हों एवं उनसे पर में स्वर वर्ण हों। यहाँ 'ह्रस्वोपधाः' शब्द से ङ्-

ण्-न् जिन पदों के अन्त में हों उन पदों की उपधा में स्थित ह्रस्व वर्ण लेना चाहिए, जो ङ्-ण्-न् वर्णों से पूर्ववर्ती ही होंगे ॥५२।

## [दु० वृ०]

ङणनाः पदान्ता ह्रस्वोपधाः स्वरे परे द्विर्भवन्ति । क्रुङ्ङत्र, सुगण्णत्र, पचन्नत्र । ङणना इति किम् ? किमत्र । पदान्ता इति किम् ? वृत्रहणौ । ह्रस्वोपधा इति किम् ? प्राङास्ते ॥५२।

## [दु० टी०]

**ङणनाः** । क्रुञ्चेः क्विप्, विरामे चवर्गस्य गत्वं स्यात्, नस्यानुस्वारो धुटि, वर्गे वर्गान्तः, संयोगान्तलोपश्च । गणयतेः क्विप् कारितलोपश्च । पचेः शन्तृङ् **"अनुबन्धोऽप्रयोगी"** (३।८।३१) इति विरामे संयोगान्तलोपश्चेति । ह्रस्व उपधा येषामिति बहुव्रीहाविह न भवति-प्राङस्ति, प्राङास्ते, भवानाह, भवानिह । प्रपूर्वाद् अञ्चेः क्विप्, भातेर्डवन्तुः व्युत्पत्तिपक्षे ।

ननु ह्रस्वादित्यपि कृते सिध्यति किमुपधाग्रहणेन ? सत्यम् । 'संज्ञापूर्वको विधिरनित्यार्थ एव' (कात० परि० वृ० ३०) । उणादिरनजः, अनन्तः, अनीश्वर इति । ननु उणादिरिति लोकोपचारात् सिध्यति । विपर्ययग्रहणसामर्थ्याद् विपरीतमात्रं तत्रेति तदा प्रपञ्चार्थमिदम् । समासोत्तरपदस्यान्तर्वर्तिनीं विभक्तिमाश्रित्य पदकार्यं न दृश्यते इति परमदण्डिनि द्विर्न भवति । सिज्लुकि इति तृतीयाभावाद् भावकर्मणोर्न स्याद् द्वित्वाच्चेत्युन्नयन्त्यन्ये ।

ननु कुर्वन्नास्ते, कृष्यन्नास्ते **"रषाभ्यां नो णः"** (८।४।१) कथन्न भवति ? असिद्धं बहिरङ्गमन्तरङ्गे (कात० परि० सू० ३५) इति नकारो दन्त्य एव । ङ्णोः कटावन्तौ शषससुप्सु वा ! वर्णागमो यथासङ्ख्यम्-प्राङ्क्शेते, प्राङ् शेते । प्राङ्क्षण्डः, प्राङ् षण्डः । प्राङ्क्साधुः, प्राङ् साधुः । प्राङ्क्षु, प्राङ्षु । सुगण्ट्शेते, सुगण् शेते, सुगण्ट्छेते । सुगण्ट्षण्डः, सुगण्षण्डः । सुगण्ट्साधुः, सुगण् साधुः । सुगण्ट्सु, सुगण्सु । सुप्ग्रहणं पदमध्यार्थम् । अप्रचुरप्रयोगत्वादिह न प्रतिपाद्यं लक्षणमिति ॥५२।

## [वि० प०]

**ङणनाः । क्रुङ्ङत्रेति ।** क्रुङ्शब्दस्य प्राङ्शब्दवद् रूपसिद्धिः । **सुगण्णत्रेति** । गण संख्याने अदन्तः, **"चुरादेश्च"** (३।२।१) इतीन् । **"अस्य च लोपः"** (३।६।४९)

इत्यकारलोपः। अकारस्य स्थानिवद्भावाद् उपधादीर्घो न भवति। सुष्ठु गणयतीति क्विप्, कारितलोपश्च। पचन्नत्रेति। पचेः शन्तृङ् **"अनुबन्धोऽप्रयोगी"** (३।८।३१) इति, अन् विकरणः, सन्ध्यक्षरविधिः। **वृत्रहणाविति। "क्विब् ब्रह्मभ्रूणवृत्रेषु"** (४।३।८३) इति क्विप्। **प्राङास्ते इति**। प्राङ् इति साधितमेव। अथ उपधाग्रहणं किमर्थम् ? ह्रस्वादिति कृते सिध्यति ? सत्यम्। **'संज्ञापूर्वको विधिरनित्यः'** (कात० परि० सू० ३२) इति ज्ञापनार्थमेव। तेनोणादिः, अनन्तः, अनजः, अनीश्वरः इत्यादिषु द्विर्न भवति। नैवम्। **"उणादयो भूतेऽपि"** (४।४।६७) इति निर्देशात्। तथा **"स्वरेऽक्षरविपर्ययः"** (२।५।२३) इति विपर्ययग्रहणेन विपर्ययमात्रं संभवति, न त्वन्यत् कार्यम् इति ज्ञापनार्थं भविष्यति। अन्यथा तत्र 'अनश्वरः' इति विदध्यादिति भावः। एवं तर्हि सुखार्थमेवोपधाग्रहणम् ॥५२।

**[क० च०]**

**ङणनाः**। स्थानिवद्भावाद् उपधाया दीर्घो न भवतीति। ननु कथमिदं **"न पदान्त०"** (कात० परि० सू० ११) इत्यादिना स्थानिवद्भावप्रतिषेधात् ? सत्यम्। अनेनैव न्यायेन दीर्घाभावो भविष्यति, किं **"छादेर्घेस्मन्त्रन्०"** (४।१।१९) इत्यनेनैव ह्रस्वविधानाद् अनित्योऽयं न्याय इति। तथाहि निमित्तस्य कारितस्याभावे सति नैमित्तिकदीर्घस्याभावो भविष्यति, नैवम्। स्वरादेशन्यायेन स्थानिवद्भावादिति चेत्, न। **"न पदान्त०"** (कात० परि० सू० ११) इत्यादिना स्थानिवद्भावनिषेधादेव दीर्घाभावो भविष्यति, किं **"छादेर्घे०"** (४।१।१९) इत्यनेन ह्रस्वविधानेन। तस्माद् ह्रस्वविधानं बोधयति **"न पदान्तद्विर्वचन०"** (कात० परि० सू० ११) इति परिभाषेयमनित्येति **केचिद्** आहुः।

**टीकायां** तु अकारकरणसामर्थ्यादिव **'दीर्घविधौ न स्थानिवत्'** इति न्यायो नोपतिष्ठत इति। **"अस्योपधायाः"** (३।६।५) इत्यत्र वक्ष्यति। **अन्ये** तु दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधेऽपि उपधासंज्ञां प्रति स्थानिवद्भावस्य वज्रलेपत्वान्न दीर्घ इत्याहुः। **वस्तुतस्तु "न पदान्त०"** (कात० परि० सू० ११) इत्यस्य नञा निर्दिष्टत्वादनित्यत्वं क्लृप्तम् एवेति कतमोऽयं पूर्वपक्षावसरः। अत एव **पञ्जीकृता "अलोपे समानस्य"** (३।३।३५) इत्यत्र स्थानिवद्भावनिषेधो नाभ्युपेयः इत्युक्तम्। प्राङास्ते इति। अथात्र 'अन्च्' धातोर्ह्रस्वोपधत्वात् **'पूर्वस्मिन् परनिमित्तादेशः'** (कात० परि० सू० ४७) इति न्यायात् कथं द्विर्न स्यात्। नैवम्। ज्ञापकज्ञापितविधित्वाद् अनित्येयं

परिभाषेति **केचित्। सत्यम्** इत्यादि । ननु तथापि ह्रस्वग्रहणादनित्यत्वं भविष्यति किम् उपधाग्रहणेनेति । नैवम् । निरर्थके हि **'संज्ञापूर्वको विधिरनित्यः'** (कात० परि० सू० ३२) इत्युपतिष्ठते, न तु सार्थके ॥५२।

**[समीक्षा]**

'क्रुङ् + अत्र, सुगण् + अत्र, पचन् + अत्र' इस अवस्था में कलापकार ह्रस्व उपधा वाले 'ङ्-ण्-न्' वर्णों का द्वित्व करके क्रुङ्ङत्र, सुगण्णत्र, तथा पचन्नत्र शब्दरूपों की सिद्धि करते हैं। पाणिनि के अनुसार यहाँ क्रमशः ङुट्-णुट्-नुट् आगम् होते हैं– **"ङमो ह्रस्वादचि ङमुण् नित्यम्"** (८।३।३२)। इन आगमों के टित् होने के कारण **"आद्यन्तौ टकितौ"** (१।१।४६) परिभाषासूत्र, इत्संज्ञाविधायक तथा लोपविधायक सूत्रों की भी आवश्यकता होती है। इसके परिणामस्वरूप पाणिनीय प्रक्रिया में दुरूहता और गौरव सुस्पष्ट है, जब कि कातन्त्रीय प्रक्रिया में सरलता और लाघव।

यदि सूत्ररचना पर ध्यान दिया जाए तो भी पाणिनि की शब्दावली क्लिष्ट प्रतीत होती है। क्योंकि पहले तो 'ङम्' प्रत्याहार का ज्ञान, तदनन्तर उसके अन्त में 'उट्' पठित होने से उसका ङ्-ण्-न् के साथ अन्वय करके ङुट्–णुट्-नुट् यह अर्थ करना सरलता का परिचायक नहीं हो सकता।

**[रूपसिद्धि]**

'क्रुङ् + अत्र, सुगण् + अत्र, पचन् + अत्र' इस स्थिति में पदान्तवर्ती 'ङ्-ण्-न्' वर्णों का द्वित्व होने पर क्रमशः 'क्रुङ्ङत्र, सुगण्णत्र, पचन्नत्र' शब्द सिद्ध होते हैं॥५२॥

## ५३. नोऽन्तश्चछयोः शकारमनुस्वारपूर्वम् (१।४।८)

**[सूत्रार्थ]**

पदान्तवर्ती नकार के स्थान में अनुस्वारपूर्वक शकारादेश होता है यदि च-छ वर्ण पर में रहें तो ॥५३।

**[दु० वृ०]**

नकारः पदान्तश्चछयोः परयोः शकारमापद्यते अनुस्वारपूर्वम् । भवांश्चरति, भवांश्छादयति, भवांश्च्यवते, भवांश्छ्यति । व्यवस्थित-वा-स्मरणात् 'प्रशान् चरति'। एवम् उत्तरत्रापि । तथान्तो विरतिरिति । तेन त्वन्तरसि ॥५३।

## [दु० टी०]

**नोऽन्तः** । ननु ह्रस्वोपध इति किमिह न वर्तते ? सत्यम् । ङ्णौ ह्रस्वोपधौ स्वरे द्विः, ततो नः, ततोऽन्तश्चछयोरित्ययोगविभागात् ।एकयोगेन हि ह्रस्वोपध इति नस्या-विशेषणं पुनर्नकारं कुर्वन् ह्रस्वोपधनिवृत्तिं साधयतीति । व्यवस्थित-वा-स्मरणात् 'प्रशान् चरति' । **एवमुत्तरत्रा**पीति । 'प्रशान् टीकते, प्रशान् ठकारीयति, प्रशान् तरति, प्रशान् थुडति' । नातः परं व्यवस्थितवास्मरणम् । प्रपूर्वात् शमेः क्विप् **"मो नो धातोः"** (४।६।७३) सस्वर एव नकारोऽस्य च लोपे स्थानिवद्भावात् स्वरादेशस्य नलोपो मा भूत् ।

यद्येवम्, व्यवस्थित-वा-स्मरणमपीह न प्रयोजयति ? सत्यम् । अनुस्वार-विधिरेवायमिति **"न पदान्तद्विर्वचनवर्गान्त०"** (कात० परि० सू० ११) इत्यादिना स्थानिवद्भावनिषेधः स्यादिति । स्वरान्तस्थानुनासिकपरयोरेव चछयोरिति व्यवस्थित-वा-स्मरणेनैव प्रतिपत्तव्यम्, तदप्रयोजनम्, अव्यभिचारात् । तथा **"टठयोः षकारम्"** (१।४।९) इत्यत्रापि । तथा 'महान् त्सरुः' इत्यत्रापि स्वरान्तस्थापरयोस्तथयोरेव दर्शनात् तथयोः सकारं नापद्यते । 'भवाञ्च् शकारीयति, भवाण्ट् षकारीयति' इति प्रयोगविवक्षा चेदस्तु, तर्हि पदान्ताधिकारोऽपीह न प्रयोजयति, अव्यभिचारात् । किमपरेणान्तग्रहणेन ? सत्यम् । अन्तो विरतिरवसानम् इति प्रतिपत्त्यर्थम् । तेन 'त्वन्तरसि' इति **"वर्गे तद्वर्गपञ्चमं वा"** (१।४।१६) इति सति न भवति ।

नन्वयमपि नकारः शब्दावसाने चेत् पदविभागे समुपलभ्यते, तदेतद् उत्तरार्थं च । तथा चकासाम्बभूव, चकासांबभूवेति **"वर्गे तद्वर्गपञ्चमो वा"** (१।४।१६) भवत्यनुप्रयोगत्वात् । तथा जङ्गम्यते, जंगम्यते इति । **"अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य"** (३।३।३१) इत्यत्र पुनरन्तग्रहणमवसानार्थमिति वक्ष्यति । 'गन्ता, यन्ता' इति नात्र विरतेरभिधानमिति । अनुस्वारः पूर्वो यस्मात् **सोऽनुस्वारपूर्वः** शकारस्तस्मात् पूर्वो यः स्वरः स भाषायां सानुनासिको न दृश्यते इत्यतः सानुनासिको विभाषया नादिश्यते । कानः कानीत्यनुस्वारपूर्वः सकारो वक्तव्यः । कांस्कान् पश्यति, वीप्सायां द्विर्वचनम् । **"नॄनः पे वा"** (कात० परि०, सं० ५०) । नॄँः पाहि, नॄँ ᳵ पाहि , नॄन् पाहि । वक्तव्यं व्याख्येयम् इति । बहुलत्वाद् अरेफप्रकृतिरपि विसर्गोऽनुस्वारागमोऽपि द्रष्टव्य एव क्वचिदधिकारात् नित्यम् **"अनव्ययविसृष्टः०"** (२।५।२९) इति सकारः ॥५३।

[वि० प०]

**नोऽन्त०** । अनुस्वारः पूर्वो यस्मादसा**वनुस्वारपूर्वः** शकारः । भवांश्छ्यतीति । छो छेदने दिवादेर्यन् । **"यन्योकारस्य"** (३।६।३६) इत्योकारलोपः । व्यवस्थित० इत्यादि । **'शमु दमु उपशमे'** (३।४२) इति प्रशाम्यतीति क्विप् । **"पञ्चमोपधाया धुटि चागुणे"** (४।१।५५) इति दीर्घत्वम् । **"मो नो धातोः"** (४।३।७३) इति मकारस्य सस्वरो नकारः । **"अस्य च लोपः"** (३।६।४९) इत्यकारलोपः । **"स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्"** (कात० परि० सू० १०) इति स्थानिवद्भावात् **"लिङ्गान्तनकारस्य"** (२।३।५६) इति न लोपो न भवति ।

यद्येवम्, अत एव स्थानिवद्भावान्नान्तत्वाभावेऽनुस्वारपूर्व शकारो न भविष्यति, किं व्यवस्थित – वा-स्मरणेनेति ? सत्यम् । अनुस्वारविधौ **'न पदान्तद्विर्वचनवर्गान्तानुस्वारः'** (कात० परि० सू० ११) इत्यादिना स्थानिवद्भावप्रतिषेधात् प्राप्नोति । ननु शकारस्यापि विधानात् कथमनुस्वारविधिरिति चेत्, नैवम् । नहि शकारविधानम् अनुस्वारविधिं व्याहन्ति, साक्षादनुस्वारस्यापि विधीयमानत्वात् । पदान्तविधिनिबन्धनो वा स्थानिवद्भावप्रतिषेधः स्यादिति व्यवस्थित-वा-स्मरणम् अभिधीयते । एवमुत्तरत्रापीति । 'प्रशान् टीकते, प्रशान् ठकारीयति, प्रशान् तरति, प्रशान् थुडति' । **"टठयोः षकारम्, तथयोः सकारम्"** (१।४।९,१०) न भवतीत्यर्थः ।

ननु च द्वयोश्चछयोः परयोः पदान्त एव नकारः संभवतीति, अतः पदान्ताधिकारोऽपि निष्फलः । किं पुनरपरेणान्तग्रहणेन कृतमिति । अथ 'वञ्चति, वाञ्छति' इत्यादौ अनन्त्यो नकारः संभवतीति चेत्, न । तत्रानुस्वारस्य व्यक्तौ प्रवृत्तत्वात् परत्वादनन्त्य इति विशेषणेन अपवादत्वात् **"मनोरनुस्वारो घुटि"** (२।४।४४) अनुस्वार एवास्ति बाधकः । अथ 'चिन्ता, श्रन्था' इत्यत्र अनुस्वारस्य **"वर्गे वर्गान्त०"** (२।४।४५) इति कृते **"तथयोः सकारम्"** (१।४।१०) इति प्राप्नोति ।

तदयुक्तम् । **'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'** (काला० परि० ५७) 'कुर्वन्ति, हृष्यन्ति' इत्यादौ व्यक्तिबलादनुस्वारीभूतो नकारो णत्वमतिक्रामति । तथा अनुस्वारपूर्वं शकारमपीति किमन्तग्रहणेन इत्याह – **तथान्तो विरतिरिति** । तथेत्युत्तरसूत्रे इत्यर्थः । तथान्तो विरतिरवसानमिति पर्यायः । एतदुक्तं भवति – पदान्तत्वप्रतिपादनार्थं नान्तग्रहणमिति, अपि तु पाठकृतविरतिप्रतिपादनार्थम् । तेन 'त्वन्तरसि' इति वर्गे तद्वर्गपञ्चमे सत्यपि पदान्तत्वे नकारपर्यन्ते विरतेरभावात् **"तथयोः सकारम्"**

(१।४।१०) इति न भवतीत्यर्थः। एवं **"मोऽनुस्वारं व्यञ्जने"** (१।४।१५) **इत्यादिष्वपि** वेदितव्यमिति ॥५३।

**[क० च०]**

**नोऽन्त०** । नकारस्य मुखनासिकयोरुच्चारितत्वात् शकारोऽपि मुखोच्चारितभागं व्याप्नोति। अतोऽवशिष्टनासिकाभागेनानुस्वार इति। न च नकारस्यानु पश्चान्नासिकायाम् उच्चारितत्वाद् अनुस्वारोऽपि शकारस्य पश्चादेवोच्चार्यते इति वाच्यम्। अनुस्वारपूर्वम् इत्यस्य बहुव्रीहेरिष्टत्वात् **"कारिते च संश्चणोः"** (३।४।१३) इति निर्देशाच्च।

**वस्तुतस्तु** शकारात् परम् अनुस्वारस्योच्चारयितुम् अशक्यत्वात्। अत एव अनुस्वारात् पूर्व इति पञ्चमीतत्पुरुषोऽपि न घटते, तस्माद् बहुव्रीहिरेवेति मनसि कृत्वाह– अनुस्वारः पूर्वो यस्मादिति। व्यवस्थित-वा-स्मरणादिति **वृत्तिः**। ननु कथम् इदमुच्यते, यावता पूर्वत्र नवाग्रहणमेवास्ति न तु वाग्रहणमिति ? सत्यम्। नवाशब्दस्यैकदेशोऽत्र स्मृत इति को दोषः। यद् वा अर्थपरनिर्देशोऽयम्, तेन वास्मरणं विभाषास्मरणम् इत्यर्थः। प्रशान् चरतीति। एवमुत्तरत्रापीति वृत्तिः। अतः "प्रशामष्टठयोर्णः, ञश्चछयोः" (कात० परि०-सं० ६०, ६१) इति **श्रीपति**सूत्राभ्यां णकारञकारयोर्विषयत्वात्। यदत्र नकारश्रुतिस्तत्सन्धिस्थानप्रदर्शनार्थं बोध्यम्। साक्षादनुस्वारस्यापि विधीयमानत्वादिति पञ्जी। एतेनानुस्वारप्राप्त्या **'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'** (द्र०, कलापव्याकरणम्, पृ० २२०) इति न्यायात् शकारोऽपि प्राप्नोतीति कर्तव्यं व्यवस्थितवास्मरणमिति।

ननु यथा अनुस्वारप्राप्त्या सन्नियोगशिष्टेन शकारस्य प्राप्तिरित्युच्यते, तथा स्थानिवद्भावात् शकारस्याप्राप्त्या अनुस्वारस्याप्राप्तौ व्यर्थमेव व्यवस्थित-वा-स्मरणमिति। नैवम्, **'विधिनियमसंभवे विधिरेव ज्यायान्'** (बलाबल० १७) इति। तथाहि स्थानिवद्भावनिषेधद्वारा अनुस्वारस्य प्राप्तिः स्थानिवद्भावेन च शकारस्य प्राप्त्यभावः। ततश्चानुस्वारद्वारकविधेर्बलवत्त्वात् शकारविधिरेव प्राप्नोति। न तु शकारद्वारकोऽनुस्वाराभावः इति तस्मात् कर्तव्यमेव व्यवस्थित-वा-स्मरणमिति। ननु तथापि व्यवस्थित-वा-स्मरणं न क्रियतां **"न पदान्त०"** (कात० परि० सू० ११) इत्यादिना केवलानुस्वारविधावेव स्थानिवद्भावनिषेधः प्रतिपत्तव्यः। अस्य च विशिष्टविधेः स्थानिवद्भावविषयत्वादप्राप्तिरित्याशङ्क्याह-पदान्तविधिनिबन्धनो वा स्थानिवद्भावप्रतिषेधः स्यादिति **केचित्**।

**वयं** तु ब्रूमः– स्वसिद्धान्तमुक्त्वा कस्यचित् सिद्धान्तमाह– **पदान्तविधी**ति। वाशब्देनात्रास्वरसः सूचितः। अस्वरस एव कुत इति चेद् उच्यते– पदान्तत्वे सिद्धे स्थानिवद्भाव उपपद्यते। स्थानिवद्भावनिषेधे तु पदान्तत्वम् इत्यन्योऽन्याश्रयत्वादिति, कुत्र तर्हि पदान्तत्वे स्थानिवद्भावनिषेधस्य विषय इति चेद् यत्रान्योऽन्याश्रयो नास्ति। यथा– 'अग्नयः सन्ति' इत्यत्र अस्धातोरकारस्य स्थानिवद्भावनिषेधान्नोत्वमिति।

अत्र **गुरवः**– नात्र इतरेतराश्रयदोषः, यतो नकारस्य पदान्तता अस्त्येव, किन्तु स्थानिवद्भावनिषेधेनापदान्तता क्रियते इति। अथ पदान्ताधिकृतेर्दूरत्वाच्च अन्तशब्दस्य पदान्तोऽर्थः, सोऽपि न वक्तव्यः इत्याह– **नन्वित्यादीति हेमकरः**। तन्न। पूर्वसूत्रेऽपि पदान्ताधिकारः प्रवर्तते, ततो दूरत्वाभावाद् अन्यदपि बहु प्रलपितम्। तन्न दूषितं ग्रन्थ-गौरवभयात्। **व्यक्तौ प्रवृत्तत्वादिति**। ननु अनुस्वारशकारयोरपि व्यक्तिव्याख्या घटत इत्याह– **परत्वादिति**। चकारछकारमादाय विशेषसूत्रमिदमिति परत्वेऽधिकमाह– **अनन्त्य** इति। **सकृद्गतन्यायादिति**। सकृद् एकवारम्, यद् बाधितं तद् बाधितमेव। अतो विप्रतिषेधो गम्यते इत्यर्थः॥५३।

**[समीक्षा]**

'भवान्+चरति, भवान्+छादयति, भवान्+च्यवते, भवान्+छ्यति' इस अवस्था में पाणिनीय प्रक्रिया के अनुसार **"नश्छव्यप्रशान्"** (८।३।७) से नकार के स्थान में रु आदेश, **"अत्रानुनासिकः पूर्वस्य तु वा"** (८।३।२) से वैकल्पिक अनुनासिक, पक्ष में **"अनुनासिकात् परोऽनुस्वारः"** (८।३।४) से अनुस्वारागम, **"खरवसानयोर्विसर्जनीयः"** (८।३।१५) से विसर्गादेश, **"विसर्जनीयस्य सः"** (८।३।३४) से विसर्ग को सकार तथा **"स्तोः श्चुना श्चुः"** (८।४।४०) से शकारादेश होने पर 'भवाँश्चरति, भवांश्चरति, भवाँश्छादयति, भवांश्छादयति' शब्दरूप सिद्ध होते हैं।

कातन्त्रीय प्रक्रिया के अनुसार न् के स्थान में केवल अनुस्वारपूर्वक श् आदेश किए जाने पर ही उक्त रूपों की निष्पत्ति मानी जाती है। दोनों प्रक्रियाओं में से पाणिनीय प्रक्रिया विस्तृत होने के कारण दुर्बोध भी हो सकती है, परन्तु कातन्त्रीय प्रक्रिया में संक्षेप और सरलता सन्निहित होने से लाघव स्पष्ट है।

**[विशेष]**

१. "तेभ्य एव हकारः पूर्वचतुर्थं न वा" (१।४।४) इस सूत्र में पठित 'वा' को व्यवस्थितविभाषा के रूप में माने जाने के कारण 'प्रशान् चरति' इत्यादि में

न् को अनुस्वारपूर्वक शकारादेश नहीं होता। अग्रिम **"टठयोः षकारम्, तथयोः सकारम्"** (१।४।९,१०) सूत्रों में भी व्यवस्थितविभाषा के आश्रयण से 'प्रशाण्टीकते, प्रशान्तरति' में मूर्धन्य षकार तथा दन्त्य सकारादेश न् के स्थान में प्रवृत्त नहीं होते।

२. प्रकृतसूत्रपठित 'अन्त' शब्द का अर्थ 'विरति' या 'अवसान' माना जाता है, जिसके फलस्वरूप 'त्वन्तरसि' में न् के स्थान में अनुस्वारपूर्वक सकारादेश नहीं होता।

वस्तुतः इसे "तथयोः सकारम्" (१।४।१०) सूत्र की व्याख्या में दिखाया जाना चाहिए॥

**[रूपसिद्धि]**

१ – ४. **भवांश्चरति, भवांश्छादयति, भवांश्च्यवते, भवांश्छ्यति**। 'भवान् + चरति, भवान् + छादयति, भवान् + च्यवते, भवान् + छ्यति' स्थिति में न् के स्थान में अनुस्वारपूर्वक श् आदेश॥५३।

## ५४. ठठयोः षकारम् (१।४।९)

**[सूत्रार्थ]**

पदान्तवर्ती नकार के स्थान में अनुस्वारपूर्वक मूर्धन्य षकारादेश होता है ट-ठ वर्णों के पर में रहने पर॥५४।

**[दु० वृ०]**

नकारः पदान्तष्टठयोः परयोः षकारमापद्यतेऽनुस्वारपूर्वम्। भवांष्टीकते, भवांष्ठकारेण॥५४।

**[क० च०]**

**टठयोः**। ननु ठकारेणेति किमपेक्षया करणत्वं क्रियाश्रुतेरभावात्? सत्यम्। क्रियापदमत्र विवक्षितव्यमिति न दोष इति **हेमकरः**॥५४।

**[समीक्षा]**

'भवान् + टीकते, भवान् + ठकारेण' इस अवस्था में कातन्त्रकार न् के स्थान में अनुस्वारपूर्वक ष् आदेश करके 'भवांष्टीकते, भवांष्ठकारेण' आदि शब्दरूप सिद्ध करते हैं। पाणिनि के अनुसार **यहाँ** भी न् को रु, रु को विसर्ग, विसर्ग को स्,

स् को ष् आदेश तथा अनुस्वार-अनुनासिक प्रवृत्त होते हैं। अतः सं० ५३ की तरह यहाँ भी पाणिनीय प्रक्रिया गौरवपूर्ण है ॥

**[रूपसिद्धि]**

१. **भवांष्टीकते**। भवान् + टीकते। पदान्तवर्ती नकार को अनुस्वारपूर्वक मूर्धन्य षकारादेश।

२. **भवांष्ठकारेण**। भवान् + ठकारेण। ठकार के पर में रहने पर पदान्तवर्ती नकार को अनुस्वारपूर्वक मूर्धन्य षकारादेश ॥५४।

## ५५. तथयोः सकारम् (१।४।१०)

**[सूत्रार्थ]**

त-थ के पर में रहने पर पदान्त नकार को अनुस्वारपूर्वक सकारादेश होता है ॥५५।

**[दु० वृ०]**

नकारः पदान्तस्तथयोः परयोः सकारमापद्यते अनुस्वारपूर्वम्। भवांस्तरति, भवांस्थुडति।पुंस्कोकिलः, पुंस्खननम्।पुंश्चकोरः, पुंश्छत्रम्।पुंष्टिट्टिभः, सुपुंश्चरति। पुंसोऽशिट्यघोषविषये संयोगान्तलोपस्यानित्यत्वात्।यथाप्राप्तमेव।अशिडिति किम्? पुंसरः ॥५५।

**[वि० प०]**

**तथयोः**। इह स्वरान्तस्थानुनासिकपरयोस्तथयोरिति व्यवस्थित-वा-स्मरणेन वेदितव्यम्। तेन महान् त्सरुरित्यत्र न भवतीति। तथा यथासम्भवं पूर्वपरयोरपि सूत्रयोर्व्यावृत्तिरिति।**पुंस्कोकिल** इत्यादि।पुमांश्चासौ कोकिलश्चेति।पुंस्खननमित्यादिषु यथायोगं विग्रहः कार्यः। **सुपुंश्चरतीति**। शोभनाः पुमांसो यस्मिन् कुले इति विग्रहः। **"विरामव्यञ्जनादावुक्तं नपुंसकात् स्यमोर्लोपेऽपि"** (२।३।६४) इति वचनाद् अन्शब्दलोपे संयोगान्तसकारस्यापि लोपः कथन्न प्राप्तः? पुंस्कोकिल इत्यादिषु च **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यतिदेशबलात् तत् कथमसौ संयोगान्तलोपो न भवतीत्याह – **पुंस** इत्यादि। तथा च वक्ष्यति – **पुनः संयोगग्रहणमिह पूर्वस्मिंश्चानित्यार्थमिति**। इहापि स्वरान्तस्थानुनासिकपरेऽघोषे इत्येव। तेन 'पुंक्षीरम्, पुंक्षुरः' इति संयोगान्तलोप एवेति।

ननु 'पुंस्कोकिलः' इत्यादौ **'व्यञ्जनान्तस्य यत्सुभोः'** (२।५।४) इत्यतिदेश-बलाल्लोपः प्राप्नोति। न च तत्रानित्यत्वं प्रतिपादितम्? सत्यम्। संयोगान्तलोप इत्येतद्वचनविहितस्यैव कार्यस्य तत्रातिदेश इत्यदोषः। तेन विसर्जनीये सति क्वचिद् **"अनव्ययविसृष्टस्तु सकारं कपवर्गयोः"**, क्वचिद् **"विसर्जनीयश्चे छे वा शम्, टे ठे वा षम्"** (१।५।१,२) इत्याद्याह– **यथाप्राप्तमेवेति**॥५५।

## [क० च०]

**तथयोः**।**"पुमः खय्यम्परे"**(पा० ८।३।६) इति परः। पुम इति लुप्तसंयोगान्तस्य पुंसोऽनुकरणम्, पुमो मकारो बिन्दुपूर्वं सकारम् आपद्यते इत्यर्थः। खयीति, शिड्वर्जितेऽघोषे परे इत्यर्थः। खयि कीदृशे अम्परे, स्वरान्तस्थानुनासिकपर इत्यर्थः। खयीति किम्? पुंवत्। अम्पर इति किम्? पुंक्षुरः। तन्न वक्तव्यमित्याह– **पुंस** इति **वृत्तिः**।

अथ परमते 'पुमः' इति निर्देशात् 'पुमान् करोति' इत्यत्र न भवति। अस्मन्मते इह किं स्यादिति चेत्, न। इहापि 'पुंसः' इति **वृत्तौ** लुप्तामृशब्दस्यानुकरणार्थं भवति। अत एव कश्चिदिह स्वरान्तस्थानुनासिकपरयोश्चछयोः, टठयोस्तथयोरिति सम्बन्धं मन्यते। तेन भवान् चूछौ लिखति, भवान् टठौ लिखति, महान् त्सरुरित्यादौ न भवति।

अस्मन्मते तदेव प्रमाणमिति हृदि कृत्वाह– **इह स्वरान्त** इत्यादि **पञ्जी**। ननु 'पुंस्कोकिलः' इत्यादेः कथमिह प्रस्तावः। यत्र संयोगान्तलोपस्यानित्यत्वं तत्रैव दर्शयितुम् उचितत्वात्? सत्यम्। अत्रापि प्रयोजनमस्ति, अनुस्वारपूर्वस्य सकारस्य वक्तव्यत्वादिति **हेमकराशयः**। **वयन्तु** स्वरान्तस्थानुनासिक एवाघोषेऽन्तलोपोऽनित्य इति॥५५।

## [समीक्षा]

'भवान्+तरति, भवान्+थुडति' आदि स्थलों में कलापकार न् के स्थान में ही साक्षात् अनुस्वारपूर्वक स्-आदेश करते हैं। इसी प्रकार 'भवांस्तरति, भवांस्थुडति' प्रयोग सिद्ध होते हैं। पाणिनि के अनुसार न् के स्थान में रु आदेश, रु के स्थान में विसर्ग, विसर्ग के स्थान में सकारादेश तथा अनुस्वार-अनुनासिक होने पर उक्त रूप निष्पन्न होते हैं। सं० ५३ की समीक्षा के अनुसार यहाँ भी पाणिनीय प्रक्रिया में गौरव स्पष्टतया परिलक्षित होता है॥

## [विशेष]

'पुंस्कोकिलः, पुंस्खननम्, पुंश्चकोरः, पुंश्छत्रम्, पुंष्टिट्टिभः, सुपुंश्चरति' इत्यादि प्रयोगों की सिद्धि के लिए पाणिनीय व्याकरण में सूत्र है– **"पुमः खय्यम्परे"**

(पा० ८।३।६)। आचार्य शर्ववर्मा ने इसके लिए पृथक् सूत्र नहीं बनाया। अतः दुर्गसिंह आदि व्याख्याकारों का अभिमत यह है कि शिड्भिन्न अघोष के पर में रहने पर 'पुमन्स्' शब्द में प्राप्त संयोगान्तलोप अनित्य माना जाता है। तदनुसार 'पुमांश्चासौ कोकिलश्च' इस विग्रह तथा 'पुमन्स्+कोकिलः' इस अवस्था में **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) सूत्र द्वारा अतिदेश, **"पुंसोऽनूशब्दलोपः"** (२।२।४०) से अन् का लोप, संयोगान्तलोप की अनित्यता से **"संयोगान्तस्य लोपः"** (२।३।५४) सूत्र से संयोगान्त स् के लोप का निषेध, **"मनोरनुस्वारो धुटि"** (२।४।४४) से म् को अनुस्वार, **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग एवं **"अनव्ययविसृष्टस्तु सकारं कपवर्गयोः"** (२।५।२९) से विसर्ग को स् आदेश करने पर 'पुंस्कोकिलः' रूप सिद्ध होता है। 'पुंश्चकोरः, पुंश्छत्रम्, सुपुंश्चरति' में **"विसर्जनीयश्चे छे वा शम्"** (१।५।१) सूत्र से विसर्ग के स्थान में शकारादेश 'पुंष्टिट्टिभः' में **"टे ठे वा षम्"** (१।५।२) से मूर्धन्य षकारादेश प्रवृत्त होता है। 'पुंसरः' में शिट्पर होने के कारण संयोगान्तलोप का निषेध नहीं होता। अतः सलोप तथा म् को अनुस्वारादेश होने पर 'पुंसरः' रूप साधु होता है।

ऐसी मान्यता है कि वसन्त ऋतु में पुरुष-कोकिल के ही स्वर में विशेष माधुर्य रहता है। स्त्री-कोकिल में नहीं। यह भी प्रसिद्धि है कि कोकिल अपने अण्डे काक-नीड में रख देते हैं और इस प्रकार कोकिल-शावकों का पालन-पोषण काकों द्वारा किया जाता है। इसीलिए इनका 'परभृतः' यह भी एक नाम है। परन्तु पुरुषशावकों का पालन-पोषण स्वयं कोकिल माता-पिता ही करते हैं। या जिस पुरुषशावक का पालन-पोषण कोकिल माता-पिता द्वारा किया जाता है उसी के स्वर में विशेष माधुर्य उत्पन्न होता है। बँगला – टीकाओं में एतद्विषयक एक श्लोक उपलब्ध होता है –

**संवर्धितः पितृभ्यां य एकः पुरुषशावकः।**
**पुंस्कोकिलः स विज्ञेयः परपुष्टो न कर्हिचित्॥**

**[रूपसिद्धि]**

१. **भवांस्तरति**। भवान्+तरति। तकार के पर में रहने पर पदान्तवर्ती न् को अनुस्वारपूर्वक सकारादेश।

२. **भवांस्थुडति** । भवान् + थुडति । थकार के पर में रहने पर पदान्तवर्ती न् को अनुस्वारपूर्वक सकारादेश ॥५५।

## ५६. ले लम् (१।४।११)

### [सूत्रार्थ]

लकार के पर में रहने पर पदान्तवर्ती नकार को लकारादेश होता है ॥५६।

### [दु० वृ०]

नकारः पदान्तो ले परे लम् आपद्यते अनुस्वारहीनम् ।भवाँल्लुनाति, भवाँल्लिखति । कारहीनत्वादनुनासिकम् ॥५६।

### [दु० टी०]

**ले लम्०** । अनुनासिकयोगाद् अनुनासिकमिति । एतदुक्तं भवति नकारोऽन्तोऽनुस्वारेण हीनं लकारमनुनासिकमापद्यते इत्यर्थः । कारहीनत्वादिति हेतुः । वर्णात् प्रयुक्तः कारशब्दो हि स्वरूपग्राहको दृष्टः, तदभावे **"स्थानेऽन्तरतमः"** (काला० परि० २४) इत्यनुनासिकस्य नकारस्यानुनासिक एव भवति । द्विप्रभेदा ह्यन्तस्थाः– सानुनासिका निरनुनासिकाश्च रेफवर्जिता इति । अनुस्वारपूर्वमित्यपि न संबध्यते, यतोऽनुनासिकस्य लकारस्यापि नकार एव स्थानी दृश्यते स कथमन्तरतमो न भवतीति ॥५६।

### [वि० प०]

**ले लम्०** । यद्यप्यन्तस्था द्विविधाः सानुनासिका निरनुनासिकाश्च रेफवर्जिता इति, तथापि सूत्रे निरनुनासिकस्यैव श्रूयमाणत्वात् स एव लकारः प्राप्नोति । तदयुक्तम् । कारशब्दो हि वर्णात् परः श्रूयमाणो यथाश्रुतवर्णपरिग्राहको भवति, तदभावे **"स्थानेऽन्तरतमः"** (काला० परि० २४) इति न्यायाद् अनुनासिकनकारस्यानुनासिक एव लकारो भवति इत्याह – **कारहीनत्वाद् अनुनासिकम्** इति ।एतेनानुस्वारपूर्वमिति न संबध्यते, यतोऽनुस्वारस्यापि नकार एव स्थानी, स चानुनासिकेनैव लकारेणान्तरतम्यात् प्रवर्तमानेन सर्वात्मनाघ्रातत्वमिति कथमनुस्वारः प्रवर्तते, स्थानिन एवाभावात् । अत एवोक्तम्– **अनुस्वारहीनम्** इति ।

ननु अनुनासिको हि वर्णधर्मः, तथा च सहानुनासिकेन वर्णधर्मेण वर्तन्ते इति **सानुनासिका** वर्णा उच्यन्ते । तत् कथम् अनुनासिकं लकारमापद्यते इति सामाना-

धिकरण्यमिति ? सत्यम् । अनुनासिकधर्मयोगाद् अनुनासिक उच्यते ऌकारः । यथा दण्डयोगाद् दण्डः पुरुषः इति ॥५६।

**[क० च०]**

**ले०** । ननु भवाँल्लुनातीत्यत्र कथं सानुनासिकऌकारः श्रूयते ? सत्यम् । अन्तस्थाः सानुनासिका निरनुनासिका रेफवर्जिता इति को दोषः ? अथ तर्हि एवं सानुनासिका निरनुनासिका एव कथन्न स्युरिति मनसि कृत्वाह – **यद्यपीत्यादि** । अत्र सूत्रे कथं सानुनासिको न निर्दिश्यते ततश्चान्तरतमव्याख्या च परिहृता भवति ? सत्यम् । अन्तरतमपरिभाषाया अनुप्रवेशादनुस्वारपूर्वो ऌकार एव प्राप्नोतीति **हेमकरः** । तन्न । सूत्रे सानुनासिकनिर्देशेनापि सर्वात्मना आघ्रातत्वाद् अनुस्वारो न भवतीति वक्तुं शक्यत्वात् । अथ पूर्वेषु योगेषु अन्तरतमतया प्रवृत्तिर्दृष्टा । तद्वद् अत्रापि भवति, तत् कथं सानुनासिको न निर्दिश्यते ? सत्यम् । सूत्रे **"ले लम्"** (१।४।११) इति सानुनासिको न निर्दिष्टः, उच्चारणगौरवादिति **हेमकरः** ।

ननु कारशब्दे विद्यमानेऽपि **"स्थानेऽन्तरतमः"** (काला० परि० २४) इत्यस्य कथं नानुवृत्तिः ? सत्यम् । कारशब्दस्य यथाश्रुतवर्णग्रहणादन्तरतमस्य विवक्षा परिहृता, तदभावे च वर्तते इति ॥५६।

**[समीक्षा]**

'भवान् + लुनाति, भवान् + लिखति' इत्यादि स्थलों में कलापकार के निर्देशानुसार न् को सानुनासिक ल् आदेश होकर 'भवाँल्लुनाति, भवाँल्लिखति' आदि शब्दरूप निष्पन्न होते हैं । पाणिनि ने ऐसे स्थलों में परसवर्णादेश का विधान किया है – "तोर्लि" (८।४।६०) ।

पाणिनीय और कलाप दोनों में ही साक्षात् सानुनासिक आदेश विहित नहीं है, व्याख्या के बल पर ही सानुनासिक ऌकारादेश उपपन्न हो पाता है । पाणिनीय व्याख्याकार कहते हैं कि स्थानी नकार यतः अनुनासिक है – **"मुखनासिकावचनोऽनुनासिकः"** (१।१।८), अतः परसवर्ण ऌकारादेश भी सानुनासिक ही होगा – "विद्वान् लिखतीति स्थिते नकारस्य स्थानिनः अनुनासिकस्य परसवर्णो ऌकारो भवन् आन्तर्यादनुनासिक एव ऌकारो भवतीत्यर्थः" (बा० म० ८।४।६०) ।

कलाप के वृत्तिकार दुर्गसिंह ने कहा है कि उपर्युक्त सूत्रों में (१।४।८,९,१०) कार के साथ वर्णों का पाठ किया गया है, प्रकृत सूत्र में ल के साथ 'कार' पठित नहीं है। आचार्य का यह विशेष निर्देश ही अनुनासिक ल् को सूचित करता है– **"कारहीनत्वादनुनासिकम्"** (कात० वृ० १।४।११)। कलाप के अनुसार उच्चरित वर्ण के स्वरूप का अवबोध कराने के लिए दो प्रत्यय निर्दिष्ट हैं– कार एवं त्।

यदि आचार्य को ल्-वर्ण के अनुनासिकरहित स्वरूप का अवबोध कराना अभीष्ट होता तो वे ल् के साथ कार का भी पाठ अवश्य ही करते। न करने का यही उद्देश्य हो सकता है कि उन्हें यहाँ सानुनासिक लकार करना अभीष्ट है, जैसा कि प्रयोगों में भी देखा जाता है। इन दो कार्यों की उभयत्र समानता होने पर भी पाणिनि का सावर्ण्यज्ञान अवश्य ही गौरवाधायक कहा जा सकता है।

**[रूपसिद्धि]**

१. **भवाँल्लुनाति**। भवान्+लुनाति। लकार के पर में रहने पर पदान्तवर्ती न् को अनुनासिक ल् आदेश।

२. **भवाँल्लिखति**। भवान्+लिखति। लकार के पर में रहने पर पदान्तवर्ती न् को सानुनासिक ल् आदेश ॥५६।

## ५७. ज-झ-ञ-शकारेषु ञकारम् (१।४।१२)

**[सूत्रार्थ]**

पदान्तवर्ती नकार के स्थान में ञकारादेश होता है। यदि नकार के बाद ज, झ, ञ या श वर्ण हो ॥५७।

**[दु० वृ०]**

नकारः पदान्तो ज-झ-ञ-शकारेषु परतो ञकारमापद्यते। भवाञ्जयति, भवाञ्झासयति, भवाञ्ञकारेण, भवाञ्शेते। पदमध्ये चटवर्गादेश इति ज-झ-ञ-शकारेषु ञकारविधानम् ॥५७।

**[वि०प०]**

**जझञ०**। ननु शे ञकारम् इति क्रियताम्, जझञानां च वर्गत्वात् तेषु तवर्गश्चटवर्गाविति ञकारः सिद्ध एवेत्याह– **पदमध्ये चटवर्गादेश** इत्यादि। भवाञ्जयतीत्यादौ पदान्तत्वान्न तेन ञकारः सिध्यतीति भावः ॥५७।

## [क० च०]

**जझञ०** । **पदमध्य** इति **वृत्तिः** । इदमेव ञकारविधानं पदमध्ये चटवर्गादेश इति ज्ञापयतीत्यर्थः । डढणपरस्त्वित्यादिवचनं च ज्ञापकम् उन्नेयम् । ननु **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इति सूत्रमेकपदप्रस्तावे न क्रियताम्, किन्तु सामान्येन विधीयताम् । तदा तेनैव भवाञ्जयतीत्यादिकं भविष्यति, किमनेन ? नैवम् । यदि सामान्येन विधीयते तदा सूत्रत्रयं कर्तव्यं स्यात् । तथाहि 'भवाञ्शेते' इति सिद्ध्यर्थं **"शे ञकारम्"** (१।४।१२) इत्येकं सूत्रम्, स्वोदाहरणसिद्ध्यर्थं **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) इत्यस्त्येव, 'मधुलिट् तरति' इति सिद्ध्यर्थम् अपरमपीति । अन्यथा अत्रापि तवर्गस्य टवर्गः स्यादिति **हेमकरः** ।।५७।

## [समीक्षा]

'भवान् + जयति, भवान् + झासयति, भवान् + ञकारेण, भवान् + शेते' इत्यादि स्थलों में कलापकार न् के स्थान में ञ् आदेश करके 'भवाञ्जयति, भवाञ्झासयति, भवाञ्ञकारेण, भवाञ्शेते' आदि रूप सिद्ध करते हैं । यहाँ पाणिनि ने श्चुत्व-विधान किया है – **"स्तोः श्चुना श्चुः"** (८।४।४०) । ज्ञातव्य है कि चवर्ग के अन्तर्गत आने वाले 'च-छ-ज-झ-ञ' इन पाँचों वर्णों के परवर्ती होने पर पदान्तवर्ती नकार के स्थान में ञकारादेश के उदाहरण पाणिनीय व्याकरण में नहीं मिलते । अतः पाणिनीय निर्देश की अपेक्षा कलाप का निर्देश अधिक विशद कहा जा सकता है ।

## [विशेष]

कलापव्याकरण के कारक-प्रकरण में एक सूत्र है – **"तवर्गश्चटवर्गयोगे चटवर्गौ"** (२।४।४६) । इस सूत्र से चवर्ग के परवर्ती होने पर तवर्ग के स्थान में चवर्गादेश होता है । इसी के निर्देशानुसार ज, झ एवं ञ वर्णों के पर में रहने पर न् के स्थान में ञ् आदेश किया जा सकता है । यदि ऐसा स्वीकार कर लिया जाए तो फिर केवल शकार के परवर्ती होने पर ही नकार को ञकारादेश करना अवशिष्ट रह जाता है । तदर्थ "शे ञकारम्" इतना ही सूत्र करना आवश्यक है ।

इस पर वृत्तिकार दुर्गसिंह ने समाधान दिया है – **'पदमध्ये चटवर्गादेश इति जझञशकारेषु ञकारविधानम्'** (कात० वृ० १।४।१२) । अर्थात् कारक-प्रकरणीय (२।४।४६) सूत्र की प्रवृत्ति पद के मध्य में होती है । मध्यवर्ती तवर्ग के स्थान में

चवर्गादेश उपपन्न होता है। जैसे – 'राज्ञः, मज्जति' इत्यादि। यहाँ पदान्तस्थ न् के स्थान में ञ् आदेशविधानार्थ प्रकृत सूत्र यथावत् रूप में बनाना उचित ही है।

[रूपसिद्धि]

१-४. **भवाञ्जयति, भवाञ्झासयति, भवाञ्ञकारेण, भवाञ्शेते।** भवान् + जयति, भवान् + झासयति, भवान् + ञकारेण, भवान् + शेते। यहाँ क्रमशः 'ज्-झ्-ञ्-श्' वर्णों के परवर्ती होने पर पदान्तवर्ती न् को ञ् आदेश ॥५७।

## ५८. शिन्चौ वा (१।४।१३)

[सूत्रार्थ]

पदान्तवर्ती न् के स्थान में विकल्प से 'न्च्' आदेश होता है, श् वर्ण के पर में रहने पर। यह ज्ञातव्य है कि 'न्च्' आदेश न होने पर उक्त सूत्र "जझञशकारेषु ञकारम्" (१।४।१२) से ञकारादेश होगा ॥५८।

[दु० वृ०]

नकारः पदान्तः शि परे न्चौ वा प्राप्नोति ञकारं वा। भवाञ्छूरः, भवाञ्च्शूरः, भवाञ्शूरः। कुर्वञ्छूरः, कुर्वञ्च्शूरः, कुर्वञ्शूरः। प्रशाञ्छयनम्, प्रशाञ्च्शयनम्, प्रशाञ्शयनम्। णत्वं गत्वं च न स्यात्। अनुस्वारो वर्गान्तश्च स्यादेव। वात्र समुच्चये ॥५८।

[दु० टी०]

**शि न्चौ।** नकारश्चकारान्तो भवतीत्यर्थः। नकारश्चकारश्च यदीह पृथग्भावेनादिश्यते, तदा नकारस्य नकारकरणमनर्थकम्। अथ यदि नकारस्थित्यर्थं नकारकरणम्, तर्हि वाशब्द इह विकल्पार्थ एव भवन् रूपत्रयमवधारयिष्यति। तर्हि ञकार एव कृत एकमादेशं विकल्पयिष्यति ? सत्यम्। साध्यतया चकारः कृतोऽनुविधायकतया च नकार इति। वर्णद्वयापेक्षया तु द्विवचनं यथाश्रुतवर्णपरिग्रहार्थमिति। रषाभ्यां नस्य णत्वं चस्य गत्वं च न स्यात्।

ननु विरामे व्यञ्जनादौ च प्रत्यये गत्वं वक्ष्यति, तत् कथम् इहेति ? सत्यम्। प्रशामः शयनं **प्रशाञ्छयनमिति "व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यनेन स्यात्। तर्हि नस्यानुस्वारे वर्गान्तश्च कथमिति अनुस्वारस्य हि व्यक्तौ प्रवृत्तत्वात्। द्विवचनस्य

तु यथाश्रुतवर्णपरिग्रहबलेन 'असिद्धं बहिरङ्गमन्तरङ्गे' (कात परि० वृ० ३३) इत्यपि बाध्यते। 'वाऽत्र समुच्चये' इति सिद्धान्ते तु खल्वेवम्-शकारे ञकारं वा न्चौ वा इत्यर्थः ॥५८।

## [वि० प०]

शि न्चौ। कुर्वञ्छूर इति कृञः शन्तृङ्, अनुबन्धलोपः। **'तनादेरुः, करोतेः'** (३।२।३७;५।४)इति गुणः। **"अस्योकारः"** (३।४।३९)इत्यादिना अकारस्योकारः। विरामे संयोगान्तलोपे न्चादेशे कृते पक्षे शकारस्य **"वर्गप्रथमेभ्यः"** (१।४।३) इत्यादिना छकारः, न्चादेशाभावपक्षे पूर्वेण ञकार एवेति रूपत्रयम्। प्रशाञ्छयनमिति। प्रशान् इति साधितमेव। प्रशामः शयनमिति वाक्ये **"स्वरे धातुरनात्"** (४।६।७५) इति नकारो निवर्तते।

अथ न्चाविति कथमेक एवायमादेशः। यावता नकारचकारौ भिन्नावेव कथं नादिश्येते। नकारस्य नकारकरणं व्यर्थमिति चेत् , तदयुक्तम्। कार्यान्तरबाधनार्थं भविष्यति, नैवम्। एवं सति शकारे रूपत्रयं स्यात्। तथाहि पूर्वेण ञकारोऽनेन नकारश्चकारश्चेति।ततो यदि रूपत्रयमभिप्रेतं स्यात् तदा 'शि चं वा' इति कृते विभाषया चकारो भविष्यति। विकल्पबलादेव पक्षे नकारस्य स्थितिः। पूर्वेण ञकारोऽस्त्येव इति रूपत्रयं सिद्धम्, किं नकारकरणेनेति ? तस्मान्नकारकरणादेवादेशोऽयमेक इति।

यद्येवं **"शि ञ्चौ"** इति कथं न कृतम् ? ञकार एवैकत्वम् आदेशस्य बोधयिष्यति। अन्यथा पूर्वेणैव सिद्धत्वात् किमर्थम् अनेन ञकारकरणेनेति ? एतेनानुस्वारवर्गान्तप्रक्रिया च परिहृता भवति ? सत्यम्। नकारश्चकारान्तो भवतीति साध्यतया चकारः कृतोऽनुविधायकतया च नकार इति। एकविधानेन हि लाघवं भवति, न विधानद्वयेनेति भावः। आदेशस्यैकत्वेऽपि वर्णद्वयापेक्षया द्विवचनम्, तच्च यथाश्रुतवर्णपरिग्रहार्थमेव। अन्यथा न्चादेशे कृतेऽनन्त्यत्वान्नकारस्य **"रषृवर्णेभ्यः"** (२।४।१८) इत्यादिना णत्वम्, चकारस्य **"चवर्गदृगादीनां च"** (२।३।४८) इति गत्वं स्यादित्याह– **णत्वं गत्वं च न स्याद्** इति।

ननु गत्वं **"विरामव्यञ्जनादौ च"** (२।३।६४) प्रत्यये विधीयते, तत् कथमिह प्राप्तिः ? सत्यम्। प्रशामः शयनं प्रशाञ्छयनम् इति विग्रहे **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यनेन स्यादिति। तर्हि नकारस्यानुस्वारो वर्गान्तता च कथम् ? सत्यम्। अनुस्वारस्य व्यक्तौ प्रवृत्तत्वात् प्रवृत्तस्य च वर्गे वर्गान्तस्यावश्यंभावित्वादित्याह–

अनुस्वारो वर्गान्तश्च स्यादेवेति। अथान्तरङ्गेऽनुस्वारादौ कर्तव्ये बहिरङ्गत्वादसिद्धो न्चादेशः, ततश्चानन्त्यत्वाभावात् कथमनुस्वार इति न चोद्यम्, द्विवचनस्य यथाश्रुत-वर्णपरिग्रहणेन **'असिद्धं बहिरङ्गम्'** (काला० परि० ४२) इत्यस्यापि बाधितत्वात्। 'वात्र समुच्चये' इत्यादेशस्यैकत्वस्य समर्थितत्वात् पूर्वसूत्राद् ञकाराधिकारस्य विद्यमानत्वादयं वाशब्दः समुच्चयार्थ एव घटते। उभयोरपि कार्ययोर्वाक्योपात्तत्वान्नकारः शकारे परे ञकारं वा प्राप्नोतीत्यर्थः ॥५८।

## [क० च०]

**शि न्चौ**। ननु प्रशाम इत्यत्र वाक्ये कथं **"मो नो धातोः"** (४/६/७३) इति कृतो नकारो न श्रूयते इत्याह-वाक्य इत्यादि। **"स्वरे धातुरनात्"** (४/६/७५) इति स्वरे परे धातुर्निवर्तते, नत्वात्। आकारो न निवर्तते इत्यर्थः। कार्यान्तरबाधनार्थं भविष्यतीति पूर्वेण ञकारप्राप्तेरेव बाधेति भावः। अन्यथा अस्मिन्नपि पक्षे पूर्वसूत्रप्रवृत्त्या रूपद्वयमेव स्यादिति, तदा "शि चं वा" इतीत्यादि। ननु "शि चं वा" इति कृतेऽपि वाशब्दः समुच्चयार्थः कथन्न स्याद् विकल्पार्थे वा किं प्रमाणम्? सत्यम्। यदि "शि चं वा" इति कृतेऽपि विकल्प एव न स्यात् तदा निःसन्देहार्थं चकारग्रहणमेव (शि चम्, चेति) कृतं स्यात्।

अथ सिद्धान्तेऽपि चकारस्याकरणाद् वाशब्दो विकल्पार्थ एवेति किं नोच्यते? नैवम्। यदि स्थितिपक्षेऽपि वाशब्दो विकल्पार्थः स्यात् तदा तेन विकल्पेन रूपत्रयं स्यात्। तथाहि पूर्वेण ञकारः, अनेन न्चादेशः। विकल्पपक्षे नकारस्थितिरिति। अत्र यदि एतदेव साध्यं स्यात् तदा निःसन्देहार्थं 'शि चान्तो वा' इति कृतं स्यात्। **अयमर्थः** – नकारः शि परे चान्तो वा भवति। ततश्च पक्षे विकल्पबलादेव नकारस्थितिः, पूर्वसूत्रेण च ञकारोऽप्यस्त्येवेति। एतेन आदेशद्वयशङ्कापि परिहृता भवतीति। न च 'शि चान्तो वा' इति कृते गौरवम् इति वाच्यम्, शङ्काद्वयपरिहारार्थं गौरवस्यापि न्याय्यत्वादिति। तस्मादीदृशस्याकरणाद् वाशब्दः समुच्चयार्थ एव।

ननु 'शि चान्तो वा' इति क्रियमाणे द्विवचनस्याभावाद् यथाश्रुतवर्णपरिग्रह-व्याख्याविरहेण णत्वगत्वयोर्निराकरणाभावात् ते स्याताम् इति, तत् कथमिदमुच्यते इति चेत्, न। णत्वं हि व्यक्तिबलादनुस्वारस्य प्रवर्तमानत्वादेव न भविष्यति। गत्वमपि दृगादिसाहचर्यादौपदेशिकधात्ववयवचवर्गग्रहणान्न भवष्यितीति कश्चित्। तन्न। धात्ववयवस्य गत्वस्वीकारे 'तृष्णग्' इत्यसिद्धेः।

न चास्मिन् पक्षे इह 'शि चं वा' इति कुर्याद् इत्याद्यसङ्गतम्। द्विवचन-फलस्याभावादिति वाच्यम् । चकारकरणादेव आदेशद्वयपक्षे नकारस्यान्त्यत्वेन फलस्य सुदूरपराहतत्वात् [गत्वाभावस्य सिद्धत्वात्]।

**हेमकरस्तु** – यदि स्थितिपक्षेऽपि वाशब्दस्य विकल्पार्थता स्यात् तदा पूर्वसूत्रे नकारग्रहणम् अपनीय 'शि ञ्चो वा' इति विदध्यात्, तदापि रूपत्रयं भविष्यति। अथैवं कृते एक एवादेशः कथं न स्यात्। न चैकादेशे बहुवचनम् असङ्गतम् इति वाच्यम्, वर्णत्रयापेक्षया बहुवचनस्य चरितार्थत्वात्? सत्यम्। यद्येक एवादेशः स्यात् तदा नकारस्य वर्गान्तत्वे संयुक्तसजातीययोर्वर्णयोरुच्चारणाभेदान्नकारो व्यर्थः स्यात्। तस्माद् भिन्नावेवादेशाविति।

अथ बहुवचनादेशत्रयं कथं न स्यात्? नैवम्, वाग्रहणात्। बहुवचनं तु वर्णद्वयापेक्षया चरितार्थम्। तस्मात् पूर्वसूत्रे नकारकरणादिहाप्यादेशैकत्वस्य च समर्थितत्वादयं वाशब्दः समुच्चयार्थ एवेत्याचष्टे। आदेशस्य द्वित्वे बहुवचनाद् गत्वाभावस्तस्माद् भिन्नयोगकरणाद् वाशब्दः स्थितिपक्षे समुच्चयार्थ एवेत्याचष्टे। **अन्ये** तु यदि सिद्धशास्त्रे विकल्पः स्यात् तदापि पक्षे ञकारो भविष्यतीति साध्यक्षतेरभावात् समुच्चयार्थत्वमेव युक्तम्। न च विकल्पबलेन पक्षे नकारस्थितिरपि करणीयेति वाच्यम्, आम्नायविरुद्धस्य ज्ञापयितुम् अयोग्यत्वात्। अत एव **कुलचन्द्रो**ऽप्याह– नकारस्थित्यदर्शनात् समुच्चयार्थो वाशब्दः।

यद्यप्यनेनैव सिद्धान्तेन आदेशद्वयशङ्का परिहृता भवति, तथापि रूप-त्रयाभ्युपगमवादेन सिद्धान्तान्तरं प्रदत्तम् इत्याहुः। सूत्रार्थं कुर्वन् लाघवदर्शनार्थत्वात् सिद्धान्तयति – **सत्यम्** इत्यादि। चकारस्य साध्यत्वेन नकारोऽपि स्वस्थित्या अनुविदधातीत्यनुविधायको नकार इत्यर्थः। आदेशस्यैकत्वस्य समर्थितत्वादिति 'शि चं वा' इत्यकरणादिति भावः॥५८।

**[समीक्षा]**

'भवान्+ शूरः, कुर्वन् + शूरः, प्रशान् +शयनम्' इस स्थिति में कलापकार के निर्देशानुसार 'न्' को 'न्च्' आदेश, **"वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा"** (१ । ४ । ३ ) से छकारादेश, **"मनोरनुस्वारो घुटि"** (२/४/४४) से अनुस्वार, **"वर्गे वर्गान्तः"** (२/४/४५) से ञकारादेश होने पर 'भवाञ्च्छूरः' शब्द निष्पन्न होता है। **"धुटो धुट्स्वेकवर्गे"** (कात० परि०, सं० ७६) से च् के लोप–पक्ष में भवाञ्छूरः,

छकारादेशाभाव में भवाञ्च्शूरः एवं न् के स्थान में केवल 'ञ्' आदेश होने पर भवाञ्शूरः रूप भी बनते हैं।

पाणिनि के अनुसार तुगागम (८।३।३१), छत्व (८।४।६३), श्चुत्व (८।२।४०), चू-लोप (८।४।६५) होकर उक्त प्रयोग सिद्ध होते हैं। जिन्हें लक्ष्य कर कहा गया है ( द्र०, सि० कौ० इत्यादि)–

**अछौ अचछा अचशा अशाविति चतुष्टयम्।**

**रूपाणामिह तुक्-छत्व-चलोपानां विकल्पनात्॥**

प्रयुक्त होने वाले विधिसूत्रों की संख्या में साम्य होने पर भी पाणिनीय व्याकरण में आदेश तथा आगम दो विधियाँ अवश्य ही गौरवाधायक सिद्ध हो सकती हैं। कातन्त्र में एक-एक ही सूत्रद्वारा न् के स्थान में 'न्च' एवं 'ञ्' आदेश का विधान लाघव-बोधक कहा जा सकता है।

**[विशेष]**

**'कुर्वञ्छूरः'** आदि स्थलों में **"रषृवर्णेभ्यो नो णमनन्त्यः"** (२।४।१८) से नकार को णकारादेश तथा 'भवान्चूशूरः' इत्यादि स्थलों में **"चवर्गदृगादीनां च"** (२।३।४८) से 'च्' को 'ग्' आदेश नहीं होता है, क्योंकि सूत्र (शि न्चौ वा) में द्विवचन के पाठ से आचार्य का यही अभिप्राय माना जाता है, कि यहाँ णकारादेश न हो। **"चवर्गदृगादीनां च"** (२।३।४८) सूत्र में 'दृग्' शब्द क्विबन्त है। अतः उसकेसाहचर्य से यहाँ चकार को गकारादेश नहीं होगा, क्योंकि 'भवान्च्' क्विबन्त नहीं है और गकारादेश क्विबन्त में ही होगा। यह आशङ्का नहीं करनी चाहिये कि णत्व न होने से नकार के स्थान में अनुस्वार एवं ञकारादेश भी नहीं होंगे, क्योंकि अनुस्वारादेश व्यक्ति है और व्यक्ति सभी कार्यों की बाधिका मानी जाती है। इसीलिये वृत्तिकार दुर्गसिंह ने कहा है –"णत्वं गत्वं च न स्यात्। अनुस्वारो वर्गान्तश्च स्यादेव" इति।

सूत्रपठित 'वा' शब्द को यहाँ समुच्चयार्थक माना जाता है। यह ज्ञातव्य है कि कलापव्याकरण में विकल्पार्थ के अवबोध-हेतु प्रायः 'नवा' शब्द का ही प्रयोग किया गया है। प्रकृत सूत्र में नकाररहित 'वा' के पाठ से व्याख्याकार उसे समुच्चयार्थक मानते हैं। फलतः न् के स्थान में 'न्च्' तथा 'ञ्' दोनों ही आदेश प्रवृत्त होते हैं।

**[रूपसिद्धि]**

**१-३. भवाञ्छूरः, भवाञ्च्शूरः, भवाञ्शूरः।** भवान्+ शूरः। प्रकृत सूत्र से न् को न्च् आदेश, "वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा" (१।४।३) से श् को छ्, "मनोरनुस्वारो घुटि" (२।४।४४) से न् को अनुस्वार, "वर्गे वर्गान्तः" (२।४।४५) से अनुस्वार को ञ्, "धुटो धुट्येकवर्गे" (धुटश्च धुटि ३।६।५१) से च् का लोप= भवाञ्छूरः। छकाराभावपक्ष में न् को अनुस्वार, अनुस्वार को ञ्= भवाञ्च्शूरः। 'न्च' आदेश न होने पर "जझञशकारेषु ञकारम्" (१।४।१२) से न् को ञ्=भवाञ्शूरः।

**४-६. कुर्वञ्छूरः, कुर्वञ्च्शूरः, कुर्वञ्शूरः।** कुर्वन्+ शूरः। उक्त की तरह न् को न्च् आदेश, श् को छ्, न् को अनुस्वार, अनुस्वार को ञ्, च् का लाप = कुर्वञ्छूरः। छकारादेश न होने पर न् को अनुस्वार, अनुस्वार को ञ्= कुर्वञ्च्शूरः। न्च् आदेश न होने पर न् को ञ्= कुर्वञ्शूरः।

**७-९. प्रशाञ्छयनम्, प्रशाञ्च्शयनम्, प्रशाञ्शयनम्।** प्रशान्+शयनम्। यहाँ पर भी न् को न्च् आदेश तथा छकारादेशपक्ष में 'प्रशाञ्छयनम्'। छकाराभावपक्ष में 'प्रशाञ्च्शयनम्'। 'न्च्' आदेशाभावपक्ष में 'प्रशाञ्शयनम्' शब्दरूप सिद्ध होता है ॥५८॥

## ५९. ड-ढ-णपरस्तु णकारम् [१।४।१४]

**[सूत्रार्थ]**

'ड्, ढ्, ण्' वर्णों के परवर्ती होने पर नकार के स्थान में णकार आदेश होता है ॥५९।

**[दु० वृ०]**

डढणाः परे यस्मादिति। डढणपरो नकारो णमापद्यते। भवाण्डीनम्, भवाण्ढौकते, भवाण्णकारेण। तुशब्दो वानिवृत्त्यर्थः ॥५९।

**[दु० टी०]**

**डढण०। डढणपर** इति। यदि बहुव्रीहिरयं डढणेष्विति किमर्थं न कुर्यात्? सत्यम्। परग्रहणम् उभयसमासार्थम्। डढणेभ्यः पर इति, तेन षड्भिरधिका नवतिः **षण्णवतिः**। षण्णां नगराणां समाहारः **षण्णगरी**, संहतिरिह विवक्षया भवति। **"पञ्चमे पञ्चमांस्तृतीयान्नवा"** (१।४।२) इति व्यवस्थितविभाषया अनयोश्च नित्यं पञ्चम इति। **तुशब्द** इत्यादि। अन्यथा न्चौ वा ञकारं पद्यते इति स्यात्। नच वक्तव्यम् इह टाच्च सस्तादिर्वा टकारान्नकाराच्च सकारस्तकारादिर्भवति वा वर्णागमदर्शनात्। मधुलिट् साधुः, मधुलिट्त्साधुः। भवान् साधुः, भवान्त्साधुः, स्वरान्तस्थानुनासिकेष्वेव दर्शनात् तथयोः सकारं नापद्यते। सुपि च मधुलिट्सु, मधुलिट्त्सु। तकारस्यानन्त्यत्वेऽपि न चटवर्गयोगः– प्रशान्सु, प्रशान्त्सु ॥५९।

[वि०प०]

**डढण०। डढणाः** परे यस्मादित्यनेन बहुव्रीहिरिति दर्शितम्, न तु डढणेभ्यः पर इति तत्पुरुषः। तर्हि डढणेष्विति कृते सिध्यति, किं परग्रहणेन? सन्देहे तु नेति? सत्यम्। परग्रहणाद् डढणेभ्यः परः इत्यपि प्रतिपत्तव्यम्, तेन् षड्भिरधिका नवतिः, षण्णां नगराणां समाहारः इति विग्रहे षण्णवतिः, षण्णगरीति सिद्धम्। **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यतिदेशबलात् **"हशषछान्तेजादीनां डः"** (२।३।४६) इति षकारस्य डकारस्ततोऽनेन नस्य णत्वम्। तदनन्तरं पदान्ते धुटां प्रथमे सति **"पञ्चमे पञ्चमांस्तृतीयान् न वा"** (१।४।२) इति व्यवस्थितविभाषाश्रयणान्नित्यं पञ्चम इति।

**तुशब्द** इत्यादि। यदि समुच्चायार्थो वाशब्दोऽत्रानुवर्तते, तदा डढणपरो नकारोऽधिकारवशात् 'न्यौ' वा प्राप्नोति ञकारं वेति वाक्यार्थः स्यात् । स चानिष्ट इति अव्ययत्वादनेकार्थेन तुशब्देन वाशब्दो निवर्तित इत्यर्थः॥ ५९।

[क० च०]

**डढण०। "व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यतिदेशबलाद् **"हशष०"** (२।३।४६) इत्यादिना डत्वे सत्यनेन नवतिशब्दस्य नस्य णत्वम्। तदनन्तरं **"पदान्ते धुटां प्रथमः"** (३।८।१) इति डकारस्य ढकार इति पञ्जी। तत्तु कुलचन्द्रेणाक्षिप्तम्। तथाहि षण्णवतिरित्यत्र परत्वात् पदान्ते धुटां प्रथमे सति **"पञ्चमे पञ्चमान्"** (१।४।२) इति कृतेऽनेन णकार इति। अत्र **केचिद्** अनेन णत्वमिति वाक्यम्। पञ्चम इत्यस्मात् परं द्रष्टव्यमित्याहुः। **अन्ये** तु अत्र परग्रहणात् परमपि **"पदान्ते धुटां प्रथमः"** (३।८।१) इति बाधित्वा अनेन णकार इत्याहुः। **वस्तुतस्तु** नित्यत्वात् परत्वाद् अपवादत्वाच्चाग्रतोऽस्यैव विषय इति। ततः **"पदान्ते धुटां प्रथमः"** इति युक्तम् उत्पश्यामः॥ ५९।

[समीक्षा]

'भवान्+ डीनम्, भवान् +ढौकते, भवान्+ णकारेण' इस स्थिति में कलाप एवं पाणिनीय दोनों ही व्याकरणों के अनुसार न् के स्थान में णकारादेश प्रवृत्त होता है। कलाप के अनुसार ड, ढ् एवं ण् वर्ण पर में होने के कारण न् के स्थान में ण् आदेश एवं पाणिनीय व्याकरण में टवर्ग का योग होने के कारण तवर्ग के स्थान में टवर्गादेश का विधान किया जाता है। इस प्रकार प्रयोगसिद्धि में कोई बाधा या जटिलता तो उपस्थित नहीं होती, परन्तु पाणिनि का तवर्ग–टवर्ग यह सामान्यनिर्देश सभी उदाहरणों के अभाव में अवश्य ही चिन्त्य प्रतीत होता है।

[विशेष]

(१) 'डढणपरः' शब्द का अर्थ 'डढणेभ्यः परः' नहीं है, किन्तु 'डढणाः परे यस्मात्' यह माना जाता है। अर्थात् यहाँ तत्पुरुषसमास न होकर बहुव्रीहि समास दिखाया गया है। यदि बहुव्रीहिसमास ही यहाँ इष्ट हो तो फिर 'डढणेषु' ऐसा पाठ किया जाना चाहिये। इस पर व्याख्याकारों ने अपना अभिमत स्पष्ट करते हुए कहा है कि सूत्रकार ने ऐसा इसलिए किया है कि तत्पुरुष समास के अनुसार 'षण्णवतिः, षण्णगरी' आदि स्थलों में भी णकारादेश सम्पन्न हो जाए, क्योंकि 'षड्+ नवतिः, षड्+नगरी' में न् से परवर्ती ड नहीं है, किन्तु ड से पर में नकार विद्यमान है। अतः केवल बहुव्रीहि समास मानने पर 'षण्णवतिः' आदि स्थलों में णकारादेश नहीं हो सकता। ऐसी स्थिति में भी णकारादेश प्रवृत्त हो जाए, अतः उभयसमासविहित 'डढणपरः' यह पद पढ़ा गया है।

(२) सूत्रस्थ 'तु' शब्द का प्रयोजन वैकल्पिक विधान की निवृत्ति बताया गया है। अर्थात् पूर्ववर्ती सूत्र "**शि न्चौ वा**" (१।४।१३) में वा-शब्द पठित है। उसकी अनुवृत्ति प्रकृत सूत्र में आएगी, जिसके फलस्वरूप णकारादेश भी विकल्प से प्रवृत्त होगा, जो यहाँ अभीष्ट नहीं है। अतः उसके निरासहेतु 'तु' शब्द का पाठ किया है॥

[रूपसिद्धि]

१. **भवाण्डीनम्।** भवान् + डीनम्। प्रकृतसूत्र से ड् के परवर्ती रहने पर पदान्तस्थ न् को ण् आदेश।

२. **भवाण्ढौकते।** भवान्+ ढौकते। ढकार के पर में होने पर पदान्तवर्ती न् को ण् आदेश।

३. **भवाण्णकारेण।** भवान्+णकारेण। णकार के परवर्ती होने पर पदान्तवर्ती न् को ण् आदेश॥५९।

## ६०. मोऽनुस्वारं व्यञ्जने (१।४।१५)

[सूत्रार्थ]

व्यञ्जन के परवर्ती होने पर पदान्तवर्ती मकार के स्थान में अनुस्वारादेश होता है॥ ६०।

[दु०वृ०]

मकारः पुनरन्तो व्यञ्जने परे अनुस्वारमापद्यते। त्वं यासि. त्वं रमसे। अन्त इति किम्? गम्यते। अनुस्वार इति संज्ञापूर्वको विधिरनित्यः। तेन 'सम्राट्, सम्राजौ'॥ ६०।

[दु० टी०]

**मोऽनु०** । मकारः पुनरन्त इति प्राग् योगेषु पदान्त एव सम्भवतीति पदान्त-शब्दाविर्भावार्थ उक्तः । इह पुनरन्तशब्दो विशेषणतयाऽवश्ययोज्य इत्यर्थः । तथा च व्याख्यातमेव 'मो राजि समः क्वौ' इति न वक्तव्यम् इत्याह – **अनुस्वार** इत्यादि । अथवा लोकोपचारात् सिद्धोऽयं संज्ञाशब्दः । तथा चाह – 'यो राजसूययाजी य ईश्वरो मण्डलस्य यश्चाज्ञया एव राज्ञः शास्ति स **सम्राड्** विज्ञेयः' ।। ६० ।

[वि० प०]

**मोऽनुस्वारम् । "नोऽन्तश्चछयोः शकारमनुस्वारपूर्वम्"** (१।४।८) इत्यत्रान्तग्रहण-मुत्तरत्र विरतिप्रतिपादनार्थमित्युक्तम् । सा च विरतिः पूर्वयोगेष्वव्यभिचारिण्येव । यच्च तेषु पदान्तविवरणं तदधिकारवशाद् इह पुनरवश्यं विरतिप्रतिपादनार्थम् अन्तग्रहणं योजनीयम् इत्याह – **नकारः पुनरन्तः** इति । अन्तो विरतिभूतो न पुनः पदान्त एवेत्यर्थः । तेन पदमध्येऽपि यत्र विरतेरभिधानम् अस्ति, तत्रानेनैवानुस्वार इति । 'गम्यत' इति प्रकृतिभागमात्रे विरतिरत्र नाभिधीयते इति भावः ।

**"मो राजि समः क्वौ"** (पा० ८।३।२५) इति समो मकारस्यानुस्वारापवादार्थं मकारः कश्चिदाह, स इह कथम् इत्याह– **अनुस्वार** इत्यादि । संराजते इति क्विप् **"विरामे हशषछान्तेजादीनां डः"** (२।३।४६) । अनित्यत्वस्य लक्ष्यानुरोधाद् राजतौ क्विबन्ते परे समो मकारस्यानुस्वारो न भवतीत्यर्थः । अथवा संज्ञाशब्द एवायं लोके प्रसिद्ध इति किमनित्यत्वकथनेनेति । तथा च **विश्वदत्तः** – यो राजसूययाजी ईश्वरो मण्डलस्य यश्चाज्ञयैव राज्ञः शास्ति स **सम्राड्** विज्ञेयः ।। ६० ।

[क० च०]

**मोऽनु०** । अन्त इति किम्? गम्यत इति **वृत्तिः** । ननु गम्यत इति कथं प्रत्युदाहृतम्, यस्मादिहान्तग्रहणाभावेऽपि पदान्ताधिकारादत्रापि न प्राप्तिरिति? सत्यम् । "नोऽन्तश्छचयोः" (१।४।८) इत्यन्तग्रहणादेव पदान्ताधिकारनिवृत्तिः । एवं च सति अत्रान्तग्रहणसम्बन्धेन किमित्येतदेवाह – **अन्त** इत्यादि ।

ननु तथापि कथमिदं प्रत्युदाहृतं **"मनोरनुस्वारो धुटि"** (२।४।४४) इत्यत्र धुड्ग्रहणस्य व्यावृत्तिबलादेव न भविष्यति? सत्यम् । तद्धि धुड्ग्रहणं हन्यत इति व्यावृत्त्यैव चरितार्थम्, कथमनेन प्राप्तमनुस्वारं व्यावर्तयितुमुत्सहत इति **केचित् । अन्ये**

तु नेदं प्रत्युदाहरणं किन्तु प्रथमकक्षायामुक्तम्, प्रत्युदाहरणं तु 'यन्ता, गन्ता' इति। ननु तेनानेन वानुस्वारे को विशेषः? सत्यम्, यद्यनेनानुस्वारः क्रियते, तदा **"वर्गे तद्वर्गपञ्चमो वा"** (१। ४।१६) स्यादित्याहुः। अपरे तु अत्र पदान्ताधिकारस्य सम्बन्धेऽसत्यपदान्ते पदान्ते च व्यञ्जने परेऽनेनानुस्वारे सिद्धे यत् पुनस्तत्र मकारोपादानं **'सिद्धे सत्यारम्भो विधिर्नियमाय विकल्पाय ज्ञापकाय वा'** (कलापव्या०, पृ०२२३) इति न्यायात् तन्नियमार्थम्। तथाहि– अनन्त्य एव धुटि परेऽनुस्वारो न त्वन्त्ये धुटि परे। एवं च सति ' त्वङ्करोषि' इत्यादिष्वेव धुड्ग्रहणस्य व्यावृत्तिः स्यादिति।

यत्तु 'गम्यते' इत्यत्र व्यावृत्तिर्दर्शिता, तत्तु प्रथमकक्षायामेवेत्याहुः, नैवम्, सूत्रोपात्तधुड्ग्रहणस्यैव नियमयोग्यत्वात्। तथा चानन्तो धुट्येव नाधुटीति नियमे सति गम्यते इत्यत्र नियमबलादेव न भविष्यति, किं पुनरत्र प्रत्युदाह्रियते इति चेत्, न। मकारस्य कार्यित्वेन प्राधान्यात् तद्विशेषणस्यान्त्यग्रहणस्यापि प्राधान्येन तस्यापि नियमः संभवतीति विनिगमनाविरहान्नियम एव भविष्यतीति। न चानन्त्य एव धुट्येवेति उभयनियम एवास्तामिति वाच्यम्, गौरवात्। एवं सत्यत्रान्तग्रहणाभावेऽन्त्यानन्त्यसामान्येनैवानेन सिद्धे यत् तत्र मकारग्रहणं तद् धुटि परे विकल्पार्थं भविष्यति। ततश्चानेन धुटि परे नित्ये प्राप्तेऽन्तग्रहणमत्र गम्यत इत्यादावनुस्वारनिवारणार्थम् इति न कोऽपि दोष इति। **हेमकरस्तु** हम्मतीति प्रत्युदाहर्तव्यम् इति यदाह तद् दुष्टमेव गम्यते इत्यनेन समानत्वादिति॥ ६०।

### [समीक्षा]

'त्वम्+ यासि, त्वम्+ रमसे' इस स्थिति में दोनों ही व्याकरणों में म् के स्थान में अनुस्वारादेश होता है, तथापि कलापव्याकरण के विधान में कार्यी मकार का प्रथमान्त तथा कार्य अनुस्वार का द्वितीयान्त निर्देश किया गया है। पूर्वाचार्यों की यही पद्धति (शैली) थी। इसके विपरीत पाणिनि कार्यी का षष्ठ्यन्त तथा कार्य का प्रथमान्त निर्देश करते हैं।

### [विशेष]

ऐसा देखा जाता है कि 'सम्राट्, सम्राजौ' आदि स्थलों में म् के स्थान में अनुस्वारादेश प्रवृत्त नहीं होता है। एतदर्थ पाणिनीयव्याकरण में तो **"मो राजि समः क्वौ"** (पा०८। ३।२५) सूत्र बनाया गया है, जिसके अनुसार क्विप्प्रत्ययान्त राज्

शब्द के परवर्ती रहने पर सम् के मकार को मकार ही होता है; परन्तु कलापव्याकरण में ऐसा सूत्र नहीं है, जिससे वृत्तिकार दुर्गसिंह ने इसका समाधान प्रकारान्तर से इस प्रकार किया है कि संज्ञापूर्वक की गई विधि अनित्य होती है– 'सञ्ज्ञापूर्वको विधिरनित्यः' (कालापपरि० सू० ३८)। इस सूत्र में 'अनुस्वार' यह निर्देश संज्ञापूर्वक है, अतः इस विधि के अनित्य होने के कारण 'सम्राट्' आदि स्थलों में अनुस्वारादेश नहीं होगा।

[रूपसिद्धि]

१. **त्वं यासि**। त्वम्+ यासि। व्यञ्जन वर्ण के पर में रहने पर पदान्तवर्ती मकार को अनुस्वार आदेश।

२. **त्वं रमसे**। त्वम्+ रमसे। व्यञ्जन वर्ण के पर में रहने पर पदान्तवर्ती मकार को अनुस्वार आदेश ॥६०।

## ६१. वर्गे तद्वर्गपञ्चमं वा (१।४।१६)

[सूत्रार्थ]

किसी भी वर्गीय वर्ण के पर में रहने पर पदान्त अनुस्वार को उसी वर्ग का पञ्चम वर्ण आदेश होता है ॥ ६१।

[दु०वृ०]

अन्तोऽनुस्वारो वर्गे परे तद्वर्गपञ्चमं वाऽऽपद्यते। त्वङ्करोषि, त्वं करोषि। त्वञ्चरसि, त्वं चरसि। पुम्भ्याम्। वर्ग इति किम्? त्वं लुनासि ॥ ६१।

**॥ इति दौर्गसिंह्यां वृत्तौ प्रथमे सन्धिप्रकरणे चतुर्थो वर्गपादः समाप्तः ॥**

●

[दु०टी०]

**वर्गे**। ननु प्राङ् नकारः कार्यी कथमनुस्वारः कार्यितया प्रवर्तते? सत्यम्। व्यञ्जने मकारस्यानुस्वारत्वाद् वर्गे तद्वर्गपञ्चमः खलु पक्षे तस्य बाधक इति। तर्हि व्यञ्जन इति तत्र व्यक्तौ तेनानुस्वारसामान्यमिह सिद्धम्। 'जंगम्यते, जङ्गम्यते' इति सिद्धमेव। ननु तद्वर्गपञ्चमग्रहणं किमर्थम्, श्रुतत्वात् तस्यैव निमित्तभूतस्य वर्गस्य भविष्यतीति परिभाषाश्रयणमपि प्रतिपत्तिगौरवमेव। तर्हि तद्ग्रहणमेवास्ताम्? सत्यम्। स चासौ वर्गश्चेति **तद्वर्गः**, तस्य पञ्चमस्तद्वर्गपञ्चमः इति अतिशयबालप्रबोधार्थः। सानुनासिकान्तस्थायां पररूपं भाषायां न दृश्यते इति 'त्वँय्यासि, त्वँल्लिखसि, त्वँव्वहसि'। हे मनयवलपरे मनयवला वा वक्तव्याः। किँम् ह्मलयति, किं ह्मलयति। किँन् ह्नुते, किं ह्नुते। किँय् ह्यः, किं ह्यः। किँव् ह्वलयति, किं ह्वलयति। किँल् ह्लादयति, किं ह्लादयति।

भाषायां चेत् 'वाशब्दः इति बहुलार्थः प्रतिपत्तव्यः ।' 'समासेऽवश्यमः कृत्ये खम्, काममनसोस्तुमः समो हिततततयोरपि, मांसस्य पचि युड्घञोः' एषामन्त्यो वर्णः खं शून्यमापद्यते–अवश्यकर्तव्यम्, अवश्यकार्यम्, कर्तुकामो गन्तुमनाः । समः काममनसोरपि सम्बन्धस्तेन सकामः, समनाः, सहितम्, संहितम्, सततम्, सन्ततम् । लोकोपचाराद् बहुलार्थत्वाद् वा । यणि तु नित्यमेव– साहित्यम्, सातत्यम् । मांसस्य पचनम् – मांस्पचनम् । मांसपाकः, मांस्पाकः । समास इति किम् ? अवश्यं कर्तव्यम्, गन्तुं कामोऽस्य, गन्तुं मनोऽस्य । क्रियायां क्रियार्थायामेव तुम्, भवतेर्गम्यमानत्वात् । मांसस्य पचनम्, मांसस्य पाकः ॥६१।

**॥ इति दुर्गसिंहविरचितायां टीकायां प्रथमे सन्धिप्रकरणे चतुर्थो वर्गपादः समाप्तः॥**

●

## [वि०प०]

**वर्गे०** । ननु पूर्वसूत्रे मकार एव कार्यी, स एवात्रापि युज्यते कथमनुस्वार एव कार्य्यितया सम्बध्यते? सत्यम् । वर्गस्यापि व्यञ्जनत्वात् पूर्वेणानुस्वारे नकारस्य स्थितिरेव नास्तीति । अथ परत्वाद् विशेषविहितत्वाच्च वर्गे परे मकारस्यैव तद्वर्ग-पञ्चमः कथं न स्याद् इति चेत् तर्हि **"मोऽनुस्वारं व्यञ्जने"** (१।४।१५) इत्यनुस्वारस्य व्यक्तौ प्रवृत्तत्वाद् अतोऽनुस्वार इति ।

ननु किमर्थं व्यक्तिव्याख्यानं नकारस्यैव तद्वर्गपञ्चमो विधीयताम्, तदयुक्तम् । **"अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य"** (३।३।३१) इत्यनुस्वारागमे सति जङ्गम्यते इति अनुस्वारस्य ङकारो न स्यादिति । **तच्छब्देन** निमित्तभूतवर्ग उच्यते, स चासौ वर्गश्चेति तद्वर्गस्तस्य पञ्चम इति विग्रहः । **तद्वर्गग्रहणं** सुखार्थमेव । अन्यथा श्रुतत्वात् तस्यैव निमित्तभूतस्यैव वर्गस्य पञ्चमो भविष्यति । पुम्भ्याम्, पुंभ्याम् इत्यादि । पुंसोऽन्शब्दलोपे संयोगान्तसकारलोपे सति पदमध्ये विरतेरभिधानान्मकारस्य पूर्वेणानुस्वारोऽनेन वर्गान्तश्च वा भवतीति ॥६१।

**॥ इति श्रीमत्त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां प्रथमे सन्धिप्रकरणे चतुर्थो वर्गपादः समाप्तः॥**

●

## [क०च०]

**वर्गे०** । परत्वादिति श्रेष्ठत्वादित्यर्थः । पक्षान्तरमाह– विशेषविहितत्वादिति **कश्चिद्** । **अपरे** तु "भिसैस् वा" (२।१।१८) इत्यत्र दर्शयिष्यमाणे व्याघ्रभूतिमते नैकस्मिन्नुदाहरणेऽपि परत्वचिन्तेति यत् परत्वमुक्तम्, तत् परमतम् । स्वमते तु

विशेषविहितत्वादित्युक्तमित्याहुः। **वस्तुतस्तु** उभयोः सावकाशत्वाभावात् परत्वं न संगच्छते इत्याह-विशेषविहितत्वादिति। तेन **हेमकर**मतमेव प्रमाणमिति॥ ६१।

**॥ इति कलापचन्द्रे प्रथमे सन्धिप्रकरणे चतुर्थो। वर्गपादः समाप्तः॥**

●

## [समीक्षा]

'त्वम्+ करोषि, त्वम् +चरसि, पुम्+ भ्याम्' इस स्थिति में म् के स्थान में **"मोऽनुस्वारं व्यञ्जने"** (१।४।१५) से अनुस्वार आदेश तथा प्रकृत सूत्र "वर्गे तद्वर्गपञ्चमं वा" (१।४।१६) से अनुस्वार के स्थान में परवर्ती वर्गीय वर्ण का वर्गीय पञ्चम वर्ण आदेश होकर 'त्वङ्करोषि, त्वञ्चरसि, पुम्भ्याम्' शब्दरूप निष्पन्न होते हैं। पक्ष में वर्गीय पञ्चम वर्ण आदेश न होने पर 'त्वं करोषि, त्वं चरसि, पुंभ्याम्' रूप भी साधु माने जाते हैं।

पाणिनीय व्याकरण में भी **"मोऽनुस्वारः"** (८।३।२३) से अनुस्वारादेश तथा **"वा पदान्तस्य"** (८।४।५९) से वैकल्पिक परसवर्णादेश होकर उक्त रूप सिद्ध होते हैं।

क्, च् तथा भ् वर्णों के परवर्ती होने पर पूर्ववर्ती अनुस्वार के स्थान में यदि क्रमशः ङ्, ञ् तथा म् आदेश करना हो तो कवर्ग, चवर्ग एवं पवर्ग का पञ्चम वर्ण आदेश करना अधिक सुविधाजनक कहा जा सकता है, परसवर्णादेश विधान की अपेक्षा। उदाहरणार्थ यदि 'त्वङ्करोषि' को लिया जाए, तो निम्नाङ्कित के अनुसार स्थान-प्रयत्न मिलाने के बाद ही यह निश्चय किया जा सकता है कि कवर्ग के परवर्ती होने पर पूर्ववर्ती अनुस्वार के स्थान में 'ङ्' आदेश उपपन्न होगा–

| **स्थान** | **वर्ण** |
|---|---|
| नासिका | अनुस्वार (म्–स्थानिक) |
| कण्ठ | क, ख, ग, घ, ङ |
| नासिका | ङ |
| **प्रयत्न** | — |
| (आ०) स्पृष्ट | क, ख, ग, घ, ङ, म (अनुस्वार)। |
| (बा०) अल्पप्राण, संवार, नाद, घोष | ग्, ङ्, म् (अनुस्वार) |

उपर्युक्त स्थिति में स्थान– प्रयत्नों को मिलाकर देखने पर यह विदित होता है कि बाह्य प्रत्यत्नों में भी प्रत्येक वर्ग के दो दो वर्ण समान प्रयत्न वाले रह जाते हैं। आभ्यन्तर प्रयत्न में तो वर्गीय पाँचों वर्णों का स्पृष्ट ही प्रयत्न होता है। बाह्य प्रयत्न के अनुसार ग् को हटाने के लिए नासिकास्थान का आश्रय लेना पड़ता है। यतः अनुस्वाररूप स्थानी वर्ण का स्थान नासिका है और वह कवर्गीय वर्णों में से केवल ङ् का ही होता है। अन्य प्रथम– द्वितीयादि वर्णों का नहीं। अतः कवर्ग के परवर्ती होने पर अनुस्वार के स्थान में ङ् ही परसवर्ण होता है। यह विधि पाणिनीय व्याकरण की है। सामान्यतया किसी भी वर्ग के पञ्चम वर्ण को जानने की अपेक्षा परसवर्ण विधि से पञ्चम वर्ण जानना अत्यन्त प्रयत्नसाध्य है।

**[रूपसिद्धि]**

१. **त्वङ्करोषि– त्वं करोषि**। त्वम्+ करोषि। व्यञ्जनवर्ण के पर में रहने पर पदान्तवर्ती म् को " मोऽनुस्वारं व्यञ्जने" (१।४।१५) से अनुस्वार तथा विकल्प से प्रकृत सूत्र-द्वारा अनुस्वार को कवर्गीय पञ्चम वर्ण ङ् आदेश = त्वङ्करोषि। पञ्चमवर्णादेश के अभाव में= त्वं करोषि।

२. **त्वञ्चरसि – त्वं चरसि**। त्वम्+ चरसि। व्यञ्जन वर्ण के परवर्ती होने पर पदान्त म् को अनुस्वार तथा उसको वैकल्पिक वर्गीय पञ्चम वर्ण आदेश= त्वञ्चरसि। वर्गीय पञ्चम वर्ण आदेश में अनुस्वारघटित रूप= त्वं चरसि।

३. **पुम्भ्याम्– पुंभ्याम्**। पुम्+भ्याम्। व्यञ्जन वर्ण के पर में रहने पर पदान्तवर्ती म् को अनुस्वार तथा उसको वैकल्पिक वर्गीय पञ्चम वर्ण आदेश= पुम्भ्याम्। वर्गीय पञ्चम वर्ण आदेश के अभाव में अनुस्वारघटित रूप = पुंभ्याम्॥६१।

**॥ इति सन्धिप्रकरणे समीक्षात्मकश्चतुर्थो वर्गपादः समाप्तः ॥**

# अथ सन्धिप्रकरणे पञ्चमो विसर्जनीयपादः

## ६२. विसर्जनीयश्चे छे वा शम् (१।५।१)

**[सूत्रार्थ]**

च् अथवा छ् के पर में रहने पर पूर्ववर्ती विसर्ग 'श्' आदेश प्राप्त करता है। अर्थात् विसर्ग के स्थान में शकारादेश होता है॥६२।

**[दु०वृ०]**

विसर्जनीयश्चे वा छे वा परे शमापद्यते। कश्चरति, कश्छादयति ॥६२।

**[दु०टी०]**

**विसर्जनीयः। "उमकारयोर्मध्ये"** (१।५।७) इति यावत् पदान्त एव संभवति। ननु "अश्चे छे वा शम्" इति विदध्यात्। इहाप्यकार उच्चारणार्थः। अथ स्थानान्तरेऽपीति संज्ञासूत्रमपि न करणीयं स्यात्? सत्यम्। संज्ञापूर्वको व्यवहारः सुखप्रतिपत्त्यर्थ एव ॥६२।

**[क०च०]**

**विसर्जनीयः**। शमित्यस्वरो निर्देशः, श्रुतत्वाल्लुप्ते च प्रमाणाभावात्। अत एव सूत्रनिर्देशाद् वा ॥६२।

**[समीक्षा]**

'कः + चरति, कः + छादयति' इस स्थिति में कलाप-व्याकरण की प्रक्रिया के अनुसार विसर्ग के स्थान में साक्षात् ही शकारादेश होकर 'कश्चरति, कश्छादयति' रूप निष्पन्न होते हैं। जबकि पाणिनि विसर्ग के स्थान में सकारादेश (**विसर्जनीयस्य सः** ८।३।३४) करने के अनन्तर ही **"स्तोः श्चुना श्चुः"** (८।४।४०) से श्चुत्वविधान द्वारा उक्त रूपों की निष्पत्ति बताते हैं। यह भी ज्ञातव्य है कि पाणिनि तवर्ग के स्थान में चवर्ग का निर्देश करते हैं, परन्तु वस्तुतः अभीष्ट कार्य केवल 'च्–छ्' वर्णों के परवर्ती होने पर प्रवृत्त होता है। इससे भी कलापव्याकरण का प्रक्रियालाघव स्पष्ट है।

**[रूपसिद्धि]**

१. **कश्चरति** । कः + चरति । प्रकृत सूत्र से चकार के पर में रहने पर विसर्ग को शकारादेश ।

२. **कश्छादयति** । कः + छादयति । छकार के परवर्ती होने पर पूर्ववर्ती विसर्ग के स्थान में छकारादेश ॥ ६२ ।

## ६३. टे ठे वा षम् (१।५।२)

**[सूत्रार्थ]**

ट् अथवा ठ् के पर में रहने पर पूर्ववर्ती विसर्ग के स्थान में मूर्धन्य षकारादेश होता है ॥ ६३ ।

**[दु०वृ०]**

विसर्जनीयष्टे वा ठे वा परे षम् आपद्यते । कष्टीकते, कष्ठकारेण । प्रत्येकं वाऽत्र समुच्चये बालावबोधार्थम् ॥ ६३ ।

**[दु०टी०]**

**टे ठे० । प्रत्येकं वा समुच्चये बालावबोधार्थम्** इति विकल्पार्थं तु न भवति, प्रतिसूत्रमुपादानात् "**वर्गे तद्वर्गपञ्चमं वा**" (१।४।१६) इति विभाषानुवृत्तेर्वा । ननु वाशब्देऽप्यतिक्रियमाणे किमत्राविस्पष्टं भवेत् । टठयोरित्युक्ते षष्ठ्यपि भवितुमर्हति । षमिति कर्मपदं विसर्जनीयं कर्तारमपेक्षते । नैवम्, क्रियाकारकाकुशलानां बालानामवबोधार्थमिति ॥ ६३ ।

**[वि०प०]**

**टे ठे० । प्रत्येकमि**त्यादि । विकल्पार्थं तु न भवति, प्रतिसूत्रम् उपादानात् । "**वर्गे तद्वर्गपञ्चमं वा**" (१।४।१६) इति विभाषानुवृत्तेर्वा । ननु यदि प्रत्येकं वा समुच्चयो न स्यात् तदा किमिहाविस्पष्टं भवति ? सत्यम् । "**टठयोः षम्**" इति कृते षष्ठीमपि प्रतिपद्येत, टठयोः स्थान इति । तदयुक्तम् । षमिति कर्मपदम्, तच्च कर्तारमन्तरेण न संभवतीति विसर्जनीयम् अपेक्षते । ततो विसर्जनीयः षमापद्यते, टठयोः परयोरिति सप्तम्येव निश्चीयते । तथा पूर्वोत्तरयोरपि योगयोरिति? सत्यम्, एवं तर्हि क्रियाकारकाकुशलानां बालानामवबोधार्थम् । न खलु ते कर्तारमन्तेरण कर्मणः सम्भव इति प्रतिपत्तुं क्षमन्त इति ॥ ६३ ।

## [क०च०]

**टे ठे०** । ननु अकारयुक्तयोरेव टठयोर्निमित्तता सप्तम्या प्रतिपाद्यते, ततश्च कथं 'कष्टीकते' इत्यादिषु षकारः स्यात्? सत्यम्, **"विसर्जनीयश्चे छे वा शम्"** (१।५।१) इति निर्देशाद् अकारयुक्तादन्यत्रापि भवतीत्यदोषः । विकल्पार्थश्च न भवति, वा - शब्दः पुनरर्थे । अत्र हेतुमाह– **प्रतिसूत्रमित्यादि** । ननु कथं प्रतिसूत्रे वाशब्दोपादानं समुच्चये हेतुः स्यात्, तस्य स्पष्टार्थकत्वात् । सा हि स्पष्टार्थता समुच्चये विकल्पे च सम्भवति? सत्यम् । यदि वाशब्दो विकल्पार्थः स्यात् तदा वाग्रहणमपि न कृतं स्यात् । तर्हि कुतो विकल्पप्राप्तिर्भविष्यतीत्याह - **वर्ग** इत्यादि । तस्माद् वाग्रहणबलादेव विकल्पार्थो न भवतीति भावः ।

ननु वाऽनुवृत्त्या टकारस्य ठकारस्य च उभयोरेव विकल्पः क्रियते । अत्र तु ठकारसम्बन्धिना वाशब्देन ठकार एव विकल्पः साध्यते, तत् कथं वाऽधिकारे निर्वाहः स्यात् । तस्माद् विकल्प एव कथं न स्यात् । किं च यदि समुच्चयार्थ एव भविष्यति तदा निःसन्देहार्थं चकारग्रहणं कृतं स्यात्? सत्यम्, यदि ठकारनिमित्तविकल्प एव भविष्यति तदा व्यवस्थितविभाषयैव सिध्यति, किं पुनरत्र वा–ग्रहणेन ? किं च व्याप्तिन्यायादुभयोरेव विकल्पार्थो भविष्यति । किं वा व्याप्तिन्यायात् समुच्चयार्थतैव युक्ता यद् वा यदीष्टो विकल्पः स्यात् तदा निःसन्देहार्थं नवा–ग्रहणमेव कृतं स्यात् ।। ६३ ।

## [समीक्षा]

'कः + टीकते, कः+ ठकारेण' इस स्थिति में कातन्त्रकार सीधे ही विसर्ग को षकारादेश करके 'कष्टीकते, कष्ठकारेण' शब्दरूप निष्पन्न करते हैं, परन्तु पाणिनि विसर्ग को सकारादेश करने के बाद ही सकार के स्थान में षकार का विधान करते हैं । क्योंकि उनके निर्देशानुसार स् के स्थान में श् आदेश प्रवृत्त होता है –"स्तोः श्चुना श्चुः" (८। ४। ४०)

## [विशेष]

सूत्रपठित 'वा' को टीकाकार– पञ्जीकार-कलापचन्द्रकार ने समुच्चयार्थक सिद्‌ध किया है ।

**[रूपसिद्धि]**

१. **कष्टीकते** । कः + टीकते । टकार के परवर्ती होने पर पूर्ववर्ती विसर्ग के स्थान में प्रकृत सूत्र- द्वारा षकारादेश।

२. **कष्ठकारेण।** कः + ठकारेण । ठकार के पर में रहने पर पूर्ववर्ती विसर्ग को प्रकृत सूत्र- द्वारा षकारादेश ॥६३।

## ६४. ते थे वा सम् (१।५।३)

**[सूत्रार्थ]**

त् एवं थ् वर्णों के पर में रहने पर विसर्ग के स्थान में सकारादेश होता है ॥ ६४ ।

**[दु०वृ०]**

विसर्जनीयस्ते वा थे वा परे समापद्यते । कस्तरति, कस्थुडति । कारस्करादय इति संज्ञाशब्दा इव लोकतः सिद्धाः ॥६४।

**[दु०टी०]**

**ते थे०** । कारस्करादयः संज्ञाशब्दा लोकतः सिद्धा इति न कारं करोतीति कारस्करो वृक्ष उच्यते, अन्वर्थाभावात् । नापकरोतीति अपस्करः । एवं न पारं करोतीति पारस्करो देशः । न तत् करोतीति तस्करश्चौरः । न रथं पातीति रथस्पा नदी । न मा क्रियतेऽनेनेति मस्करो वेणुर्दण्डश्च, न मा कर्तुं शीलमस्येति मस्करी परिव्राजकः, माकृतकर्माण्युपशास्ति वैश्रेयसीति । न ईषत् तीरमस्येति, अजस्येव तुन्दमस्येति कास्तीरम् अजस्तुन्दं च नगरम्, न बृहंश्चासौ पतिश्चेति ( न बृहतां पतिरिति) बृहस्पतिर्देवता, न प्रगतं कण्वमस्येति प्रस्कण्वो नाम ऋषिः । न हरेरिव चन्द्रो (रमणीयो हरेरिव चन्द्रो दीप्तिरस्येति वा) यस्येति हरिश्चन्द्रो नाम राजर्षिः । प्रायश्चित्तिः, प्रायचित्तिः । प्रायश्तिम्, प्रायचित्तम् । प्रायप्रायसोश्चित्तौ चित्ते च रूपद्वयमिदम् । आस् – शब्दस्याव्ययस्य चर्ये आश्चर्यमिति प्रतीतिविरुद्धे वर्तते तथा पदे प्रतिष्ठायां वर्तते । क्वचिद् अव्ययविसृष्टस्यापि सकारः – आस्पदं प्रतिष्ठा । प्राणधारणाय यत् स्थानं कुस्तुम्बुरु च धन्याकमुच्यते, न कुत्सितं तुम्बुरु इत्यन्वर्थता । अपरस्परशब्दः क्रियासातत्ये वर्तते, न त्वपरे च परे चेति द्वन्द्वः । अपरस्पराश्छात्रा गच्छन्ति, सततं गच्छन्तीत्यर्थः । न विकिरतीति विकिरो विस्किरो वा शकुनिरुच्यते ।

अथ प्रकृतिप्रत्ययोपलम्भाय संज्ञाशब्दा यथाकथंचिद् व्युत्पाद्यास्तदा वर्णागमो वर्णविपर्ययश्चेत्यादि निरुक्तलक्षणमपि लोकोपचारात् सिद्धम्। अन्वर्थो यथा– 'गावो विद्यन्तेऽस्मिन्निति गोष्पदो देशः, गवामगोचरेऽपि। गोष्पदपूरं वृष्टो देवः' इति क्षेत्रादेर्वर्षप्रमाणमिह गम्यते, न पुनर्गवां पदमात्रे वर्तते ॥६४।

**[वि० प०]**

ते थे०। कारस्करादय इति। 'कारस्करो वृक्षः' इति सूत्रं न वक्तव्यम्। एते हि संज्ञाशब्दा वृक्षादिवल्लोके विशिष्टविषयतया प्रसिद्धाः। नहि कारं करोतीति कारस्करो वृक्ष इत्यन्वर्थो घटते। तस्माद् यस्तु लोकतः सिद्धस्तत्र किं यत्नेनेति? यदि संज्ञाशब्दानामप्यमीषां प्रकृतिप्रत्ययविभागोपलम्भाद् यथाकथंचिदवश्यं कार्या व्युत्पत्तिः, तदा वर्णागमो वर्णविपर्ययश्चेति लोकत एव वेदितव्यमिति ॥६४।

**[समीक्षा]**

'कः + तरति, कः + थुडति' इस अवस्था में कातन्त्र और पाणिनीय दोनों ही व्याकरणों के अनुसार विसर्ग को सकारादेश होकर 'कस्तरति, कस्थुडति' शब्दरूप निष्पन्न होते हैं। अतः यहाँ उभयत्र साम्य है।

**[विशेष]**

पाणिनि ने **"कुस्तुम्बुरूणि जातिः"** (६।१।१४३) सूत्र से लेकर **"पारस्करप्रभृतीनि च संज्ञायाम्"** (६।१।१५७) तक १५ सूत्रों द्वारा 'जाति– क्रियासातत्य, प्रतिष्ठा– अनित्य' आदि के विवक्षित या गम्यमान होने पर 'कुस्तुम्बुरूणि, अपरस्पराः सार्था गच्छन्ति, गोष्पदो देशः, आस्पदम्, आश्चर्यम्, मस्करो वेणुः, मस्करी परिव्राजकः, कास्तीरं नाम नगरम्, कारस्करो वृक्षः, पारस्करो देशः' आदि शब्दों की सिद्धि निपातनप्रक्रिया से बताई है, जिनमें सुडागम अवश्य देखा जाता है। वस्तुतः व्युत्पत्ति के बल से इन शब्दों का अर्थ – निश्चय नहीं किया जा सकता, बल्कि लोक– प्रसिद्धि के अनुसार ही इनके अर्थ का अवधारण होता है। व्याकरणशास्त्र में भी आचार्यों ने लोक का प्रामाण्य माना है। कातन्त्र व्याकरण का सूत्र है– **"लोकोपचाराद् ग्रहणसिद्धिः"** (१।१।२३)। अर्थात् जिन शब्दों की सिद्धि के लिए इस व्याकरण में सूत्र नहीं बनाए गए हैं उनकी सिद्धि लोकव्यवहार या लोकप्रसिद्धि के अनुसार जान लेनी चाहिए। इसे ही ध्यान में रखकर दुर्गसिंह आदि व्याख्याकारों ने कहा

है कि कातन्त्रकार ने 'कारस्कर' आदि शब्दों को संज्ञाशब्द मानकर उनके साधनार्थ सूत्र नहीं बनाए। अतः उनकी सिद्धि अन्य लोकप्रसिद्ध संज्ञाशब्दों की तरह समझ लेनी चाहिए।

**[रूपसिद्धि]**

१. **कस्तरति**। कः + तरति। तकार के परवर्ती होने पर पूर्ववर्ती विसर्ग को प्रकृत सूत्र– द्वारा सकारादेश।

२. **कस्थुडति**। कः + थुडति। थकार के पर में रहने पर पूर्ववर्ती विसर्ग को सकारादेश॥ ६४।

## ६५. कखयोर्जिह्वामूलीयं नवा (१।५।४)

**[सूत्रार्थ]**

क – ख वर्णों के परवर्ती होने पर विसर्ग के स्थान में जिह्वामूलीय (×) आदेश विकल्प से होता है॥ ६५।

**[दु०वृ०]**

विसर्जनीयः कखयोः परयोर्जिह्वामूलीयमापद्यते न वा। क × करोति, कः करोति। क × खनति, कः खनति॥ ६५।

**[दु०टी०]**

**कखयोः**। क × इति विदध्यात्। संज्ञापूर्वको व्यवहारः शिष्यावबोधार्थः। ककारस्यापि अत्राप्युच्चारणार्थत्वात्॥ ६५।

**[समीक्षा]**

'कः + करोति, कः + खनति' इस अवस्था में दोनों ही व्याकरणों के अनुसार विसर्ग को जिह्वामूलीय आदेश होता है, परन्तु कातन्त्र व्याकरण में वज्र– सदृश आकृति (×) वाले वर्ण की जिह्वामूलीय संज्ञा की गई है – "क × इति जिह्वामूलीयः" (१।१।१७), और इसीलिए प्रकृत विधिसूत्र में भी जिह्वामूलीय पद पठित है।

पाणिनि ने अपने व्याकरण में न तो जिह्वामूलीय संज्ञा ही की है और न विधिसूत्र "कुप्वो ⨯क ⨯पौ च" (८।३।३७) में उसका पाठ ही किया है। इस स्थल में अर्धविसर्ग-सदृश आकृतिवाले वर्ण का विधान किया जाता है।

व्याख्याकारों ने उस अर्धविसर्गसदृश वर्ण को जिह्वामूलीय नाम दिया है। इससे स्पष्ट है कि पाणिनीय निर्देश विशेष व्याख्यागम्य है, जब कि कातन्त्रीय निर्देश अत्यन्त सरल।

**[विशेष]**

पाणिनीय व्याख्याकारों के अनुसार जिह्वामूलीय को अर्धविसर्ग के सदृश माना गया है,परन्तु कातन्त्रव्याख्याकारों ने इसे वज्रसदृश आकृतिवाला माना है। ये दोनों ही आकृतियाँ (ᳵ, ×) पर्याप्त भिन्न हैं। इनकी भिन्नता में विशेषज्ञ विद्वान् ही प्रमाण हो सकते हैं।

**[रूपसिद्धि]**

१. **क×करोति**। कः+करोति। ककार के परवर्ती होने पर पूर्ववर्ती विसर्ग को जिह्वामूलीय आदेश।

२. **क×खनति**। कः +खनति। खकार के पर में रहने पर पूर्ववर्ती विसर्ग को जिह्वामूलीय आदेश ॥६५।

## ६६. पफयोरुपध्मानीयं नवा (१।५।५)

**[सूत्रार्थ]**

'प–फ' वर्णों के पर में रहने पर विसर्ग के स्थान में उपध्मानीय आदेश होता है ॥६६।

**[दु०वृ०]**

विसर्जनीयः पफयोः परयोरुपध्मानीयमापद्यते नवा। क ᳶ पचति, कः पचति, क ᳶ फलति, कः फलति। व्यवस्थितविभाषयाऽघोषे शिट्परे न शादयः। पुरुषः त्सरुकः, वासः क्षौमम्, अद्भिः प्साताम् ॥६६।

**[दु०टी०]**

**पफ०**। नवाधिकार एव व्यवस्थितविभाषार्थं परिकल्पयिष्यति। भूयः किं नवाग्रहणेनेति चेद्, वक्ष्यमाणं हि विकल्पवचनं पूर्वस्मिन् विभाषानिवृत्त्यर्थमुत्तरत्रेति संदेह एव स्यात्। ननु पुरुषः त्सरुकः इति कथमत्र व्यवस्थितविभाषा ? **"वर्गे तद्वर्गपञ्चमं वा"** (१।४।१६) इत्यतो मण्डूकप्लुतिरिति ॥६६।

[वि०प०]

**पफयोः।** अधिकृतेन वाशब्देन विकल्पार्थे लब्धे यत् पुनर्नवाग्रहणं तद् व्यवस्थितविभाषार्थमित्याह-**व्यवस्थित** इत्यादि। कथमेतद् यावता वक्ष्यमाणं तावद् वाग्रहणं विकल्पनिवृत्त्यर्थम्। तच्च विकल्पं निवर्तयते, किमुत्तरत्र आहोस्विद् **'उभयोर्विभाषयोर्मध्ये यो विधिः स नित्यः'** (काला०परि०सू०७८) इति पूर्वसूत्रे सन्देहव्युदासार्थमेवेह नवाग्रहणं कथं व्यवस्थितविभाषार्थमुच्यते। एवं तर्हि अव्ययानामनेकार्थत्वाद् भविष्यति इति। **शिटपर०** इति। शिट् परो यस्मादिति विग्रहः। वासः क्षौममिति। क्षुमा अतसी। **"तस्येदम्"** (२।६।७) इत्यण्। अद्भिरिति। **"अपां भे दः"** (२।३।४६) इति॥६६।

[क०च०]

**पफ०**। व्यवस्थितविभाषयेति वृत्तिः। अत्र शिट्परं शषसमात्रपरमिति बोध्यम्। शादय इति तु तालव्यपाठः, तेनान्यदुदाहरणद्वयम्– 'छात्रः चशौ पठति; छात्रः ट्षौ पठति' इति द्रष्टव्यम्। **क्षौमेत्यादि पञ्जी**। **"तस्येदम्"** (२।६।७) इत्यणिति सूत्रावयवमात्रं न वाक्यम्। वाक्यं तु क्षुमाया इदमिति॥६६।

[समीक्षा]

'कः+पचति, कः + फलति' इस अवस्था में दोनों ही व्याकरणों के अनुसार विसर्ग को उपध्मानीय आदेश होता है, परन्तु अन्तर सूत्र– सं० ६५ के अनुसार ही है। अर्थात् पाणिनि ने केवल "कुप्वो ᳶ क ᳶ पौ च" (८।३।३७) यह विधिसूत्र बनाया है। उन्होंने न तो इस सूत्र में उपध्मानीय शब्द पढ़ा है और न कोई इस प्रकार की स्वतन्त्र संज्ञा ही। इसके विपरीत कातन्त्रकार ने उपध्मानीय संज्ञा की है– " **ᳶप इत्युपध्मानीयः**" (१।१।१८) तथा प्रकृत विधिसूत्र में भी उसका स्पष्ट पाठ है।

[विशेष]

पाणिनीय व्याख्याकारों ने उपाध्मानीय को अर्धविसर्ग के सदृश आकृति वाला बताया है, जब कि कातन्त्रव्याख्याकार इसे गजकुम्भ के सदृश आकृतिवाला वर्ण कहते हैं। अर्ध विसर्ग की आकृति तो जिह्वामूलीय जैसी ही है–ᳶ, परन्तु गजकुम्भ की अनेक आकृतियाँ भिन्न-भिन्न संस्करण वाले ग्रन्थों में देखी जाती हैं। जैसे–



**[रूपसिद्धि]**

१. **क ᳶ पचति – कः पचति।** कः +पचति। पकार के पर में रहने पर पूर्ववर्ती विसर्ग को विकल्प से उपध्मानीय आदेश = क ᳶ पचति। उपध्मानीय के अभाव में कः पचति।

२. क ᳶ फलति। कः + फलति। फकार के परवर्ती होने पर पूर्ववर्ती विसर्ग को वैकल्पिक उपध्मानीय आदेश = क ᳶ फलति। उपध्मानीय आदेश के अभाव में = कः फलति ॥६६।

## ६७. शे षे से वा वा पररूपम् (१।५।६)

**[सूत्रार्थ]**

'श् – ष् – स्' वर्णों के परवर्ती होने पर विसर्ग के स्थान में पररूप आदेश होता है ॥६७।

**[दु०वृ०]**

विसर्जनीयः शे वा षे वा से वा परे पररूपम् आपद्यते नवा। कश्शेते, कः शेते। कष्षण्डः, कः षण्डः। **कस्साधुः**, कः साधुः। चटतानित्यकरणाद् विसर्जनीयादेशस्याघोषे प्रथमो न स्यात्। कश्चरतीत्यादिष्वप्येवम् ॥६७।

**[दु०टी०]**

**शे षे०**। एकोऽत्र वाशब्दः समुच्चयार्थः, अपरो वाशब्दो विकल्पार्थः। शषसेष्वघोषपरेषु विसर्जनीयो लोप्यो वा। कः श्च्योतति, कश्च्योतति। कः ष्ठीवति, कष्ठीवति। कः स्थाता, कस्थाता। पररूपत्वेऽपि रूपत्रयम्। तन्न वक्तव्यम्, **श्रुतेरभेदात्** ॥६७।

**[वि०प०]**

**शे षे०**। प्रथमोऽत्र वाशब्दः समुच्चये, द्वितीयस्तु विकल्पार्थः। अथ 'कश्शेते' इत्यादिषु पररूपत्वे कृते शषसानामघोषे प्रथमः कथं न स्यादित्याह– चटतानित्यादि। अयमभिप्रायः– यदि प्रथमः स्यात् तदा इवर्णचवर्गयशास्तालव्याः, ऋवर्णटवर्गरषा मूर्धन्याः, लृवर्णतवर्गलसा दन्त्याः इति क्रमेण शषसानां स्थाने चटता एव प्राप्नुवन्ति। तत् पररूपग्रहणमपनीय चटतानित्येतान् वर्णान् स्वरूपेण कृत्वा शषसेषु वा चटतानिति सूत्रं विदध्यात्। एवं च सति प्रक्रियागौरवमपि परिहृतं भवति, न चैवं तस्मान्न प्रथमः ॥६७।

[क०च०]

**शे षे से०** । पूर्वसूत्राद् वाऽधिकारेण विकल्पे सिद्धे यत् पुनर्वाग्रहणं तद् वाऽधिकारनिवृत्त्यर्थम् । चटतानित्यकरणादिति **वृत्तिः** । एतेन पररूपविधानार्थं **'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते'** (काला०परि०सू०६३) इति न्यायात् पररूपेण प्रथमो बाध्यते इति भावः। **वररुचिस्तु** परम् इत्युक्ते श्रुतत्वात् 'शषसाः' एव भविष्यन्ति यद्रूपग्रहणं तद्रूपमात्रावधारणार्थम् । तेन 'कः शेते' इत्यादौ न प्रथम इत्याचष्टे इति । प्रक्रियागौरवमपीति पञ्जी । न केवलं साध्यस्यान्यव्याजेन विधानं परिहृतं भवतीत्यर्थः । यद् वा न केवलं मात्रालाघवं भवतीत्यपेरर्थः ।। ६७ ।।

[समीक्षा]

'कः + शेते, कः + षण्डः, कः + साधुः' इस अवस्था में कातन्त्रकार विकल्प से विसर्ग को पररूप करके 'कश्शेते, कष्षण्डः, कस्साधुः' आदि शब्दरूप निष्पन्न करते हैं। परन्तु पाणिनि उक्त प्रयोगों की सिद्धि के लिए विसर्ग को सकारादेश (**विसर्जनीयस्य सः** ८ । ३ । ३४), सकार को शकार (**स्तोः श्चुना श्चुः** ८ ।४। ४०) तथा षकार आदेश का (**ष्टुना ष्टुः** ८।४।४१) विधान करते हैं। इस प्रकार पाणिनीय निर्देश में गौरव स्पष्ट है।

[विशेष]

(१) कातन्त्र के प्रकृत सूत्र को लक्ष्य करके प्रश्नोत्तरसंवाद कातन्त्रसम्प्रदाय में प्रचलित है। –

**क्व हरिः शेते? का च निकृष्टा? को बहुलार्थः? किं रमणीयम्?**

**वद कातन्त्रे कीदृक् सूत्रं शे षे से वा वा पररूपम्॥**

अर्थात् सूत्र है– "शे षे से वा वा पररूपम्" (१। ५। ६)। श्लोकोक्त चार प्रश्नों के उत्तर सूत्र में इस प्रकार दिए गए हैं–

| | |
|---|---|
| १. क्व हरिः शेते? | शेषे। |
| २. का च निकृष्टा? | सेवा। |
| ३. को बहुलार्थः? | वा। |
| ४. किं रमणीयम्? | पररूपम्। |

(२) व्याख्याकारों ने सिद्ध किया है कि 'कः शेते' स्थल में विसर्ग को चकारादेश, 'कः षण्डः' में विसर्ग को टकार तथा 'कः साधुः' में तकार आदेश करना यदि अभीष्ट होता तो ग्रन्थकार ने "शषसेषु वा चटतान्" इस प्रकार की सूत्र रचना की होती। उन्होंने सूत्र बनाया है – **"पदान्ते धुटां प्रथमः"** (३।८।१)। अतः उक्त रूपों में विसर्ग के स्थान में क्रमशः शकार-षकार-सकार ही आदेश होते हैं, चकार-टकार-तकार नहीं।

**[रूपसिद्धि]**

१. **कश्शेते – कः शेते**। कः + शेते। शकार के परवर्ती होने पर पूर्ववर्ती विसर्ग को विकल्प से शकारादेश = कश्शेते। शकारादेश के अभाव में = कः शेते।

२. **कष्षण्डः – कः षण्डः**। कः +षण्डः। षकार के परवर्ती होने पर पूर्ववर्ती विसर्ग को षकारादेशः = कष्षण्डः। षकारादेश के अभाव में = कः षण्डः।

३. **कस्साधुः – कः साधुः**। कः + साधुः। सकार के पर में रहने पर पूर्ववर्ती विसर्ग को सकारादेश= कस्साधुः। सकारादेश के अभाव में= कः साधुः॥६७।

## ६८. उमकारयोर्मध्ये (१।५।७)

**[सूत्रार्थ]**

दो अकारों के मध्य में स्थित विसर्ग को उकारादेश होता है॥६८।

**[दु०वृ०]**

द्वयोरकारयोर्मध्ये विसर्जनीय उमापद्यते। कोऽत्र, कोऽर्थः। पुनरत्रेति रप्रकृतिरिति परत्वाद् रेफः स्यात्॥६८।

**[दु०टी०]**

उम०। अकारयोर्मध्ये इत्येकोऽपि शब्दोऽनेकार्थस्याभिधायक इति द्विवचनमुपपद्यते। मध्ययोगे षष्ठीयम्। **"उमतोऽति"** इति कृते सत्युत्तरत्रापरग्रहणं न करणीयं स्यात्, न चोद्यमेतत्। मध्यग्रहणस्य सुखार्थत्वात्। कथं **"कुरवोत्सहितं मन्त्रं सभायां चक्रिरे मिथः"** (म०भार० ८।६।६)। इत्यकारग्रहणे ह्याकारस्यापि ग्रहणमिति ? सत्यम्। ऋषिवचनसामर्थ्यप्रवृत्तस्य न नियामकमिदम्। युगे युगे व्याकरणान्तरमिति वा॥६८।

[क०च०]

**उम०** । 'वा' न वर्तते इति पूर्वसूत्रे पुनर्वाग्रहणस्य वाधिकारनिवृत्त्यर्थत्वात् । ननु 'पटवः सन्ति' इत्यात्रास् – धातोरस्तेरादेरित्यकारलोपे स्थानिवद्भावात् कथमुत्वं न स्यादिति चेत्, न । **"न पदान्त०"** (पा०१।१।५८) इत्यादिना स्थानिवद्भाव-निषेधात् । अथ कथमिदमुच्यते चतुर्थपाद एव **"नोऽन्त०"** (१।४।८) इत्यस्यान्तग्रहणेन पदान्ताधिकारस्य दूरीकृतत्वात् चेद् उच्यते । **"अघोषवतोश्च०"** (१।५।८) इत्यत्र पदान्ताधिकारनिवृत्त्यर्थं क्रियमाणश्चकारो बोधयति– अन्तग्रहेणनान्तरितोऽप्यत्र प्रकरणे पदान्ताधिकारोऽस्तीति **"अल्पादेर्वा"** (२।१।३१) इत्यत्र पञ्जिकायां वक्ष्यति । 'चतुष्टया' इत्यन्तर्वर्तिनीं विभक्तिमाश्रित्य पदान्तत्वे सति **"ते थे वा सम्"** (१ । ५ । ३ ) इत्यनेन सकार इति । कथं तर्हि 'सर्पिष्षु' इत्यत्र पदमध्येऽपि पररूपमिति चेत्, न । आगमग्रहणस्य बहुलार्थत्वादिति **विद्यानन्दः** । तन्न । **"अघोषवतोश्च"** (१।५।८) इत्यत्र चकार उक्तसमुच्चयमात्र इति वक्ष्यमाणटीका-विरोधात् । तस्मात् पारिशेष्यादेवात्र पदान्तकार्यप्रसक्तिः । अत एव **"विसर्जनीयश्चे छे वा शम्"** (१।५।१) इत्यत्रोक्तम्– उमकारयोर्मध्य इति यावत् पदान्ते एव संभवतीति । किं च विभाषया वृत्तौ पदान्तीयकार्यमात्रस्यैव प्रतिषेधः प्रतिपत्तव्यः इति न केवलं पदान्तनिबन्धनसूत्रीयकार्य मित्यर्थः ।।६८।

[समीक्षा]

'कः + अत्र, कः + अर्थः' इस स्थिति में कातन्त्रकार के अनुसार विसर्ग को उ तथा **"उवर्णे ओ"** (१। २। ३) से ओकारादेश होकर 'कोऽत्र, कोऽर्थः' आदि शब्दरूप सिद्ध होते हैं । पाणिनि के अनुसार विसर्ग होने से पूर्व ही सु– प्रत्ययस्थ स् को रु आदेश प्रवृत्त होता है । इस प्रकार पाणिनि के निर्देश में पदसिद्धि से पूर्व ही सन्धिविधान करना संगत प्रतीत नहीं होता ।

[विशेष]

(१) 'पुनः + अत्र' इस स्थिति में विसर्ग के स्थान में उकारादेश न होकर **'पूर्वपरयोः परविधिर्बलवान्'** (कात० परि०सू० ७०) इस न्याय के अनुसार **"रप्रकृतिरनामिपरोऽपि"** (१। ५। १४) सूत्र द्वारा रकारादेश होता है ।

(२) "उमकारयोः" इतने सूत्र से ही अभीष्टसिद्धि हो सकती थी, फिर 'मध्ये' ग्रहण व्यर्थ होकर यह ज्ञापित करता है कि कहीं पर एकत्र दीर्घ आकार के रहने

पर भी उक्त कार्य सम्पन्न हो जाए। इसी के फलस्वरूप 'कुरवः + आत्महितम्' इस स्थिति में विसर्ग के स्थान में उकारादेश होकर 'कुरवोत्महितम्' रूप निष्पन्न होता है। टीकाकार के अनुसार ऋषिवचन को प्रामाणिक मानकर यह प्रयोग उपपन्न होता है या फिर युगभेद से व्याकरण भी भिन्न होते हैं। अतः उस युग के व्याकरण में उक्त की व्यवस्था की गई होगी।

### [रूपसिद्धि]

१. **कोऽत्र**। कः +अत्र। ककारोत्तरवर्ती अकार तथा 'अत्र' के प्रारम्भिक अकार के मध्यवर्ती विसर्ग को प्रकृत सूत्र- द्वारा उकारादेश तथा **"उवर्णे ओ"** (१।२।३) से अ को 'ओ' आदेश (परवर्ती उ- वर्ण का लोप) = कोऽत्र।

२. **कोऽर्थः**। कः + अर्थः। दो अकारों के मध्य में स्थित विसर्ग को उकारादेश तथा उससे पूर्ववर्ती अ को 'ओ' आदेश (परवर्ती 'उ' का लोप) = कोऽर्थः॥ ६८।

## ६९. अघोषवतोश्च (१।५।८)

### [सूत्रार्थ]

अकार तथा घोषवान् वर्णों के मध्य में स्थित विसर्ग के स्थान में उकार आदेश होता है॥ ६९।

### [दु०वृ०]

अकार- घोषवतोर्मध्ये विसर्जनीय उमापद्यते। को गच्छति। को धावति अघोषवतोरिति किम्? कः शेते ॥६९।

### [दु०टी०]

**अघोष०**। अश्च घोषवांश्चेति द्वन्द्वः। चकार उक्तसमुच्चयमात्रे॥६९।

### [क० च०]

**अघोष०**। **अघोषवतोरिति किमिति वृत्तिः।** ननु कथमिदमुच्यते यदि सूत्रमेव न क्रियते तदा को गच्छतीति स्वोदाहरणस्यासिद्धत्वात्। 'कः शेते' इत्यत्र केनापि सूत्रेण उत्वप्राप्तेरभावात् प्रत्युदाहरणस्यासङ्गतेः? सत्यम्। "उम् वर्णयोर्मध्ये" इत्येकयोग एवास्ताम् इति **हेमकरः**।

**अन्ये** तु अघोषवतोरित्यत्र घोषवद्ग्रहेणन किम्? आच्चेत्यास्ताम्। न च निर्निमित्ते स्यादिति वाच्यम्, **"सिद्धो वर्णसमाम्नायः"** (१।१।१) इति निर्देशादित्याहुः।

वयं तु 'अघोषवतोरित्युभयग्रहणमेव खण्डयते' (इति मन्यामहे)। **अयमभिप्रायः** – अत्र सूत्रम् अकृत्वा पूर्वसूत्रे एव चकारो विधीयताम् । ततश्च **"अपरो लोप्योऽन्यस्वरे यं वा"** ( १।५।९) इति लोप– यकारयोर्विधानाद् आकारघोषवतोर्लोपविधानाद् नामिनो **"घोषवत्स्वरपर०"**(१।५।१३) इति रेफविधानाच्च पारिशेष्यादघोषवतोरेव प्राप्तश्चकारः समुच्चरिष्यते, तत्र पूर्वसूत्रात् शकाराद्यनुकर्षणमाशङ्क्य समाधत्ते–'कः शेते' इति। **वररुचिस्तु** चकारात् क्वचिद् अघोषेऽपि उत्त्वं भवति। यथा– 'वातोऽपि तापपरितो सिञ्चति' इत्याचष्टे ॥६९।

**[समीक्षा]**

'कः +गच्छति, कः+ धावति' इस अवस्था में कातन्त्रकार के अनुसार विसर्ग को उकारादेश होता है। जबकि पाणिनीय प्रक्रिया के अनुसार विसर्गावस्था से पूर्व ही स् को रु तथा उस रु को "हशि च" (पा० ६।१। ११४) से उत्त्व आदेश करके उक्त रूपों की निष्पत्ति की जाती है।

पदों का साधुत्व बताने वाले व्याकरणशास्त्र में 'शिवः, अर्च्यः, कः, धावति' आदि पदों के स्वतन्त्र रूप में सिद्ध हो जाने के बाद ही दो पदों में (पदस्थ वर्णों में) सन्धिनियमों का प्रवृत्त होना अधिक संगत कहा जा सकता है। अतः कातन्त्र में जो विसर्ग को उकारादेश विहित है, वही अधिक संगत है, न कि 'शिव' प्रातिपादिक से प्रथमा–एकवचन 'सु' प्रत्यय के प्रवृत्त होने पर ही पदान्तर 'अर्थः, वन्द्यः' आदि पदों के सन्निधान से सन्धिकार्य का होने लगना संगत कहा जाएगा। अतः कातन्त्रकार का दृष्टिकोण उचित है।

**[रूपसिद्धि]**

१. **को गच्छति**। कः + गच्छति। ककारोत्तरवर्ती अ तथा घोषसंज्ञक वर्ण ग के मध्य में स्थित विसर्ग को 'उ' आदेश, "अवर्ण उवर्णे ओ" (१।२।२) से ककारोत्तरवर्ती 'अ' को ओ आदेश तथा उ का लोप।

२. **को धावति**। कः + धावति। ककारोत्तरवर्ती अ तथा घोषसंज्ञक ध् के मध्यवर्ती विसर्ग को 'उ' आदेश, "अवर्ण उवर्णे ओ" (१।२।२) से ककारोत्तरवर्ती अ को ओ तथा परवर्ती उ का लोप॥६९।

## ७०. अपरो लोप्योऽन्यस्वरे यं वा (१।५।९)

### [सूत्रार्थ]

अकारभिन्न स्वर के पर में रहने पर अकार से परवर्ती विसर्ग का लोप होता है तथा विकल्प से यकारादेश भी होता है ।।७०।

### [दु०वृ०]

अकारात् परो विसर्जनीयो लोप्यो भवति उक्ताद् अन्यस्वरे यं वाऽऽपद्यते । क इह, कयिह । क उपरि, कयुपरि । अपर इति किम्? अग्निरत्र । वाऽत्र समुच्चये । ईषत्स्पृष्टतरोऽत्र यकारः ।।७०।

### [दु०टी०]

**अपरः** । आत् परोऽपर इति, अन्यश्चासौ स्वरश्चेति अन्यस्वरः सामर्थ्यप्राप्तं स्वरमपेक्ष्यान्यस्वरः स्यादिति । अपर इत्यादि । ननु अन्यग्रहणमपि किमर्थम् "**उमकारयोर्मध्ये**" (१ । ५ । ७) इति बाधकं लोपस्य यकारस्य चाविशिष्टत्वात् तथा रेफश्च नामिपरत्वात् । अथ जातौ विस्पष्टार्थं व्यक्तौ बाधकं नास्तीति लोपयत्वोत्त्वानि स्युरित्यन्यग्रहणं तथा अपरग्रहणमपि स्थितम् । आदिति सिद्धे परग्रहणं च स्पष्टार्थम् । स्वरग्रहणं किमर्थम्? 'कः करोति, कः फलति' इति विकल्पपक्षे मा भूत् । **वाऽत्र समुच्चये** इति । लोपयकारयोर्विधानाद् विकल्पसिद्धिरस्तीति । न च विसर्गस्थितिहेतुरयं विकल्पः कल्प्यते यलोप्यो वेत्यकरणात् । तस्माद् वा-शब्दः समुच्चयार्थो निश्चितः । यथा स्थानान्तरेषु यकार ईषत्स्पृष्टः सिद्धस्तथा ईषत्स्पृष्टतरश्चेह स्वभावाद् इति । **अन्ये** तु अनुक्तमपीषत्स्पृष्टत्वं वाशब्दः समुच्चिनोतीति मन्यन्ते । तत् पुनः स्थान– करण-शैथिल्यमुच्चारणकृतमुच्यते ।।७०।

### [वि० प०]

**अपरः । अग्निरत्रेति ।** ननु चात्र परत्वाद् विशेषविहितत्वाच्च नामिपरस्य विसर्जनीयस्य घोषवत्स्वरपर इति रेफोऽपि बाधकः किमपरग्रहणेनेति? सत्यम् । सुखार्थम् । किं च व्यक्तिपदार्थपक्षे बाधकत्वं नास्तीति अत्रापि स्यात् । **वाऽत्र समुच्चये** इति । लोपयकारयोः सूत्र एवोक्तत्वाद् विकल्पो लब्ध एवेति समुच्चये वाशब्द इह वेदितव्य इत्यर्थः ।

ननु पक्षे विसर्गस्य स्थित्यर्थं विकल्पार्थ एव वाशब्दः कथं न स्यात् । नैवम्, तदा 'यलोप्यौ वा' इत्येवं विदध्यात् । तस्माद् भिन्नविभक्तिनिर्देशात् लोप्यो वा भवति यकारमापद्यते इति समुच्चाय एव वाशब्दो युज्यते इत्यदोषः ।।७०।

[क० च०]

**अपरो०** । ननु कयिहेत्यादौ घोषवति कथं न दीर्घो लाक्षणिकत्वादिति चेत्, तदयुक्तम् । वृक्षायेत्यादिष्वपि दीर्घाभावप्रसङ्गात् । तत्रैव दीर्घः कथमिति चेद्, वर्णविधौ लाक्षणिकपरिभाषाया अनादरात् । इदमेव कुतो लब्धमिति चेत्, स्थादोश्चेति ज्ञापकात् । अत्र **हेमकरः** सिद्धान्तयति– **'असिद्धं बहिरङ्गम् अन्तरङ्गे'** (कात०परि० सू० ३५) इति न्यायादत्र न दीर्घः, तन्न । वृक्षायेत्यादावपि प्रकृत्याश्रिते दीर्घे कृते प्रत्ययाश्रितस्य यकारस्यासिद्धिवद्भावप्रसङ्गात् ।

अथ स्थितिपक्षे कथमत्रैव दीर्घोऽसिद्धवद्भावस्य विषयत्वादिति चेद्, अकारो दीर्घं भोऽष्विति (?) कृते सिध्यति यद् घोषवद्ग्रहणं तत् सन्निपातासिद्धवद्भावयोरनित्यार्थम् । **वररुचि**मतानुसारिणाप्येवं तस्मिन् सूत्रे व्याख्यायते ।

**कामघोषस्तु** कयिहेत्यत्र यकारस्य व्यञ्जनत्वाद् विभक्तिविषये यो घोषवान् वर्ण इत्यस्याघटनात् न दीर्घः । अथ कुत इदं लब्धमिति चेदुच्यते–**"शसि सस्य च नः"** (२।१।१६) इत्यत्र शस् निरिति कृतेऽपि **"अकारो दीर्घं घोषवति"** (२।१।१४) इति दीर्घे कृते वृक्षान् इत्यादिकं सिध्यति यत् पुनस्तत्र दीर्घो विधीयते तद् बोधयति– विभक्तिविषये यो घोषवान् वर्णस्तस्मिन्नेव दीर्घः, न तु विभक्तिरूपे घोषवद्वर्णमात्रे इति । न च **"आद्यन्तवदेकस्मिन्"** (कात० परि० वृ० २०) इति न्यायादेवात्रापि विभक्तिविषयत्वमस्तीति वाच्यम्, ज्ञापकस्य व्यर्थत्वादिति, तन्न, शस् निरिति कृते इमानित्यत्र व्यञ्जनेऽद्भावप्रसङ्गात् । अन्यदपि बहु दूषणमस्तीति । तन्न लिखितं ग्रन्थगौरवभयात् । तस्मात् सिद्धान्तः पुनरयम्-तत्रैकपदाश्रित एव घोषवति दीर्घप्रस्तावात् कुतः कयिहेति भिन्नपदाश्रितघोषवति दीर्घप्रसङ्ग इति । अपर इति किम् ? अग्निरत्रेति **वृत्तिः** । अपरग्रहणाभावे किमपेक्षयाऽन्यत्स्वरो ग्रहीतव्य इति चेदुच्यते यतो विसर्गस्तदपेक्षयाऽन्यत्वं ग्राह्यमिति न दोषः ।

**परत्वादिति पञ्जी** । यथा तस्य परत्वं तथाऽस्यापि अन्यस्वरमादाय विशेषविहितत्वमस्तीति आशङ्क्यते, तस्यापि विशेषविहितत्वं नामिपरत्वमादाय इत्याह- **विशेषविहितत्वादिति** । एतेन विशेषविहितत्वेनोभयमेव समानम्, किन्तु रेफस्य परत्वेनाधिकरणत्वमिति । अथोभयोः सावकाशत्वाभावात् कथं परत्वमिति चेत्, न । **"अन्यस्वरे यं वा"** (१।५।९) इत्यस्य क इहेत्यादौ रेफस्य तु अग्निरिहेत्यादाविति । नैवमित्यादि– अथ भिन्नविभक्तिनिर्देशात् समुच्चयार्थत्वमुच्यते, तथा वाशब्दबलाद् विकल्पः कथं न

स्यात् । तथाहि यदि समुच्चयार्थो भविष्यति तदा यलोप्याविति कृतं किं चरितार्थं वा-शब्देन ? सत्यम् । यथाश्रुतभिन्नविभक्तिनिर्देशे समुच्चयं विना वाक्यार्थपोष एव न स्यात्, समुच्चयस्यैव विकल्पनानौचित्यादित्याशयः । तर्हि यलोप्याविति कथं न कृतम् इति चेत्, सूत्रस्य विचित्रा कृतिः ।।७०।

**[समीक्षा]**

(१) 'कः + इह, कः + उपरि' इस दशा में कातन्त्रकार एक ही सूत्र द्वारा विसर्गलोप तथा यकारादेश का विधान करते हैं। जिससे 'क इह, कयिह' आदि प्रयोग निष्पन्न होते हैं। पाणिनि के अनुसार स् को रु, रु को य् तथा उसका वैकल्पिक लोप करके उक्त प्रयोग सिद्ध किए जाते हैं। जिससे अनेक सूत्र तथा अनेक कार्य करने पड़ते हैं। अतः पाणिनीय निर्देश में गौरव स्पष्ट है।

(२) 'कः + इह' इस अवस्था में विसर्ग के स्थान में यकारादेश होने पर **"अकारो दीर्घं घोषवति"** (२।१।१४) से ककारोत्तरवर्ती अकार को दीर्घ आदेश प्राप्त होता है। इसके समाधानार्थ "अकारो दीर्घं घोषवति" (२।१।१४) सूत्र का अर्थ किया जाता है– विभक्तिविषयक घोषवान् वर्ण के पर में रहने पर अकार को दीर्घ होता है। न कि विभक्तिरूप घोषवान् वर्ण के पर में रहने पर। अतः 'देवाय' इत्यादि में दीर्घ हो जाता है। कयिह में नहीं। उमापति ने कहा भी है।

**देवायेति कृते दीर्घे कयिहेति कथं नहि।**

**सत्यमेकपदे दीर्घो न तु भिन्नपदाश्रितः ॥ इति।**

**[रूपसिद्धि]**

१. **क इह, कयिह** । कः + इह । अकारोत्तरवर्ती विसर्ग का स्वर वर्ण इ के पर में रहने पर लोप तथा सन्धि का अभाव = क इह । विसर्ग को यकारादेश = कयिह ।

२. **क उपरि, कयुपरि।** कः + उपरि। स्वर वर्ण उ के परवर्ती होने पर अकारोत्तरवर्ती विसर्ग का लोप तथा सन्धि का अभाव = क उपरि। विसर्ग का विकल्प से यकारादेश = कयुपरि ।।७०।

## ७१. आभोभ्यामेवमेव स्वरे (१।५।१०)

### [सूत्रार्थ]

आकार तथा भो-शब्द से परवर्ती विसर्ग के स्थान में यकारादेश तथा विसर्ग का लोप होता है यदि विसर्ग से स्वरवर्ण पर में हो तो ॥७१।

### [दु०वृ०]

आकार-भोशब्दाभ्यां परो विसर्जनीय एवमेवं भवति स्वरे परे। देवा आहुः, देवायाहुः। भो अत्र, भोयत्र। भो-इत्यामन्त्रणौकारोपलक्षणम्। तेन **केचित्** 'भगो अत्र, भगो यत्र, अघो अत्र, अघो यत्र'। आदीषत्स्पृष्टतरश्चौकारादीषत्स्पृष्टतर एवात्र यकारः। एवमेवग्रहणं नित्यलोपनिरासार्थम् ॥७१।

### [दु०टी०]

**आभो०**। भो इति भवतो वादेरुत्वे सति भोस्शब्दश्चाव्ययो विद्यते इति। यथा भो ब्राह्मणौ, भो ब्राह्मणा इति। कथं प्रभोरिह, शम्भोरयम्, कुभोरयम् इति, **'व्याख्यानतो विशेषार्थप्रतिपत्तिर्नहि सन्देहादलक्षणम्'** (काला०परि०सू० ८८) इत्यामन्त्रणविषयो गृह्यते। भो इत्यादि। भगवदघवतोर्वादेरुत्वे सति 'भगो-अघो' शब्दौ ततस्ताभ्या-मपीति **कश्चित्**।

**वयं** तु ब्रूमः – किमुपलक्षणेन। क्वचिदपि भाषायां न दृश्यते। आकारादीषत्-स्पृष्टतरः ईषत्स्पृष्टश्च यकार इह स्वभावादिति रूपत्रयं पूर्ववत्। ओकारात् पुनरीषत्स्पृष्टतरः स्वभावादिति रूपद्वयमेव। एतदुक्तं भवति – यथा चायमयत्नसाध्य ईषत्स्पृष्टः, ईषत्स्पृष्टतरोऽपि तथेत्यर्थः। यथा हम्मतिरयं स्वभावात् सौराष्ट्रे एव दृश्यते, न सर्वत्र देशे इति। उ निपातेऽपीषत्स्पृष्टतर एव पूर्वस्मिन् इह वेति रूपद्वयमेव। क उ, कयु। देवा उ, देवायु। भो उ, भोयु। **एवमि**त्यादि। यथा पूर्वस्मिन् विसर्जनीयो लोप्यो यं वापद्यते, तथैवेत्यर्थः। तेन कस्यचिदोकारान्नित्यं लोप इति मतम्। तद् व्यवच्छिद्यते इति पुनः स्वरग्रहणमन्यस्वरनिवृत्त्यर्थं तेन 'देवा आगताः, भो ओदनं पचति' इति सिद्धम् ॥७१।

### [वि० प०]

**आभो०। भो अत्रेति**। भवन्त् – शब्दाद् **"आमन्त्रणे च"** (२।४।१८) इति सिः, **"भवतो वादेरुत्वं सम्बुद्धौ"** (२।२।६३) इति वादेरवयवस्य उत्वम्। सम्बुद्धिसकारस्य

विसर्जनीयः। अव्ययो वाऽऽमन्त्रणविषये 'भोः' शब्द इत्याह– भो इत्यादि। **"भवतो वादेरुत्वं संबुद्धौ"** (२।२।६३) इत्यत्र योगविभागबलाद् भगवदघवतोरपि वादेरुत्वं वर्णयन्ति। तेनानयोरपीत्यर्थः। अयं पुनरुपलक्षणव्याख्यानं न मन्यते, भाषायामनयोः प्रयोगस्यादर्शनात्। आदीषत्स्पृष्टतरश्चेति स्वभावतः अन्तस्थानामीषत्स्पृष्टत्वाद् इहापि यकार ईषत्स्पृष्ट एव प्राप्नोति। ततो **"व्योर्लघुप्रयत्नतरः शाकटायनस्य"** ( पा०८। ३।१८) इति ईषत्स्पृष्टत्वं विभाषयेति कश्चिदाह। तदिह न वक्तव्यम्, यथा अन्यत्रायम् ईषत्स्पृष्टः स्वभावात् सिद्धः, तथेहापि ईषत्स्पृष्टतरश्च स्वभावात् सिद्ध एवेति, पर्यनुयोगस्योभयत्राविशेषादिति।

एवं पूर्वत्रापीत्याह– **आदीषत्स्पृष्टतरश्चेति**। आत ईषत्स्पृष्टतर आदीषत्स्पृष्टतर इति पञ्चमीसमासः। तत्पुनरीषत्स्पृष्टतरत्वं स्थानकरणशैथिल्यमुच्चारणकृतमुच्यते। उ निपाते पुनरीषत्स्पृष्टतर एव 'देवा उ, देवायु, भो उ, भोयु, क उ, कयु'। एवमित्यादि पूर्वसूत्रोक्तकार्यं भवतीति, तेन ओकारान्नित्यमिति यन्मतं तस्य निरासः सिद्धो भवतीति ॥७१।

## [क० च०]

**आभो०**। एवमेवग्रहणं नित्यलोपनिरासार्थमिति **वृत्तिः**। अत ओतो लोपं नित्यम् इति परसूत्रं न वक्तव्यमित्यर्थः। ननु एकैवंशब्देनैवोपपत्तौ किं पुनरेवंशब्देन? सत्यम्। अत्र जातिपक्षार्थम्। ततः किमिति चेदुच्यते– वारत्र, द्वारत्रेति परो रेफ एव, अन्यथा व्यक्तिपक्षे लोपयकारयोः प्रवृत्तिः स्यादिति **विद्यानन्दः**। तन्न। जातिव्यक्तिपक्षयोर्लक्ष्यानुसारेण प्रवर्तनात् किं तत्र यत्नान्तरेण। अस्तु वा व्यक्तिपक्ष एवात्र, तथापि रेफविधौ तत्र व्यक्तिकल्पने परत्वाद् रेफ एव भविष्यति। अन्यथा पूर्वसूत्रे व्यक्त्याश्रयणे कथं पुनरुक्तमिति प्रयोगः स्यात्, नैवम्। व्यक्तिपक्षे अग्निरत्रेति प्रत्युदाहरणासङ्गतिरिति पूर्वोक्तविरोधः। **"घोषवत्स्वरपरः"** (१।५।१३) इत्यत्र जातिपक्षमाश्रित्योक्तत्वात्। एतदभिप्रायेणैव पञ्जीकृता साधारणमुक्तमिति, तस्मादवधारणेनैवशब्देन मतान्तरनिराकरणमेव स्फुटीकृतमिति।

**"अव्यये च"** इति वाशब्दोऽत्र समुच्चये। **"व्योर्लघुप्रयत्नतरः शाकटायनस्य"** (पा०८। ३।१८) इति परसूत्रम्। **अस्यार्थः**– यकारवकारयोर्मध्ये यो लघुप्रयत्नतरः स ईषत्स्पृष्टतरो भवति शाकटायनस्येति नान्यस्येति। तेन विकल्पो लब्ध इति। पर्यनुयोगस्येति प्रश्नस्येति। उभयत्रापीति सूत्रे कृतेऽप्यकृतेऽपि इत्यर्थः। स्थानकरणशैथिल्यमिति। स्थानं ताल्वादि तत्र करणं साधकतमम् अभिघातलक्षणं तस्य शैथिल्यम् = अल्पप्रयत्न-

स्तेन यदुच्चारणं तेन कृतम् इत्यर्थः। **मूर्खास्तु–** क्रियते इति **करणं** शब्दः। कर्मणि युट्; स्थानेन करणस्य शैथिल्यं स्थानकरणशैथिल्यम्। तत् किम्भूतम् उच्चारणे कृतमित्यर्थ इत्याहुः ।।७१।

**[समीक्षा]**

(१) 'देवाः + आहुः, भोः+ अत्र' इस अवस्था में कातन्त्रकार विसर्ग का लोप तथा यकारादेश करके 'देवा आहुः, देवायाहुः। भो अत्र, भोयत्र' शब्दरूप निष्पन्न करते हैं। पाणिनि के अनुसार तो यहाँ स् को रु, र् को य् तथा य् का वैकल्पिक लोप होता है। इस प्रकार पाणिनीय प्रक्रिया में गौरव स्पष्ट है।

(२) इस सूत्र में पठित 'भो' शब्द आमन्त्रणार्थक ओकारान्त शब्दों का उपलक्षण माना जाता है, जिससे 'भगो, अघो' शब्दों में भी निर्दिष्ट विधि प्रवृत्त होती है।

(३) कुछ व्याख्याकारों या आचार्यों का मत संभवतः रहा होगा कि ओकारान्त शब्दों से विसर्ग का लोप नित्य होता है। उनके मत का खण्डन करने के उद्देश्य से सूत्र में 'एवमेव' शब्द पढ़ा गया है। जिसके फलस्वरूप **"अपरो लोप्योऽन्यस्वरे यं वा"** (१।५।९) इस पूर्वोक्त सूत्र में निर्दिष्ट दोनों विधियाँ यथावत् होती हैं। अर्थाद् आकार– भोशब्दों से परवर्ती विसर्ग का वैकल्पिक लोप तथा पक्ष में यकारादेश होता है।

**[रूपसिद्धि]**

१. **देवा आहुः – देवायाहुः ।** देवाः + आहुः। आकार से परवर्ती तथा स्वर वर्ण आकार के पर में रहने पर विसर्ग का लोप = देवा आहुः। विसर्ग को यकारादेश = देवायाहुः।

२. **भो अत्र, भोयत्र।** भोः + अत्र। भो से परवर्ती तथा स्वर वर्ण अकार के पर में रहने पर विसर्ग का लोप = भो अत्र। विसर्ग को यकारादेश = भोयत्र ।।७१।

## ७२. घोषवति लोपम् (१।५।११)

**[सूत्रार्थ]**

आकार तथा भोशब्द से परवर्ती विसर्ग का घोषवान् वर्ण के पर में रहने पर लोप होता है ।।७२।

[दु०वृ०]

आकार-भोब्दाभ्यां परो विसर्जनीयो लोपमापद्यते घोषवति परे। देवा गताः, भो यासि, भगो व्रज, अघो यज। लोपग्रहणं 'यं वा' इति निवृत्त्यर्थम् ॥७२।

[दु०टी०]

**घोषवति वा। लोपेत्यादि**। लोपग्रहणमन्तरेण 'यं वा' इत्यनुवर्तते चेत् तदा आभोभ्यामेव स्वरघोषवतोरित्येकयोगं विदधीत, सूत्रे प्रधाननिर्देशात् लोपस्यानुवर्तनमुचितम्। नैवम्, 'यं वा' इति सन्निहितं वर्तते, कार्यदृष्ट्या च द्वयोरपि प्राधान्यमिति लोपग्रहणम्। [लोपग्रहणमन्तरेण 'यं वा' इत्यनुवर्तते तदा कार्यस्य समानत्वाद् आभोभ्यामनघोषे इत्येकमेव सूत्रं कुर्वीत। अघोषादन्यस्मिन् परिशिष्टे स्वरे घोषवति च लोपयकारौ भविष्यतः, किं योगविभागेन? ननु योगविभागात् 'लोपः' एवानुवर्तते इति कुतो निश्चितम्। एकयोगनिर्दिष्टत्वाद् यं वेत्यस्यैवानुवृत्तिः कथन्न भवतीति चेत्, नैवम्। 'विसर्जनीयो लोप्यो यं वाऽऽपद्यते' इति सूत्रार्थे लोपस्य प्रधानत्वाद् यकारस्य च वाशब्देन समुच्चीयमानत्वाद् अप्राधान्यम्। अतो लोप एवानुवर्तिष्यते, तदयुक्तम्, अनन्तरत्वाद् 'यं वा' इत्येतदेवानुवर्तते। किं च कार्यद्वारेण द्वयोरपि प्राधान्यमिति लोपग्रहणम्] ॥ ७२ ।

[वि०प०]

**घोष०**। 'भगो व्रज, अघो यज' इति **उपलक्षणपक्षे** दर्शितम्। विशेषविधानाद् यकारस्य निवृत्तिरर्थाद् इत्याह-**लोपमि**त्यादि। ननु लोपग्रहणमन्तेरण 'यं वा' इत्यनुवर्तते तदा कार्यस्य समानत्वाद् 'आभोभ्यामनघोषे' इत्येकमेव सूत्रं कुर्वीत। अघोषादन्यस्मिन् परिशिष्टे स्वरे घोषवति च लोप–यकारौ भविष्यतः, किं योगविभागेन ? ननु योगविभागाद् लोप एवानुवर्तते इति कुतो निश्चितम्। एकयोगनिर्दिष्टत्वाद् 'यं वा' इत्यस्यैवानुवृत्तिः कथं भवतीति चेत्, नैवम्। विसर्जनीयो लोप्यो भवति यं वाऽऽपद्यते इति सूत्रार्थे लोपस्य प्रधानत्वाद् यकारस्य च वाशब्देन समुच्चीयमानत्वाद् यं वा इत्येतदेवानुवर्तते, किं च कार्यद्वारेण द्वयोरपि प्राधान्यमिति लोपग्रहणम् ॥७२।

[क०च०]

**घोष०**। यं वेति निवृत्त्यर्थमिति वृत्तिः। यकारवाशब्दयोर्निवृत्तिरिति भावः। विशेषविधानादिति– विशेषस्य लोपस्य पुनर्विधानादित्यर्थः। अर्थादिति– **'कार्यं कार्येण**

**हन्यते'** इति न्यायादित्यर्थः। ननु लोपग्रहणं न क्रियताम्, पूर्वसूत्रादेव लोपानुवृत्तिर्भविष्यति इत्याशङ्क्याह – **नन्विति।** अनन्तरत्वादित्यादि। ननु तथापि 'अन्यस्वरे यं वा' इति कृतेऽनन्तरत्वाल्लोप्य एवानुवर्तिष्यते इत्याह– **किं चेति।** अन्यः पुनरेकस्मिन् सूत्रे आनन्तर्यं नास्तीत्याह-किंचेति। कार्यद्वारेणेति। अत्र **हेमकरः** – इदं तु प्रथमकक्षायामेवोक्तं वाशब्दस्य सम्बन्धेन यकारस्य गौणत्वादेव नेहानुवृत्तिः। लोपग्रहणं तु शङ्कामात्रनिरासार्थमेवेत्याचष्टे। तन्न। वाशब्देन सहैवानुवर्तने गौणत्वाभावाल्लोपग्रहणं विना कथं वाशब्दनिवृत्तिः। तस्माद् यदुक्तं **पञ्जीकृता** तदेव साध्विति॥७२।

**[समीक्षा]**

'देवाः + गताः, भोः+ यासि, भगोः+व्रज, अघोः+ यज' इत्यादि स्थलों में कातन्त्रकार विसर्ग का लोप करके 'देवा गताः, भो यासि' इत्यादि प्रयोगों की सिद्धि बताते हैं। यहाँ पाणिनि ने सकारस्थानिक रु को य् आदेश और उसका लोप विहित किया है। इससे कातन्त्रीय प्रक्रिया का लाघव और पाणिनीय प्रक्रिया का गौरव स्पष्ट है॥

**[विशेष]**

विगत सूत्र **"अपरो लोप्योऽन्यस्वरे यं वा"** (१।५।९) से लोप की अनुवृत्ति संभव होने पर भी प्रकृत सूत्र में लोप पद इसलिए पढ़ा गया है कि **"एकयोगनिर्दिष्टानां सहैव वा प्रवृत्तिः सहैव वा निवृत्तिः"** (सं० बौ० वै०, पृ० २२०) इस न्यायवचन के अनुसार विगत सूत्र (१।५।९) से केवल 'लोप्यः' पद की अनुवृत्ति नहीं की जा सकती, किन्तु 'लोप्यो यं वा' इतने अंश की अनुवृत्ति हो सकेगी। यदि इतने अंश की अनुवृत्ति होगी तो लोप के अतिरिक्त विसर्ग के स्थान में पाक्षिक यकारादेश भी होगा जो यहाँ अभीष्ट नहीं है। यहाँ तो लोपमात्र ही अभीष्ट है। इसी के साधनार्थ लोप शब्द सूत्र में पढ़ा गया है।

**[रूपसिद्धि]**

१. **देवा गताः**। देवाः + गताः। आकार से परवर्ती तथा घोषसंज्ञक वर्ण ग के पर में रहने विसर्ग का लोप।

२. **भो यासि**। भोः + यासि। 'भो' से परवर्ती तथा घोषसंज्ञक वर्ण य् के पर में रहने पर विसर्ग का लोप।

३. **भगो व्रज** । भगोः + व्रज । 'भो' के उपलक्षण रूप 'भगो' से परवर्ती तथा घोषसंज्ञक वर्ण व के पर में रहने पर विसर्ग का लोप ।

४. **अघो यज** । अघोः + यज । 'भो' के उपलक्षणरूप 'अघो से परवर्ती तथा घोषसंज्ञक वर्ण य् के पर में रहने पर विसर्ग का लोप ।।७२।

## ७३. नामिपरो रम् (१।५।१२)

### [सूत्रार्थ]

नामिसंज्ञक वर्ण से परवर्ती विसर्ग के स्थान में रकार आदेश होता है ।।७३ ।

### [दु०वृ०]

नामिनः परो विसर्जनीयो रमापद्यते निरपेक्षः । सुपीः, सुतूः । ईरूरर्थं वचनमिदम् ।।७३।

### [दु०टी०]

**नामि०** । नामिनः परो **नामिपरो** न तु नामि परो यस्मादिति बहुव्रीहिः घोषवत्स्वरपरः इति वचनात् । तथा परनिमित्तनिरपेक्षश्च । सुष्ठु पेषति, सुष्ठु तोषतीति क्विपि, विरामे विसर्जनीये सति विधिरयम् । **ईरूरर्थं वचनमिति।** रेफादेशे सति ईरूरोः सम्भवस्तत्र ईरूरादेशाविति । **"यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्वाध्यते"** (कात० परि० सू० ५०) इति कृतस्यापि रेफस्य पुनर्विसर्ग एव । तथा अग्निः, वायुः, गौरति ।कथं पिपठीः, पिपतीः ।पिपठिषतीति, पिपतिषतीति । विषयसप्तमीत्वादस्य लोपे सति क्विपि विरामे भूतपूर्वप्रकृतिरेव, सस्यानन्त्यत्वात् । ततो विसर्जनीये सति रेफोऽयं प्रवर्तते इति नामिपरग्रहणं किमर्थम्? 'कः सोमपाः' इत्यत्र सतोऽपि रेफस्य विसर्ग एव ।जातौ हि वाक्यमिदम् । अथोत्तरार्थं चेद् अवर्णाद् घोषवत्स्वरपरस्य विशेषविधिभिराघ्रातत्वात् । तर्हि सुखार्थमेव ।।७३।

### [वि० प०]

**नामिनः** । 'नामिनः परः' इत्यनेन पञ्चमीलक्षणस्तत्पुरुषोऽयमिति दर्शयति न तु नामिपरो यस्मादिति बहुव्रीहिः ।ततो घोषवत्स्वरपर इत्यनेनैव रेफस्य सिद्धत्वात्, तथा सापेक्षस्यापि विसर्जनीयस्य तेनैव सिद्धिरित्याह– **निरपेक्ष** इति । 'अग्निः शेते' इत्यत्र शकारे कथं न भवतीति चेत्, **"घोषवत्स्वरपरः"** ( १ । ५ । १३) इत्यनेनैव

व्यावृत्तिरिति ब्रूमः। सुष्ठु पेषति, सुष्ठु तोषतीति क्विब्, विरामे रेफसोर्विसर्जनीयः। ततोऽनेन रेफे सति **"इरुरोरीरूरौ"** (२।३।५२) इति कृते पुनर्विसर्जनीयः।

अथ किमर्थमिदं वचनम्? **रेफार्थम्**। ननु रेफेऽपि कृते पुनर्विसर्गेण भवितव्यमित्याह– **ईरूरर्थं वचनमिति**। रेफादेशे कृते सति इरुरोः सम्भवाद् ईरूरर्थं वचनमुच्यते। अत एव कृतस्यापि रेफस्य ईरूरादेशं प्रति चरितार्थत्वात् पुनर्विसर्गे बाधा न स्यात् **'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते'** (कात० परि० सू० ५०) इति न्यायात्। तथा 'अग्निः' इत्यादिषु यदि लक्षणमस्तीति रेफः स्यात् तदा पुनर्विसर्जनीय एवेति ॥७३।

**[क०च०]**

**नामि०। निरपेक्ष इति वृत्तिः**। ननु कथमिदम्, यावता पदयोः सन्निकर्षः संहिता, सा पुनरत्र नास्त्येव? सत्यम्। **"इवर्णो यमसवर्णे"** (१।२।८) इत्यत्रासवर्णग्रहणेन ज्ञापितम्– 'निरपेक्षेऽपि सन्धिः' इति। अत एव 'असवर्णे' इति किम्? दधीति प्रत्युदाहरणं संगच्छते इति न दोषः। विसर्गे बाधा न स्यादिति। अत्र किं प्रमाणमित्याह– **'यं विधिम्'** इत्यादि। कश्चरतीत्यादौ यं प्रथमविधिं प्रत्युपदेशः शकारोऽनर्थकः स प्रथमविधिः शकारोपदेशेन बाध्यते इति न **"पदान्ते धुटां प्रथमः"** (३।८।१) इति शकारस्य चकारः। यस्य तु विसर्गविधेर्निमित्तमिति रेफ ईरूरादेशाभ्यां सप्रयोजनमस्ति नासौ विसर्गविधी रेफेण बाध्यते। **परिभाषावृत्ति**मते यं रेफविधिं प्रत्युपदेशः, सूत्रमनर्थकम्। रेफस्य कार्यान्तराभावात् स रेफविधिर्विसर्गेण बाध्यते इति। यथा –'अग्निः, पटुः' इति। यस्य तु रेफविधेर्निमित्तं बीजम् ईरूरादेशरूपमस्ति, नासौ रेफो विसर्गेण बाध्यते इति। अग्निरित्यादौ यदि लक्षणमस्तीति रेफस्तदा सुपीरित्यादौ निमित्तत्वादस्यापि निमित्तत्वमेव जात्याश्रयणादिति पुनर्विसर्ग एवेति **पञ्जिकाया** अप्यभिप्रायः ॥७३।

**[समीक्षा]**

'सुपिस् + सि, सुतुस् + सि' इस अवस्था में कातन्त्रप्रक्रिया के अनुसार **"व्यञ्जनाच्च"** (२।१।४९) सूत्र-द्वारा सिप्रत्यय का लोप, **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् के स्थान में विसर्ग, **"नामिपरो रम्"** (१।५।१२) से विसर्ग

को रेफ आदेश, इरुरोरीरूरौ (२।३।५२) से ईर् आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से पुनः विसर्ग होने पर 'सुपीः, सुतूः' प्रयोग सिद्ध होते हैं। पाणिनि के अनुसार सुलोप, रेफ, उपधादीर्घ तथा विसर्ग आदेश करके इन रूपों को सिद्ध किया जाता है। इस प्रकार पाणिनीय में जो एक कार्य कम करके रूपसिद्धि हो जाती है, उससे यहाँ पाणिनीय प्रक्रिया को ही संक्षिप्त कहा जा सकता है। कातन्त्र-वृत्तिकार ने विसर्ग को रकारादेश करने का जो प्रयोजन ईर्-ऊर् आदेश बताया है, वह उपस्थित विरोध का एक समाधानमात्र है, सरलता – संक्षेप का द्योतक नहीं।

**[विशेष]**

वस्तुतः कातन्त्र व्याकरण में रेफ की उपधा को केवल दीर्घ–विधान न करके इर् के स्थान में ईर् तथा उर् के स्थान में ऊर् आदेश की व्यवस्था की गई है। **"इरुरोरीरूरौ"** (२।३।५२)।

**[रूपसिद्धि]**

१. **सुपीः**। सुपिस् + सि। **व्यञ्जनाच्च** (२।१।४९) से सि–प्रत्यय का लोप **"रेफसोर्विसर्जनीयः"** (२।३।६३) से स् को विसर्ग, "नामिपरो रम्" (१।५।१२) से विसर्ग को रेफ, "इरुरोरीरूरौ" (२।३।५२) से ईर् आदेश तथा **"रेफसोर्विसर्जनीयः"** (२।३।६३) से र् को विसर्ग आदेश।

२. **सुतूः**। सुतुस् + सि। सि– प्रत्यय का लोप, स् को विसर्ग, विसर्ग को रेफ, रेफ को ऊर् तथा र् को विसर्ग॥ ७३।

## ७४. घोषवत्स्वरपरः (१।५।१३)

**[सूत्रार्थ]**

नामिसंज्ञक वर्ण से परवर्ती विसर्ग के स्थान में रेफ आदेश होता है, यदि विसर्ग के बाद घोषवान् वर्ण तथा उसके बाद स्वर वर्ण हो तो। घोषसंज्ञक वर्ण और स्वर वर्ण में विपर्यास भी अभीष्ट है॥७४।

[दु०वृ०]

नामिनः परो विसर्जनीयो घोषवत्स्वरपरो रमापद्यते । अग्निर्गच्छति, अग्निरत्र, पटुर्वदति, पटुरत्र ।।७४।

[दु०टी०]

**घोषवत्०** । घोषवन्तश्च स्वराश्च **घोषवत्स्वराः**, अल्पस्वरोऽपि पर एवाभिधानात् ते परे यस्मादिति बहुव्रीहिः । न तु घोषवत्स्वरेभ्यः पर इति घोषवद्भ्यो विसर्जनीयस्यासम्भवात्, **"नामिपरो रम्"** (१ । ५ ।१२) इति वचनाच्च । कथं पिपठीः कल्पः, पिपठीः काम्यतीति इसन्तत्वाद् रेफश्चेद् **"व्यञ्जनान्तस्य यत् सुभोः"** (२ । ५ ।४) इति ? नैवम्, तत्र यौगपद्यात् तथा पिपठीःष्विति ? सत्यम् । अरेफप्रकृतिरपि अघोषपरोऽपि बहुलं भवति, अथवा पूर्वनिमित्तमात्राश्रितं हि रविधानमीरूरोरुपकारितया चरितार्थं पुनर्विसर्गभावमापन्नो घोषवत्स्वरपरो रमाद्यते । विरामेऽघोषे च विसर्ग एवेति व्याख्यातव्यम् ।।७४।

[वि०प०]

**घोष०** । घोषवन्तश्च स्वराश्च **घोषवत्स्वरास्ते** परे यस्मादिति बहुव्रीहिः । न तु घोषवत्स्वरेभ्यः पर इति तत्पुरुषः, घोषवद्भ्यो विसर्जनीस्यासम्भवात्, **"नामिपरो रम्"** (१ ।५ ।१२) इति वचनाच्च । अन्यथा स्वरेभ्यः परः इति समान्येन सिद्धत्वात् ।। ७४ ।

[क० च०]

**घोषवत् ०** । घोषवद्भ्यो विसर्जनीयस्याभावदिति । ननु तथापि परग्रहणबलाद् अत्र तत्पुरुषोऽस्तु, यथा **"ढणपरस्तु णकारम्"** (१ ।४ ।१४) इत्याह – "नामिपरो रम्" (१ ।५ ।१२) इत्यादि । **अन्ये** तु पदद्वयापेक्षया सिद्धान्तद्वयम् इत्याहुः । तन्न । एकपदोपात्तयोर्द्वयोरत्र बहुव्रीहिनिश्चयेऽन्यत्रापि तन्निश्चयात् । अन्यथा अनन्वयापत्तेः । **"घोषवत्स्वरेषु"** इति सिध्यति । यत् परग्रहणं तदुत्तरार्थम् । तथा रप्रकृतिरित्यस्य सप्तम्यन्तेन प्राप्तिरिति परग्रहणम् । अत एव तत्र वक्तव्यम् 'घोषवत्स्वरपरोऽपि' इति **हेमकर**स्याशयः ।। ७४ ।

**[समीक्षा]**

'अग्नि:+ गच्छति, अग्नि: + अत्र , पटु: + अत्र' इस अवस्था में कातन्त्रकार विसर्ग को रकारादेश करते हैं, परन्तु पाणिनि विसर्गादेश से पूर्व ही सुप्रत्ययस्थ स् को रु आदेश करके 'अग्निर्गच्छति, अग्निरत्र, पटुरत्र' आदि शब्दरूप सिद्ध करते हैं। इससे ऐसा कहा जा सकता है कि कातन्त्रकार को इस प्रकार की सन्धि पदनिष्पत्ति के बाद ही करनी अभीष्ट थी, जबकि पाणिनि को पदसिद्धि से पूर्व।

**[रूपसिद्धि]**

१. **अग्निर्गच्छति।** अग्नि: + गच्छति। नामिसंज्ञक वर्ण इ से परवर्ती तथा स्वर वर्ण अ है पर में जिसके ऐसे घोषसंज्ञक वर्ण ग् के पर में रहने पर विसर्ग को रेफ।

२. **अग्निरत्र।** अग्नि: + अत्र। नामिसंज्ञक वर्ण इ से परवर्ती तथा स्वर-घोषसंज्ञक वर्ण त् से पूर्ववर्ती विसर्ग को रेफ आदेश।

३. **पटुर्वदति।** पटु: + वदति। नामिसंज्ञक वर्ण उ से परवर्ती तथा स्वर वर्ण अ है पर में जिसके ऐसे घोषसंज्ञक वर्ण व् से पूर्ववर्ती विसर्ग को रेफ आदेश।

४. **पटुरत्र।** पटु: + अत्र। नामिसंज्ञक वर्ण उ से परवर्ती तथा स्वरवर्ण अ-घोषसंज्ञक वर्ण त् से पूर्ववर्ती विसर्ग को रेफ आदेश ॥७४।

## ७५. रप्रकृतिरनामिपरोऽपि (१। ५। १४)

**[सूत्रार्थ]**

रेफ-प्रकृति वाला विसर्ग रकार को प्राप्त होता है, यदि वह नामिसंज्ञक या उनसे भिन्न वर्णों से परवर्ती हो और उस विसर्ग के बाद घोषसंज्ञक वर्ण, स्वर या अघोषसंज्ञक वर्ण हों तो ॥७५।

**[दु०वृ०]**

रेफप्रकृतिविसर्जनीयो नामिन: परोऽनामिन: परोऽपि घोषवत्स्वरपरोऽपि रमाद्यते। गीर्पति:, गी:पतिर्वा। धूर्पति: धू:पतिर्वा। स्वरघोषवतोर्नित्यम् - पितरत्र, पितर्यात:। अरेफप्रकृतिरपि- हे प्रचेता राजन्, हे प्रचेतो राजन्निति वा। उषर्बुध:।

अह्नोऽरेफे – अहर्पतिः, अहर्गणः, अहरत्र। रेफे तु – अहोरात्रः, अहोरूपम्, अहोरथन्तरं साम ॥७५।

[दु०टी०]

**रप्रकृतिः**। प्रकृतिशब्द इह योनिवचन एव संभवति। **योनि**रुत्पत्तिकारणम्। अपिशब्दोऽत्र बहुलार्थः। बहून् अर्थान् लातीति **बहुलम्**–

**क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यथैव।**

**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥**

**गीर्पति**रित्यादि। न च भवति गीःकाम्यति, धूःकाम्यति, पुनःकल्पम्, प्रातःकल्पम्, अन्तःकल्पम्, प्रातःपाशः, स्वःकाम्यति, स्वःकारः, स्वःकामः, पुनःकारः, पुनःकामः, गीःकारः, गीःकामः, धूःकार, धूःकामः। अनव्ययविसृष्टस्यापि न सकारः, तत्र क्वचिदधिकारात्। अन्येष्वप्यघोषेषु रप्रकृतिर्विसर्जनीयो न रेफ इति। **हे प्रचेता राजन्निति**। प्रचेतसो राजनि वा भवति। प्रगतं चेतोऽस्येति विग्रहः, तस्यामन्त्रणम्। रत्वपक्षे **"रो रे लोपं स्वरश्च पूर्वो दीर्घः"** (१।५।१७) इति दीर्घः। **सावसम्बुद्धौ**। दीर्घे सति सिद्धमेव। उषसि बुध्यते इति नाम्युपधत्वात् कः। अह्नोऽरेफो अरेफादाविति योऽयं प्रतिषेधः सः रात्रिरूपरथन्तरेष्वेव दृश्यते। अहर्पतिर्वेति पक्षे विसृष्ट एव– अहःपतिः। अहर्भुङ्क्ते, अहर्ददाति, अहर्वान् इत्यादि नित्यम्। अहश्च रात्रिश्चेति **अहोरात्रम्। 'एकदेशविकृतमनन्यवत्'** (कात० परि० सू० १) इति इकारान्तेऽपि रात्रिशब्दे परे अहोरात्रिरागतेति। अह्नो रूपम् **अहोरूपम्**। प्रकृष्टम् अहरिति प्रकर्षे रूपप्रत्ययो यदा **तदाप्यहोरूपमिति**। अहो रथन्तरं साम। स्यादौ च न भवति– अहोभ्याम्, अहःसु। तथा वनो रेफः स्याद् ईप्रत्यये – धीवरी, पीवरी। आतः क्वनिप्। एवमन्येऽप्यनुसर्तव्याः ॥७५।

[वि०प०]

**रप्रकृतिः**। अपिशब्दस्य बहुलार्थत्वात् क्वचिद् विकल्पः, क्वचिन्नित्य इत्याह– गीर्पतिः, गीःपतिर्वेत्यादि। गिरां पतिः, धुरां पतिरिति विग्रहः। **"व्यञ्जनान्तस्य यत्सुभोः"** (२।५।४) इत्यतिदेशबलाद् ईरूरौ भवतः। 'पितरत्र, पितर्यातः' इति पितृशब्दाद् **"आमन्त्रणे च"** (२।४।१८) इति सिः, **"ह्रस्वनदी०"** (२।१।७१) इत्यादिना सेर्लोपः, **"घुटि च"** (२।१।६७) इत्यरादेशः, **"आ च न सम्बुद्धौ"**

(२ । १ ।७०) इति प्रतिषेधाद् विरामे विसर्जनीये च रेफ इति । अरेफप्रकृतिरपीति प्रकृष्टं प्रगतं वा चेतोऽस्येति **प्रचेतास्तस्य** सम्बोधने हे प्रचेतो राजन्निति रेफे कृते **"रो रे लोपं स्वरश्च पूर्वो दीर्घः"** (१। ५। १७), असंबुद्धौ **"अन्त्वसन्तस्य चाधातोः सौ"** (२ । २।२०) इति दीर्घः सिद्धः इति संबुद्धावेव दर्शितम् । अपिशब्दस्य बहुलार्थत्वात् सकारप्रकृतेरपि भवति । तेन "प्रचेतसो राजनीति वा" इति सूत्रं न वक्तव्यम् ।

**उषर्बुधः इति** । उषसि बुध्यते इति **"नाम्युपध०"** (४। २। ५१) इत्यादिना कप्रत्ययः । **अहर्पतिर्वेति** । अह्नां पतिरिति विग्रहे **"व्यञ्जनान्तस्य यत्सुभोः"** (२। ५।४) इत्यतिदेशबलाद् नकारस्य सकारे कृते विसर्जनीये च रेफ इति । वाशब्देन विसर्गस्थितिरपि कथ्यते– **अहःपतिरिति** । अहरत्रेति नपुंसकलक्षणसिलोपे विरामे **"अह्नः सः"** (२। ३। ५३) इति नकारस्य सकारः । **अहोरात्रम्** इति अहश्च रात्रिश्चेति विग्रहः ।**"अहःसर्वैकदेशसंख्यातपुण्यवर्षादीर्घादिश्च रात्रिः"** (२।६।७३-१७) इति राजादिदर्शनाद् अत्– प्रत्ययः । **"इवर्णावर्णयोः"** (२ । ६ । ४४) इत्यादिना इकारलोपः ।

तथा अह्नो रूपम्, अहोरूपम् ।"प्रकर्षे वा" रूपप्रत्ययः, तमादिदर्शनात् ।प्रकृष्टम् अहः अहोरूपम् । एवम् 'अह्नि रथन्तरं साम' एतेष्वेव न भवति । तथा चोक्तम्– **अरेफादाविति योऽयं प्रतिषेधः स प्रतिषेधो रात्रिरूपरथन्तरेष्वेव दृश्यते।** सर्वमिदम् अपिशब्दस्य बहुलार्थत्वात् सिद्धम् ॥७५।

**[क०च०]**

**रप्रकृतिः** ।पूर्वसूत्रे परशब्दसमुदायप्रथमान्तनिर्दिष्टत्वेनापिशब्दस्येति च विवृणोति- **अघोषवत्स्वरपरोऽपि** इति **वृत्तिः।** "धूर्गीरह्नां पत्यौ रो वा" इति कस्यचित् सूत्रम्, तन्न वक्तव्यम् इत्याह– **अपिशब्दस्येत्यादि ।** बहुलत्वादिति । बहून् अर्थात् लाति ददाति गृह्णाति वा **बहुलम्** इति ।

यद्येवं बहुलार्थता इति न घटते, बहुलशब्देनैव तदर्थप्रतीतौ अर्थशब्दवैयर्थ्यात् ? सत्यम् । भावसाधनोऽयं निर्देशो मन्तव्यः । बहुलग्रहणमेवार्थः प्रयोजनमस्यापि शब्दस्यासौ बहुलार्थोऽपिशब्दः इत्यदोषः । **टीकायां** तु बहुलार्थो नास्तीति दर्शितम्, तदुपलक्षणमेव बोध्यम् । यद् वा बह्वर्थविधायकोऽर्थः समुच्चयस्वरूपोऽर्थोऽस्येत्युक्ते **टीकापि** यथा-श्रुतमेव संगच्छते इति । **गीर्पतिरित्यादि** । अत्र गीष्पतिः, धूष्पतिरित्यादि

बोद्धव्यम् । तथाच **श्रीपतिः** – पक्षे कस्कादित्वात् सत्वे नाम्युपधविसर्गस्य मूर्धन्यः । अहोरात्रमिति वृत्तिपाठोऽशुद्ध एव । तथा च राजादिसूत्रे **टीकायां** वक्ष्यति– रात्रोऽहोऽह्नोऽदन्तः पुंसि प्रसिद्ध इति । अत एव **"रात्रान्तात् प्रागसंख्यका"** इत्यमरोऽपि । श्रीपतिनापि **"अह्नो रात्राद्यनघोषे"** (कात० परि०, सं० ८०) इति सूत्रे अहोरात्र इति पुंसा प्रत्युदाहृतम् । **रामनाथाचार्यस्तु** 'समाहारेऽहोरात्रम्' इति नपुसंके प्रत्युदाहृतम् । तन्मतम् आश्रित्य अहोरात्रशब्दे नपुंसकनिर्देशोऽपि न दोषावह इति ।। ७५ ।

## [समीक्षा]

'गीः+पतिः, धूः+पतिः' इस अवस्था में कातन्त्रकार विसर्ग को वैकल्पिक रेफ आदेश करके 'गीर्पतिः, धूर्पतिः' आदि शब्दरूप सिद्ध करते हैं। पाणिनि ने अष्टाध्यायी में एतदर्थ कोई सूत्र नहीं बनाया है। इसकी पूर्ति वार्तिककार ने की है– 'अहरादीनां पत्यादिषूपसंख्यानं कर्तव्यम्' (का० वृ० ८।२।७०–वा०)।

कातन्त्र के व्याख्याकारों ने कहीं इस रकारादेश को नित्य और कहीं पर अनित्य दिखाया है। जैसे **"स्वरघोषवतोर्नित्यम्"** (१।५।१४ – वा०) – 'पितरत्र, पितर्यातः'। 'गीर्पतिः– गीःपतिः' इत्यादि में रेफादेश विकल्प से किया गया है। व्याख्याकारों द्वारा इस विषय में अन्य व्याकरणवचनों पर किया गया विचार द्रष्टव्य है।

## [रूपसिद्धि]

१. **गीर्पतिः, गीःपतिः**। गीः + पतिः। नामिसंज्ञक वर्ण ई से परवर्ती तथा घोषसंज्ञक वर्ण प् से पूर्ववर्ती, रप्रकृतिक (गिर्) विसर्ग को वैकल्पिक रेफ आदेश = गीर्पतिः। रेफाभावपक्ष में गीःपतिः।

२. **धूर्पतिः, धूःपतिः**। धूः + पतिः। नामिसंज्ञक वर्ण उ से परवर्ती तथा घोससंज्ञक वर्ण य् से पूर्ववर्ती रेफप्रकृतिक (धुर्) विसर्ग को वैकल्पिक रेफादेश = धूर्पतिः। रेफादेश के अभाव में धूःपतिः।

३. **पितरत्र।** पितः+ अत्र। नामिभिन्न वर्ण अ से परवर्ती तथा स्वरसंज्ञक वर्ण अ से पूर्ववर्ती रेफप्रकृतिक (पितर्) विसर्ग को नित्य रेफादेश।

४. **पितर्यातः।** पितः+ यातः। नामिभिन्न वर्ण अ से परवर्ती तथा घोषसंज्ञक वर्ण य् से पूर्ववर्ती रेफप्रकृतिक (पितर्) विसर्ग को नित्य रेफादेश ।।७५।

# ७६. एष–सपरो व्यञ्जने लोप्यः (१।५।१५)

## [सूत्रार्थ]

'एष' तथा 'स' से परवर्ती विसर्ग का लोप हो जाता है यदि उस विसर्ग के बाद व्यञ्जन वर्ण हो तो ॥ ७६।

## [दु० वृ०]

एषसाभ्यां परो विसर्जनीयो लोप्यो भवति व्यञ्जने परे। एष चरति, स टीकते, एष शेते, स पचति। परत्वात् पूर्वान् बाधते। अप्यधिकारात् स्वरूपग्रहणाद् वा। एषकः करोति, सकः करोति, अनेषो गच्छति, असो गच्छति। अकि नञ्समासे न स्यात् ॥ ७६।

## [दु० टी०]

**एषस०**। एष च स च एषसौ, ताभ्यां पर इत्यल्पस्वरस्यापि परत्वम्, गमकत्वात्। **एष चरतीत्यादि**। **"विसर्जनीयश्चे छे वा शम्"** (१।५।१) इत्यादितोऽघोषवतोश्चेति पर्यन्तान् पूर्वोक्तान् परत्वादयं लोपो बाधते इत्यर्थः। येन विधिस्तदन्तस्यापि – परमैष चरति, परमस शेते। मेषः करोति, दासः पचतीति **'अर्थवद्ग्रहणेनानर्थकस्य'** (कात० परि० सू० ४) इति। कथम् इषेर्भावे घञि अवपूर्वस्यतेः **"उपसर्गे त्वातो डः"** (४। २। ५२) इति एषो वर्तते, अवसः कृती, सो वा वर्ण इत्यादि। सत्यम्, एतत्तदोरेषसयोरिह ग्रहणं त्यदादिकृतपरस्परसाहचर्यात्।

अप्यधिकारादित्यादि। प्रकृत्यन्तः पातीति अक्प्रत्ययः प्रकृतिग्रहणेन गृह्यते। तथा च **"अद्व्यञ्जनेऽनक्"** (२/३/३५) इति वर्जनमुच्यते – लोप्योऽपि भवति, न भवति च, प्रयोगानुसारेणेत्यर्थः। नञोऽसमासे तु लोप्य एव-नैष गच्छति, न स गच्छति। मन्दमतिबोधहेतुरयं पक्ष उच्यते। स्वरूपग्रहणाद् वेति एतत्तदोर्ग्रहणेनाक्प्रत्ययस्यापि ग्रहणं स्यात्। एषसयोः स्वरूपग्रहणं कृतम्। कुतो विरूपहेतौ अकि सति भवतीत्यर्थः।

ननु नञ्समासे किमिह वैरूप्यं चेत्, नैवम्। नञ्तत्पुरुषस्य उत्तरपदार्थसदृशवाचिनञमन्तरेण तदर्थतया एतावनर्थकौ अभावमात्रसाधने प्रसज्यपक्षेऽपि तथैवेति।

अदिति सिद्धे लोप्यग्रहणं किमर्थम् ? **'असिद्धं बहिरङ्गम्'** (कात० परि० सू० ३५) इत्यकारलोपो न स्यात् ॥७६।

**[वि० प०]**

**एषस०। परत्वादिति। "विसर्जनीयश्चे छे वा शम्"** (१।५।१) इत्यादीन् पूर्वान् विधीन् अयं लोपो बाधते **'पूर्वपरयोः परविधिर्बलवान्'** (कात० परि० सू० ७०) इति न्यायात्। तेन एष चरतीत्यादयः सिद्धाः। अथ मेषः करोति, दासः पचति। कथमेषसाभ्यां परो विसर्जनीयो लोप्यो न भवति ? सत्यम्, अनयोरनर्थकत्वात्। तर्हि इषेर्भावे घञि अवपूर्वात् स्यतेश्च **"उपसर्गे त्वातो डः"** (४।२।५२) इति डे सति कथम् एषो वर्तते, अवसः। तथा सो वा वर्ण इत्यत्रापीति ? सत्यम्। व्याख्यानात् त्यदादिकृतपरस्परसाहचर्याद् वा एतत्तदोरेषसयोरिह ग्रहणमित्यदोषः। **'आगमा यद्गुणीभूतास्ते तद्ग्रहणेन गृह्यन्ते'** (कात० परि० सू० १५) इति न्यायाद् अकि कृते सति **'येन विधिस्तदन्तस्य'** (कात० परि० सू० ३) इति न्यायान्नञ्समासेऽपि प्राप्नोति। यथा परमैष चरति, परमस टीकते। तस्मात् प्रतिषेधो वक्तव्य इत्याह- अप्यधिकारादिति।

**"रप्रकृतिरनामिपरोऽपि"** (१/५/१४) इत्यतोऽपिशब्दो वर्तते, स च लोप्यशब्देन संबध्यते, तेन 'लोपेऽपि' इति वाक्यार्थे क्वचिन्न भवतीत्यर्थः। स्वरूपग्रहणाद् वेति। अन्यथा 'एतत्तत्परो व्यञ्जने लोप्य' इति विदध्यात्। एवं च सति एषो वर्तते, अवसः कृति सो वा वर्ण इत्यत्रापि लोपस्याप्रसङ्ग एवेति। तस्माद् यदेष इति सिद्धस्य रूपस्य ग्रहणं करोति, तद् बोधयति – विरूपस्य न भवतीति। तर्हि 'अनेषो गच्छति, असो गच्छति' किमिह वैरूप्यम्, तदन्तपरिभाषया तत्रापि प्राप्नोति ? सत्यम्। नञ्तत्पुरुषस्तु उत्तरपदार्थसदृशवाची। तत्र च समासे केवलयोरनर्थकत्वात् समुदायस्यैवोत्तर-पदार्थसदृशवाचित्वात्। ततोऽर्थवद्ग्रहणे नानर्थकस्य इत्यनेनैव न्यायेन लोपो न भवति। अथवा अनर्थकमेव वैरूप्यमुच्यते। तथा प्रसज्यपक्षे अभावमात्रार्थः। सोऽपि समुदायवाच्य इति तदवस्थायामेवानर्थकत्वमनयोरिति परमैष चरतीत्यादौ उत्तरपदाभिधीयमानपदार्थः परशब्देन विशिष्यते। तेनार्थान्तरं प्रतीयते इति सामञ्जस्यमेवेति ॥७६।

[क० च०]

**एष०।** अथ एकारषकारसकाराणां कथन्न ग्रहणम् ? नैवम्, गमेर्माद् इति ज्ञापकादिति । परत्वादिति **वृत्तिः** । 'एष त्सरुकः, एष क्षमते' इत्यादावघोषे शिट्परेऽयं चरितार्थः कश्चरतीत्यादौ शादयः इति परत्वं न व्याहतम् । अवपूर्वात् स्यतेरिति । ननु कथमिदमुच्यते यावता अवे हृसोरिति विशेषवचनेन णप्रत्यये सति अवसाय इत्येवं स्यात् ? सत्यम् । नात्र **"उपसर्गे त्वातो डः"** (४/२/५२) इत्यनेन डप्रत्ययः, येन **'अवे हृसोः'** (४/२/५७) इत्यनेन बाधकत्वाण्णप्रत्ययस्य विषय इति । तर्हि कथमुक्तम् **"उपसर्गे त्वातो डः"** (४/२/५२) इति ? सत्यम् । **तस्यायमभिप्रायः** – उपसर्गे उपपदे तुशब्दोऽप्यर्थे 'आतः' इत्यनेन सन्ध्यक्षरान्तविधिः सूचित इत्यन्यतोऽपि चेत्यनेनेत्यर्थः ।

**अन्ये** तु **'क्वचिदपवादविषयेऽप्युत्सर्गस्यापि समावेशः'** (सं० बौ० वै०, पृ० २२१) इति न्यायादित्याहुः । अवसः कृतीति पक्षान्तरमाह – **सो वेति** । व्याख्यानादित्याचार्यपारम्पर्याद् **इत्यपरे।** अत्र विप्रतिपन्नं प्रत्याह – **त्यदादिकृतपरस्परसाहचर्यादिति ।**

ननु कथमत्र साहचर्याद् यत्राव्यभिचारिणा व्यभिचारी नियम्यते तत् साहचर्यमिति न्यायस्याविषयत्वात् कुतोऽत्र विषयः उभयोरेव व्यभिचारित्वात् ? सत्यम् । एषशब्द-स्तावदादेशवान्, तत्साहचर्यात् सकारोऽपि आदेशवान् गृह्यते (न सकारवर्णस्य निरासः) ततश्च लुप्तवर्णस्य सकारस्य विद्यमानत्वे तत्साहचर्याद् एषोऽपि लुप्ताकार एव गृह्यते । स च त्यदादिरेव, नतु घञन्तः । ततश्च एषस्य त्यदादेः साहचर्यात् सकारोऽपि त्यदादिरेव गृह्यते । तदुक्तं **महच्चरणैः** –

**आदेशवानेष इतीह यस्मादतः सकारो यदि तत्प्रकारः।**
**तदा स लुप्तस्वरयुक्त एव त्यदादिरेतादृश एव युक्तः॥**

नन्वेवम् एषस्यैव त्यदादित्वेन साहचर्यग्रहणात् कथं त्यदादिकृतपरस्पर-साहचर्यमुक्तम् । त्यदादिकृतसाहचर्यमिति वक्तुं युज्यते चेत्, उच्यते – इषधातोरेतच्छब्दस्य च व्यञ्जनान्तत्वादेष तावद् व्यञ्जनान्तयोनिरेव संभवति । तत्साहचर्यात् सकारोऽपि व्यञ्जनान्तयोनिरेव नान्य इति । अतो निरस्तम् अवसः सकारवर्णमात्रं च ततस्त्यदादिसकारेणापि साहचर्यादेषोऽपि त्यदादिरेव । अतः सिद्धं त्यदादिकृत-परस्परसाहचर्यमिति । त्यदादिकृतस्य एतदप्युक्तं **महच्चरणैः** –

**स्वरान्तयोनिर्यदि नैष शब्दस्तथाविधः सोऽपि तदा त्यदादिः।**

**अतो मिथः स्यादिह साहचर्यमर्यादया पर्यवसानमित्थम्॥इति।**

यद्यपि एकतरसाहचर्येणैव सिद्धिस्तथापि परस्परसाहचर्यमुक्तं सिद्धान्तद्वयाभिप्रायेणेति न दोषः।

**कुलचन्द्रस्तु –**

**विकारवानेष तथा सकारो लुप्तस्वरः सोऽपि तथैषशब्दः।**

**एष त्यदादेरपि सत्यदादेरित्थं विदध्यादिह साहचर्यम्॥इति।**

एतन्मते त्यदादिकृतपरस्परसाहचर्यं न संगच्छते, किन्त्वन्यतर एव साहचर्यमिति। **अन्ये** तु अवस इत्यपप्रयोगशङ्कया प्राह– **सो वा वर्ण** इति। **व्याख्यानादिति "सश्च नोऽस्त्रियाम्"** (२/१/५२) इत्यत्र विसर्गदर्शनादित्यर्थः। यद् वा व्याख्यानादिति एषस्य व्युत्पन्नत्वात् सकारोऽपि व्युत्पन्न एव युज्यते। स च पारिशेष्यात् त्यदादिरेव न च सकारो वर्णो व्युत्पन्न इति। तर्हि इषेर्घञन्तस्यापि व्युत्पन्नत्वात् कथं न ग्रहणमित्याह – **त्यदादिकृतेत्यादि।**

अस्मिन् पक्षेऽपि परस्परसाहचर्यं न संगच्छते त्यदादिसकारस्य साहचर्येणैषस्यापि ग्रहणात्। **वैद्यस्तु** एकस्थानीये द्वितीये प्राप्यमाणे विक्षिप्तद्वितीयग्रहणं न कार्यम्। यथा रामलक्ष्मणावित्युक्ते दाशरथी राम एव प्रतीयते, नान्यः। तन्न। एकस्मिन्नेव दिवादौ **'इष गतौ, षो अन्तकर्मणि'** (३। १६, २१) इत्यनयोः पठितत्वेन विक्षिप्तत्वाभावात्।

**वस्तुतस्तु** एषसाभ्याम् इति सिद्धे यत् परग्रहणं तन्नियतपरत्वपरिग्रहार्थम्। याभ्यां विसर्ग एव परः परभूतं विसर्गं विना ययोरुत्पत्तिर्नास्तीत्यर्थः। एवंभूतौ त्यदादावेव संभवत इत्यर्थः। अत्र स इत्यस्य घञन्तस्येषश्च सकारवर्णस्य च द्वितीयादावपि संभवात् परग्रहणं सुखप्रतिपत्त्यर्थमिति **हेमकरवचन**मपास्तम्, कार्यार्थत्वादिति।

नन्वत्र लोप्यग्रहणं किमर्थम्, अदित्युच्यताम्। तदा अकारे अकारलोपः सिध्यति चेत्, न। **'असिद्धं बहिरङ्गम्'** इति न्यायादप्राप्तेः। ननु "[1]**स्वरानन्तर्ये नासिद्धवद्भावः"**

१. द्र० – अजानन्तर्य न बहिरङ्गपरिभाषा (चा० परि०पा० – ४६)।

(कात० परि० सू० ३५) इत्यस्ति, अतः असिद्ध इत्युच्यते। अन्यथा कोऽर्थः सिद्धो वर्ण इति कथं सिद्ध्यति। अत एव 'क इह' इत्यादौ विसर्जनीयलोपे सन्धिर्निषिध्यते ? सत्यम्, प्रक्रियागौरवनिरासार्थं लोप्यग्रहणमिति **कुलचन्द्रः**। **परमार्थतस्तु** लोप्यग्रहणात् क्वचित् स्वरानन्तर्येऽप्यसिद्धवद्भावस्तेन 'खेयम्' इति सिद्धम् ॥७६।

**[समीक्षा]**

'एषः+चरति, सः+टीकते' इस अवस्था में कातन्त्रकार विसर्ग का लोप करके 'एष चरति, स टीकते' आदि शब्दरूपों का साधुत्व ज्ञापित करते हैं जबकि पाणिनि विसर्गादेश की अवस्था से पूर्व ही सु-प्रत्यय का लोपविधान करते हैं–**"एतत्तदोः सुलोपोऽकोरनञ्समासे हलि"** (६। १। १३२)।

यहाँ कातन्त्रकार की प्रक्रिया को इसलिए अधिक संगत कहा जा सकता है कि पदों का साधुत्व बताने में प्रवृत्त व्याकरणशास्त्र में पृथक्–पृथक् पदों की सिद्धि हो जाने पर ही उनका पदान्तर से संबन्ध तथा उस पदान्तर के सान्निध्य से प्राप्त सन्धिकार्यों की प्रवृत्ति होनी चाहिए। इस प्रकार कातन्त्रकार द्वारा निर्दिष्ट विसर्ग का लोप अधिक युक्तियुक्त है। पाणिनि-द्वारा विहित सुलोप का निर्देश इसलिए अधिक युक्तियुक्त प्रतीत नहीं होता, क्योंकि 'एष-स्' इस अवस्था में ही 'चरति' की उपस्थिति मानना उचित नहीं कहा जा सकता है और ऐसा होने पर सुलोप का विधान करना भी सङ्गत नहीं होगा।

**[विशेष]**

**"रप्रकृतिरनामिपरोऽपि"** (१/५/१४) सूत्रपठित 'अपि' शब्द का अधिकार (अनुवृत्ति) यहाँ भी माना जाता है, जिसके फलस्वरूप 'एषकः करोति, सकः करोति' इन अक्प्रत्ययघटित रूपों में तथा 'अनेषो गच्छति, असो गच्छति' इन नञ्समासघटित रूपों में 'एष–स' के बाद वर्तमान विसर्ग का लोप नहीं होता। द्र०–दु० वृ०–**"अप्यधिकारात्....... अकि नञ्समासे न स्यात्"**॥

**[रूपसिद्धि]**

१. **एष चरति**। एषः+चरति। व्यञ्जन वर्ण च् के परवर्ती रहने पर एष–से उत्तरवर्ती विसर्ग का लोप।

२. **स टीकते**। सः+टीकते। 'स' से परवर्ती विसर्ग का लोप, व्यञ्जन वर्ण 'ट्' के पर में रहने पर।

३. **एष शेते**। एषः+शेते। शकार–व्यञ्जन वर्ण के पर में रहने पर 'एष' से परवर्ती विसर्ग का लोप।

४. **स पचति**। सः+पचति। व्यञ्जन वर्ण 'प्' के पर में रहने पर 'स' से परवर्ती विसर्ग का लोप ॥७६।

## ७७. न विसर्जनीयलोपे पुनः सन्धिः (१। ५। १६)

### [सूत्रार्थ]

विसर्ग का लोप हो जाने पर प्राप्त होने वाला सन्धिकार्य प्रवृत्त नहीं होता है ॥७७।

### [दु० वृ०]

विसर्जनीयलोपे कृते पुनः सन्धिर्न भवति। अन्यलोपे तु भवत्येव। क इह, देवा आहुः, भो अत्र। विसर्जनीयाधिकारे पुनर्विसर्जनीयग्रहणम् उत्तरत्र विसर्जनीयाधिकारनिवृत्त्यर्थम्। तेन एषच्छात्रेण द्विर्भावः सिद्धः ॥७७।

### [दु० टी०]

**न विसर्जनीय०।** सन्धानं सन्धिः। उत्कृष्टे वर्णानां सन्निकर्ष उच्यते। तद्विषयमपि कार्यं समानदीर्घादिसन्धिरित्यभिमतम्, उपचारात्। एतेनायमर्थो भवति– **विसर्जनीय**लोपे दीर्घादि सन्धिकार्यं न स्यात्। पुनःशब्देनैतत् सूचितम्। यत्रान्यविभक्त्यादेर्लोपस्तत्र सन्धिकार्यं भवत्येव। यथा दण्डस्याग्रं दण्डाग्रमिति।

ननु कथमत्र सन्धिकार्यस्याभावशङ्का इति चेत् ? सत्यम्। **"समानः सवर्णे"** (१/२/१) इत्यौपश्लेषिक एवाधारसप्तमीत्युक्तम्। यथा दण्डस्याग्रमित्यादिषु स्यशब्देन व्यवधानादनुपश्लेषो भवति, तथा लुप्तायामपि विभक्तौ तत्काले वर्णशून्येनापि व्यवधानमस्तीति दण्डाग्रम् इत्यादि दीर्घत्वं न प्राप्नोति।

ननु कथमत्र व्यवधानं लुप्तायामपि विभक्तौ तदनन्तरभावित्वात् तत्कालम् अग्रशब्दाकार एवातिक्रामति, तेनाबाधित एव दीर्घत्वम् ? सत्यमेतत्। तथापि मन्दधियां

प्रतिपत्तिगौरवनिरासा पुनःशब्देन न्यायप्राप्तमेव सूचितमिति। तथा च – यथा द्रुतायामपि वृत्तौ समानदीर्घादिस्तथा मध्यमाविलम्बितयोरपि क्रमशस्त्रिभागाधिकयोर्विकृतिपक्षे तुल्यः। सन्निकर्षो वर्णानां भूयस्त्वं वर्णकालस्येति यथा हस्तिमशकयोस्तुल्यः सन्निकर्षः भूयस्त्वं प्राणिन इति। अथ किमर्थम् उपचारः सन्धिशब्देन सन्निकर्ष एवोच्यतां सन्धिः संश्लेषो न भविष्यति ? सत्यमेतत्। किन्तु देवा हसन्तीत्यादौ सन्निकर्षप्रतिषेधार्थं संहितापाठाद् अर्धमात्राकाललक्षणो न स्यादिति। **विसर्जनीयाधिकार इत्यादि**। विसर्जनीयस्य लोपे छस्य द्विर्भाव एवेत्यर्थः।

ननु तस्मात् परं द्विर्भावयोगं कुर्वन् ज्ञापयिष्यति, पूर्वयोगेष्वयं प्रतिषेध इति। एवं सति विस्पष्टार्थं विसर्जनीयग्रहणम्। [1]नञा निर्दिष्टस्यानित्यत्वाद् अप्यधिकाराद् वा। तदा पादपूरणे सन्धिरिति मतम्। 'सैष दाशरथी रामः, सैष राजा युधिष्ठिरः' इति ॥७७।

## [वि० प०]

**न विसर्जनीय०**। पुनःशब्देनैतत् सूचितम्, अन्यस्य विभक्त्यादेर्लोपे सन्धिरेवेत्याह – अन्यलोपे तु भवत्येवेति। तेन दण्डस्याग्रं दण्डाग्रमिति सिद्धम्। ननु विसर्जनीयलोपे सन्धिर्न भवतीत्युक्ते कः प्रस्तावोऽन्यस्य विभक्त्यादेर्लोपे सन्धेरभावशङ्कायामेवैवमुच्यते ? सत्यम्। न्यायप्राप्त एवार्थः सुखप्रतिपत्त्यर्थं पुनःशब्देन सूच्यत इति। **विसर्जनीय** इत्यादि। तेनोत्तरसूत्रे विसर्जनीयलोपेऽपि द्विर्भावलक्षणसन्धिकार्यं स्याद् वेति। ननु सकल एवायं सन्धिः पूर्वेणैव विहितः प्रतिषिध्यते। ततो यदि द्विर्भावेऽपि प्रतिषेधः स्यात्, तदा तस्मात् सूत्रादसावपि पूर्वो विहितः स्यात्। तस्मात् परविधानादेव द्विर्भावलक्षणस्य सन्धेः प्रतिषेधो न भविष्यति किं पुनर्विसर्जनीयग्रहणेन ? सत्यम्। एवं सति सुखार्थमेव ॥७७।

## [क० च०]

**न विसर्जनीय०**। विभक्त्यादेर्लोपे सति आदिशब्देन पदलोपेऽपि दध्योदनमिति। ननु दण्डाग्रमित्यादौ कथं सिद्धिः, विभक्तेर्लोपेऽपि तद्व्यापिकालस्य व्यवधानात् ?

---

१. दु० – 'नञ्घटितमनित्यम्' (काला० परि० पा० ६७)।

सत्यम् । अत एव पुनर्ग्रहणादत्राप्राप्त्या सन्धिर्विधास्यते चेत्, न । विभक्तिलोपे सति तत्कालमेवाग्रशब्दस्याकारेण सह उपश्लेषो भवति । पूर्वोऽकार इति किम् पुनर्ग्रहणेन इत्याह – **न्यायेति।** ननु तथापि विसर्जनीयग्रहणं न क्रियतामित्याह – ननु इति ।

ननु अनेन सन्धिर्निषिध्यते विसर्जनीयलोपे सति । **अस्मन्मते** सन्धिरिति संज्ञा न कृता, तस्मात् सन्धिपदेन किमुच्यते ? [1]पाणिनिनाऽपि सन्निकर्षः सन्धिरिति सूत्रम् । [2]**श्रीपति**नापि सुसन्निकर्षः सन्धिरित्युक्तम् ? सत्यम् । वर्णानां समवायः सन्धिरिति व्युत्पत्त्या इहोच्यते । अथ तथापि कथं सन्धिशब्देन दीर्घादिरुच्यते, सन्निकर्षस्य धर्मपरत्वात् ? सत्यम् । सन्धिविधेयकार्यं सन्धिरित्युपचारात् । अथ सन्निकर्षो निषिध्यताम्, किमुपचारेण, तदा हि 'कयिह' इत्यादौ सन्धिर्न भविष्यति, सन्निकर्षाभावात् ? सत्यम् । देवा हसन्तीत्यादौ संहितापाठोऽर्धमात्राकाललक्षणो न स्यादिति उपचारे किं कारणमुच्यते गुरुकरणं वा किमर्थं **"न व्यञ्जने"** (१।२।१८) इत्यनन्तरं विसर्जनीयलोपे चेति विदध्यात् । तस्माद् गुरुकरणं बोधयति – सन्ध्याश्रयमपि कार्यं सन्धिरिति **केचित्** ।

मुख्यार्थबाधेन हि क्रियतेऽत्र किं कारणं विचारणीयम् **इत्यपरे।** अत्र 'सैष दाशरथी रामः सैष राजा युधिष्ठिरः' इत्यत्र कथं सन्धिरिति विसर्जनीयस्य लुप्तत्वात् ? सत्यम् । नञा निर्दिष्टस्यानित्यत्वाद् अपिशब्दस्य बहुलार्थत्वाद् वा । ऋषिवचनाच्च सन्धिर्न दृश्यते । ननु,

**अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।**

**शिष्याणामवबोधार्थं कुर्याद् वृत्तिं विलम्बिताम् ॥**

इति नियमोऽस्ति, कथं सर्वत्र सन्धिर्निषिध्यते । कृतायामेव वृत्तौ सन्धिनिषेधो युज्यते, अन्यत्र संहिताया अभावात् ? सत्यम् । सर्वत्र संहितायास्तु तुल्यं द्रुतादिव्यवहारवर्णोच्चारणकालस्य बलवत्त्वात् । ननु अर्धमात्राकालस्य बहुत्वमिति **टीकाया**मुक्तम् । **विसर्जनीय** इत्यादि **वृत्तिः** । अधिकारो व्यापारः । कार्येष्विति यावत् सामर्थ्यमिति ।

---

१. "परः सन्निकर्षः संहिता" (पर० १/४/१०९) ।

२. 'सुसन्निकर्षः संहिता' (द्विश्छः सुसन्निकर्षे, कात० परि०-सं० ८४) ।
अर्धमात्राकालमात्रेणाव्यवायः संहितोच्यते (द्वयोः सुसन्निकर्षः, कात० परि० – सं० ९५)

ननु विसर्जनीयग्रहणमेव एषसपरग्रहणनिवृत्त्यर्थमेवोक्तम्, कुतो विसर्जनीयाधिकारनिवृत्त्यर्थमेवोच्यते। अन्यथा एष इह इत्यादावेवास्य विषयः स्यात्। अत्र **मूर्खाः**–एवं सति सूत्रमेवाकृतं स्यात् **'असिद्धं बहिरङ्गमन्तरङ्गे'** (कात० परि०सू० ३५) इत्यनेनैव सिद्धत्वात्। ननु 'क इह' इत्यादावपि तत्सम्भवात् [1]**"स्वरानन्तर्ये नासिद्धवद्भावः'** इति चेत्, प्रकृते दीयतां दृष्टिः। **अन्ये** तु पुनःशब्देन करणतयैव नेहानुवृत्तिः 'एष स' इति। अत्र **भट्टाः**–विशेषणविशेष्यभावस्य प्रयोक्तुरायत्तत्वाद् वाऽनुवर्तते।

**नन्वि**त्यादि। अथ पूर्वस्मिन् पाठे व्यञ्जनानुवृत्त्या इत्यत्र द्विर्भावः स्यात्, ननु इच्छतीत्यादिषु ? सत्यम्। 'अनृच्छ' इति ज्ञापकात्, नतु व्यञ्जनस्य प्रवृत्तिः। अथवा द्विर्भावसूत्रं रप्रकृतिरित्यनन्तरं पठनार्थम् इत्यस्मिन् पक्षे **पञ्जी** न सङ्गच्छते, अतिपूर्वत्वात् ? सत्यम्। अतिपूर्वेणापि पूर्वत्वं न विहन्यते इति न दोषः॥७७।

## [समीक्षा]

'कः+इह, देवाः+आहुः' इत्यादि अवस्थाओं में कातन्त्रकार के मतानुसार विसर्ग का लोप होकर 'क इह, देवा आहुः' आदि शब्दरूप सिद्ध होते हैं। यहाँ क्रमशः 'अ' को ए (अवर्ण इवर्णे ए १।२।२) और आ को दीर्घादेश (**"समानः सवर्णे दीर्घीभवति परश्च लोपम्"** –१।२।१) प्राप्त होता है। उसके वारणार्थ कातन्त्रकार परिभाषासूत्र द्वारा विसर्ग का लोप हो जाने पर सन्धि का अभाव निर्दिष्ट करते हैं।

पाणिनीय व्याकरण में पठित **"पूर्वत्रासिद्धम्"** (८।२।१) सूत्र की असिद्ध विधि के अनुसार यहाँ सन्धि नहीं होती। सिद्धान्तकौमुदी में कहा भी गया है (अच्सन्धि० ८।३।१९)– **"पूर्वत्रासिद्धमिति लोपशास्त्रस्यासिद्धत्वान्न स्वरसन्धिः"।**

इस प्रकार सूत्र-कार्य-संख्या में उभयत्र साम्य होते हुए भी कातन्त्रीय प्रक्रिया अधिक स्पष्ट और संक्षिप्त है। पाणिनीय प्रक्रिया में सूत्रों के पौर्वापर्य का परिज्ञान करना आवश्यक होने से ज्ञानगौरव विद्यमान है।

---

१. 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' (व्या० परि० वृ०, ८०)।

**[विशेष]**

१. सन्धि (संहिता संज्ञा) की अनेक परिभाषाएँ– सन्निकर्षः सन्धिः। सुसन्निकर्षः सन्धिः। सन्धिविधेयकार्यं सन्धिः। सन्ध्याश्रयमपि कार्यं सन्धिः।

२. सूत्रोक्त नियमों से भिन्न कुछ उदाहरणों में जहाँ सन्धिकार्य नहीं होता है या प्रवृत्त होता है, उसमें अनेक आधारों, न्यायों का उल्लेख। जैसे –'नञा निर्दिष्टस्यानित्यत्वात्। अपिशब्दस्य बहुलार्थत्वात्। ऋषिवचनाच्च'।

**[रूपसिद्धि]**

१. **क इह।** कः+इह। अकार से परवर्ती तथा इ–स्वरवर्ण के पर में रहने पर विसर्ग का **"अपरो लोप्योऽन्यस्वरे यं वा"** (१। ५। ९) से लोप होने पर **"अवर्ण इवर्णे ए"** (१। २। २) से प्राप्त एकारादेश का प्रकृत परिभाषासूत्र से निषेध।

२. **देवा आहुः।** देवाः+आहुः। आकार से परवर्ती विसर्ग का आकार के पर में रहने पर "आभोभ्यामेवमेव स्वरे" (१। ५। १०) से लोप होने पर "समानः सवर्णे दीर्घीभवति परश्च लोपम्" (१।२।१) से प्राप्त सवर्णदीर्घ का प्रकृत परिभाषासूत्र से निषेध।

३. **भो अत्र।** भोः+अत्र। 'भो' से परवर्ती विसर्ग का स्वर वर्ण 'अ' के पर में रहने पर "आभोभ्यामेवमेव स्वरे" (१। ५। १०) से लोप हो जाने पर "ओ अव्" (१। २। १४) से प्राप्त 'अव्' आदेशरूप सन्धि का प्रकृत सूत्र से निषेध ॥७७।

## ७८. रो रे लोपं स्वरश्च पूर्वो दीर्घः (१। ५। १७)

**[सूत्रार्थ]**

रकार के पर में रहने पर पूर्ववर्ती रकार का लोप तथा उस लुप्त रकार से पूर्ववर्ती स्वर को दीर्घादेश होता है ॥७८।

**[दु० वृ०]**

रो रे परे लोपम् आपद्यते, स्वरश्च पूर्वो दीर्घो भवति। अग्नी रथेन, पुना रात्रिः, उच्चै रौति ॥७८।

## [दु० टी०]

**रो रे०।** प्रधानशिष्टतया लोपो नित्यः। अन्वाचयशिष्टश्च दीर्घो यथासम्भवं स्थानेऽन्तरतम इति। ननु स्वजात्यपेक्षो दीर्घः स्वरस्यैव स्थाने भविष्यति। यथा ब्राह्मणस्य स्थाने ब्राह्मणः प्रवर्तते। तथा दीर्घादयो हि विधीयमानाः स्वस्य स्थाने वेदितव्या इति। तथा च अभ्यासे स्वरग्रहणमन्तरेण स्वरस्थाने ह्रस्वः सिद्धः इति ? सत्यम् एतत्। यदिह स्वरग्रहणं तत् सुखप्रतिपत्त्यर्थमिति, तथा पूर्वग्रहणमपि। अन्यथा लोपापेक्ष्य एव पूर्वो दीर्घ इति गम्यते ॥७८।

## [वि० प०]

**रो रे०।** उच्चै रौतीति। इह दीर्घाभावेऽपि रो रे लोपमापद्यते, चकारस्यान्वाचयशिष्टत्वादिति ॥७८।

## [क० च०]

**रो रे०।** ननु यत्रैव दीर्घस्तत्रैव लोपः कथं न स्यात् ? अन्वाचये किं प्रमाणम्। तथा च समुच्चयकल्पनेऽन्वाचयकल्पनाया अन्याय्यत्वात्। नैवम्, लोपस्य मुख्यत्वं दीर्घस्यान्वाचयता इति **टीकायामुक्तम्**। **"शेतेरिरन्तेरादिः"** (३।५।४०) इति ज्ञापकाद् नान्वाचय इति **कश्चित्**। ननु दीर्घो भवन् सजात्यपेक्षया स्वरस्यैव भविष्यति किं स्वरग्रहणेन ? सत्यम्। सुखार्थम्। पूर्वग्रहणमपि तथैव दीर्घो भवन् रेफे परे पूर्वस्मिन्नेवेति संक्षेपः ॥७८।

## [समीक्षा]

'अग्निर् + रथेन, पुनर् + रात्रिः, उच्चैर् + रौति' इस अवस्था में कातन्त्रकार इस एक ही सूत्र द्वारा रेफ का लोप तथा पूर्ववर्ती स्वर को दीर्घ करते हैं। पाणिनि ने रेफ – लोप के लिए **"रो रि"** (८।३।१४) तथा दीर्घ के लिए **"ढ्रलोपे पूर्वस्य दीर्घोऽणः"** (६।३।१११) सूत्र बनाया है। इस प्रकार पाणिनीय रचना-प्रक्रिया को गौरवाभिधायक ही माना जाएगा।

## [विशेष]

व्याख्याकारों ने सूत्रपठित चकार को अन्वाचयशिष्ट माना है। किसी प्रधान के साथ अप्रधान के अन्वय को अन्वाचय कहते हैं – 'अन्यतरस्याऽऽनुषङ्गि-

कत्वेनान्वयः = **अन्वाचयः'** । जैसे 'भिक्षाम् अट गां चानय' = भिक्षा माँग लाओ तथा गाय को ले आओ। यहाँ भिक्षाटन मुख्य कार्य है तथा गाय ले आना गौण।

यहाँ चकार को अन्वाचयशिष्ट मानने के फलस्वरूप 'उच्चै रौति' आदि स्थलों में केवल रेफ का लोप ही प्रवृत्त होता है, दीर्घ नहीं, क्योंकि 'ए – ऐ – ओ – औ' ये चार सन्ध्यक्षरसंज्ञक वर्ण सदैव दीर्घ होते हैं, उन्हें दीर्घ करने की कोई आवश्यकता नहीं – 'नित्यं सन्ध्यक्षराणि गुरूणि'।

**[रूपसिद्धि]**

१. **अग्नी रथेन।** अग्निर् + रथेन। अव्यवहित दो रेफों में से पूर्ववर्ती रेफ का लोप तथा उससे पूर्ववर्ती इकार को दीर्घ।

२. **पुना रात्रिः।** पुनर् + रात्रिः। किसी भी स्वर वर्ण का व्यवधान न रहने पर दो रेफों में से पूर्ववर्ती रेफ का लोप **तथा** उससे पूर्ववर्ती अकार **को दीर्घ** आदेश।

३. **उच्चै रौति** । उच्चैर् + रौति । दो रेफों के अव्यवहितरूप में रहने पर पूर्ववर्ती रेफ का लोप। यहाँ लुप्त रेफ से पूर्ववर्ती ऐकार स्वतः दीर्घ है, अतः उसके दीर्घविधान की कोई आवश्यकता नहीं होती। इसे व्याख्याकारों ने सूत्रस्थ 'च' को अन्वाचयशिष्ट मानकर सिद्ध किया है ॥७८।

## ७९. द्विर्भावं स्वरपरश्छकारः (१। ५। १८)

**[सूत्रार्थ]**

स्वर वर्णों से परवर्ती छकार को द्वित्व होता है ॥७९।

**[दु० वृ०]**

स्वरात् परश्छकारो द्विर्भावमापद्यते। वृक्षच्छाया, इच्छति, गच्छति। अप्यधिकाराद् दीर्घात् पदान्ताद् वा। कुटीच्छाया, कुटी छाया। आङ्माभ्यां नित्यम्। आच्छाया, माच्छिदत् ॥७९।

**॥ इति कातन्त्रव्याकरणस्य दौर्गसिंह्यां वृत्तौ सन्धौ पञ्चमो विसर्जनीयपादः समाप्तः ॥**

[दु० टी०]

**द्विर्भावम्०** । द्वित्रिचतुर्भ्यः संख्यावारे सुच् । भवनं भावः, स एव द्विरिति कर्मधारयः । द्विरिति पदं वा भिन्नमिति । स्वरात् पर इति तत्पुरुषः, न पुनः स्वरः परो यस्मादिति बहुव्रीहिः । तेनोञ्छतीति न द्विर्भावः । 'विच्छ्यते' इति द्विर्भाव एव । तदेतद्व्याख्यानात् 'छिदिर् द्विधाकरणे' (६। ३) इति निर्देशात् **"गमिष्यमां छः"** (३। ६। ६९) इति ज्ञापकाद् वा । तर्हि स्वरादिति कथं न कुर्यात् चेत्, नैवम् । परग्रहणम् उपश्लेषार्थम् । तेन 'हे छात्र ! छत्रं पश्य' इत्यत्रासंहितायां न भवति । **अप्यधिकारादित्यादि ।** 'छिदिर्' इरनुबन्धत्वाद् अद्यतन्यामण् । वाक्यस्मरणे चाङानुबन्धत्वाद् द्विर्भावो भवति वा । 'आछायेयं विभाति, आच्छायेयं विभाति' । आच्छाया नु सा, आ छाया नु सा । आङा सहचरितस्याव्ययस्य ग्रहणादिह न भवति । उपमा छन्नः, उपमाच्छन्नः, त्वं मा छादय, त्वं माच्छादयेति मादेशो द्वितीयैकवचने ।

येऽपि ङानुबन्धमाशब्दं मन्यन्ते तेऽपि साहचर्यव्याख्यानमभ्युपेष्यन्ति । अन्यथा माङ् – माने **"आतश्चोपसर्गे"** (४/५/८४) इत्यङ् । प्रमा छन्नम्, प्रमाच्छन्नम्, इत्यत्रापि स्यात् । भावग्रहणं स्पष्टार्थम् । योगाविभागार्थमित्**यन्ये** । तेन स्वरात् परस्य व्यञ्जनस्य हकारवर्जितस्य अस्वरे द्विर्भावो भवति वा । दद्ध्यत्र, दध्यत्र । मद्ध्वत्र, मध्वत्र ।

**अहकार**स्येति किम् ? सन्नह्यते । **अस्वर** इति किम् ? दधि, मधु । स्वरात् पराभ्यां रेफहकाराभ्यामपि अशिटो व्यञ्जनस्य वा । अर्क्कः, अर्कः । ब्रह्म्मा, ब्रह्मा वा । **अशिट** इति किम् ? आदर्शः, बर्हा, बर्हमित्यादि । नैवम्, श्रुतेरभेदात् सजातीयैः संयुक्तानामुच्चारणं प्रत्येकस्यानेकस्य वा भेदो नास्तीत्यर्थः । असंयोगाद् विरामे विशेष इति चेद् अस्वर इति प्रसज्यनञा – वाक्, वाक्क् । नैवं भाषायां दृश्यते इति मतम् ॥७९ ।

**॥ इति दुर्गसिंहविरचितायां कातन्त्रवृत्तिटीकायां सन्धौ पञ्चमः विसर्जनीयपादः समाप्तः ॥**

●

[वि० प०]

**द्विर्भावम्।** द्विशब्दात् **"द्वित्रिचतुर्भ्यः सुच्"** (पा० ५।४।१८) इति तमादि-निपातनात् **"[1]संख्यावारे सुच्"** इति सुच्प्रत्ययः। भवनं भावः, भावे घञ्। द्विश्चासौ भावश्चेति विग्रहः। अथवा द्विरिति भिन्नं पदम्। **'स्वरात् परः'** इत्यनेन पञ्चमी-लक्षणस्तत्पुरुषोऽयम्, न पुनः स्वरः परो यस्माद् इति बहुव्रीहिरिति सूचयति – **'व्याख्यानतो विशेषार्थप्रतिपत्तेः'** (काला० परि० सू० ८८)। तेनोञ्छतीत्यादौ न भवतीति। ऋच्छतीत्यादौ द्विर्भाव एवेति। तर्हि स्वराद् इत्युक्तं किं परग्रहणेन ? सत्यम्। उपश्लेषार्थं यत्रैव संहितया उच्चार्यन्ते वर्णास्तत्रैव स्यादिति। इह मा भूत् – 'हे छात्र! छत्रं पश्य' इति। **अप्यधिकारादित्यादि।** कुट्याश्छाया इति विग्रहः। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदान्तत्वम्। **"आङ्माभ्यां नित्यम्"** (कात० परि०-सं० ८५) इति पूर्वेण विकल्पे प्राप्ते नित्यमुच्यते। ङकारोपादानाद् मर्यादाभिविधीषदर्थक्रियायोगे वर्तमान आकारो गृह्यते, तस्यैव ङानुबन्धत्वात्। वाक्यस्मरणयोस्तु वर्तमानस्य ङानुबन्धत्वाद् दीर्घात् पदान्ताद् वा इत्यनेन विकल्प एव – 'आच्छाया, माच्छिदत्' इति। छिदिर् - मायोगेऽद्यतनी इरनुबन्धाद् वेति वक्तव्यबलादण्। अव्ययेनाङा साहचर्यान्माशब्दोऽप्यव्यय एव। तेन 'पुत्रो माच्छिदत्' इत्यादिषु पूर्वेण विकल्प एवेति ॥७९।

**॥ इति त्रिलोचनदासकृतायां कातन्त्रवृत्तिपञ्जिकायां सन्धौ पञ्चमः विसर्जनीयपादः समाप्तः॥**

●

[क० च०]

द्विर्भावम् इत्यत्र कथं कर्मधारयः। भावः क्रिया, द्विशब्देन संख्याभिधायकतया भावशब्देनैकाधिकरण्याभावादित्याह – **द्विरिति**। उपश्लेषार्थमिति। ननु सर्व एव संधयः संहितायामेव विधीयन्ते, तत् किमत्र यत्नान्तरेण ? सत्यम्। **अस्मन्मते** संहिताधिकारो नास्ति। किन्तु **"न विसर्जनीय०"** (१।५।१६) इत्यत्र सन्धिपदेन समानदीर्घादीनामभिधानात् संहिताविषयत्वं प्राप्तम्, तच्च समानदीर्घादीनामेव न द्विर्भावस्य। पूर्वसूत्रसन्धिपदेनैतत्सूत्रविहितस्य कार्यस्यानुपादानात् (यतः कार्यमेव परिग्रहणमिति संक्षेपः)।

---

१. द्र० – "वारे कृत्वस्" (शाक० व्या० ३।४।३२) आदि।

**अन्ये** तु **"इवर्णो यमसवर्णे"** (१।२।८) इत्यत्रासवर्णग्रहणात् परनिमित्तानपेक्षकार्यस्यासंहितायामपि विषय इति **"नामिपरो रम्"** (१।५।१२) इत्यत्रोक्तम्। अतोऽत्रासंहितायामपि स्यादिति परग्रहणमित्याहुः। दीर्घादिति, येषां 'नित्यदीर्घाणि सन्ध्यक्षराणि' तन्मतेनेदमुक्तम्। तेन रैछाया, रैच्छाया। नौछाया, नौच्छाया इति। **अस्मन्मते** दीर्घग्रहणं गुरूपलक्षणम्। पदान्तादिति किम् ? ऋच्छति। दीर्घादिति किम् ? स्वच्छत्रम्। नित्यं स्यात्। सामर्थ्य एवास्य विषयस्तेन 'तिष्ठतु कन्याच्छन्दस्त्वम् अधीष्व' इति नित्यं स्यादिति **श्रीपतिः**। **टीकाकारमते** तु तद्विशेषाभावादत्रापि विकल्प एवेति ॥७९।

**॥ इत्याचार्यकविराजसुषेणशर्मविरचितकलापचन्द्रे सन्धौ पञ्चमो विसर्जनीयपादः समाप्तः॥**

●

## [समीक्षा]

'वृक्ष + छाया, इ + छति, ग + छति' इस अवस्था में 'छ' वर्ण को द्वित्व तथा **"अघोषे प्रथमः"** (२।३।६१) सूत्र से छ् को च् आदेश करके कातन्त्रकार 'वृक्षच्छाया, इच्छति, गच्छति' इत्यादि शब्दरूप निष्पन्न करते हैं। पाणिनि के अनुसार यहाँ संहिताधिकार में **"छे च"** (६।१।७३) से तुगागम, **"स्तोः श्चुना श्चुः"** (८।४।४०) से प्राप्त श्चुत्व के असिद्ध होने के कारण **"झलां जशोऽन्ते"** (८।२।३९) से त् को द्, इस द् को **"खरि च"** (८।४।५५) सूत्र से प्राप्त चर्त्व के असिद्ध होने से **"स्तोः श्चुना श्चुः"** (८।४।४०) सूत्र द्वारा ज् तथा **"खरि च"** (८।४।५५) से ज् को च् आदेश होकर 'शिवच्छाया, स्वच्छाया' आदि शब्दरूप सिद्ध होते हैं।

इस प्रकार पाणिनीय प्रक्रिया में गौरव स्पष्ट है। यह भी ज्ञातव्य है कि पाणिनि ने तुगागम के लिए चार सूत्र बनाए हैं– **"छे च, आङ्माङोश्च, दीर्घात्, पदान्ताद् वा"** (६।१।७३-७६)। परन्तु कातन्त्रकार ने तुगागम के लिए छकार के द्वित्वमात्र का विधान केवल एक सूत्र द्वारा करके सरलता तथा संक्षेप ही प्रदर्शित किया है।

## [विशेष]

१. **"रप्रकृतिरनामिपरोऽपि"** (१।५।१४) सूत्रपठित 'अपि' शब्द का अधिकार इस सूत्र में भी माने जाने के कारण दीर्घस्वर के बाद आने वाले छकार का द्विर्भाव विकल्प से होता है – कुटीछाया, कुटीच्छाया।

२. 'उक्त के अनुसार आङ् तथा मा से परवर्ती छकार को द्विर्भाव नित्य होता है– आच्छाया, माच्छिदत्।

३. 'स्वरात्' न कहकर सूत्रकार ने जो 'स्वरपरः' कहा है, उसके कहने का तात्पर्य यह है कि संहिता में ही छकार को द्विर्भाव होगा, असंहिता में नहीं। जैसे – 'हे छात्र ! छत्रं पश्य'। यहाँ छकार को द्विर्भाव नहीं होता है।

## [रूपसिद्धि]

१. **वृक्षच्छाया**। वृक्ष + छाया। क्षकारोत्तरवर्ती स्वर वर्ण 'अ' से पर में स्थित छकार को द्विर्भाव तथा "अघोषे प्रथमः" (२। ३। ६१) से पूर्ववर्ती छकार को चकारादेश।

२. **इच्छति**। इ + छति। "गमिष्यमां छः" (३। ६। ६९) से 'इष्' धातुस्थ षकार को छकार, प्रकृत सूत्र से छकार को द्वित्व तथा "अघोषे प्रथमः" (२। ३। ६१) से पूर्ववर्ती छकार को चकार।

३. **गच्छति**। ग + छति। "गमिष्यमां छः" (३। ६। ६९) से 'गम्' धातुस्थ मकार को छकार, प्रकृत सूत्र से छकार को द्वित्व तथा "अघोषे प्रथमः" (२। ३। ६१) से पूर्ववर्ती छकार को चकारादेश ॥७९।

**॥ इत्याचार्यशर्ववर्मप्रणीतस्य कातन्त्रव्याकरणस्य प्रथमे सन्धिप्रकरणे समीक्षात्मकः**

**पञ्चमो विसर्जनीयपादः समाप्तः ॥**

**॥ समाप्तं च सन्धिप्रकरणम् ॥**

॥श्रीः॥

परिशिष्टम् – १

आचार्यश्रीपतिदत्तप्रणीतम्

# कातन्त्रपरिशिष्टम्

## सन्धिप्रकरणम्

●

**नमो गणेशाय।**

**संसारतिमिरमिहिरं महेशमजमक्षरं हरिं नत्वा।**

**विविधमुनितन्त्रदृष्टं ब्रूमः कातन्त्रपरिशिष्टम् ॥**

### १. वृद्धिरादेशस्य

आदेशस्य वृद्धिर्भवतीत्यधिक्रियते। प्राग् वृद्धिग्रहणं मङ्गलार्थम् ॥१।

### २. स्वस्येरेरिणोः

ईरेरिणोः परयोः स्वशब्दादेशस्य वृद्धिर्भवति। स्वैरम्, स्वैरी। स्वैराद् गुणमात्रादिना सिद्धे ईरिग्रहणमीरिण्येत्वश्रुतिनिवृत्त्यर्थम् ॥२।

### ३. अक्षस्योहिन्याम्

ऊहिन्याम् परतोऽक्षशब्दादेशस्य वृद्धिर्भवति। अक्षौहिणी। "पूर्वपदस्थाद्" (कात०परि० - ण० २) इति णत्वम् ॥३।

### ४. प्रस्योढोढ्योश्च

द्वन्द्वेऽग्नेः पूर्ववत्त्वमनित्यम्, कालव्रीह्योरिति निर्देशात्। 'ऊढ– ऊढि' इत्येतयोः परयोः प्रशब्दादेशस्य वृद्धिर्भवति। प्रौढः, प्रौढिः। 'ऊहेऽपि **शाकटायनस्य**' – प्रौहः। प्रौढिशब्दादर्शआदित्वादति कृते 'प्रौढो भावः' इति क्तार्थावगमो न स्याद् इत्यूढग्रहणम्। कथं 'प्रौढो भारः, प्रोढी रथानाम्' ? आङ्पूर्वेण स्यात् ॥४।

## ५. ऋति धातोरुपसर्गस्य दीर्घः

धातोर्ऋति उपसर्गादेशस्य दीर्घो भवति। अर्थादकारस्य। प्रार्च्छति, परार्च्छति। आङ्पूर्वादर्तेर्ऋणोतेश्च क्तौ– आर्तिः। कथम् अर्तिः? गुरोरप्यर्देः क्तिः। ततो विश्वार्तिः। सार्तिरित्येव स्यात्। अन्यथाऽऽङादेशत्वात् पूर्वलोपः स्यात्। धातोरिति किम्? प्रर्षभः। नामोपनिपातिनो नोपसर्गत्वं चेत्, धातुग्रहणं सुखार्थम्। उपसर्गस्येति किम्? अद्यर्च्छति ॥५।

## ६. नामधातोर्वा

नाम्ना स्याद्यन्तेनारब्धो धातुर्नामधातुः। तस्य ऋत्युपसर्गस्यादेशस्य वा दीर्घो भवति। प्रार्षभीयति, प्रर्षभीयति। आर्ज्जूयते, अर्ज्जूयते ॥६।

## ७. ॡति वा

नामधातोर्ॡत्युपसर्गादेशस्य वा दीर्घो भवति। प्राल्कारीयति, प्रल्कारीयति। वेत्युत्तरत्र नित्यार्थम् ॥७।

## ८. ऋणप्रवसनवत्सतरकम्बलदशानामृणे

ऋणे परे एषामादेशस्य दीर्घो भवति। ऋणार्णम्, प्रार्णम्, वसनार्णम्, वत्सतरार्णम्। वत्सतरमनादृत्य **वत्सरश्चान्द्रकाशिकादौ** पठ्यते। तदिहासम्मतम्, **पतञ्जलि – शाकटायना**-दीनां वत्सतरस्यैवेष्टत्वात्। तथा च तरप्रत्ययोऽत्र **भाष्यादावुक्तः**। कम्बलार्णम्, दशार्णम्, दशार्णो देशः, दशार्णा नदी। ऋणं जलदुर्गेऽप्युच्यते ॥८।

## ९. ऋतेऽरस्तृतीयासमासे

तृतीयायाः समासे ऋतशब्दे परेऽरादेशस्य दीर्घो भवति। शीतार्तः, तृष्णार्तः। अश्वेन ऋतो गतो वा अश्वार्तः इति च। अर इति किम्? गवृतम्। तृतीयेति किम्? ग्रामे ऋतः ग्रामर्तः। समास इति किम्? तृष्णयर्तः। आर्तशब्दो न ऋतार्थः। ऋते चानिष्टं स्यादित्यारम्भः। यत्रायमृति दीर्घस्तत्र प्रकृतिर्नेष्यते ॥९।

## १०. ऋतो रलावृद्लृतोः

ऋद्लृतोः परयोर्ऋकारस्य रलौ भवतो यथासंख्यम्। पित्रृणम्, होतॢतकः। **कश्चिद्** रलावादिश्य परयोर्दीर्घमाह-होतॄक्षः (पित्रृक्षः, पित्रृकारः) होतॣकारः ॥१०।

## ११. लुक् सवर्णवच्च

ऋदृलृतोः परयोर्ऋकारस्य लुक् सवर्णवच्च कार्यं भवति। चकाराद् यथाप्राप्तं प्रकृतिश्च भवति। पितृणम्, पितॄणम्, पितृऋणम्। होत्ऌकारः, होत्ॡकारः, होतृऌकारः। क्वचित् पदान्तविधिष्वपि स्थानिवदिति न तृतीयः। नित्यसमासे तु प्रकृतिर्नास्तीति रूपत्रयमेव। पितृच्छी, पितॄच्छी, पित्रृच्छी। पदान्तप्रकरणत्वात् पितॄन्॥११।

## १२. उपसर्गावर्णलोपो धातोरेदोतोः

धातोरेदोतोः परयोरुपसर्गाणामवर्णस्य लोपो भवति। प्रेजते, परेजते। प्रोणति, परोणति। उपसर्गस्येति किम्? ममैलयति, सन्ध्यौणति। उपसर्गाणामधातोरसम्भवाद् धातुस्पष्टार्थम्। कथं प्रगतः एजकः प्रैजकः, प्रगतः ओणकः प्रौणकः? कर्तृयोगित्वेनानुपसर्गत्वात्॥१२।

## १३. इणेधत्योर्न

अनयोः परयोरुपसर्गावर्णस्य लोपो न भवति। प्रैति, परैति, प्रैधते, परैधते। तिप्पाठः सुखार्थः॥१३।

## १४. नामधातोर्वा

नामधातोरेदोतोः परयोरुपसर्गावर्णस्य लोपो भवति वा। प्रेणीयति, प्रैणीयति। एणीयति, ऐणीयति। प्रोजायते, प्रौजायते। प्रोङ्काम्यतीति नित्यम्, परत्वात्॥१४।

## १५. एषैष्ययोः प्रस्य

एषैष्ययोः परतः प्रस्याकारस्य लोपो भवति वा। प्रेषः, प्रैषः। प्रेष्यः, प्रैष्यो दासः। अन्यत्र प्रेषणम्। प्रेषयतीति नित्यम् (स्यात्)। एष्यग्रहेणन यपो ग्रहणं नेच्छन्ति। प्रेष्य गतः। इषेरिनन्तात् क्तो यप्। प्रस्येति किम्? उपेषः, उपेष्यः॥१५।

## १६. ओमि च नित्यम्

ओमि च परतो नित्यमवर्णस्य लोपो भवति। अद्योम् ब्रूमः, तदोम् ब्रूमः। ओमित्यभ्युपगमादिष्वव्ययम्॥१६।

## १७. एवे इवार्थे

इवार्थोऽत्र सादृश्यमसम्भावना च। इवार्थे एवशब्दे परे नित्यम् अवर्णस्य लोपो भवति। चर्मेव रज्जुः। शालेव शाखा। तदद्येवाभूत, तत्तदेवाभूत्। बालेव गच्छ, मालेव

तिष्ठ इति च स्यादेव। एवेऽनवधारणे इति **काश्मीरिकाः** पठन्ति। इवार्थ इति किम्? 'इहेव वयं प्रवीराः' इति **भाष्यम्।** ममैव धनम्, सैव स्रक्, वपुरतनु तथैव संवर्मितम्। अपदोषतैव विगुणस्य गुणः। मिथ्यैव श्रीः श्रियम्मन्या। असम्भावनायामेवायं विधिरिति **नैयासिकाः**॥१७।

## १८. आङ्यादिष्टे

आदेशरूपे आङि अर्वणस्य लोपो भवति। आ + इहि = एहि, अद्येहि, तदेहि। आ + ऊढा= ओढा, ममोढा, सोढा। आ ऋक्षात् = अर्क्षात्, ममर्क्षात्। आ + लृकारात् अल्कारात्, ममल्कारात्। अनादिष्टे लोपोऽनर्थकः इत्यादिष्ट एवावशिष्यते। आदिष्ट-ग्रहणं लुप्तेऽपि यथा स्याद् इति। आ + एलयति = एलयति, अद्येलयति, ममेलयति। आ + ओणति = ओणति, ममोणति, सन्ध्योणति। आ + ओष्ठम् = ओष्ठम्, ममोष्ठम्, लेखोष्ठम्॥१८।

## १९. शकन्ध्वादिषु च

शकन्धुप्रभृतिषु शब्देषु पूर्वस्यावर्णस्य लोपो भवति। शकानाम् अन्धुः शकन्धुः, सीमानम् अन्तति बध्नाति सीमन्तः केशविन्यासे। अन्यत्र सीमान्तः। कुलान्यटतीति कुलटा, पचाद्यच्। रूढ्या भिक्षुकी असती चोच्यते। **भाष्ये** तु एत एवोदाहृताः। आकृतिगणत्वमपि नोक्तम्। **अपरे** तूदाहरन्ति– अटान् अवतीति अटवी अरण्ये समोऽर्थोऽस्येति समर्थः, अपृथगर्थः। प्रकृष्टावोष्ठावस्येति प्रोष्ठो नाम कश्चित्। प्रोष्ठोऽनड्वान्, प्रोष्ठी मत्स्यान्तरम्। प्रोष्ठपाठो नित्यार्थः।

**शकन्धुः केशविन्यासे सीमन्तः कुलटाऽटवी।**
**एकार्थत्वे समर्थोऽपि प्रोष्ठो जातौ च नाम्नि च॥**
**यत्त्वर्द्धशनमिच्छन्ति तन्न वृद्धैरुदाहृतम्।**
**आकृत्याऽन्यदपि ज्ञेयं समास–मशनादयः॥१९।**

## २०. ओष्ठोत्वोः समासे वा

'ओष्ठ–ओतु' इत्येतयोः परयोः समासेऽवर्णस्य लोपो भवति वा। बिम्बोष्ठः, बिम्बौष्ठः। बडवोष्ठी, बडवौष्ठी। ग्रामोतुः, ग्रामौतुः। कन्योतुः, कन्यौतुः। अस्य ओष्ठः ओष्ठः, औष्ठः। आ ओष्ठाद् ओष्टम्, औठम्। अनोष्ठ इति परत्वान्नओऽक्षरविपर्ययः।

श्रुतत्वाद् आभ्यां लोप्यावर्णस्य समासे इह न स्यात्। वृषलपुत्रौष्ठव्रणस्ते। नृप कन्यौतुकुलं पातु ॥२०।

## २१. पदान्तस्य गोरोतोऽति प्रकृतिः

पदान्तस्य गोरोकारस्य अकारे परे प्रकृतिर्भवति वा समासे । गो अजिनम्, गोऽजिनम् । गो अग्रम्, गोऽग्रम्। तयोः समास इत्येव– हे चित्रगोऽजिनधरं पश्य। गोरिति किम्? द्योऽर्द्धम्। पदान्तस्येति किम्? राजगवः।अतीति किम्? गवासनम्। गवीश्वरः ॥२१।

## २२. अव स्वरे

पदान्तस्य गोरोकारस्य स्वरे परे अवेत्यादेशो भवति वा समासे।गवाजिनम्, गोऽजिनम्।गवेष्टिः, गविष्टिः।गवेश्वरः, गवीश्वरः।गवोच्छ्वासः, गवुच्छ्वासः। गवोद्ध्र्वम्, गवुद्ध्र्वम्।गवर्क्षौ, गवृक्षौ।गवैडकम्, गवेडकम्।कृतावोऽयं समाहारार्थं गवाश्वादौ पठ्यते। गवौदनम्, गवोदनम्। पदान्तत्वादसमासान्तत्वाच्च गव्यति, गव्यते ॥२२।

## २३. नित्यमिन्द्रे

इन्द्रशब्दे परे गोरोकारस्य नित्यम् अवेत्यादेशो भवति। गवेन्द्रः। गवेन्द्रगुप्तः ॥२३।

## २४. अक्षे नाम्न्येव

गोरोकारस्याक्षशब्दे परे संज्ञायामेव अवेत्यादेशो भवति। गवाक्षो जालकम्। गवाक्षो नाम कश्चित्। नाम्नीति किम्? गोक्षम्। इहावधारणाद् विभाषापि बाध्यते ॥२४।

## २५. प्रकृत्येतौ संबुद्ध्योद् वा

संबुद्धौ ओत् संबुद्ध्योत्। स इतौ परतो वा प्रकृत्या तिष्ठति। भानो इति, भानविति। संबुद्ध्योदिति किम्? गवित्ययमाह। स्योदिति सिद्धे संबुद्धिग्रहणं स्पष्टार्थम् ॥२५।

## २६. उतोऽदद्रीचः

अदद्रीचः उकारस्य स्वरे परे प्रकृतिभर्वति वा। अमुमुईचा, अमुन्वीचा। अदमुईचा, अदन्वीचा। **कैश्चिदिह** विभाषा नाद्रियते। **कैश्चिदिदं** न पठ्यत एव ॥२६।

## २७. ऋत्यनित्यसमासेऽनुपसर्गसमानस्य ह्रस्वश्च

उपसर्गादन्यस्य यः समानस्तस्य ऋकारे परे नित्यसमासादन्यत्र वाक्ये विकल्पसमासे च यथासम्भवं ह्रस्वः प्रकृतिश्च भवति वा। दाम ऋच्छति, दामर्च्छति। माला ऋच्छति, माल ऋच्छति, मालर्च्छति। ग्राम ऋषभः, ग्रामर्षभः। शाला ऋक्षः, शाल ऋक्षः, शालर्क्षः। उच्चरितरुचिरऋचाश्चाननाश्चतुर्णाम्। हिमऋतावपि ताः स्म भृशस्विद इति च। महाऋषिः, महऋषिः, महर्षिः। स्तृ ऋच्छौ, स्तृऋच्छौ स्तृच्छौ। गम्लृ ऋच्छौ, गम्लृलृच्छौ। इह ऋकारोऽपि दीर्घ इति **तन्त्रान्तरम्,** तदा गम्लृच्छौ।

लृकारेऽपि स्मरन्त्**येके**– कन्यालृकारः, कन्यल्कारः, कन्यलृकारः। नित्यसमासे **निषेधः** किम्? अश्वर्च्छी, बडवर्च्छी। अनुपसर्गस्येति किम्? प्रार्च्छति, परार्च्छति। **समानस्येति** किम्? गवृणम्, नावृणम्। पदान्तस्येव पितॄन्। अवर्णार्थं सवर्णार्थं च **वचनम्**॥ २७॥

## २८. तौ नामिनोऽसवर्णे

अनुपसर्गसमानस्य नामिनोऽसवर्णे स्वरे परतो नित्यसमासादन्यत्र प्रकृति**दीर्घस्य** ह्रस्वश्च वा भवति। दधि अत्र, दध्यत्र। मधु अत्र, मध्वत्र। नदी अत्र, नदि अत्र, नद्यत्र। नामिनः इति किम्? ममेष्टिः, कन्येहते। समानस्येति किम्? श्रिया इन्दुः, पाणावाद्यम्। पदान्तस्येत्येव। नद्यौ, वध्वौ। असवर्ण इति किम्? वारीहसे, मधूर्ध्वम्। **कथं** वारि ईहसे, मधु ऊर्ध्वम्? सन्धिर्हि संहिता। स तु पदयोर्विभाषित एव। संहिताश्रयत्वाच्च सन्धयोऽभिधीयन्ते समानदीर्घादयः। अतस्ते संहितायामेव स्युः। **सप्तम्या निर्दिष्टे** वर्णाव्यवाये विधिराश्रीयते, न तु कालाव्यवाये। तथा च असंहितायामपि सप्तम्या निर्दिष्टे विध्यन्तराणि स्युः। प्रकरणमिदं तु संहितायामेव विसन्ध्यर्थम्।

नित्यसमासे निषेधः किम्? साध्वृच्छी, कुट्यर्थः, जान्वर्थः। नित्यग्रहणाद् नदि **अम्भः**, नदी अम्भः, नद्यम्भः इति च स्यादेव। प्रकृतिह्रस्वयोर्नित्यसमासे निषेध इति **वार्त्तिकम्, भाष्ये** तु समासमात्रे निषेधः। **चन्द्र**स्यापि मतमेतत्। अनुपसर्गस्येति किम्? अध्यृच्छति, अध्यास्ते, अन्वस्यति॥ २८।

## २९. इतावुञोऽनुनासिकदीर्घश्च

अनुबन्धस्तन्त्रान्तरप्रसिद्ध्या निपातग्रहणार्थः। उञो निपातस्येतौ परतोऽनुनासिक-दीर्घः प्रकृतिश्च भवति वा। ऊँ इति, उ इति, विति। दीर्घग्रहणं समानस्थान्यर्थम्। अह उ, अहो इति प्रकृतिरेव स्यात्॥२९।

## ३०. वर्गाद् वा स्वरे स्वरवत्

वर्गात् परस्योञः स्वरे परे वा वकारो भवति । वाग्वस्ति, वागु अस्ति। दृषद्वूर्ध्वम्, दृषदु ऊर्ध्वम्। वाग्वुच्चैः, वागु उच्चैः। पचन्वीहते, पचनु ईहते। सुगण्ण्वुदके, सुगणु उदके। क्रुङ्ङ्विन्द्रः, क्रुङ्ङु इन्द्रः। किम्वीहसे, किमु ईहसे। स्वरत्वाद् ङणना द्विर्भवन्ति। मोऽनुस्वारश्च न स्यात्। संयन्तिवदिहापि प्राप्नोति॥३०।

## ३१. स्वरजौ य्वावनादिस्थौ लोप्यौ व्यञ्जने

'वा' न वर्तते। स्वरे जातौ = स्वरजौ। तौ यकारवकारौ पदान्तावनादिस्थौ व्यञ्जने परे लोप्यौ भवतः। नद्या ऊः नद्यूः। तस्येहा, नद्वीहा। ऊरिति अवतेर्वेञो वा क्विपि रूपम्। अभ्यू आगच्छति, अभ्वागच्छति। प्रत्यू आगच्छति प्रत्वागच्छति। अभिप्रत्योरूशब्देनाव्ययीभावः। पटुश्चासाविश्चेति पट्विः, तस्योत्सवः पट्युत्सवः। साधु इ आस्ते साध्यास्ते। स्वरजाविति किम्? किंय् ह्यो भूतम्, किंव् ह्वलयति। य्वाविति किम्? होत्र्युदयः। अनादिस्थाविति किम्? किंय् वृतः, व्युपधः। व्यञ्जन इति किम्? नद्युदकम्, वध्वीहा। पदान्तावित्येव राय्यन्तः, नाव्यन्तः। **केचिदिदं** शार्ववर्मिके द्वितीयसन्धौ पठन्ति॥३१।

## ३२. अवर्णात् क्विपोऽनघोषे प्रकृतिश्च

अवर्णात् परौ क्विबन्तस्य यौ य्वौ तौ पदान्तौ स्वरे घोषवति च लोप्यौ भवतः, तस्मिंश्च सति प्रकृतिश्च भवति। अश्वयुजं मूलवृश्चमाचष्टे इतीन्, ततः क्विप्– अश्वगच्छति, मूलगच्छति। अश्वभ्याम्, मूलभ्याम्। अश्व अग्रे, मूल अग्रे। अनघोष इति किम्? अश्वय् चरति, मूलव् खनति। अश्वय् यु, मूलव् यु। इह सुपः षत्वं वक्ष्यते। पदान्तावित्येव– अश्वयौ, मूलवौ॥३२।

## ३३. चर्करीताभ्यासस्य

चर्करीतमिति चेक्रीयितलुकि धातोः संज्ञा, तस्याभ्यासस्य स्वरे प्रकृतिर्भवति। अरिअर्ति, अरीअर्ति। अरि आरयति, अरी आरयति। **भाषायामपि केचित् चर्करीतमिच्छन्ति।**

उक्तं हि **भाष्ये** – 'भाषायामपि यङो लुगस्तीति' । **निर्लूरवृत्तौ** चोक्तम्–'भाषायामपि यङो लुगस्तीति' । लुगधिकारे "यङो बहुलम्" इति **चान्द्रे** च पठ्यते । **काशिकायामपि** 'छन्दोऽनुवृत्तिरिह नेष्टा' इत्युक्तम् । 'जाघटीति' इति **जाम्बवतीविजयकाव्ये।** 'जाज्वलीति' इति **नीतिसंग्रहे।** 'शंशमाश्चक्रुः' इति **भट्टिकाव्ये** च पठ्यते । **भागवृत्तिकारस्तु** बोभवीत्येव न छान्दसम् इति मन्यते । तितउरिति तनोर्डितउप्रत्यये विधानात्, औणादिकबाहुलकाद् वा अकारस्य प्रकृतिः ॥३३।

## ३४. शिट्यघोषे विसर्जनीयस्य

शिट्परेऽघोषे विसर्जनीयस्य प्रकृतिर्भवति । कः त्सरुकः, कः क्षाम्यति, कः प्साति, सर्पिः प्सानम्, धनुःक्षणनम्, निःक्षणनम्, दुःक्षणनम्, बहिःक्षणनम् । पुंनिर्दुर्बहिरित्यादिना मूर्धन्योऽपि नेति मतम् ॥३४।

## ३५. प्रशामस्तथयोः

तथयोः परयोः प्रशामः प्रकृतिर्भवति ।प्रशान् तरति, प्रशान् थुडति ।तथयोरिति किम्? प्रशाँल्लुनाति, प्रशाञ्शेते ॥३५।

## ३६. नस्य धुट्परयोः प्रथमद्वितीययोः

धुट्परयोः प्रथमद्वितीययोः परतो नकारस्य प्रकृतिर्भवति । भवान्त्सरति, भवान्थ्सरति । नॄन् प्साति, नॄन् फ्साति ॥३६।

## ३७. समो राजि क्वौ

राजतौ क्विबन्ते समो मकारस्य प्रकृतिर्भवति । सम्राट्, सम्राजौ । क्वाविति किम्? संराजति ॥ ३७।

## ३८. एतो द्वित्वे

द्विवचनस्यैकारस्य स्वरे प्रकृतिर्भवति । अनेकवर्णद्विवचनार्थमिदम् । ब्रुवाते अत्र यजावहे इह । एत इति किम्? यजावहायत्र ॥३८।

## ३९. नादसः

अदसोऽकि सति द्विवचनस्य इतः स्वरे प्रकतिर्न भवति । अमुकेऽत्र । एत इति किम्? अमू अत्र । मादुत्वे कादेत् परिशिष्यते ॥३९।

## ४०. मणीवादिषु च

मणीवादिषु च द्विवचनस्य प्रकृतिर्न भवति। मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम (मभार० १२।१७१।१२)।रोदसीव, दम्पतीव, जम्पतीव, भार्यापतीव, वाससीव। इवार्थे वनिपातोऽस्त्येव। यथा 'प्रशस्तिलिखितानि व केशिदन्तक्षतानि कादम्बखण्डितदलानि व पङ्कजानि'। इवे प्रकृतिरनिष्टेत्यारम्भः।

**मणी भार्यापती चैव दम्पती रोदसी तथा।**

**वाससी जम्पती चैवमिमे जायापती तथा।**

**इवेऽन्यैरिह पठ्यन्ते पेचुषीप्रभृतीन्यपि॥**

**कश्चित्** त्रिमुनिसमुपेक्षणान्नेदमाद्रियते ॥४०।

## ४१. सस्य पादपूरणे

पादपूरणे कर्तव्ये सस्य प्रकृतिर्न भवति। पादोऽत्र पद्यस्य तुर्यो भागः।

**सैष दाशरथी रामः सैष राजा युधिष्ठिरः।**

**सैष विप्रो दयाशीलः सैष योगीश्वरो विभुः॥**

**तन्त्रान्तरवृत्तिकारास्तु** ऋचामेव पादेऽस्य वृत्तिं मन्यन्ते। **आर्षप्रयोगास्तु** यथाकथंचिद् विधेयाः = नित्यत्वेन संग्रहणीया इत्याहुः। तथा च एषस्यापि दृश्यते– **'एवैष रथमारुह्य मथुरां याति माधवः'**। न्याय्यश्चैतत् स्मृत्यन्तरे 'प्राक् छन्दसि' इति **श्रुतेः**। तदिहापि वाक्यमिदम् ऋषिप्रयोगेष्वेव स्मर्तव्यम् ॥४१।

## ४२. इतौ तु प्लुतस्य

इतौ तु परतः प्लुतस्य प्रकृतिर्न भवति। एहीह ब्राह्मणेति। श्रुतत्वात् प्लुतनिबन्धनस्यैवायं प्रतिषेध इति। द्वित्वे तु प्रकृतिः स्यादेव। आगच्छतं भोः कवी इति। तुनिपातो विशेषद्योतनार्थस्तेन छान्दसानुकरणप्लुतस्येतौ प्रकृतिरेव – युष्मे इति ॥४२।

## ४३. इतो वा

इकारस्य **प्लुतस्येतौ** प्रकृतिर्भवति वा। एहीह ब्राह्मणीति, एहीह ब्राह्मणि इति। **चाक्रवर्मणस्य** तु मते सर्वप्लुतानामितौ विकृतिरेवेति तु **भाष्यम्** ॥४३।

## ४४. प्रथमस्य पञ्चमो मिप्रत्यये

प्रत्यये मकारे प्रथमस्य पदान्तस्य पञ्चमो भवति नित्यम् । वाङ्मयम्, मृन्मयम् पदान्तत्वान्न णत्वम् । ईण्मान्, अम्मयम् । गरुत्मानिति वक्ष्यते ॥४४।

## ४५. टवर्गस्य नवतिनगर्योर्नश्च णः

टवर्गस्य नवतिनगर्योः परयोः पञ्चमस्तयोर्नकारस्य णश्च भवति । षण्णवतिः, षण्णगरी, सुगण्णवतिः, सुगण्णगरी । 'नस्य णः' इति पठन्त्येके । तेषां तृतीयपञ्चमौ स्तः । स्त्रीनिर्देशः किम्? षड्नगरम्, सुगण्नगरम् ॥४५ ।

## ४६. वाऽनुनासिके न द्विः प्रथमस्य

पदान्तस्य प्रथमस्यानुनासिके वा पञ्चमो भवति, तस्य द्विर्भावश्च न भवति । स्वरयवलाः सानुनासिका निरनुनासिकाश्च । तत्रैषामानुनासिक्यम् आन्तरतम्याद् विशेषविधानाद् वा न सर्वत्र । दृङ्ँ इति, दृगँ इति । विनँ इति, विड्ँ इति । तनँ इति, तदँ इति । **कश्चिद्** अविशेषेण यवलानामानुनासिक्यमिच्छन् 'दृङ् याँता, दृङ् वाँता, दृङ् लाँता' इत्युदाहरति, तदा नेष्टं वार्त्तिकादौ । **चान्द्रे** तु विधिरेवैष नाद्रियते ॥४६।

## ४७. मनोरनुस्वारपूर्वः

एतदधिक्रियते ॥४७।

## ४८. कानोऽभ्यासस्य सः

अभ्यासो द्विरुक्तपूर्वभागः । कानित्यस्य द्विरुक्तपूर्वभागस्य यो नकारस्तस्यानुस्वारपूर्वः सकारो भवति । कांस्कान् ब्रूते । वीप्सायां द्विर्वचनम् । अभ्यासस्येति किम्? वृषान् कान् कान् नेष्यति ग्रामान् ॥४८।

## ४९. वा सुटि समः

समो मकारस्य सुटि परतोऽनुस्वारपूर्वः सकारो भवति वा । संस्कर्ता, संस्स्कर्ता । इह वाग्रहणमनार्षमि**त्येके** । तदसत् । उक्तं हि **भाष्ये – समो मलोप इत्येके** इति । स च लोपोऽनुस्वारपूर्वोऽनुनासिकपूर्वश्चेति व्याख्यातव्यम् **अपरैः । शाकटायनस्तु** पक्षे समो मलोपमात्रमाह– सस्कर्ता । ततः पक्षेऽत्र समो मलोपोऽप्येष्टव्यः । समो मकारस्यानुस्वारानुनासिकाभ्यां द्वे रूपे, सस्याभावे चानुस्वारेणैकम्, तेषु त्रिषु । तस्मात् तयोरिति कस्य वा

द्वित्वे षट् । तत्र रेफाद् वा द्वित्वे द्वादश रूपाणि । **शाकटायन**नोक्ते च समो मलोपमात्रे सस्कर्तेत्यादिना पुनश्चत्वारीति षोडश । सस्याभावेऽप्यनुस्वारवदनुनासिकेन चत्वारीच्छन्ति । तैः सह विंशतिरूपाणि ।। ४९ ।।

## ५०. नॄनः पे वा

'नॄन्' इति लुप्तषष्ठीकं पदम् । अः इति अकार उच्चारणार्थः । नॄन् इत्यस्य नकारस्य पकारे परेऽनुस्वारपूर्वो विसर्जनीयो भवति वा । नॄंः पुनाति, नॄं ᳵ पुनाति, नॄन् पुनाति । अनुनासिकेन च द्वे – नॄँः पुनाति नॄँ ᳵ पुनाति । अतः पञ्च रूपाणि स्युः ।।५०।

## ५१. पुमः प्रथमद्वितीययोरधुटि

अधुट्परयोः प्रथमद्वितीययोः पुमो मकारस्यानुस्वारपूर्वो विसर्जनीयो भवति । पुंस्कारः, पुंस्केलिः, पुंस्खट्वा । पुंनिर्दुर्बहिश्चतुरामिति सत्वम् । पुंश्चाटुः, पुंश्छत्रम्, पुंष्टङ्कः, पुंष्ठकारः, सुपुंस्तरति, सुपुंस्थुडति, पुंस्पानम्, पुंस्फलम् । प्रथमद्वितीययोरिति किम् ? पुंगानम्, पुंशाला, पुंह्लादः । अधुटीति किम् ? पुंक्षीरम्, पुंस्सानम् ।।५१।

## ५२. पूर्वस्य वाऽनुनासिकोऽनुस्वारेण

इह योऽयमनुस्वारस्तेन सह पूर्वस्वरस्यानुनासिको वा भवति । भवाँश्चन्द्रः, भवांश्चन्द्रः । भवाँष्टङ्कः भवांष्टङ्कः । भवाँस्तुल्यः, भवांस्तुल्यः । काँस्कान्, कांस्कान् । नॄँःपाहि, नॄंःपाहि । पुँस्केलिः, पुंस्केलिः । सँस्स्कर्ता, संस्स्कर्ता । इह सकाराप्रवृत्तिपक्षेऽपि वाऽनुनासिकमिच्छन्ति । तथा च सँस्कर्ता, संस्कर्ता इति सिद्ध्यर्थमनुस्वार-पूर्वोऽनुनासिकपूर्वश्च समो मलोप इति **भाष्य**व्याख्या ।।५२।

## ५३. टाच्च सस्तादिर्वा

टकारान्नकाराच्च परः सकारस्तादिर्भवति वा । विट्त्साधुः, विट्साधुः । सुपि पदान्तत्वमस्त्येव । विट्त्सु, विट्सु । भवान्त्साधुः, भवान् साधुः ।।५३।

## ५४. ङ्णोः कटावन्तौ शषसेषु

ङकारणकारयोः पदान्तयोः शषसेषु यथासङ्ख्यं कटावन्तौ वा भवतः । प्राङ्क्शेते, प्राङ्शेते । प्राङ्क्षण्डः, प्राङ्षण्डः । प्राङ्क्साधुः, प्राङ्साधुः । सुगण्ट्शेते, सुगण्शेते । सुगण्ट्षण्डः, सुगण्षण्डः । सुगण्ट्साधुः, सुगण्साधुः । सुपि पूर्ववत् । प्राङ्क्षु, प्राङ्षु । ङकारादपि सुपः षत्वं वक्ष्यते । सुपि वर्णग्रहणात् स्यात् । सुगण्ट्सु,

सुगणूसु । कटोः पदान्तत्वात् प्राङ्कूछेते, सुगण्ट्छेते इति छत्वं स्यात् । सुगण्ट्त्साधुरिति । सस्तादिश्च ॥५४।

## ५५. अनुस्वारस्य परो यवलेषु

पदान्तस्यानुस्वारस्य यवलेषु परतो वा परवर्णादेशो भवति । सँय्यच्छति, संयच्छति । सँव्वदति, संवदति । सँल्लुनाति, संलुनाति । किंव्वान्, किंवान् । पुँव्वत्, पुंवत् । कथं यय्यम्यते, वँव्वम्यते ? तत्रान्तग्रहणस्य पदान्तार्थत्वात् । आन्तरतम्यादादेशोऽयम् अनुनासिक एव अन्तस्थानामानुनासिक्यं छान्दसम् । चञ्चल इति रूढित्वादिति । वार्त्तिकं तु आन्तरतम्यविधेरन्यत्रेति लक्ष्यते । अनुनासिकादेशस्य यकारादेरानुनासिक्यं हि **भाष्यादौ** समर्थितम् । **तन्त्रान्तरे** तु आदेशविशेषणमिहानुनासिकोऽधिक्रियते ॥५५।

## ५६. हे मनयवलास्तेषु

तेषु मनयवलेषु यो हकारस्तस्यानुस्वारस्य यथासंख्यं म–न–य–व–ला वा भवन्ति । सम्ह्मलयति, संह्मलयति । सन् ह्नुते, संह्नुते । किँय् ह्यो भूतम्, किं ह्यो भूतम् । किँव्ह्वलयति, किं ह्वलयति । सन् ह्लादते, संह्लादते ॥५६।

## ५७. प्रथमस्य शषसेषु वा द्वितीयः

प्रथमस्य शषसेषु वा द्वितीयो भवति । पदान्त इह नानुवर्तते । दृख्श्यामा, दृक्श्यामा । द्विठ्षण्डः, द्विट्षण्डः । तथ्साधुः, तत्साधुः । अफ्सीमा, अप्सीमा । भर्थ्सनम्, भर्त्सनम् । अफ्सरा, अप्सरा ॥५७।

## ५८. न ख्यात्रि × क

ख्यात्रि परतो जिह्वामूलीयो न भवति । कः ख्यातः, कः ख्यायते । × क इति किम् ? कश्चख्यौ, निष्ख्यानम् । इद**मपाणिनीयमचान्द्रं** च ॥५८।

## ५९. चञाभ्यां सस्य शः

चञाभ्यां परस्य सस्य शो भवति । अच्शु, निच्शु, सनञ्शु वाक्येषु ॥५९।

## ६०. प्रशामष्टठयोर्णः

प्रशामोऽन्तस्य टठयोः परयोर्णो भवति । प्रशाण्ढौकते, प्रशाण्ठकारीयति । तन्त्रेष्वदृष्टत्वात् 'प्रशान् टीकते' इति नस्थितिश्चिन्त्या ॥६०।

## ६१. ञश्चछयोः

चछयोः परयोः प्रशामोऽन्तस्य ञो भवति । प्रशाञ्चित्रम्, प्रशाञ्छत्रम् ॥ ६१ ।

## ६२. समासेऽवश्यमः कृत्ये मस्य लोपः

समासेऽवश्यमो मकारस्य कृत्यप्रत्यये परे लोपो भवति । अवश्यकर्तव्यम्, अवश्यकरणीयम्, अवश्यचेयम्, अवश्यकृत्यम्, अवश्यकार्यम्, अवश्यपचेलिमा माषाः, अवश्यगेयो वटुः । समास इति किम्? अवश्यं करणीयम् । इह वाक्यमपीच्छन्ति । कृत्य इति किम्? अवश्यंकारी । मयूरव्यंसकादित्वादेषु समासः ॥ ६२ ।

## ६३. तुमः काममनसोः

समासे काममनसोः परयोस्तुमो मस्य लोपो भवति । गन्तुकामः, गन्तुमनाः । समास इत्येव– गन्तुं कामोऽस्य ॥ ६३ ।

## ६४. समश्च

समश्च काममनसोः परयोर्मस्य लोपो भवति समासे । सम्यक् कामोऽस्य, सम्यङ् मनोऽस्य । सकामः, समनाः । **केचिदिदं** नाद्रियन्ते । तदसत् । **भाष्यादौ** हि काम–मनसोः समो मलोपो नित्यः ॥ ६४ ।

## ६५. हिततततयोर्यणि

यणि यौ हितततौ, तयोः परतः समो मस्य लोपो भवति । साहित्यम्, सातत्यम् । संहितसन्तताभ्यां यण्णेव नास्तीत्युक्त्वा **भाष्ये** प्रत्याख्यातमिदम् । इह तु लक्षसु संगृहीतार्थं वचनम् ॥ ६५ ।

## ६६. तयोर्वा

तयोर्हितततयोः परतः समो मस्य लोपो भवति वा । सहितम्, संहितम् । सततम्, संततम् ॥ ६६ ।

## ६७. वाऽस्य युड्घञोः पचि मांसस्य

युडन्ते घञन्ते च पचि मांसस्याकारस्य लोपो भवति वा । मांस्पचनम्, मांसपचनम् । मांस्पाकः, मांसपाकः । कस्क आदित्वात् सश्रुतिरनयोरिति वर्णविवेकः । लोपस्यासिद्ध-

त्वान्न विसर्जनीय इति **विमल**समीक्षा । मांपाकः इति **केचित्**। युड्घञोरिति किम्? मांसपाकः । कर्मण्यण् । न्यङ्क्वादित्वात् कत्वम् ॥ ६७।

## ६८. हललाङ्गलयोरीषायाम्

अनयोरकारस्य ईषायां परतो लोपो भवति ।ईषेर्मूर्धन्यान्ताद् युविषयेऽप्यप्रत्ययः। हलीषा, लाङ्गलीषा । यस्तु हलदन्तार्थस्तालव्यमध्य ईशाशब्दो न तस्येह ग्रहणम्। 'हललाङ्गलमनसामीषायाम्' इति **स्मृत्यन्तरे** मनीषया सहैकवाक्यत्वात् । मनीषेति च **धातुप्रदीप – धातुपारायणयो**रीषगतौ इत्यस्योदाहरणम् ॥ ६८।

## ६९ ईषिते च मनसः

ईषायाम् ईषिते च मनसोऽकारस्य लोपो भवति । मनीषा, मनीषितम् ॥ ६९।

## ७०. अव्यक्तानुकरणस्यानेकस्वरस्यात इतौ

अव्यक्तस्यावर्णात्मनः शब्दस्यानुकरणम् अव्यक्तानुकरणम् । तस्यानेकस्वरस्यात इतौ परे लोपो भवति । पटिति, खलिति, तडिति । तिलतुलं यान्त्यगेन्द्रा युगान्ते । अव्यक्तेति किम्? दृशमित्याह । अनेकस्वरस्येति किम्? स्वदिति करोति । अत इति किम् ? खलं करोति । कथं 'मटदिति भङ्गुरतामवाप मध्यम्' इति, दान्तत्वात् ॥७०।

## ७१. वा तस्यैवाभ्यस्तस्य

अभ्यस्तस्य द्विरुक्तस्यानेकस्वरस्याव्यक्तानुकरणस्येतौ परतोऽतस्तकारस्यैव लोपो भवति वा । पटत्पटेति, पटत्पटदिति । खलत्खलेति, खलत्खलदिति । 'स्मरानले वैरिणि मे कृशाङ्ग्या झलज्झलेति ज्वलितं किमङ्गैः' ।एवेति विकल्पपक्षेऽद्भागलोपनिवृत्त्यर्थम् । तडत्तडिति, रणद्रणिति ।समुदायानुकरणं न तु द्विर्वचनमिहेति ।अत इत्येव 'चुटुच्चुटुत्' इति करोति । इताविति किम् ? खलत्खलत् करोति ॥७१।

## ७२. धाञ्नद्धयोरपेरुपसर्गस्यादेः

धाञ्धातौ नद्धे च परतोऽपेरुपसर्गस्यादेर्लोपो भवति वा ।पिदधाति, अपिदधाति । पिधाय, अपिधाय ।पिहितम्, अपिहितम् ।पिधानम्, अपिधानम्, पिनद्धम्, अपिनद्धम् । 'धाञ्नहोः' **इत्येके** पठन्ति । पिनह्य, अपिनह्य । तथा च 'वितत्य शार्ङ्गं कवचं पिनह्य' इति **भट्टिः**। उपसर्गस्येति किम्? सुरामपिधास्यसि, अपिनद्धोऽसि वृषलेन। गर्हायामपेरुपसर्गत्वं नास्ति । आदिग्रहणमुत्तरार्थं च ॥७२।

## ७३. अवस्य तंसे

तंसे परतोऽवस्यादेर्लोपो भवति वा। वतंसः, अवतंसः। तरतावपीच्छन्ति – वतरति, अवतरति ॥७३॥

## ७४. उदः स्थास्तन्भोः

उदःपरयोःस्थास्तन्भोरादिलोपो भवति।उत्थितम्,उत्थाता, उत्थाय,उत्तभ्नाति, उत्तभ्यते।'उत्तम्भितोडुभिरतीवतरां शिरोभिः'।ह्रस्वादर्हो व्यञ्जनस्येति तकारस्य द्वित्वे त्रितयसंयोगोऽपि। उत्थितः, उत्तभ्यते। उत्कन्दको नाम व्याधिरिति कन्दते रूपम्। पृषोदरादित्वाद् वा।'अभ्रवभ्रमभ्रां धुटि रलोपमिच्छन्त्येके'।आशिषि तिक्– अब्धिः, बब्धिः,मब्धिः।वभ्रमभ्रोर्यङ्लुक्चेत्– वावब्धिः,वावब्धः। मामब्धिः,मामब्धः ॥७४॥

## ७५. यि यस्य व्यञ्जनाद् वा

व्यञ्जनात् परस्य यस्य यकारे लोपो भवति वा।आस्ये भवम् आस्यम्, आस्य्यम्। प्राण्यङ्गत्वाद् यः हर्य क्लान्तौ च। हर्यते, हर्य्यते। व्यञ्जनादिति किम्? शय्यते, पलाय्यते।व्यञ्जनादधुटामधुटि लोपो वेति पठन्त्येके, तदा अभ्रवभ्रमभ्राम्– अभ्यते, वभ्यते, मभ्यते ॥७५॥

## ७६. धुटो धुट्येकवर्गे

व्यञ्जनात् परस्य धुटः समानवर्गे धुटि लोपो भवति वा।ऊर्जयतेः क्विप् ऊर्क्, ऊर्गायति, उर्ग्गायते, ऊर्घातयति, ऊर्ग्घातयति। मृजेर्दिस्योः अमार्ट्, अमार्डीनः, अमार्ड्डीनः। भिन्तः, भिन्त्तः, अभिन्थाः, अभिन्त्थाः। रुन्धेः, रुन्द्धेः। पिण्ढि, पिण्ड्ढि। अर्देः क्तिः अर्त्तिः,अर्त्तिः।धुट इति किम्? शार्ङ्गवलिकः,शार्ङ्गम्।धुटीति किम्? शक्थ्ना। एकवर्ग इति किम्? तर्प्ता। वर्ग इति किम्? ईर्त्सति, भर्त्सनम्। व्यञ्जनादिति किम्? भेत्ता, राद्धा ॥७६॥

## ७७. शषसेष्वघोषपरेषु विसर्जनीयस्य

अघोषः परो येभ्यस्तेषु शषसेषु विसर्जनीयस्य लोपो भवति वा।कश्च्योतति, कःश्च्योतति।कश्तिप्,कःश्तिप्ः।कष्ठीवति,कःष्ठीवति।निस्फुरति,निःस्फुरति। स्फुरिस्फुल्योर्निर्निविभ्यः इति धात्वादेर्मूर्धन्यः।कस्फुलति, कः स्फुलति।कस्पृशति, कः स्पृशति।'यस्तोत्रख्यातवीर्यः' इति ॥७७॥

## ७८. न नञ्वृत्त्यकोरेषसात्

एषात् साच्च परस्य विसर्जनीयस्य नञ्समासेऽकि च लोपो न भवति। अनेषो गतः, असो गतः। 'प्रतीयते सम्प्रति सोऽप्यसः परैः' (शिशु० १/६९)। एषकः कृतः, सकः कृतः। एकवचनम् अयथासंख्यार्थम्। कथम् अनेष आस्ते, सक आस्ते? श्रुतत्वादेषसाश्रयो लोपो बाध्यते ॥७८।

## ७९. वा गीर्धूरह्नां पत्यौ रः

एषां विसर्जनीयस्य पत्यौ वा रेफो भवति। गीर्प्पतिः, गीष्पतिः। धूर्प्पतिः, धूष्पतिः। गीष्पति-धूष्पत्योः कस्क आदित्वाद् नाम्युपधविसृष्टस्य मूर्धन्यः। **अपरे** तु कस्क आदौ न पठन्ति। अहर्प्पतिः, अहःपतिः। भुवर्लोको धूर्पुत्रो वेत्युदाहृत**मन्यैः**। स्वर्पतिः स्वःपतिरिति **काश्मीरकेण**। तदिह 'उषर्बुधः' इति च पृषोदरादित्वात्। मण्डूकप्लुत्या समासानुवर्तनाद् इह न स्यात्। इयं गीः पतिरस्याः धीषणः। इयं धूः पतिरस्याः वाहीकः ॥७९।

## ८०. अह्नोऽरात्राद्यनघोषे

रात्रादेरन्यस्मिन्ननघोषे स्वरे घोषवति च अह्नो विसर्जनीयस्य रेफो भवति। अहरत्र, अहरूर्ध्वम्, अहर्भूतम्, अहर्गणः। रात्रादिनिषेधः किम्? अहश्च रात्रिश्च अहोरात्रः। अहोरूपम्। अहोरथन्तरं साम। 'अहोरात्रिं च शेते' इत्यपीच्छन्ति। **भाष्ये** त्वेतन्न चिन्तितम्। एष्वेव निषेधो रात्रिरूपरथन्तरेष्विति **शाकटायनीये** त्रिमुनिमते च, तस्माद् अहारजनीति रत्वं स्यादेव। **चान्द्रे** तु रेफमात्रेऽसौ निषेधः, तथाच 'यातः शनैः कृत्स्नमहोरयेन' इति प्रत्युदाहृतं तैः। अनघोष इति किम्? अहःसाधु ॥८०।

## ८१. न सिलोपो व्यञ्जनात्

व्यञ्जनात् सिलोपे अह्नो रो न भवति। हे दीर्घाहो ग्रीष्म, दीर्घाहा निदाघः। हे ह्रस्वाहो हेमन्त, ह्रस्वाहा माघः, हे ह्रस्वाहोऽपेहि, दीर्घाहा आप्तः। स्त्रीपुंसयोरह्नः सौ दीर्घमिच्छन्ति। व्यञ्जनादिति व्यञ्जनाच्चेत्ययं लोपो लक्ष्यते। इह तु स्यादेव। अहर्वत्, अहर्वान्, अहर्वाते। अस्यादेः स्वरघोषवतोः प्राप्तौ प्रतिषेधोऽयम् ॥८१।

## ८२. स्यादौ च

घोषवदादौ स्यादौ च अह्नो रो न भवति। अहोभ्याम्, अहोभिः, अहोभ्यः ॥८२।

## ८३. एकाधिकरणे प्रचेतसो राज्यवृत्तौ वा

समानाधिकरणे राजनि परतोऽसमासे प्रचेतसो विसर्जनीयस्य वा रेफो भवति। हे प्रचेतो राजन्! हे प्रचेता राजन्! एकाधिकरण इति किम्? जुहुधि प्रचेतो राजन्नेधि रथी। आवृत्ताविति किम्? प्रचेतो राज्ञः। प्रचेतो राजानो ग्रामाः। **भाष्ये** तु– वाग्रहणं न पठ्यते। असमासे चायं विधिरित्यपि नोक्तम्। राज्ञीत्युपधालोपलक्षितस्य ग्रहणादिह न भवति– हे प्रचेतो राजन्! राजतेः शन्तृङ्॥८३।

## ८४. द्विश्छः सुसन्निकर्षे

अधिकारोऽयम्। सुसन्निकर्षः संहिता॥८४।

## ८५. आङ्माभ्याम्

आङ्माभ्यां परश्छकारो द्विर्भवति। आच्छाया, माच्छिदत्। आङो ग्रहणादिह वा स्यादेव– आच्छाया· नु सा। आछाया नु सा। परेण विकल्पे प्राप्ते नित्यार्थोऽयमारम्भः। अयं माच्छादयति। अयं माछादयति। अव्ययेन साहचर्याद् अनव्ययान्न स्यात्॥८५।

## ८६. गुरोः सामर्थ्ये वा

अन्योऽन्यमभिसम्बन्धः सामर्थ्यम्। कार्यिनिमित्तपदयोः सामर्थ्ये गुर्वक्षरात् परश्छकारो द्विर्भवति वा। सेनाच्छत्रम्, सेनाछत्रम्। जगतीच्छन्दः, जगतीछन्दः। वधूच्छत्रम्, वधूछत्रम्। रथेच्छत्रम्, रथे छत्रम्। रैच्छाया, रैछाया। गोच्छाया, गोछाया। नौच्छाया, नौछाया। सन्ध्यक्षराण्यदीर्घाण्यपि गुरूण्येव। कथमन्यथा एधाञ्चक्रे, ओखाञ्चक्रे। गुरोरिति किम्? साधुच्छत्रं नित्यं स्यात्। सामर्थ्य इति किम्? ह्रीच्छति, तिष्ठतु कन्याच्छन्दस्त्वमधीष्व॥८६।

## ८७. प्लुताद् गुर्वादेशात्

गुर्वक्षरादेशात् प्लुतात् परश्छकारः सामर्थ्ये वा द्विर्भवति। रिपू रिपूच्छेदयिष्यामि। रिपू रिपू छेदयिष्यामि वाम्। एहीह सुभूतेच्छात्र, एहीह सुभूते छात्र। गुर्वादेशाद् इति किम्? चौर चौरच्छेदयिष्यामि त्वाम्। नित्यं स्यात्॥८७।

## ८८. ह्रस्वादर्हो व्यञ्जनस्यास्वरसंयोगे

ह्रस्वात् परस्य व्यञ्जनस्यारेफहकारस्य स्वरसंयोगाभावे वा द्विर्भवति। रूपम् इत्यपेक्ष्य षष्ठी। पुत्त्रः, पुत्रः। चित्त्रम्, चित्रम्। रुद्ध्यते, रुध्यते। गृद्ध्रः, गृध्रः।

क्लृप्प्यते, क्लृप्यते । न भ्रमतीत्यब्भ्रम्, अभ्रं च नभः । अभ्रतीत्यब्भ्रम्, अभ्रं च घनः । अपो बिभर्तीति, अब्भ्रमिति मूलविभुजादित्वात् क इत्यपरे । तदा– 'भ्रमयन्नुपैति मुहुरभ्रमयम्' इति **माघयमकम्** ।'भेरीरेभिभिरभ्राभैः' इति द्विर्वचन – दुर्घटं च चिन्त्यम् । यदि ध्यायतेः कः मध्यो दकारवानेवेति **वृद्धाः** ।

**सुराजितह्रियो यूनां तनुमध्यासते स्त्रियः ।**

**तनुमध्याः क्षरत् स्वेदमुराजितमुखेन्दवः ॥**

इति यमकमनेनाधेर्धस्य द्वित्वे समर्थनीयम् । **रुद्रस्तु** द्विव्यञ्जनमपि मध्यशब्दमाह । **भाष्य**स्थित्या तु योगवाहानामपि द्वित्वेन भवितव्यम् । अय ×× काम्यति, अय × काम्यति । पय ɯɯ पीतम्, पय ɯ पीतम् । अस्वरसंयोग इति प्रसह्य (ज्य) प्रतिषेधात् विरामेऽपीति मतम् । त्वक्क्, त्वक् । मरुत्त्, मरुत् । ह्रस्वादिति किम्? आध्वनति, गात्रम्, गोत्रम्, वाक् । **काशिकादौ** तु वाक्क्, वाग्ग् इत्युदाहृतम् ।

**केचित्** सन्ध्यक्षरादपीच्छन्ति 'यस्तोत्रख्यातवीर्य्यः' इति । स्तुतुदोष्ट्रनि विसर्जनीयलोपे सति रूपसाम्यं स्यात् । अर्ह इति किम्? निर्गतम्, जागर्त्ति । रलोपे दीर्घो मा भूत् । उह्यते ब्रह्म । व्यञ्जनस्येति किम् ? तितउ धान्यं दधि ऋणम् । अस्वरसंयोग इति किम् ? समिधि, दृशदि, इन्द्रः, चन्द्रः ॥८८।

## ८९. स्वराद् रहाभ्यामशिटो व्यञ्जनस्य

स्वरात् परौ यौ रेफहकारौ ताभ्यां परस्याशिटो व्यञ्जनस्य वा द्विर्भवति । कर्क्कः, कर्कः । अर्ग्घः, अर्घः । वर्द्धते, वर्धते । जागर्त्ति, जागर्ति । प्रह्ल्लादते, प्रह्लादते । निह्न्नुते, निह्नुते । वाह्ल्लीकम्, वाह्लीकम् । स्वरादिति किम्? अभ्र्यते संह्लादते । अनुस्वारस्य हि णत्वविधावेव स्वरत्वमिष्टम् । उक्तं हि – 'व्यञ्जनता स्वरसन्धौ स्वरता णत्वविधौ योगवाहानाम्' । × कɯपोः परगमनार्थं व्यञ्जनतेष्टाऽनु-**शिष्टिकृतः** । केवलानामनुच्चारणाद् वर्णान्तरयोगं वहन्तीति **योगवाहा** अनुस्वारादयः । सामान्येनाट्सूपदेशो योगवाहानामिति **भाष्यात्** । स्वरादिव योगावाहादपि द्वित्वेन भवितव्यम् । अशिटः किम्? दर्शयति, वर्षति, कार्सरम्, बर्हिः । **तन्त्रान्तरे** रेफात् शषसहानां स्वरे निषेधाद् व्यञ्जने काश्श्र्यम्, पार्ष्ष्णिरिति द्विः स्यादेव । प्रह्राद इति रस्य द्वित्वे पदमध्येऽपि रलोपः । यथा नदर्दस्पदृर्धोश्चर्करीतयोः सौ दधो रत्वे अनानाः, अपास्पारिति ॥८९।

## १०. शिटः प्रथमाद्वितीयाभ्याम्

प्रथमाद्वितीयाभ्यां परस्य शिटो वा द्विर्भवति । त्वक्श्शयनम्, त्वक्शयनम् । त्वख्श्शयनम्, त्वख्शयनम् । षट्ष्षण्डः, षट्षण्डः । षठ्ष्षण्डः, षठ्षण्डः । अप्स्सरसः, अप्सरसः । अफ्स्सरसः, अफ्सरसः । शिट इति किम् ? वाक्चरति । प्रथमाद्वितीयाभ्यामिति किम् ? सर्पिष्षु, धनुष्षु ॥१०।

## ११. तस्मात् तयोः

तस्माच्छिटः परयोः प्रथमद्वितीययोर्द्विर्भवति वा । प्रायश्च्चित्तम्, प्रायश्चित्तम् । वृश्च्चति, वृश्चति । अयश्च्छाया, अयश्छाया । ष्ट्ठीवति, ष्ठीवति । स्त्थाता, स्थाता ॥११।

## १२. वर्गादञोऽन्तस्थायाः

ञकारवर्जिताद् वर्गाक्षराद् अन्तस्थाया द्विर्भवति वा । नद्य्यत्र, नद्यत्र । वध्व्वत्र, वध्वत्र । वाग्व्वस्ति, वाग्वस्ति । नेनिज्व्वहे, नेनिज्वहे । शुक्ल्लः, शुक्लः । वर्गादिति किम् ? शिष्यः, आस्वहे । अञ इति किम् ? राञ्यौ, प्राञ्यौ । अन्तस्थाया इति किम् ? सिक्तम्, दग्धम् ॥१२।

## १३. तस्यास्तस्य

तस्या अन्तस्थायाः परस्य तस्याञो वर्गस्य द्विर्भवति वा । वल्क्कनम्, वल्कनम् । उल्म्मुकम्, उल्मुकम् । कल्प्पः, कल्पः । अश्वयुक्करोति, अश्वयु करोति । मूलव्प्पचति, मूलव् पचति । हल्ग्गीयते, हल्गीयते ॥१३।

## १४. न पुत्रस्यादिन् पुत्रादिनोराक्रोशे

आदिन्- पुत्रादिनोः परयोराक्रोशे गम्यमाने पुत्रस्य द्विर्न भवति । पुत्रादिनी वृषलि ! भूयाः पुत्रपुत्रादिनी वृषलि ! भूयाः । आक्रोश इति किम् ? पुत्रपुत्रादिनी मत्सी, पुत्रपुत्रादिनी व्याघ्री । संयोगावयवव्यञ्जनस्य सजातीयस्यैकस्यानेकस्योच्चारणाभेद इति **चूर्णिः । शाकटायनादयस्तु** मन्यन्ते भिन्नमेकम् अनेकस्मात् । भिन्नयोश्च कथमभिन्ना श्रुतिः, तदयं प्रकरणोपक्रमः ॥१४।

## १५. द्वयोः सुसन्निकर्षः

वर्णान्तराव्यवहितयोर्द्वयोर्वर्णयोः सुसन्निकर्षो भवति । स तु निरतिशयमानन्तर्यम् अर्धमात्राकालमात्रेणाव्यवायः संहितोच्यते । पाणी, कुण्डे, नद्यौ, वध्वौ, प्लवते, गायति । संहितायामेव सन्धयः स्युः ॥१५।

## ९६. धातूपसर्गयोरुपसर्गैः

धातूपसर्गयोरुपसर्गैः सह सुसन्निकर्षो भवति । अधीते, प्रोर्णोति, अध्येति, उपैति । उपसर्गस्य च व्याक्रियते व्युदस्यति ॥९६।

## ९७. पदयोरवृत्तौ वा

अवृत्तौ असमासे द्वयोः पदयोः सुसन्निकर्षो वा भवति । इह अम्भः इहाम्भः । **इह इन्द्रः** इहेन्द्रः । इह उष्ट्रः इहोष्ट्रः । इह ऐन्द्री इहैन्द्री । अवृत्ताविति किम्? कुट्यर्थः, जान्वर्थः । इहोत्तरपदस्य पदत्वं नास्तीति चेत् तर्हि त्रिपदायां वृत्तौ प्रयोजनम् । मत्ताल्पमातङ्गं वनम् ॥९७।

## ९८. भोः पदान्तौ य्वावीषत्पृष्टतरौ

भोशब्दात् परः पदान्तो यकार ईषत्पृष्टतरोऽनुशिष्यते । भोयत्र । भगोऽघोभ्यामपि स्मरन्ति । भगोयत्र, अघोयत्र । पदान्त इति किम्? भो यासि । वग्रहणमुत्तरार्थम् ॥९८।

## ९९. अवर्णाद् उञि

अवर्णात् परौ पदान्तौ य्वौ उञि परत ईषत्पृष्टतरावनुशिष्येते । कयु, देवायु, तस्मायु, पटवु, पटावु । अवर्णादिति किम्? नद्यु । उञीति किम्? सयुः ॥९९।

## १००. वा स्वरे

अवर्णात् परौ पदान्तौ य्वौ स्वरे परतः ईषत्पृष्टतरौ अनुशिष्येते वा । तयार्घ्याः, तयार्घ्याः । तस्मायुदकम्, तस्मायुदकम् । पटवेहि, पटवेहि । कयिह, कयिह । देवायिह, देवायिह ॥१००।

## १०१. दूराद्धूतौ प्लुतो हैहयोः

'है-हे' इत्येतयोः स्वरो दूराद्धूतौ प्लुतो भवति । है३ अम्ब, है३ इन्द्र । हे३ अम्ब, हे३ इन्द्र । दूरादिति किम् ? आगच्छ हायम्ब, आगच्छ ह इन्द्र । यतो यत्र प्राकृतप्रयत्नजो ध्वनिरव्याहतो न संचरति तत् ततो दूरम् ॥१०१।

## १०२. वाक्यस्वराणामन्त्यः

समर्थः पदसमूहो **वाक्यम्**। दूराह्वाने वाक्यस्वराणामन्त्यस्वरः प्लुतो भवति। आगच्छ भो देवदत्त[२]। वाक्यग्रहणं पदमात्रस्यान्त्यो मा भूत्। स्वरग्रहणम् उपधाप्लुतत्वार्थम्। आगच्छ भो इन्द्रवर्म[२]निति ॥१०२।

## १०३. वाऽनृद् गुरुः पर्य्यायेण

ऋकारवर्जितो गुरुर्दूराह्वाने पर्यायेण प्लुतो भवति वा। आगच्छ भो देवदत्त[२], आगच्छ भो दे[२]वदत्त, आगच्छ भो देवद[२]त्त। अनृदिति किम्? आगच्छ भो ऋष्यध्वज! गुरुरिति किम्? आगच्छ भो सुरथ। श्रुतत्वादाहूयमानस्वराणामेवैष विधिः ॥१०३।

## १०४. नामगोत्रयोरस्त्रीशूद्रप्रत्यभिवादे

अभिवादितेन गुरुणा अभिवादकस्याशीः **प्रत्यभिवादः**। अस्त्रीशूद्रयोः प्रत्यभिवादे वाक्यस्वराणामन्त्यः स्वरः प्लुतो भवति। स चेन्नामगोत्रयोरवयवः स्यात्। अभिवादये वशिष्ठोऽहम्। आयुष्मानेधि वशिष्ठ[२]। अभिवादये कौण्डिन्योऽहम्, आयुष्मानेधि कौण्डिन्य[२]! नामगोत्रयोरिति किम्? अभिवादये विप्रोऽहम्, आयुष्मानेधि विप्र! **भाष्ये** तु नामगोत्रयोरिति न चिन्तितम्। न स्त्रीशूद्रासूयकेष्विति च समर्थितम्। स्त्रीशूद्रप्रतिषेधः किम्? अभिवादये गार्ग्यहम्। आयुष्मती भव गार्गि! अभिवादये इन्द्रदासोऽहम्, शुभंयुरेधीन्द्रदास! ॥१०४।

## १०५. राजन्यविशां वा

प्रत्यभिवादे वाक्यस्वराणामन्त्यस्वरः प्लुतो भवति वा। स चेद् राजन्यविशां नामगोत्रयोरवयः स्यात्। अभिवादये भरतोऽहम्, आयुष्मानेधि भरत[२], आयुष्मानेधि भरत। एवम् आयुष्मानेधीन्द्रवर्म[२]न्, आयुष्मानेधीन्द्रवर्मन्। वैश्यस्य च- अभिवादये इन्द्रपालिततोऽहम्, आयुष्मानेधीन्द्रपालित[२], आयुष्मानेधीन्द्रपालित ॥१०५।

## १०६. चितीवार्थे

इवार्थे चिच्छब्दे प्रयुज्यमाने वाक्यस्वराणामन्त्यस्वरः प्लुतो भवति वा। वारिचिद् वहसि[२], वारिचिद् वहसि। वारीवेत्यर्थः। ज्योतिश्चिद् वहसि[२], ज्योतिश्चिद् वहसि। ज्योतिरिवेत्यर्थः ॥१०६।

## १०७. हेः प्रतिवचने

प्रतिवचनमुत्तरम्। तत्र हिशब्दस्य स्वरः प्लुतो भवति वा। अकार्षीः कटं वृषल! अकार्षीः हि[३], अकार्षीः हि। प्रतिवचन इति किम्? वृषो वहति रथं हि ॥१०७।

## १०८. भर्त्सने पर्य्यायेणाभ्यस्तस्य

भर्त्सने द्विरुक्तस्यान्त्यस्वरः पर्य्यायेण प्लुतो भवति वा। चौर[३] चौर! दण्डयिष्यामि त्वाम्, चौर चौर[३] दण्डयिष्यामि त्वाम्, चौर चौर दण्डयिष्यामि त्वाम्। चौर[३] चौर! बन्धयिष्यामि त्वाम्, चौर चौर[३] बन्धयिष्यामि त्वाम्, चौर चौर बन्धयिष्यामि त्वाम् ॥१०८।

## १०९. अङ्गयुक्तस्याख्यातस्याकाङ्क्षायाम्

अङ्गेत्यनेन निपातेन युक्तस्याख्यातस्याकाङ्क्षायामन्त्यः स्वरः प्लुतो भवति वा। अङ्ग! दीव्यसि[३] पुरा बुध्यसे जाल्म, अङ्ग! दीव्यसि पुरा बुध्यसे जाल्म। अङ्ग! रमसे[३] एतर्हि खिद्यसे जाल्म। अङ्ग! रमसे एतर्हि खिद्यसे जाल्म। आख्यातस्येति किम्? अङ्ग ब्राह्मणक! पलाण्डूनत्सि। आकाङ्क्षायामिति किम्? अङ्ग! हन्यसे, नात्रान्यदपेक्ष्यते। भर्त्सन इत्येव– अङ्ग! जुहुधि पुराधीषे ब्रह्म ॥१०९।

## ११०. विचारणे पूर्वस्य

विचारणे पूर्वस्यान्त्यः स्वरः प्लुतो वा भवति। अहिर्नु[३] रज्जुर्नु, अहिर्नु रज्जुर्नु। स्थाणुर्नु[३] पुरुषो नु, स्थाणुर्नु पुरुषो नु। **तन्त्रान्तरे**ऽन्येऽपि प्लुतविषयाः स्युः, ते पुनरन्यस्य न सम्मताः। सर्व एव प्लुता विभाषयितव्या इति स्मृतेश्च नात्यन्तमिहादरः ॥११०।

## १११. सुट् परादिरचादौ

सुड् भवति, स च चकारादेरन्यत्र परादिः। एतद् द्वयमधिकर्तव्यम्। सुड् उदाहरिष्यते। परादित्वे च प्रयोजनम्। समस्कार्षीदिति सुटः प्रागट्। सञ्चस्करुरिति ससुटो द्विर्वचनम्, धातोः संयोगादित्वाद् गुणश्च। अचादाविति किम्? हरिश्चन्द्रः, प्रायश्चित्तम्, आश्चर्यम्। अपरादित्वे विसर्जनीयः ॥१११।

## ११२. समः कृञ्यस्वार्थे

स्वस्मादर्थान्तरे वर्तमाने कृञि समः परः सुट् परादिर्भवति । पदानि संस्कुरुते, व्युत्पादयतीत्यर्थः । लवणेन संस्कुरते व्यञ्जनम् । प्रकर्षयतीत्यर्थः । अस्वार्थ इति किम्? संकृतिः । कृञत्र स्वार्थ एव समा विशिष्यते ॥११२।

## ११३. पर्य्युपात् समूहे

परेरुपाच्च समूहेऽर्थे वर्तमाने कृञि सुट् परादिर्भवति । उपस्कृतं रथानाम् । परिष्कृतं रथानाम् । समूह इत्यर्थः । संस्कृतं रथानामिति समूहे पूर्वेण ॥११३।

## ११४. उपात् प्रतियत्नविकृत्यध्याहारेषु

एष्वर्थेषु कृञि उपात् सुट् परादिर्भवति । उत्कर्षाधानं प्रतियत्नः । केशानामुपस्कुरुते । स्वरूपान्यथात्वं **विकृतिः** । उपस्कृतान्यङ्गानि मुमूर्षोः । गम्यमानार्थस्य कस्यचिदेकदेशस्य स्वरूपेणोपादान**मध्याहारः** । उपस्कृत्य व्याचष्टे ॥११४।

## ११५. किरिच्छेदे

छेदविषये किरतावुपात् सुट् परादिर्भवति ।उपस्किरति व्रीहीन् छेत्तुम्, उपस्कारं व्रीहयो दायन्ते, विक्षिप्येत्यर्थः । इह क्त्वार्थे णम् इष्यते ॥११५।

## ११६. प्रतेश्च हिंसार्थे

हिंसार्थे किरतौ प्रतेरुपाच्च सुट् परादिर्भवति । चौरं प्रतिस्किरति । 'उरोविदारं प्रतिचस्करे नखैः' (शिशु०१/४७) । व्यालानुपस्किरति, 'अरीनुपस्कर्तुमयं ममोद्यमः' ॥११६।

## ११७. अपाच्चतुष्पाच्छकुनिषु हृष्टभक्षनिवासार्थिष्वालेखने

हृष्टेषु भक्षार्थिषु निवासार्थिषु च कर्तृषु चतुष्पाच्छकुनिष्वालेखने वर्तमाने किरतावपात् सुट् परादिर्भवति ।अपस्किरते षण्डो हृष्टः ।अपस्किरते कुक्कुटो भक्षार्थी, अपस्किरते श्वा निवासार्थी । आलिखतीत्यर्थः । आलेखन इति किम्? अपकिरति तृणानि श्वा निवासार्थी ॥११७।

## ११८. प्रात् तुम्पि गोकर्तृके

गोकर्तृके तुम्पतौ प्रात् सुट् परादिर्भवति । प्रस्तुम्पति गौः । गोकर्तृक इति किम् ? प्रतुम्पत्यश्वः ॥११८।

## ११९. वृत्तौ

वृत्तिरेकार्थीभावः । स इह समासेऽवशिष्यते । तत्र वक्ष्यमाणो विधिर्वेदितव्यः ॥ ११९ ।

## १२०. विष्करो विकिरे

विकिरेऽर्थे वेः किरे सुटि परिनिविभ्यः सितसयसिवुसहसुटामिति मूर्धन्ये च 'विष्किरः' इति निपात्यते । इहार्थाद् विभाषा । लावकादयः कियन्त एव शकुनयो विकिराः परिगण्यन्ते । भक्ष्याः सर्वे शकुनयो विकिरा इति **वैयाकरणाः** । **नामकाण्डे** तु शकुनिमात्रपर्यायावेतो ॥१२०।

## १२१. कास्तीराजस्तुन्दमस्करमस्करिणः

एते ससुटो निपात्यन्ते । ईषत् तीरमस्य । अजस्येव तुन्दमस्य । कास्तीरम् अजस्तुन्दं च नगरम् । मा क्रियतेऽनेनेति मस्करो वेणुर्दण्डश्च । मा कर्तुं शीलमस्येति मस्करी परिव्राट् ॥१२१।

## १२२. अपस्करादयश्च

अपस्करादयश्च ससुटो निपात्यन्ते ।

**अपस्करो रथस्याङ्गे पुरीषे स्यादपस्करः ।**
**कुस्तुम्बुरू च धन्याके सातत्ये त्वपरस्परः ॥ १ ।**
**प्रायस्यानशनार्थस्य चित्ते चित्तौ विभाषया ।**
**प्रायसा संग्रहो नैव न ह्येषोऽनशनार्थकः ॥ २ ।**
**वृक्षे वनस्पती रूढो कशायां स्यात् प्रतिष्कशः ।**
**आङः पदे प्रतिष्ठायां रथस्पा सरिदन्तरे ॥ ३ ।**
**माने गवामसेव्ये च गवां गम्ये च गोष्पदम् ।**
**वृक्षे कारस्करो देशे पारस्कर इति स्मृतम् ॥ ४ ।**
**परःशताद्यास्ते येषां परां संख्या शताधिकात् ।**
**क्रियाविनिमयेऽन्योऽन्यपरस्परौ तथा स्मृतौ ॥ ५ ।**
**सुषामादिगणे पाटान्मूर्धन्यो गोष्पदे भवेत् ।**
**प्रतिष्कशे रथस्पायामपि चान्द्रैरयं मतः ॥ ६ ।**

## १२३. प्रहरिभ्यामृषौ कण्वचन्द्रयोः

कण्वचन्द्रयोः प्रहरिभ्यां यथासंख्यम् ऋषावर्थे सुड् भवति। प्रगतं कण्वं पापमस्य प्रस्कण्वो नाम ऋषिः। हरिरिव चन्द्रो रमणीयः, हरेरिव चन्द्रो दीप्तिरस्येति वा। हरिश्चन्द्रः। ऋषाविति किम् ? यज्वा हरिचन्द्रो युवा ॥१२३।

## १२४. आङश्चर्य्येऽद्भुते

अद्भुतेऽर्थे आङश्चर्ये सुड् भवति। आश्चर्यम्। अद्भुत इति किम्? आचर्यो ग्रामः ॥१२४।

## १२५. करणे भद्रोष्णयोर्मुः

करणशब्दे परे भद्रोष्णयोर्मुरागमो भवति। भद्रङ्करणम्, उष्णङ्करणम् ॥१२५।

## १२६. इन्धेऽग्निभ्राष्ट्रयोः

इन्धे परे अग्नि-भ्राष्ट्योर्मुरागमो भवति। इन्धेरिनन्तादल् – अग्निमिन्धः, भ्राष्ट्रमिन्धः ॥१२६।

## १२७. प्राताण्णे श्येनतिलयोः

प्रातात् णप्रत्यये परे श्येनतिलयोर्मुरागमो भवति। श्येनपातस्तिलपातश्चास्यां क्रियते इति श्येनम्पाता मृगया, तैलम्पाता पितृक्रिया। घञ्युत्तरपदात् सोऽस्यां क्रियते इति णं वक्ष्यति पातेन व्यवहिते णेऽर्थात् ॥१२७।

## १२८. पृणप्रीणयोर्लोकस्य

पृणप्रीणयोः परयोर्लोकस्य मुरागमो भवति। लोकम्पृणः, लोकम्प्रीणः। इदम् अप्रमाणं **चान्द्रकाशिकादौ** ॥१२८।

## १२९. धेनुम्भव्यामध्यन्दिनमनभ्यासमित्यः

एते न्वागमे सति निपात्यन्ते। धेनुर्भविष्यति धेनुम्भव्या। भव्यगेयेति कर्तरि यः। निपातनात् पूर्वनिपातः। दिनस्य मध्यं **मध्यन्दिनम्।** अनभ्यासे दूरे इत्यः अनभ्यासम् इत्यः, परिहार्यसन्निधिरित्यर्थः। धेनुम्भव्या वेति पठन्त्**येके** ॥१२९।

## १३०. ईयकारकयोर्दुरण्यस्य

ईयप्रत्यये कारकशब्दे च परे अन्यस्य दुरागमो भवति । अन्यस्येदम् अन्यदीयम् । अन्यत्कारकम् ।।१३०।

## १३१. अषष्ठीतृतीयान्तस्याशीराशास्थास्थितेषु

अषष्ठीतृतीयान्तस्यान्यस्याशीराशास्थास्थितेषु परेषु दुरागमो भवति ।अन्यदाशीः, अन्यदाशा, अन्यदास्था, अन्यदास्थितः । अषष्ठीतृतीयान्तस्येति किम् ? अन्यस्याशीः । अन्येनाशा अन्याशा, अन्येनास्था अन्यास्था, अन्येनास्थितः अन्यास्थितः ।।१३१।

## १३२. ऊत्युत्सुकरागेषु

एष्वषष्ठीतृतीयान्तस्यान्यस्य दुरागमो भवति । अन्यदूतिः । अन्यदुत्सुकः । अन्यद्रागः । अषष्ठीतृतीयान्तस्येति किम् ? अन्यस्यौतिः अन्यौतिः । ऊटो वृद्धिः । अन्येनोत्सुकः **अन्योत्सुकः** । अन्येन रागः **अन्यरागः** ।।१३२।

## १३३. वाऽर्थे

अषष्ठीतृतीयान्तस्यान्यस्य अर्थशब्दे परे दुरागमो भवति वा ।अन्यदर्थः **अन्यार्थः** । अषष्ठीतृतीयान्तस्येत्येव । अन्यस्यान्येन वा अर्थः अन्यार्थः ।।१३३।

## १३४. उद् दुरो ध्ये टवर्गश्च परादेः

ध्ये परतो दुरोऽन्तस्य उद् भवति । परस्यादेष्टवर्गादेशश्च । दुर्ध्यायति इति दूढ्यः ।।१३४।

## १३५. खलि दाशूनाशिदभेषु

खलन्तेषु दाश्रादिषु दुरोऽन्तस्य उद् भवति । परस्यादेष्टवर्गादेशश्च । दुर्दाश्यते **दूडाशः** । दुर्नाश्यते **दूणाशः** । दुर्दभ्यते **दूडभः** । अतो निपातनात् खलि दम्भेर्नलोपः ।।१३५।

## १३६. षषो दन्तृदशनोः

दन्तृदशनोः परतः षषोऽन्तस्य उद् भवति, परस्यादेष्टवर्गादेशश्च । षड् दन्ता अस्य **षोडन्** वत्सः । बहुव्रीहौ सुसंख्यादिभ्यो वयसि दन्तस्य दन्तृ । षड्भिरधिका दश **षोडश** ।।१३६।

## १३७. वा धाप्रत्यये

धाप्रत्यये षषोऽन्तस्य उद् भवति वा। तत्संनियोगेन परस्यादेष्टवर्गादिशश्च। संख्यायाः प्रकारे धा। षोढा, षड्धा। षषः स्वार्थेऽपि धामिच्छन्ति। तत्रैवायं विधिरिति **वार्त्तिकविदः**। नानार्थविहितस्येदं ग्रहणमिति **काशिकादौ**। प्रकाराधिकारे षोढा वेति च **तन्त्रान्तरम्**। **नैयासिकास्तु** त्वं विकल्प्य ढत्वं नित्यमादिशन्ति। तेषां षोढा, षड्ढेति। **भाष्यटीकायां** तु सहोभयं विकल्पितमिति। **शाकटायनानामपि** मतमेतत्, तदिह प्रमाणम् ॥१३७।

## १३८. अन्तमान्तितमान्तियान्तितोऽन्तियदः

एते निपात्यन्ते। अन्तिकस्य तमे तादिलोपः कादिलोपश्च। अन्तमः, अन्तितमः। यतसोर्वा कादिलोपः। अन्तिके भवः अन्तियः। अन्तिकादन्तितः, अन्तिके सीदति अन्तिषत्। इह मूर्धन्यश्च निपात्यते ॥१३८।

## १३९. ईदपो द्व्यन्तरः

द्वेरन्तरश्च परस्याप आदेरीद् भवति। द्वीपः, अन्तरीपः। पन्थ्यप्पुर इत्यत् ॥१३९।

## १४०. प्रादेरनवर्णात्

नामिव्यञ्जनान्तात् प्रादेः परस्याप आदेरीद् भवति। परीपः, नीपः अधीपः, समीपः, दुरीपः। अनवर्णादिति किम्? प्रापः, परापः। समाप इति समाङ्पूर्वस्य ॥१४०।

## १४१. अनूपो देशे

देशेऽर्थे अनोः परस्याप आदेरुद् भवति। अनूपो देशः। देश इति किम्? अन्वीपः ॥१४१।

## १४२. बृहस्पतिबाड्वलिगव्यूतिपृषोदरादीनि

एतानि निपात्यन्ते। बृहतां पतिः **बृहस्पतिर्**देवता। वाचं वदतीति **वाग्वादः**, तस्यापत्यं **बाड्वलिः**। गस्य डत्वम्, दस्य लत्वम्, धातोर्ह्रस्वश्च। गवां यूतिः **गव्यूतिः**। पृषदुदरम् अस्य **पृषोदरः**। पृषोद्यानम्। बलादाहतं कमलेन **बलाहको** मेघः। धुरन्धरस्तु **भागुरि**मते धुराशब्देन धारेः खे ह्रस्वोऽपीष्यते। गानं धर्मोऽस्येति **गन्धर्वः**। पिशितम् अश्नातीति **पिशाचः**। शवानां शयनम् **श्मशानम्**। मयुरिव रौतीति **मयूरः**।

हनुरस्यास्तीति **हनूमान्, हनुमान्।** मरुता दत्तः **मरुत्तः,** दस्य लुक्। आध्यायतीति **आढ्यः**। अश्वस्येव स्थामोर्जितमस्य **अश्वत्थामा**। अश्वास्तिष्ठन्त्यस्मिन्निति **अश्वत्थः।**

एवं कपित्थः, दधित्थः। एषु सकारस्य तकारः। उद्गतोऽम्बरम् **उदुम्बरः।** इहोत्वमात्रम्। ऊर्ध्वं खन्यते इति **उदूखलम्, उलूखलं** च। नस्य नित्यं लत्वम्, दस्य तु वा। मध्ये ऊत्वं च। केनोभ्यते इति **कुम्भः**। कुमुद्दालयति कुद्दालः। किखिभिरिन्ध्यते इति **किष्किन्ध्या,** इनन्ताद् इन्धेर्यः। इन्धेरलि किष्किन्धेति चेच्छन्ति। किं कलयतीति **किष्कुः**। डुरौणादिकः। त्रिष्वपि मूर्धन्यः। व्रतिनः सीदन्त्यस्यामिति **वृषी**। अनेकार्थेन वृषेणैकताश्रुतेरिह मूर्द्धन्यमिच्छन्ति। द्यौरोकोऽस्य **दिवौकाः**। उत्वमोकारस्य। यद्यपि दिवर्थे दिवमिति निश्चितं तथाप्योकारनिवृत्त्यर्थमिह दिवौकसः पाठः। तथा च **भागवृत्तिकृता विमलमतिनाप्येष** निपातितः। ईशेस्तालव्यान्तादप्रत्ययः। हलीशा, लाङ्गलीशा। एतौ विभाषयेति मतम्।

तद् करोतीति **तस्करः**। अक्षाणां परम् **परोक्षम्।** हिनस्तीति **सिंहः**। असु लुनातीति **लुलापः**। दक्षिणतीरम्, दक्षिणतारम्। दिक्शब्दात् तीरशब्दस्य वा तारः। धूरिव जटाऽस्येति **धूर्जटिः**।

**लोपागमादेशविपर्य्यया ये ये चार्थभेदेषु विधेर्विशेषाः।**
**न लक्षिता लक्षितविस्तरेण तत्संग्रहोऽयं कृतिनोपदिष्टः॥**
**समीक्ष्य तन्त्राणि मया मुनीनां यदत्र भाष्यादिविरुद्धमुक्तम्।**
**न तद् विमृष्यं कृतिभिर्मुनीनां साधारणी वाचि खलु प्रतिष्ठा॥१४२।**

**॥ इति श्रीमहामहोपाध्यायश्रीपतिदत्तविरचितायां कातन्त्रपरिशिष्टवृत्तौ सन्धिप्रकरणं समाप्तम्॥**

# परिशिष्टम् – २

## [रूपसिद्धिः]


| | शब्दरूपम् | पृ० सं० |
|---|---|---|
| १. | अ अपेहि | १८१ |
| २. | अग्नये | १५७ |
| ३. | अग्निरत्र | २६९ |
| ४. | अग्निर्गच्छति | २६९ |
| ५. | अग्नी एतौ | १८८ |
| ६. | अग्नी रथेन | २८४ |
| ७. | अज्झलौ | २०९ |
| ८. | अघो यज | २६७ |
| ९. | अथो एवम् | १८१ |
| १०. | अमी अश्वाः | १९१ |
| ११. | अमी एडकाः | १९१ |
| १२. | असा इन्दुः | १६७ |
| १३. | असाविन्दुः | १६७ |
| १४. | अहो आश्चर्यम् | १८१ |
| १५. | आ एवम् | १८१ |
| १६. | आगच्छ भो देवदत्त अत्र | १९३ |
| १७. | इ इन्द्रं पश्य | १८१ |
| १८. | इच्छति | २८८ |
| १९. | उ उत्तिष्ठ | १८१ |
| २०. | उच्चै रौति | २८४ |
| २१. | एष चरति | २७८ |
| २२. | एष शेते | २७८ |
| २३. | क इह | २६१, २८२ |
| २४. | क उपरि | २६१ |
| २५. | कः शेते | २५५ |
| २६. | कः षण्डः | २५५ |
| २७. | कः साधुः | २५५ |
| २८. | क × करोति | २५२ |
| २९. | क × खनति | २५२ |
| ३०. | क ᳶ पचति | २५३ |
| ३१. | क ᳶ फलति | २५३ |
| ३२. | ककुब्भासः | २०९ |
| ३३. | कयिह | २६१ |
| ३४. | कयुपरि | २६१ |
| ३५. | कश्चरति | २४७ |
| ३६. | कश्छादयति | २४७ |
| ३७. | कश्शेते | २५५ |
| ३८. | कष्टीकते | २४९ |
| ३९. | कष्ठकारेण | २४९ |
| ४०. | कष्षण्डः | २५५ |

| | | |
|---|---|---|
| ४१. | कस्तरति | २५१ |
| ४२. | कस्थुडति | २५१ |
| ४३. | कस्साधुः | २५५ |
| ४४. | कुर्वञ्च् शूरः | २३७ |
| ४५. | कुर्वञ्छूरः | २३७ |
| ४६. | कुर्वञ्शूरः | २३७ |
| ४७. | कृकारः | १२८ |
| ४८. | को गच्छति | २५८ |
| ४९. | कोऽत्र | २५६ |
| ५०. | को धावति | २५८ |
| ५१. | कोऽर्थः | २५७ |
| ५२. | क्रर्थः | १५३ |
| ५३. | क्रुङ्ङत्र | २१९ |
| ५४. | गङ्गोदकम् | १३२ |
| ५५. | गच्छति | २८८ |
| ५६. | गव्यूतिः | १७५ |
| ५७. | गावौ | १६३ |
| ५८. | गावः | १६३ |
| ५९. | गीःपतिः | २७३ |
| ६०. | गीर्पतिः | २७३ |
| ६१. | त आहुः | १६७ |
| ६२. | तच्चरति | २१३ |
| ६३. | तच्छादयति | २१३ |
| ६४. | तच्छ्मशानम् | २०५ |
| ६५. | तच्छ्वेतम् | २०४ |
| ६६. | तच्श्मशानम् | २०५, २१६ |
| ६७. | तच्श्लक्ष्णः | २१६ |
| ६८. | तच्श्वेतम् | २०४ |
| ६९. | तज्जयति | २१३ |
